1. °शिल्पिनां P_2 2. चैव P_2 3. अन्यस्संस्कार° P_2 4. पुष्कलो A
5. लाक्ष° P_1, T.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]स एव जातिपालः स्याच्चौर्याच्चक्री तु तैलिकः ।
शूद्रात् करिण्यां[2] वै जातः कूटकृच्छवदाहकः ॥ ५३ ॥

ब्राह्मणान्नापितोऽम्बष्ठ्यामघोवपनवृत्तिकः ।
प्रतिलोमानुलोमाभ्यां प्रातिलोम्यानुलोमतः ॥ ५४ ॥

बह्वः सङ्करा जाताः यथाऽऽभीरादिजातयः ।
[3]प्रकृतानुपयोगात्ते वर्ण्यन्ते न स्वरूपतः ॥ ५५ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
जातिनिर्णयो नाम प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः ॥

दीक्षाविधिः

ब्रह्मा :—

ये दीक्षाया[4]मधिकृता ये च तत्र बहिष्कृताः ।
ते यथावदशेषेण कथिताः पुरुषोत्तम ॥ १ ॥

दीक्षास्वरूपविषये बुभुत्सा मम सम्प्रति ।
विजृम्भते तत्स्वरूपमुपदेष्टुं त्वमर्हसि ॥ २ ॥

श्रीभगवान् :—

प्रतिष्ठाविधिवत्सर्वं दीक्षामण्डपमादितः ।
कारयित्वा शुचौ देशे तद्वदेव चतुर्मुख ॥ ३ ॥

---

1. एवं च P_2, T 2. करण्यां M_1, P_2 3. अत्यन्तं M.
4. अधिकृत्य P, T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देशे च पश्चिमे वेद्याः कुण्डं तालत्रयाद्बहिः ।
कारयित्वा द्विजेन्द्रादिवर्णानामानुपूर्वशः ॥ ४ ॥

अनुकूलं चतुष्कोणं तालद्वयमितान्तरम् ।
वृत्तं गोकर्णयुग्मेन विस्तीर्णं तदनन्तरम् ॥ ५ ॥

चापाकारं वितस्तिभ्यां विस्तारायामसंमितम् ।
त्रिकोणमितरत् कुण्डं प्रादेशद्वय[1]विस्तृतम् ॥ ६ ॥

आयामस्स्रुक्स्रुवादीनामीदृशो ब्राह्मणादिषु ।
दशम्यां यागसम्भाराः [2]सम्भार्यास्समिदादयः ॥ ७ ॥

एकादश्यां तु सायाह्ने तिथौ स्यादधिवासनम् ।
मण्डपे च यजने स्थाप्यं[3] द्वारकुम्भादिपूर्वकम्[4] ॥ ८ ॥

धारणाशोधिततनुश्चक्राब्जं वर्तयेद् गुरुः ।
कुम्भं च हेमादिमयं करकं चापि तादृशम् ॥ ९ ॥

[5]आहितोदकसम्पूर्णं न्यस्तरत्नसुवर्णकम् ।
सूत्रवेष्टितसर्वाङ्गं स्रक्चन्दनपरिष्कृतम् ॥ १० ॥

अहताभ्यां च वासोभ्यां छादितं दोषवर्जितम् ।
अस्त्रेण शतवारं तु करकं चाभिमन्त्रयेत् ॥ ११ ॥

अच्छिन्नधारया सिञ्चेद्वेदिकां परितो गुरुः ।
प्रादक्षिण्येन करकं[6] नीत्वा कुम्भं च पृष्ठतः ॥ १२ ॥

ऐशान्ये चक्रपद्मस्य भागे धान्ये[7] निवेशयेत् ।
दक्षिणे कलशं वामे करकं मूलविद्यया ॥ १३ ॥

---

1. °विस्तरम् A 2. संहार्य P_1, T 3. स्थाप्य P_2 4. पूर्ववत् P_2
5. आढकोदक M_1 6. करकान्नीत्वान्ये P_2 7. याम्ये M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुम्भे च हरिमावाह्य पूजयेच्छास्त्रवर्त्मना ।
यजेत देवं चक्राब्जमण्डले कमलासन ॥ १४ ॥

साङ्गं सपरिवारं च यथाविधि यथाक्रमम् ।
मथित्वाऽष्टाक्षरेणाग्निं कुण्डे तं विनिवेशयेत् ॥ १५ ॥

तत्र सिद्धं चरुं कृत्वा चतुर्धैकन्निवेशयेत्[1] ।
मण्डलस्थाय हरये कुम्भे भागमथेतरम् ॥ १६ ॥

अग्नौ चैकं स्वयं चैकमुपयुञ्जीत देशिकः ।
समिधश्शतमष्टौ च जुहुयाद्देशिकोत्तमः ॥ १७ ॥

आज्यहोमोऽपि तद्वत् स्यान्मूलमन्त्रेण मन्त्रवित् ।
चरुं नृसूक्तेन तथा पूर्णाहुत्यन्तमन्वितम्[2] ॥ १८ ॥

शिष्यं [3]शान्तं जितक्रोधं मदाद्यैर्वर्जितं शुचिम् ।
अहतक्षौमवसनं सोत्तरीयमलङ्कृतम् ॥ १९ ॥

आहूय वाससा बध्वा गुरुर्नेत्रे[4] स्वविद्यया ।
आत्मनो दक्षिणे पार्श्वे निवेश्य प्राङ्मुखं यथा ॥ २० ॥

तेन [5]दर्भैश्च संस्पृष्टः पुण्डरीकाक्षविद्यया ।
द्वादशाहुतिमाज्येन जुहुयाच्चरुणा तथा ॥ २१ ॥

समित्पुष्पतिलैश्चापि ततः प्रसृतिमुद्रया ।
त्रिर्मूर्ध्नि शिष्यमालभ्य प्रादक्षिण्येन देशिकः ॥ २२ ॥

अष्टाक्षरेण मन्त्रेण ततो भस्मसमुद्भवम् ।
पाण्डरं मूर्ध्नि शिष्यस्य[6] विनिवेश्योर्ध्वपुण्ड्रकम् ॥ २३ ॥

---

1. चतुर्धैतन्निवेदयेत् M_1 2. अन्वितः T, P_1; अन्यतः P_2; 3. स्नातं T, P_1, P_2 4. नेत्रं P_2 5. दर्भेण M_1 6. मण्डनं शिष्ये M_1

पा—2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्त्रमन्त्रेण बध्नीयात् सूत्रं प्रतिसरं करे ।
पीत्वा शिष्यः पञ्चगव्यं प्रणवेन चरुं ततः ॥ २४ ॥

भुञ्जीत कायशुद्ध्यर्थं दन्तान् काष्ठेन धावयेत् ।
दन्तकाष्ठं च भूभागे निपात्याग्रं विलोकयेत् ॥ २५ ॥

नैऋते मारुते याम्ये यद्यग्रमशुभं भवेत् ।
शुभमन्यत्र दिग्भागे काष्ठाग्रे पतिते भवेत् ॥ २६ ॥

अशुभं शान्तिहोमेन शाम्येच्छुभकरश्च सः ।
नारसिंहेन मन्त्रेण तिलैरष्टोत्तरं शतम् ॥ २७ ॥

होमः कार्यस्ततशिशष्यमाचान्तं देवसन्निधौ ।
करे गृहीत्वा देवेशं प्रणम्य गुरुरात्मवान् ॥ २८ ॥

विज्ञापयेदिमां गाथामुच्चार्य कमलासन ।
"संसारपाशबद्धानां पशूनां पाशमोक्षणे ॥ २९ ॥

त्वमेव शरणं देव गतिरन्या न विद्यते ।
पाशमोक्षणहेतुर्यस्त्वत्समाराधनात्मकः ॥ ३० ॥

तेनेमान् जन्मपाशेन पाशितान् पशुजन्मनः ।
विपाशयामि देवेश तदनुज्ञातुमर्हसि" ॥ ३१ ॥

इति विज्ञाप्य शिष्यं तं मायासूत्रेण वेष्टयेत् ।
शुक्लं रक्तं च कृष्णं च त्रिवर्णं त्रिगुणीकृतम् ॥ ३२ ॥

सूत्रं पुनश्च त्रिगुणं कृत्वा सूत्रेण तादृशम् ।
शिखां प्रक्रम्य पादान्तं पञ्चविंशतिसंख्यया ॥ ३३ ॥

वेष्टयेन्मूलमन्त्रेण कायं शिष्यस्य सर्वतः ।
जुहुयात्तेन मन्त्रेण शिष्यं संस्पृश्य देशिकः ॥ ३४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्पिषाऽष्टोत्तरशतं वारान् पूर्णाहुतिं ततः ।
स्वप्नाधिपतिमन्त्रेण सर्पिषाऽष्टोत्तरं शतम् ॥ ३५ ॥

स्वप्नदर्शनसिद्ध्यर्थं जुहुयाद्देशिकोत्तमः ।
माषौदनेन भूतेभ्यो बलिं दद्यात् समाहितः ॥ ३६ ॥

विमुक्तनेत्रबन्धस्य शिष्यस्य तनुबन्धनम् ।
मायासूत्रं समादाय शरावेऽन्यस्य निक्षिपेत् ॥ ३७ ॥

कुम्भपार्श्वे शरावेण पिधायान्येन देशिकः ।
दर्भानास्तीर्य तत्तल्पे शिष्यस्स्वापं समाचरेत् ॥ ३८ ॥

मण्डलस्थं च कुम्भस्थं देवं नोद्वासयेत्तदा ।
ततः प्रभाते शिष्यस्य शुभं चेत् स्वप्नदर्शनम् ॥ ३९ ॥

दीक्षेत नो चेदशुभं शान्तिहोमं समाचरेत् ।
स्नात्वा शिष्येण सहितः प्रविशेद्यागमण्डपम् ॥ ४० ॥

ध्वजतोरणकुम्भादिपूजा पूर्ववदिष्यते ।
चतुर्विधं निवेद्यान्नं नमस्कृत्य प्रदक्षिणम् ॥ ४१ ॥

[1]शिष्यस्य पूर्ववन्नेत्रे बद्ध्वा नूतनवाससा ।
निवेश्य पूर्ववत् पार्श्वे जुहुयात् समिदादिभिः ॥ ४२ ॥

प्रत्येकमष्टोत्तरशतं मूलमन्त्रेण देशिकः ।
मायासूत्रं ततश्छित्त्वा संहारक्रममास्थितः ॥ ४३ ॥

तत्त्वान्युद्दिश्य जुहुयात् [2]प्रत्येकं तानि देशिकः ।
प्रत्येकमष्टोतरशतमष्टकृत्वोऽथवा गुरुः ॥ ४४ ॥

---

1. शिष्यं तु P_2 2. प्रकृत्यन्तानि T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वहृत्पद्मे परं ज्योतिर्ध्यात्वा परमपूरुषम् ।
तस्मिन् जीवं च शिष्यस्य संहरेत् मन्त्रवित्तमः ॥ ४५ ॥

शोषणादीनि देहस्य शिष्यसम्बन्धिनस्तथा ।
कृत्वा तत्र स्मरेदण्डं ततः स्वहृदयाम्बुजात् ॥ ४६ ॥

सङ्क्रमय्य पुनर्जीवं प्रकृत्यादिक्रमात् सृजेत् ।
सर्गकाले च जुहुयात् तत्त्वानि क्रम[1]मास्थितः ॥ ४७ ॥

सृष्ट्वा स्थूलशरीरान्तमण्डमेदं च[2] चिन्तयेत् ।
तन्मध्ये पुरुषं ध्यात्वा जातमात्मानमात्मना ॥ ४८ ॥

प्रोक्षयेन्मूलमन्त्रेण नेत्रबन्धं च मोचयेत् ।
शिष्यस्तु परिधायान्यद्वासः पादौ प्रधाव्य च ॥ ४९ ॥

आचम्य वाससाऽन्येन बद्धनेत्रो निजे गुरौ ।
आसीत प्राङ्मुखस्तस्मिन् शोधयेच्च षडध्वना ॥ ५० ॥

[3]कालाध्वा भुवनाध्वा च पदतत्त्वाधवनौ ततः ।
मन्त्राध्वा चाथ वर्णाध्वा षडध्वानः प्रकीर्तिताः ॥ ५१ ॥

पूर्वमाज्याहुतिं हुत्वा महाव्याहृतिविद्यया ।
हुतशेषेण शिष्यस्य पादौ स्पृष्ट्वा ततस्तिलैः ॥ ५२ ॥

हुत्वा नाभिं समालभ्य ततो हुत्वा कुशेशयैः ।
स्पृष्ट्वा च हृदयं हुत्वा चरुणा मूर्ध्नि संस्पृशेत्[4] ॥ ५३ ॥

अष्टोत्तरशतं होमः प्रत्येकं मूलविद्यया ।
होमान्ते च ततश्शिष्यं गृहीत्वा दक्षिणे करे ॥ ५४ ॥

---

1. °आश्रित A 2. विचिन्तयेत् T, P_1, P_2 3. P_2 कोशग्रन्थे "कालाध्वा च पदाध्वा च भुवनाध्वा तथैव च" इति पाठो दृश्यते। 4. मूर्धनि स्पृशेत् P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीत्वा प्रदक्षिणं कुम्भं मण्डलं च यथोदितम् ।
[1]द्वारि तिष्ठंश्चतुर्णां तु द्वाराणां [2]क्रमलामन ॥ ५५ ॥

मणिमुक्ताप्रवालैर्वा पुष्पैर्वा केवलैर्गुरुः ।
अञ्जलिं पूरयेदन्ते ततस्तस्य विकस्वरैः ॥ ५६ ॥

पुष्पाणि विकिरेत्तस्मिन्मण्डले [3]गुरुचोदितः ।
यस्मिन् पतति भूभागे पुष्पाणामुत्करस्त्रयम् ॥ ५७ ॥

तद्भागाधिपमूर्तीनां नामान्यस्य विनिर्दिशेत् ।
शिष्यस्य केशवादीनि पदं भागवतेति च ॥ ५८ ॥

नाम्नामन्ते प्रयोक्तव्यं यद्वा भट्टारकेति च ।
ब्राह्मणश्चेत् क्षत्रियस्य देवान्तं नाम निर्दिशेत् ॥ ५९ ॥

वैश्यस्य [4]पालशब्दान्तं दासान्तं पादजन्मनः ।
ततो विमुच्य दृग्बन्धं दर्शयेच्चक्रमण्डलम् ॥ ६० ॥

शिष्येण सहितो वेद्यां ध्यायेन्नारायणं गुरुः ।
ध्यात्वा च दक्षिणे कर्णे शिष्यस्य प्रणवान्वितम् ॥ ६१ ॥

मन्त्रं दद्यादृषिच्छन्दोदैवतं चाङ्गमेव च ।
द्वादशाक्षरमादौ तु पश्चादष्टाक्षरात्मकम् ॥ ६२ ॥

मूर्तिमन्त्रं च तदनु समध्याप्य यथाविधि ।
केवलं वैष्णवं नाम नमःप्रणववर्जितम ॥ ६३ ॥

[5]हुम्फडादिवषट्स्वाहावर्जितं केशवादिकम् ।
अध्याप्यं स्त्रीषु शूद्रेषु तद्वदेवानुलोमजे ॥ ६४ ॥

---

1. द्वारे P_2 2. यथाक्रमम् P_1 3. गुरुबोधितः M_1 4. बाल° P_2
5. हुम्फट्स्वाहावषड्वर्ज्यं केवलं केशवादिकम् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सावित्रीं येऽनुतिष्ठन्ति तेषां विप्रव[1]दीरितम् ।
कुम्भस्थं मण्डलस्थं च हरिं शिष्यः समर्चयेत् ॥ ६५ ॥

आराध्य हरिमुत्थाय तस्थुषः प्राञ्जलिस्सदा ।
मूर्ध्नि शिष्यस्य स गुरुस्ततो ध्यात्वा च[2] मण्डलम् ॥ ६६ ॥

हस्तं न्यसेद्विष्णुहस्ते ततश्शिष्यस्य देशिकः ।
आचार[3]नियमान् सर्वान् बोधयेदग्निसन्निधौ ॥ ६७ ॥

मन्त्रः परस्य नाख्येयो नाक्षसूत्रं प्रदर्शयेत् ।
न च मुद्रां नापि सिद्धिं[4] मन्त्रं न कथयेत् स्वयम् ॥ ६८ ॥

आचार्यनाम न वदेन्नियोगं नास्य[5] लङ्घयेत् ।
शयनादींश्च न गुरोराक्रमेन्न च लङ्घयेत् ॥ ६९ ॥

न गुरुं दूषयेद्वाचा नाचरेत्तस्य विप्रियम् ।
गुरुवद् गुरुदारेषु वर्तितव्यमसन्निधौ ॥ ७० ॥

आचार्यमच्युतं शास्त्रं त्रयं संमानयेत्सदा ।
नास्तिकान् भिन्नमर्यादान् देव[6]ब्राह्मणदूषकान् ॥ ७१ ॥

न स्पृशेन्ना[7]थ तैस्सार्धं [8]संवदेद्दुर्दशास्वपि ।
प्रसारयेन्नैव पादौ गुरुदेवाग्निसन्निधौ ॥ ७२ ॥

वेदितव्यं जगत्सर्वं वासुदेवमयं सदा ।
अनर्चयित्वा देवेशं नात्मपोषणमाचरेत् ॥ ७३ ॥

जयस्तोत्रप्रणामादीन् सन्ध्याकाले समाचरेत् ।
भगवद्ध्यानतत्कर्म[9]कर्तव्येषु सदा रमेत् ॥ ७४ ॥

---

1. इष्यते T, P_1, P_2 2. अब्जमण्डलम् P_2 3. आचारं P_2 4. मन्त्रस्य कथयेत T, P_1 5. नियमान्नास्य P_2 6. वेदब्राह्मणनिन्दकान् A 7. नैव P_2 8. संवसेद् A_1, P_1, P_2 9. कीर्तनेषु T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैष्णवं च यतिं [1]दृष्ट्वा प्रणमेद्दण्डवत् क्षितौ ।
पुत्रदारगृहक्षेत्रपश्वादिधनमात्मनः ॥ ७५ ॥

व्यपदेश्यमशेषेण नाम्ना भगवतो भवेत् ।
समः सर्वेषु भूतेषु कामक्रोधौ विवर्जयेत् ॥ ७६ ॥

शनैश्शनैरिन्द्रियाणि विषयेभ्यो निवारयेत् ।
संसारविमुखैस्सार्धं शास्त्राभ्यासं समाचरेत् ॥ ७७ ॥

श्रौतस्मार्तानि कर्माणि सदा सेवेत नेतरत् ।
[2]स्वसूत्रोक्तेन विधिना निषेकादिक्रिया भवेत् ॥ ७८ ॥

कुर्यात्सर्वाणि कर्माणि भगवद्ध्यानतत्परः ।
गुह्यं नाम च गोत्रं च [3]प्राकृतान्नान्यदिष्यते ॥ ७९ ॥

आसीनो वा शयानो वा गच्छन् भुञ्जान एव च ।
सङ्कीर्तयेत् स्मरे[4]च्चापि वासुदेवं सनातनम् ॥ ८० ॥

एवं सम्बोध्य नियमान् शान्तिहोमं समाचरेत् ।
पूर्णाहुत्यन्तमखिलं हुत्वा चाग्निं विसर्जयेत ॥ ८१ ॥

मण्डलस्थं च कुम्भस्थं देवमुद्वास्य देशिकः ।
वर्धयेदाशिषा शिष्यं शिष्यश्च गुरवे तथा[5] ॥ ८२ ।

गां च भूमिं हिरण्यं च भूषणं यानमेव च ।
दासीदासादि वितरेदात्मवित्तानुसारतः ॥ ८३ ॥

ब्राह्मणान् भोजयेद्दत्वा वित्तं वित्तेषु निःस्पृहः ।
तदहश्शेषमासीत तत्रैव हुतशेषभुक् । ८४ ॥

---

1. यतिं चैव दृष्ट्वा तं प्रणमेत् क्षितौ P_2 2. स्वसूत्रोक्तविधानेन A, P_1
3. प्राकृतं नान्यद् A, P_2 4. ॰चापि T, P_2 5. तदा P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्तं गते दिनकरे सर्वालङ्कारसंयुतम्[1] ।
गुरुणानुमतो गेहं प्रविशेद्बन्धुभिस्सह ॥ ८५ ॥

अनेन विधिना यस्तु दीक्षितश्चक्रमण्डले ।
ब्राह्मणो वेदविद्विद्वान् स सर्वाश्रमिणां वरः ॥ ८६ ॥

उच्यते नामभिश्चैतैर्नाख्येयः प्राकृतो यथा ।
सूरिः सुहृद्भागवतः सात्त्वतः पञ्चकालवित् ॥ ८७ ॥

ऐकान्तिकस्तन्मयश्च पाञ्चरात्रिक इत्यपि ।
एवमादिभिराख्याभिराख्येयः कमलासन ॥ ८८ ॥

समयोऽग्रे सदाचारस्स्वाध्यायो द्रव्यसङ्ग्रहः ।
शुद्धिर्त्याग[2]स्स्तुतिर्ध्यानमित्येवं विधिरष्टधा ॥ ८९ ॥

विधिनानेन यस्तिष्ठेत् स भागवत उच्यते ।
एवं न कुरुते यस्तु सर्वभूतेषु पापकृत् ॥ ९० ॥

कर्मणा मनसा वाचा न स भागवतः स्मृतः ।
ज्ञानादिगुण[3]संघातो भर्गो यत्र स उच्यते ।
भगवद्भक्तिरस्येति स भागवत उच्यते ॥ ९१ ॥

इति श्रीपाञ्चरात्रमहोपनिषदि पाद्मे तन्त्रे
चर्यापादे दीक्षाविधिर्नाम द्वितीयोऽध्यायः ॥

---

1. °संयुतः T, P_1, P_2 2. °स्मृतिः M 3. °संभूतो T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयोऽध्यायः ॥

नित्ययागविधिः ॥

भगवान् :—

श्रूयतामभिधास्यामि ब्रह्मन्नाराधनं हरेः ।
येन विष्णोः पदं मर्त्यः[1] प्राप्नोतीतरदुर्लभम्[2] ॥ १ ॥

स्नानमूलाः क्रियाः सर्वाः स्नानं च बहुधा स्मृतम्[3] ।
वारुणं दिव्यमाग्नेयं वायव्यं पार्थिवं तथा ॥ २ ॥

मान्त्रं मानसमित्येवं स्नानं सप्तविधं [4]भवेत् ।
निरीक्ष्य चात्मनश्शक्तिं समयं देशमेव च ॥ ३ ॥

एतेष्वेकतमं कुर्यात् समाराधनतत्परः ।
अवगाहनमप्स्वन्तर्वारुणं स्नानमुच्यते ॥ ४ ॥

सहातपेन वर्षेण स्नानं दिव्यमनन्तरम् ।
समिधां दीपितानां च गोमयस्य हुतस्य च ॥ ५ ॥

सितेन भस्मनाङ्गेषु ललाटादिषु च क्रमात् ।
यदूर्ध्वपुण्ड्रकरणं मन्त्रोच्चारणपूर्वकम् ॥ ६ ॥

तदाग्नेयं भवेत्स्नानं शोधनं परमं स्मृतम् ।
गच्छत्सु गोषु पादोत्थै[5] रजोभिर्भुवि[6] सम्भवैः ॥ ७ ॥

[7]स्पर्शनं वपुषस्स्नानं वायव्यं तदुदाहृतम् ।
प्रशस्ते पर्वताग्रादौ जातया श्वेतमृत्स्नया ॥ ८ ॥

---

1. सद्यः M_1 2. प्राप्नोत्यमरदुर्लभम् T, P_1, P_2 3. श्रुतम् T, P_1, P_2 4. स्मृतम् P_2 5. वातोत्थैः T, P_1, P_2 6. भूमि॰ M_1 7. प्रशस्तं T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उच्चार्य केशवादीनि नामान्यङ्गे यथाक्रमम् ।
ललाटादौ यद्विधानमूर्ध्वपुण्ड्रस्य तद्भवेत् ॥ ९ ॥

ऊर्ध्वपुण्ड्रं मृदा धार्यं सान्तरालं त्रिय[त्र्य]ङ्गुलम् ।
[1]लक्ष्म्या सार्धं सुखासीनो रमते तत्र निर्वृतः ॥ १० ॥

पार्थिवं स्नानमब्लिङ्गैर्मन्त्रैर्विप्रवरेरितैः ।
अम्भोभिः प्रोक्षणं ब्रह्मन् तन्मन्त्रस्नानमिष्यते ॥ ११ ॥

[2]द्विराचम्याहतं वासः परिधाय सुखासनः ।
प्राणानायम्य मां ध्यायेत् हृदयाम्भोरुहे स्थितम् ॥ १२ ॥

ध्यानेनानेन निर्धूतकल्मषो जायते पुमान् ।
स्नानं मानसमेतत्स्यात् स्नातश्च हरिमर्चयेत् ॥ १३ ॥

आजानु पादौ प्रक्षाल्य हस्तौ चामणिबन्धनात् ।
आचम्य च द्वारपार्श्वं गत्वाऽङ्गन्यासपूर्वकम् ॥ १४ ॥

[3]तालत्रयं च हस्ताभ्यां कृत्वाभिबलजं स्थितः ।
कवाटमुद्घाटय ततो वायुमन्त्रेण पद्मज[4] ॥ १५ ॥

साम्ना देवव्रतेनान्तः प्रविशेद्दक्षिणाङ्घ्रिणा ।
प्रणमेच्छिरसा देवं पुण्डरीकाक्षविद्यया ॥ १६ ॥

आरोपितेषु दीपेषु माल्ये चापि निरासिते ।
वेद्यां पात्रेषु बिम्बेषु शोधितेषु यथातथम् ॥ १७ ॥

द्वारपूजां मुखे सर्वपरिवारसमर्चने ।
कृते शिष्येण वान्येन परिचारकरेण वा ॥ १८ ॥

---

1. एषोऽर्धश्लोकः M_1, T कोशयोरेव दृश्यते । 2. त्रिराचम्य M_2, P_1, P_2
3. "घण्टायाश्चालनं कुर्यात् कवाटोद्घाटनादिषु ।" इत्यर्धश्लोकः M_2, P_2 कोशयोरेवोपलभ्यते । 4. मन्त्रवित् P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूजकोऽलङ्कृतः स्रग्वी शुक्लाम्बरधरश्शुचिः ।
[1]धृतोपवीतोत्तरीयश्चन्दनाद्यनुलेपनः ॥ १९ ॥

[2]चन्दनश्वेतमृत्स्नाम्बुकल्पिताग्र्योर्ध्वपुण्ड्रकः ।
[3]देवस्य पार्श्वमासाद्य पार्श्वे [4]सव्येतरे स्वयम् ॥ २० ॥

आसीनो विष्टरे शुद्धे बृस्यादौ स्वस्तिकासने ।
बद्ध्वा पद्मासनं वापि तूर्यघोषे प्रवर्तिते ॥ २१ ॥

तिरस्करिण्या [5]चत्वारि निश्छिद्रं छादिते ततः ।
अस्त्रमन्त्रेण ककुभो बद्ध्वा [6]धूमध्वजं बहिः ॥ २२ ॥

प्राकारावस्थितं ध्यायेत्तेजोमन्त्रेण मन्त्रवित् ।
चक्रमुद्रां च [7]खे न्यस्य चक्रमन्त्रेण साधकः ॥ २३ ॥

गोपयन्नित्थमात्मानं प्राणायामैस्त्रिभिः क्रमात् ।
युक्तः कृत्वा योगमुद्रां नाभिकन्दे[8] स्थितं पुनः ॥ २४ ॥

वेद्याकारं वायुबीजं ध्यात्वा तज्जेन वायुना ।
धूम्रेण देहपाप्मानं शोषयित्वा निरन्वयम् ॥ २५ ॥

त्रिकोणमग्निबीजं च रक्तवर्णं हृदम्बुजे ।
ध्यात्वा तदुत्थसप्तार्चिश्शिखाभिः कल्मषं दहेत् ॥ २६ ॥

माहेन्द्रबीज विन्यस्य पीताभं चतुरश्रकम् ।
कण्ठे[9] सह स्पर्शनेन स्तम्भयेदग्निमुत्थितम् ॥ २७ ॥

वायुना कुम्भकेनैव वृत्तं स्फटिकसन्निभम् ।
विन्यस्य वारुणं बीजं मूर्ध्नि तज्जामृताम्भसा ॥ २८ ॥

---

1. शुक्लोप॰ T, P_1, P_2 2. श्वेतमृत्स्नाम्बुकल्केन धारयेदूर्ध्वपुण्ड्रकम् T, P_1, M_1
3. देवपार्श्वं समासाद्य T, P_1, P_2 4. सव्योत्तरे A 5. च द्वारि T, P_1; च द्वारे A
6. वायुध्वजं M_1 7. विन्यस्य M_1 8. कुम्भे M_1; देशे A 9. कर्णे M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षालयेत्सर्वतो देहमापादतलमस्तकम् ।
पृथिव्यादीनि तत्त्वानि समाधिपरया धिया ॥ २९ ॥

परमात्मनि संहृत्य प्रलयक्रममास्थितः ।
पृथिवीं पञ्चगुणकां पीताभां चतुरश्रिकाम् ॥ ३० ॥

घ्राणोपस्थेन्द्रिययुतां तन्मात्रालक्षणे ततः ।
गन्धे संहृत्य योगेन गहनेन विचक्षणः ॥ ३१ ॥

रसनापाय्विन्द्रियाभ्यां [च] सहापश्चतुर्गुणाः[1] ।
अर्धचन्द्राकृतिश्चैतास्तन्मात्रा लक्षणे रसे ॥ ३२ ॥

गन्धं च तन्मात्रात्मानं ततोऽग्निं त्र्यश्रपाटलम् ।
त्रिगुणं दृष्टिचरणं स्रोतोभ्यां[2] सुसमाहितः ॥ ३३ ॥

तन्मात्रालक्षणैरेतैरन्तस्तन्मात्रया सह[3] ।
संहरेद् द्विगुणं वायुं स्पर्शे[4] तन्मात्रलक्षणे ॥ ३४ ॥

धूम्रं वृत्तं त्वक्कराभ्यां रूपतन्मात्रया सह ।
मुञ्चानस्संहरेद्योगी खञ्च[5] शब्दगुणं पुनः ॥ ३५ ॥

तन्मात्रालक्षणे शब्दे नीलोत्पलदलप्रभम् ।
स्पर्शं च तन्मात्रात्मानं [श्रुतिवाक्]सहितं ततः ॥ ३६ ॥

संहृत्य शब्दतन्मात्रां स्वान्ते स्वान्तमहङ्कृतौ ।
अहङ्कृतिं बुद्धितत्त्वे बुद्धिं च प्रकृतौ पुनः ॥ ३७ ॥

जीवे च प्रकृतिं जीवं वासनाविवशं ततः ।
[6]सुसूक्ष्मे नाभिचक्रे स्वे भास्कराभमवस्थितम् ॥ ३८ ॥

---

1. सह पश्चाच्चतुर्गुण M_2; सहपञ्चचतुर्गुणम् M_1 2. श्रोत्राभ्यां M_1
3. "तन्मात्रालक्षणे रूपे रसतन्मात्रया सह" अयं पाठः P_2 कोशे दृश्यते 4. स्पर्श॰ P_2
5. खण्ड॰ P_2 6. सुसूक्ष्मं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुषुम्नया नाडिकया पद्मसूत्रसुसूक्ष्मया ।
उपर्यारोहयेद्देहे कुम्भकेन नभस्वता ॥ ३९ ॥

भित्त्वा च ब्रह्मणो रन्ध्रं बहिर्देहाद्विनिर्गतम् ।
प्रविश्य भास्करस्यापि मण्डलान्निर्गतं बहिः ॥ ४० ॥

अशरीरं तदा जीवं परस्मिन् ब्रह्मणि ध्रुवे ।
स्थितं ध्यायेत् स्थितं तत्र स्वदेहं योनिजं दहेत् ॥ ४१ ॥

न्यस्तेन शिखिबीजेन पादाग्रे ज्वलनत्विषा ।
पादादिमूर्धपर्यन्तं दग्धे देहे निजे ततः ॥ ४२ ॥

निवृत्तिबीजं खे ध्यायेत्पूर्णचन्द्रायुतोपमम् ।
[1]तदूर्ध्वपीयूषनिधौ जाते पाण्डरपङ्कजे ॥ ४३ ॥

स्मरेज्जीवं समुत्पन्नं सकाशाद्ब्रह्मणस्तदा ।
जीवात्प्रधानं तस्माच्च[2] बुद्धिं बुद्धेरहङ्कृतिम् ॥ ४४ ॥

ततो मनस्ततश्शब्दतन्मात्रां खं ततस्सह ।
वाक्श्रुतिभ्यां शब्दगुणं तन्मात्रां स्पर्शलक्षणाम् ॥ ४५ ॥

वायुं स्पर्शगुणं सार्धं त्वचा हस्तेन च स्मरेत् ।
[3]ततश्च रूपतन्मात्रं ततोऽग्निं सह चक्षुषा ॥ ४६ ॥

पद्भ्यां रूपगुणं [4]ताभ्यां तन्मात्रां च रसं ततः ।
आपो रसगुणाः पायूरसनाभ्यां सहाब्जज ॥ ४७ ॥

गन्धं च तन्मात्रात्मानं ततो[5] गन्धगुणां भुवम् ।
समुत्पन्नां स्मरेद्विद्वान् घ्राणोपस्थयुतां तथा ॥ ४८ ॥

---

1. तदुत्थ T, P_1 2. तु M_1 3. तन्मात्रां स्पर्शरूपां तां - P_2; तन्मात्रां च स्पर्शनाम्नीं - A; ततश्च स्पर्शतन्मात्रां - M_2 4. तस्मात् P_1; रूप० P_2 5. सह P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्थं शरीरमात्मीयं [1]शुद्धाशुद्धादिभूतजम् ।
विचिन्त्य पङ्कजं बुध्या प्रबुद्धं [2]तद्विनिर्गतैः ॥ ४९ ॥

शातकुम्भमयैः कुम्भैः पूर्णैरमृतवारिभिः ।
स्नापितं शुद्धमनघं चिन्तयित्वा निजं वपुः ॥ ५० ॥

आराधने हरेर्योग्यं परस्य परमात्मनः ।
ध्यायन्नष्टाक्षरं मन्त्रं द्वादशाक्षरमेव वा ॥ ५१ ॥

सृष्टिस्थितिलयन्यासैर्हस्तन्यासपुरस्सरम् ।
न्यसेदङ्गेषु मूर्धादिपादान्तेषु यथातथम् ॥ ५२ ॥

तलं पृष्ठं च करयोश्शोषयित्वाऽस्त्रविद्यया ।
अङ्गुलीनां च सर्वासां पर्वस्वाद्यन्तवर्तिषु ॥ ५३ ॥

इष्यते प्रणवन्यासो मध्यमेषु च पर्वसु ।
[3]मन्त्राक्षराणि विन्यस्येन्न्यास एषस्सनातनः ॥ ५४ ॥

पर्वं दक्षिणतर्जन्याः प्रक्रम्याङ्गुष्ठपर्वसु ।
दक्षिणेतरतर्जन्याः पर्वान्तं साधकोत्तमः ॥ ५५ ॥

सृष्टिन्यासमिमं कुर्याद् व्यत्यासेन तु संहृतिः[4] ।
प्रक्रम्य तर्जनीपर्वं कनिष्ठापर्वं विश्रमः ॥ ५६ ॥

स्थितावष्टाक्षरस्यैष मन्त्रस्य न्यास ईरितः ।
द्वादशाक्षरमन्त्रस्य न्यासस्सम्प्रति कथ्यते ॥ ५७ ॥

न्यासस्तले मध्यमया तर्जन्यङ्गुष्ठपर्वणि ।
कृत्वा प्रदक्षिणं पर्वस्वङ्गुष्ठेनेतरेषु तु ॥ ५८ ॥

---

1. सृष्ट्वा महदादि T_1; सृष्ट्वा महादि P_1, P_2 2. विनिस्सृतैः P_1
3. मन्त्राक्षराणां विन्यासो A, P_2 4. संहृतौ P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सव्ये तले तु विश्रान्तिस्स्पृष्ट्वापरथा लये ।
तलयोः प्रक्रमस्थाने दक्षिणेतरयोर्द्वयोः ॥ ५९ ॥

कनिष्ठयोश्च विश्रान्तिः [1]पर्वणोरुभयोरपि ।
द्वादशाक्षरमन्त्रस्य न्यासोऽयं कमलासन । ६० ॥

हृदयादीनि चाङ्गानि ध्यात्वाङ्गुष्ठादिपञ्चसु[2] ।
न्यसेन्न[3]खमुखे नेत्रे तले सव्ये गदाधरौ ॥ ६१ ॥

सव्येतरे पद्मचक्रे न्यसेन्न्यासः करद्वये ।
ईरितस्तलयो[4]र्मन्त्रं ध्यात्वा तेजोभिरुज्ज्वलम् ॥ ६२ ॥

ताभ्यां मूर्धादिपादान्तं देहे न्यस्येत्समन्ततः[5] ।
व्यापकं कञ्चुकं यद्वा [6]मन्त्रं त्वक्षरशस्ततः ॥ ६३ ॥

मूर्ध्नि नेत्रे मुखे चित्ते [7]नाभौ गुह्ये च जानुनि ।
चरणौ क्रमशः स्पृष्ट्वा न्यासो मन्त्रस्य इष्यते ॥ ६४ ॥

विपरीतक्रमो ज्ञेयः संहृतौ पालने पुनः ।
नाभ्यादिहृदयान्तेषु [8]न्यासोऽङ्गेषु प्रकीर्तितः ॥ ६५ ॥

अष्टाक्षरस्य मन्त्रस्य स्थानान्येतानि तानि च ।
शिरसः पश्चिमं पूर्वं दक्षिणं चोत्तरं ततः ॥ ६६ ॥

चत्वारि च चतुर्वक्त्रस्थानानि द्वादशाक्षरे ।
मूर्ध्नि मध्यमयाऽङ्गुल्या तर्जन्या सह चक्षुषोः ॥ ६७ ॥

न्यस्येन्मुखेऽनामिकया साङ्गुष्ठेन च मन्त्रवित् ।
अङ्गुष्ठतर्जनीभ्यां तु हृदये न्यसनं भवेत् ॥ ६८ ॥

---

1. करयोः M_1 2. पर्वसु M_1 3. ०अन्तर्मुखे M_1 4. मध्ये M_1
5. समाहितः A, P_1 6. मन्त्रमक्षरशस्ततः P_1 7. नाभ्यां P_2 8. न्यास एव M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथाङ्गुष्ठकनिष्ठाभ्यं नाभौ न्यासः प्रशस्यते ।
विनाङ्गुष्ठेन शेषाभिर्गुह्ये जानुनि चोभयोः ॥ ६९ ॥

समस्ताभिश्चरणयोरित्यष्टाक्षरभूमयः ।
प्राग्भागे शिरसोऽङ्गुल्या न्यासोऽङ्गुष्ठेन दक्षिणे ॥ ७० ॥

तर्जन्या पश्चिमे भागे न्यासोऽनामिकयोत्तरे ।
कनिष्ठया तदेताः स्युर्द्वादशाक्षरभूमयः ॥ ७१ ॥

रूपं क्रमेणाक्षराणां न्यासकालेऽपि चिन्तयेत् ।
शुक्लं हिरण्मयं कृष्णं रक्तं कुङ्कुमसन्निभम् ॥ ७२ ॥

पद्मकिञ्जल्कसदृशं सर्ववर्णकमष्टकम् ।
सितं कृष्णं च धूम्राभं श्यामं तारानिभं [1]तथा ॥ ७३ ॥

स्फटिकाभं च शङ्खाभं रक्तं शुक्लं च लोहितम् ।
तमोरूपं पीतवर्णं ध्यात्वा [2]मन्त्रं द्वयाक्षरम् ॥ ७४ ॥

स्थाने यथोक्ते विन्यस्य षडङ्गन्यासमाचरेत् ।
हृदयं च शिरश्चैव शिखा कवचमेव च ॥ ७५ ॥

[3]अस्त्रं नेत्रं षडेतानि हृदये मस्तके तथा ।
शिखायामानुपूर्व्येण स्कन्धस्योभयपार्श्वयोः ॥ ७६ ॥

नेत्रयोर्दिक्षु सर्वासु न्यसनीयानि भूमिषु ।
रूपाणि षण्णां कुमुदं बन्धूकमसितोत्पलम् ॥ ७७ ॥

अब्जकेसरमम्भोजमतसी[4]सूनसन्निभम् ।
दिव्यायुधधरं दिव्यवस्त्रमाल्यानुलेपनम् ॥ ७८ ॥

---

1. ततः P_2 2. द्विषडक्षरम् T 3. नेत्रमस्त्रं A, P_2
4. ॰रूपसम्पदम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कौस्तुभं वनमालां च श्रीवत्सं दिव्यलक्षणम् ।
बिभ्राणं भावयेत्साक्षादात्मानं परमेश्वरम् ॥ ७९ ॥

अर्चयेन्न्यासबीजानि गन्धपुष्पादिभिः क्रमात् ।
मानसैरुपचारैश्च हृदयाम्भोरुहे स्थितम् ॥ ८० ॥

होमान्ते अर्चयेत्पूर्वं वासुदेवं सनातनम् ।
आत्मशुद्धिरियं प्रोक्ता मन्त्रशुद्धिस्तु वक्ष्यते ॥ ८१ ॥

षड्विंशेनार्णबीजेन मन्त्रबीजानि शोषयेत् ।
सप्तविंशेन बीजेन दहेदेतानि वर्णशः ॥ ८२ ॥

अष्टाविंशेन बीजेन तेषु[1] स्तम्भनमाचरेत् ।
एकोनत्रिंशबीजेन तान्येव क्षालयेत्पुनः ॥ ८३ ।

हुङ्कारेण प्रबुद्धानि फट्कारेण विचक्षणः ।
कुर्यादभिमुखान्यन्यत् प्रणवेन विशोधयेत् ॥ ८४ ॥

तमक्षमालया शुद्धं जपेन्मन्त्रं समाहितः ।
अष्टोत्तरशतं वारानष्टाविंशतिमेव वा ॥ ८५ ॥

अष्टौ वा मन्त्रविन्मन्त्रं बीजाद्यन्तं पुटीकृतम् ।
पूजाद्रव्याणि सर्वाणि क्षालयेच्चाम्बुपूरिताम् ॥ ८६ ॥

दक्षिणे [2]वामपार्श्वे [3]तु विनिवेश्य गलन्तिकाम् ।
अर्घ्यादिपात्राण्यादाय गायत्र्या विष्णुपूर्वया ॥ ८७ ॥

प्रक्षाल्य पादेष्वादद्याद्देवस्याग्रेऽथ पद्मज[4] ।
पाद्यं मध्ये दक्षिणेऽर्घ्यं वामे चाचमनीयकम् ॥ ८८ ॥

---

1. खे च P_2 2. स्थापयित्वा तु वामपार्श्वे A 3. वा P_2
4. वाऽऽत्मनः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]तस्य पात्रस्य पार्श्वे तु वामे स्नानीयपात्रकम् ।
पूर्णानि [2]चाक्षताम्भोभिः पात्राणि निगमादिना ॥ ८९ ॥

संस्पृश्यार्घ्यादिपात्रेषु द्रव्याणि विनिवेशयेत् ।
कुशाग्रमक्षतं पुष्पं फलं मलयजं तथा ॥ ९० ॥

तिलान् सिद्धार्थसहिता[3]न्न्यसेदर्घ्यस्य भाजने ।
[4]तिलदूर्वां विष्णुपर्णीं श्यामाकं पद्ममक्षतम् ॥ ९१ ॥

पाद्यपात्रे षडेतानि द्रव्याणि विनिवेशयेत् ।
एलालवङ्गकर्पूरजातीतक्कोलचन्दनम् ॥ ९२ ॥

पुष्पाण्याचमनीये तु पात्रे द्रव्याणि कल्पयेत् ।
गन्धं सर्वौषधीरत्नफलबीजकुशानि च ॥ ९३ ॥

तिलानि चाक्षतं चैव दधि क्षीरं [5]घृतं तथा ।
रजनी द्वादशाङ्गानि [6]स्नानीये च विनिक्षिपेत् ॥ ९४ ॥

कोष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचम्पका ।
वचा कचोरमुस्ताश्च सर्वौषध्यः प्रकीर्तिताः ॥ ९५ ॥

[7]तिलाश्च तुलसी चैव निक्षिपेच्छान्तिवारिणि ।
द्वादशारं भासमानं चक्रमध्ये तु भास्करम् ॥ ९६ ॥

हस्ते वामेतरे ध्यात्वा दीप्तौ तद्रश्मिभिः पुनः ।
द्रव्याणि दग्ध्वा निश्शेषं भस्मीभूतानि तानि च ॥ ९७ ॥

दक्षिणेतरहस्तस्थे सितपद्मे विकस्वरे ।
दलैः षोडशभिर्युक्ते चन्द्रं पीयूषरश्मिभिः ॥ ९८ ॥

---

1. "तत्पूर्वयोश्च शुद्धां वा पात्रं स्नानीयपात्रकम् ।" एषोऽर्धः P_2 कोशे दृश्यते । 2. गालित° T, P_1 3. यवानर्घ्ये विनिक्षिपेत् T, P_1, P_2 4. तिलान् P_2; तिलं दूर्वां M_1 5. घृतानि च T,P_1,P_2,M_2 6. स्नानीयं द्रव्यमुच्यते M_1 7. तिलानि P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]ह्लादयन्तं स्थितं ध्यात्वा तदुत्थैरमृताम्बुभिः ।
सिक्तानि जातानि पुन[2]र्यागयोग्यानि भावयेत् ॥ ९९ ॥

हस्तयोरुभयोर्देवं ध्यायेन्नारायणं प्रभुम् ।
ताभ्यामर्घ्यादिपात्रेषु स्पृष्ट्वा द्रव्याणि विश्वतः ॥ १०० ॥

सकृत सकृत् सम्भृतानि गायत्र्या विष्णुपूर्वया ।
अभिमन्त्र्य ततो मुद्रां सौरभेयीं प्रदर्शयेत् ॥ १०१ ॥

तद्दुग्धेन च पात्राणि पूरितानि विचिन्तयेत् ।
ओमर्घ्यमित्यादिपूर्वं कल्पयामीति [3]चोच्चरन् ॥ १०२ ॥

स्पृशेत्पात्राणि हस्तेन पात्रेऽन्यस्मिन्ननन्तरम् ।
अर्घ्यपात्राज्जलं किञ्चिद् गृहीत्वा विनिवेशयेत् ॥ १०३ ॥

[4]दक्षिणेतरहस्ते तत् पात्रं संस्थाप्य मन्त्रयेत् ।
मन्त्रेण मूलभूतेन वारान् सप्त तदम्बुना ॥ १०४ ॥

[5]फडन्तेनास्त्रमन्त्रेण द्रव्याण्यात्मानमेव च ।
प्रोक्ष्य कूर्चेन[6] देवस्य योगपीठं प्रकल्पयेत् ॥ १०५ ॥

[7]अभिन्ने सहजे पीठे प्रतिमायाश्चतुर्मुख ।
आधारं प्रथमं कूर्मं कालाग्निं तदनन्तरम् ॥ १०६ ॥

उपरिष्टाच्च भोगीन्द्रं फणाभिर्भूमिमण्डलम् ।
चतुरश्रं सहस्रेण बिभ्राणं बलवत्तरम् ॥ १०७ ॥

भुवश्चोपरि धर्माद्याः कल्प्या योगासनाङ्घ्रयः ।
आग्नेयादिषु चत्वारश्चतसृष्वेव पद्मज ॥ १०८ ॥

---

1. प्लावयन्तं T, P_1 2. योगयोग्यानि M_1 3. चोच्चरेत् T, P_1
4. "श्रीरर्घ्यस्य भवेद्देवे वागीशा चमनीयके । वाद्यस्य पितरो देवास्स्नानीये वरुणस्तथा । कस्य शान्तिस्सरस्वत्या त्रिष्वेतास्समर्चयेत् ॥" अर्धत्रयमिदं P_2 कोशे दृश्यते । 5. पठन्तेन P_1, 6. त्वब्जेन M_1 7. अच्छिन्ने P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अघमर्षाद्याश्च तावन्तः प्रागादिषु यथाक्रमम् ।
आशासु तावतीष्वेव पुरुषाकृतयस्तथा[1] ॥ १०९ ॥

चतुर्भुजास्सिंहवक्त्रास्सिताः[2] पूर्वेऽरुणाः परे[3] ।
हस्ताभ्यामभिमुख्याभ्यां रचिताञ्जलिसम्पुटाः ॥ ११० ॥

अपराभ्यां च बिभ्राणा हस्ताभ्यां योगपीठिकाम् ।
मध्ये सदाशिवो देवस्तद्वदेव प्रतिष्ठितः ॥ १११ ॥

[4]अधस्तात्पुरुहूताद्या दिक्षु प्रागादिषु क्रमात् ।
अष्टावष्टसु पीठस्य पादरूपेण धारकाः ॥ ११२ ॥

ईषाश्चतस्रः पूर्वाद्याः [5]तासु वेदचतुष्टयम् ।
अहङ्कारास्त्रयः पाशा गुणाः सत्त्वादयो गुणाः ॥ ११३ ॥

तूलिका पञ्चभूतात्मा जीवात्माऽस्तरणं तथा ।
अग्नेस्सोमस्य सूर्यस्य मण्डलान्युपरि क्रमात् ॥ ११४ ॥

अम्भोजमुपरिष्टाच्च वलक्षं द्वादशच्छदम् ।
स्मरे[6]त्केसरसम्पूर्णं मध्ये विपुलकर्णिकम् ॥ ११५ ॥

भद्रासनं कल्पयित्वा यथोक्तेनैव वर्त्मना ।
अर्चयेद्गन्धपुष्पाद्यैः पीठपार्श्वे तु दक्षिणे ॥ ११६ ॥

ब्रह्माणं विष्णु[7]मीशं च समाराध्य तथोत्तरे ।
सनत्कुमारं सनकं सनन्दं च [8]सभाजयेत् ॥ ११७ ॥

पार्श्वे तु पश्चिमे दुर्गां विघ्नेशं नारदं तथा ।
आत्मनश्च [9]गुरुं ध्यात्वा प्रारभेताच्युतार्चनम् ॥ ११८ ॥

1. स्थिताः P_1, P_2 2. स्थिताः M_1 3. पुरे A 4. अथवा T, P_2
5. तस्य P_2 6. केसरिणः पूर्णं M_1 7. ईशानं P_1 8. विभावयेत् M_1
9. गुरून् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आवाहनपदं पात्रं [1]प्रक्षालितमथाम्बुभिः ।
पूरयेन्मूलमन्त्रेण हस्ताभ्यां च समुद्धरेत् ॥ ११९ ॥

ललाटसममेतस्मिन्नन्तरावाह्य केशवम् ।
मूलबिम्बाद्यथा दीपं दीपादविकृतं तथा ॥ ११० ॥

चतुरुच्चारयेन्मन्त्रमागच्छपदसंयुतम् ।
तेन तोयेन कर्मार्चां सिञ्चेत्कूर्चेन मूर्धनि ॥ १२१ ॥

तत्र संनिहितं देवं कर्मार्चायां विचिन्तयेत् ।
प्रणम्य किञ्चिदुत्थाय स्वागतोक्तिरनन्तरम् ॥ १२२ ॥

दर्शयेत्प्रतिमामुद्रां कल्पयित्वा च सन्निधिम् ।
यागावसानिकीं तत्र प्रार्थयेत हरेः स्थितिम् ॥ १२३ ।

संमुखीकरणं कुर्यात् पुण्डरीकाक्षविद्यया ।
दद्याच्च मूलमन्त्रेण सपर्यासनमादितः ॥ १२४ ॥

यथा देहे [2]तथा देवे मन्त्रन्यासं समाचरेत् ।
हस्तन्यासं विना शंखचक्रमुद्रां प्रदर्शयेत् ॥ १२५ ॥

[3]नावाहयेदेकबेरे सुरसिद्धावतारिते ।
ऋषिभिर्मनुजैर्वापि स्थापिते [4]निश्चिते हरौ ॥ १२६ ॥

सुस्थितेऽभिमुखीभावस्तदेवावाहनं हरेः ।
यथाग्निमाहितं कुण्डे यथा वा पुरुषं [5]स्वयम् ॥ १२७ ॥

काले [6]प्रबोधयेद्देवम् अर्चने बोधयेद्धरिम् ।
कल्पनं योगपीठस्य मन्त्रन्यसनमेव च ॥ १२८ ॥

---

1. प्रक्षाल्य च तथाम्बुभिः M_1 2. तथार्चायां P_1, P_2 3. आवाहयेत् P_2
4. निश्चले M_1 5. स्थितम् P_1, P_2 6. प्रबोधयस्येतं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिम्बे स्थिरे सदा कार्यं पूजारम्भे चतुर्मुख ।
अर्घ्यवस्त्राम्बराकल्पं पुष्पगन्धानुलेपनैः ॥ १२९ ॥

[1]प्रदिरुस्थिते स्थितं ध्यायेत् पाद्याचमनयोः पुनः ।
आसीनं स्नानकाले च पद्मासनसुखासने ॥ १३० ॥

नैवेद्यधूपदीपादावासीनं स्वस्तिकासने ।
उपचारेषु चान्यत्र तत्तत्कर्मानुसारतः ॥ १३१ ॥

स्थितमासीनमथवा देवं ध्यायीत पूजकः ।
अर्चयामीति साम्ना तु क्षिपेत्पुष्पाञ्जलिं हरेः ॥ १३२ ॥

विभो सकललोकेश विष्णो जिष्णो प्रभो हरे ।
त्वां भक्त्या पूजयाम्यद्य भोगैरर्घ्यादिभिः क्रमात् ॥ १३३ ॥

[2]इति विज्ञाप्य देवेशं यजेदर्घ्यादिभिः क्रमात् ।
भक्तिनम्रेण शिरसा दद्यादर्घ्यं तु मूर्धनि ॥ १३४ ॥

पादारविन्दयोर्दद्यात्पाद्यं पाद्यप्रतिग्रहे ।
ध्यायेदाचमनीयस्य दानकाले जगद्गुरुम् ॥ १३५ ॥

आचामन्तमिवाम्भोभिस्साक्षादम्भः प्रतिग्रहे ।
उपचर्योपचारेण मधुपर्कादिना [3]सह ॥ १३६ ॥

हस्ताभ्यां शिरसा पद्भ्यां मनसा च [4]हृदा तथा ।
अहङ्कारेण चात्मानं निपात्य धरणीतले ॥ १३७ ॥

अनेन प्रणिपातेन प्रणिपत्य जनार्दनम् ।
दासोऽहं ते जगन्नाथ सपुत्रादिपरिग्रहम् ॥ १३८ ॥

---

1. हृदि M_1 2. "दिव्येनार्घ्योपचारेण यथाशक्ति यथाविधि । अर्चयिष्यामि समये भगवन्तं जनार्दनम् ॥" एष श्लोकः P_1 ग्रन्थे अधिकतया दृश्यते । 3. हरिम् T, P_1, P_2 4. धिया A, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रेष्यं प्रशाधि कर्तव्ये मां नियुङ्क्ष्व हिते सदा ।
इति विज्ञाप्य देवेशं [1]परिचारान् प्रकल्पयेत् ॥ १३९ ॥

योगासनाब्जपत्रेषु पूर्वादिषु यथाक्रमम् ।
द्वादस द्वादशस्वेव शक्तीः श्रीवत्सपूर्विकाः ॥ १४० ॥

श्रीवत्सं वनमालां च मायां योगात्मिकां तथा ।
वैष्णवीं विमलां सृष्टिं [2]शक्तिमुत्कर्षणीमपि ॥ १४१ ॥

प्रज्ञां सत्यां तथेशानामनुकम्पां पितामहीम् ।
प्रथमावरणे चापि दिक्षु प्रागादिषु क्रमात् ॥ १४२ ॥

व्याप्तिं कान्तिं च तृप्तिं च श्रद्धां विद्यां जयां क्षमाम् ।
शान्तिं च [3]शक्तिमष्टैताः [4]ध्यात्वा चामरधारिणीः ॥ १४३ ॥

ततो द्वितीयावरणे शङ्खाद्यायुधधारिणः ।
पुरुषानष्ट पूर्वादिष्वानुपूर्व्येण कल्पयेत् ॥ १४४ ॥

तृतीयावरणे स्वासु दिक्ष्विन्द्रादीन् प्रकल्पयेत् ।
बहिरावरणे तार्क्ष्यं भगवत्प्रमुखं तथा ॥ १४५ ॥

विष्वक्सेनं तथैशान्यां [5]द्वितीयावरणाद्बहिः ।
परिवारा निरीक्षेरन् सर्वे प्राञ्जलयो हरिम् ॥ १४६ ॥

दद्याच्च पादुके स्नातुमुत्थानसमये हरेः ।
इदं विष्णुरिति द्वाभ्यां पादुकारोहणं [6]स्मरेत ॥ १४७ ॥

उद्धरेच्च हरिं स्नातुमुत्तिष्ठ ब्रह्मणस्पते ।
इति मन्त्रेण देवेशं प्रापयेत् स्नानपीठिकाम् ॥ १४८ ॥

---

1. परिवारान् T, P_1, P_2 2. पुष्टिं M_1, P_2 3. शक्तीरष्टैताः T, P_1, P_2
4. कृत्वा P_2 5. तृतीया A, P_2 6. हरेः P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रैस्तु भद्रं कर्णेभिरिति स्नानासनासने ।
सावित्र्या वितरेदर्घ्यं पाद्यं त्रीणि पदेति च ॥ १४९ ॥

आपः पुनन्त्वित्येतेन मन्त्रेणाचमनक्रिया ।
दन्तधावनकाष्ठं च तद्विष्णोरिति निर्वपेत् ॥ १५० ॥

[1]जिह्वानिर्लेपनं तत्र तद्विप्रास इति प्रभोः ।
मुखप्रक्षालनं दद्याद्विष्णुगायत्रिया पुनः[2] ॥ १५१ ॥

अभ्यङ्गं वामदेव्येन कुर्यादुद्वर्तनं पुनः ।
कार्यं विष्णोर्नुकमिति मन्त्रेणामलकादिना ॥ १५२ ॥

[3]न ते विष्णो इति द्वाभ्यामभिषेकविधिस्ततः ।
आपोहिष्ठेति तिसृभिरतो देवा अवन्त्विति ॥ १५३ ॥

कङ्कतेन मृजेत्केशान् कलशैः स्नपनं तथा[4] ।
हिरण्यवर्णां हरिणीमित्यालेपो[5] हरिद्रया ॥ १५४ ॥

हिरण्यवर्णाः शुचयः पावकेति चतसृभिः ।
क्षाल्यो गन्धाम्बुना देहः पुनस्तं कुङ्कुमेन तु ॥ १५५ ॥

आलिप्य विष्णुगायत्र्या क्षालयेत् पावमानिभिः ।
ब्रह्मजज्ञानमिति च कयानश्चित्र आभुवत् ॥ १५६ ॥

इत्येव[6]मर्घ्यपाद्याद्यैर्यजेताद्यं महेश्वरम् ।
परिषिच्य तु सावित्र्या सूक्तेन पुरुषात्मना ॥ १५७ ॥

सहस्रधारया स्नानं यद्वा कुम्भेन तद्भवेत् ।
अग्निर्मूर्धेति मन्त्रेण प्लोतेनाङ्गाम्बुनिःसृतिः ॥ १५८ ॥

---

1. "जिह्वानिर्लेखनं चैव विष्णुगायत्रिविद्यया ।" अयमर्धः P_2 कोशे दृश्यते । 2. अयं श्लोकः T, M_1 कोशयोरुपलभ्यते । 3. न ते विष्णुरिति क्षाल्यं P_2, प्रतद्विष्णुरिति क्षाल्यं T, P_1; न ते विष्णुरिति A 4. ततः P_2 5. इति लेपो T, P_2 6. धूपदीपान्तमर्चयेत् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्णुगायत्रिया दद्याद्वस्त्रे द्वे धौतनिर्मले ।
प्रणवेन ब्रह्मसूत्रमुत्तरीयं च कल्पयेत् ॥ १५९ ॥

आचान्तमन्वधिष्ठाय पादुके मण्डनासने ।
सुखासीनाय देवाय प्राग्वदर्घ्यादि निर्वपेत् ॥ १६० ॥

धूपेनागरुजेनार्द्रान् मूर्धानं दिव इत्यृचा ।
केशान् [1]संशोष्य शुचिना चन्दनेन सुगन्धिना ॥ १६१ ॥

इदं विष्णुरिति श्रुत्या लेपनं [2]वपुषस्स्मृतम् ।
जितं त इति मन्त्रेण मण्डनैरपि मण्डयेत् ॥ १६२ ॥

पुष्पाणि दद्यात्तद्विष्णोरिति मन्त्रेण मन्त्रवित् ।
इरावतीति मन्त्रेण पादयोरक्षतान् क्षिपेत् ॥ १६३ ॥

अञ्जनं विष्णुगायत्र्या व्याहृत्या दर्पणेक्षणम् ।
जितं त इति धूपैश्च धूपयेदगरूत्थितैः ॥ १६४ ॥

उद्दीप्यस्वेति मन्त्रेण दीपारोपणमिष्यते ।
तिलान् वस्त्रं तथा हेम ताम्बूलं तण्डुलानपि ॥ १६५ ॥

फलानि गव्यमा[3]हारं गाश्च धान्यं यथावसु ।
गोग्रासं देशिकायैव दद्याद्देवस्य सन्निधौ ॥ १६६ ॥

अधिपस्य तथा राज्ञो राष्ट्रस्य सकलस्य च ।
प्रजानां ब्राह्मणादीनां दानमभ्युदयावहम् ॥ १६७ ॥

अपनीते [4]यावनिके पटे भक्तानुकम्पया ।
घोषयेत्तूर्यघोषेण नृत्तं [5]गेयं तथाचरेत् ॥ १६८ ॥

---

1. संशोध्य P_1 2. वपुषि P_1 3. आधारं A, T, P_1 4. यवनिकापटे T, P_1, P_2 5. गीतं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोत्राणि च [1]कथाश्चित्रा वेदानङ्गानि षट् तथा ।
पठेयुरग्रे देवस्य सर्वमन्यच्च मङ्गलम् ॥ १६९ ॥

[2]आसनात्पादुके दत्त्वा गमयेद्भोजनासनम् ।
दत्त्वार्घ्यं पाद्यमाचामं मधुपर्कं निवेदयेत् ॥ १७० ॥

प्रणवेन ततो दद्यात्ता[3]म्बूलीमास्यशोधनीम् ।
हविर्निवेदयेत्सिद्धं[4] भोज्यभक्ष्यादिकं तथा ॥ १७१ ॥

मधुरादिरसोपेतं [5]विद्युक्तं सुसमाहितम्[6] ।
सुसंस्कृतैश्च [7]निष्पन्नैर्युक्तमन्नैः फलादिभिः ॥ १७२ ॥

अपक्वैरतिपक्वैश्च यथायोगं प्रकल्पयेत् ।
राजोपचारवत्सर्वमुपचारे [8]प्रकल्पिते ॥ १७३ ॥

प्रोक्षणं[9] चास्त्रमन्त्रेण परिषिच्य च वर्मणा ।
प्रणवेनार्हणे दत्ते दहना[10]प्लावनादिके ॥ १७४ ॥

कृते च सुरभीमुद्रां दर्शयित्वा च देशिकः ।
न्यस्तेऽर्घ्यपुष्पे संस्पृष्टे विष्णुहस्ते समाधिना ॥ १७५ ॥

[11]अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ।[12]
प्रगृहीतार्घ्यपुष्पेण दर्शितग्रासमुद्रया ॥ १७६ ॥

---

1. तथा वेदान् वेदाङ्गानि च षट् तथा M_1; कथा वेदाः वेदाङ्गानि च षट् तथा T 2. आचरेत् P_1, P_2 3. ताम्बूलं आस्यशोधनम् T 4. पश्चात् A 5. वियुक्तं T 6. सुसमाहितः P_2 7. मृष्टान्नैः A, P_1 8. प्रकल्पयेत् P_1, P_2 9. प्रोक्षितं T, P_2 10. आप्लावनादिषु A, T 11. "विधाय दक्षिणं बाहुं भूमिसंस्पर्शकं पुनः ।" अयं श्लोकार्धोऽधियतया P_2 कोशे दृश्यते। 12. "उन्नम्य वामपृष्ठेन दक्षिणेन करेण तु ।" अयमर्धश्लोकः "अन्वारब्धे"त्यस्य प्रतिनिधितया P पुस्तके दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवस्य त्वेति मन्त्रेण नैवेद्यं तद्यथोदितम् ।
देवस्य दक्षिणे हस्ते निर्वपेत् साधकः स्वयम् ॥ १७७ ॥

दत्ते [1]च पानके हस्ते पानीये च सुसंस्कृते ।
कृते चाचमने दद्यात्ताम्बूलीमास्यशोधनीम् ॥ १७८ ॥

क्रियाकलापं पूजादौ कर्मार्चायां यदीरितम् ।
तत्सर्वं ध्रुवबेरादौ यथासम्भवमाचरेत् ॥ १७९ ॥

अर्घ्यादिषूपचारेषु कर्तव्येषु यथातथम् ।
मन्त्रपूर्वेषु सर्वेषु वाचमेनामुदीरयेत् ॥ १८० ॥

दिव्येनाघ्योंपचारेण यथाशक्ति यथाविधि ।
अर्चयिष्यामि समये भगवन्तं जनार्दनम् ॥ १८१ ॥

इत्यादिकामवितथां पूजकः सुसमाहितः ।
चतुर्भिरेव गन्धाद्यैः परिवारार्चनं मतम् ॥ १८२ ॥

सर्वस्मिन्नुपचारे च स्तुत्यन्तेऽनुष्ठिते पुनः ।
जपेच्च पूजको मन्त्रं यथोदीरितसंख्यया ॥ १८३ ॥

द्वादशाक्षरमन्यं वा तदन्ते जुहुयाद्वहिः ।
भूतेभ्यो बलिदानं च कुर्यान्नित्यं महोत्सवम् ॥ १८४ ॥

विज्ञाप्य देवदेवेशं पूजकः [2]प्रणमेत् स्वयम् ।
आददीतावशिष्टानि पूजावस्तूनि कृत्स्नशः ॥ १८५ ॥

तैरात्मपूजनं कुर्यात् तुष्येत्तेनापि केशवः ।
मन्त्रैर्यथोक्तैराराध्यस्सूक्तेन पुरुषेण वा ॥ १८६ ॥

---

1. °अन्नपानके A, P_1 2. प्रणतः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथवा द्वादशार्णैर्वा मन्त्रैर्बिम्बमुखे [1]हरिम् ।
प्रपद्यते परं श्रेयो निष्कामो यदि पूजकः ॥ १८७ ॥

[2]कामनायां तु काम्यानि फलानि प्रतिपद्यते ॥ १८८ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
नित्ययागविधिर्नाम तृतीयोऽध्यायः ॥

चतुर्थोऽध्यायः ॥

अग्निकार्यविधिः ॥

ब्रह्मा :—

भगवन्नुत्सवो नित्यो होमश्चाग्नौ पुरोदितः ।
स कथं पूजकैः कार्यः कथयस्व यथातथम् ॥ १ ॥

श्रीभगवान् :—

द्वारस्थानग्न्यगारस्य चण्डादीनर्चयेत्क्रमात् ।
अन्तः प्रविश्य शकृदालिप्ते कुण्डेऽक्षतार्चिते ॥ २ ॥

उपविश्यात्मनः पार्श्वे दक्षिणे पुष्पभाजनम् ।
अन्यानि होमद्रव्याणि वामपार्श्वे तु निक्षिपेत् ॥ ३ ॥

[3]आज्यपात्रं चरुस्थालीं प्रोक्षणीं समिधः कुशान् ।
प्रणीतां तण्डुलांस्तोयं परिधीन् स्रुक्स्रुवौ तथा ॥ ४ ॥

दर्वीमग्नेर्विहरणं व्यजनानि च मोक्षणम् ।
शुष्कं च काष्ठं [4]गन्धांश्च गन्धद्रव्यं च साक्षतम् ॥ ५ ॥

---

1. हरि: M_1 2. कामनायास्तु T, P_1; कामानवाप्नुयात् कामी A
3. "कुण्डस्योत्तरपार्श्वे तु प्रागग्रेषु कुशेषु च ।" इत्यर्धः P_1, P_2 कोशयोः, "आज्यपात्रमि"त्यर्धात् पूर्वं दृश्यते । 4. घण्टाश्च T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वन्द्वानि च प्रयोज्यानि न्यञ्चि सत्येव सम्भवे ।
कुण्डमध्ये ततस्तिस्रो रेखाः प्रागायताः पृथक् ॥ ६ ॥

तथोदगायतास्तिस्रो लिखित्वा मूलविद्यया ।
दर्भस्तम्बद्वयेनाद्भिरभ्युक्ष्यादाय पावकम् ॥ ७ ॥

मथितं लौकिकं यद्वा निधाय च विहृत्य च ।
[1]अद्भिः परिसमूह्याग्निं परिस्तीर्य त्रिभिस्त्रिभिः ॥ ८ ॥

प्रागग्रैरुदगग्रैश्च दर्भैः पञ्चभिरेव वा ।
सप्तभिर्नवभिर्वापि यद्वैकादशसंमितैः ॥ ९ ॥

ग्रन्थीकृताग्रैरद्वन्द्वैः पञ्चविंशतिनिष्ठितैः ।
तत्राग्निमध्येऽपां पूर्णां प्रणीतामक्षतार्चिताम् ॥ १० ॥

निधाय दर्भयुग्मेन कूर्चं प्रादेशसंमितम् ।
निर्मायाच्छादनं तस्य त्रिभिर्दर्भैः पवित्रितैः ॥ ११ ॥

कूर्चेन तेन प्रोक्षण्यां प्रणीताजलमावपेत् ।
प्रोक्षणीमात्मनश्चाग्रे [2]सकूर्चं न्यस्य मन्त्रवित् ॥ १२ ॥

अङ्गुष्ठानामिकाभ्यां [3]तत्कूर्चं तत्करयोर्द्वयोः ।
पुनराधारमुत्पूय त्रिः प्रोक्ष्य प्रोक्षणीं पुनः ॥ १३ ॥

होमद्रव्याणि सर्वाणि प्रोक्षयेत्तेन वारिणा ।
स्पृशेच्च तानि द्रव्याणि नामादेशं यथायथम् ॥ १४ ॥

स्रावयेत्प्रोक्षणीवारि प्रादक्षिण्येन तां पुनः ।
कृत्वाम्भःपूरितां देवं प्रणीतायां सभाजयेत् ॥ १५ ॥

---

1. वासुदेवादिभिर्मन्त्रैः A 2. सकृद्विन्यस्य T 3. तु कूर्चं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नेर्दक्षिणतो दर्भकूर्चे तन्मयविष्टरे ।
आवाह्य बुध्या ब्रह्माणमिष्ट्वा प्रक्षाल्य वारिणा ॥ १६ ॥

विष्णुगायत्रिया स्थालीमाढकं तत्र [1]तण्डुलम् ।
प्रक्षिप्य हृदयाद्यङ्गैः प्रक्षाल्याग्ना[2]वधिश्रपेत् ॥ १७ ॥

आज्यस्थाल्यां निरूप्याज्यं द्रावितं गालितं तथा ।
तत्र प्रत्यस्य दर्भाग्रद्वयं मन्त्रेण मन्त्रवित् ॥ १८ ॥

अङ्गारेषु निधायाग्नौ तां दीप्तेनाथ बर्हिषा ।
पर्यग्निकुर्यादुत्तार्य यथास्थानं निवेशयेत् ॥ १९ ॥

उत्पूयोत्प्लवनं कूर्चमद्भिः स्पृष्ट्वा ह्युषर्बुधे ।
प्रहृत्य चामृतीकृत्य घृतं सुरभिमुद्रया ॥ २० ॥

अव[3]कुण्ठया च दिक्पालानिन्द्रादीन् पूजयेत्क्रमात् ।
उष्णोदकेन प्रक्षाल्य स्रुक्स्रुवौ कुशपञ्चकम् ॥ २१ ॥

कूर्चमादाय तौ तेन मूले मध्ये च मूर्धनि ।
संमृज्य कूर्चमूलेन मध्येनाग्रेण च क्रमात् ॥ २२ ॥

निष्टप्याग्नौ [4]निधातव्यौ तावुदीच्यामथात्मनः ।
स्रुवेणाज्यं समादाय होम[5]वस्तुषु सेचयेत् ॥ २३ ॥

चरुं चाज्येन संसिच्य पार्श्वे तमवरोपयेत् ।
केवलान्नं तथा मौद्गं पायसान्नं गुलोदनम् ॥ २४ ॥

चतुर्विधश्चरुर्ज्ञेयः पाकश्चुल्ल्यामपीष्यते ।
यादृङ्निवेद्यते बिम्बे होतव्यश्चापि तादृशः ॥ २५ ॥

---

1. तण्डुलान् T, P_1, P_2 2. अधिश्रयेत् M_1 3. अवकुण्ठ्य च दिक्पालान् T
4. विधातव्यौ T 5. वस्तूनि T, P_1, $\bar{P}_2$

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदक्संस्थाः परिधयः प्रत्यगारम्भणास्तथा ।
निधातव्याः शिखीशानकोणयोस्समिधौ तथा ॥ २६ ॥

ऊर्ध्वे निधाय मनसा ध्यायन्निध्मान् प्रजापतिम् ।
एकतोऽग्रान् सकृत्यञ्च दशोक्तान् मुष्टिमुद्रया ॥ २७ ॥

आदर्शादाज्यपात्रं च कुशकूर्चेन वेष्टिते ।
वामे करे निधायाग्नावाघाराहुतिमाचरेत् ॥ २८ ॥

प्राजापत्यन्तथाचैन्द्रमाज्यभागं तथाचरेत् ।
आग्नेयं दक्षिणे भागे सौम्यं [1]भागे तथोत्तरे ॥ २९ ॥

मध्ये व्याहृतिभिर्हुत्वा स्मरेदग्निमनन्तरम् ।
द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ॥ ३० ॥

वरदं शक्तिपाणिं च बिभ्राणं स्रुक्स्रुवौ तथा ।
अभीतिदं चर्मधरं वामे चाज्यधरं करे ॥ ३१ ॥

जिह्वायां दक्षिणे वक्त्रे धूम्रायां मारणादिकम् ।
लोहिन्यां [2]च वशीकारं[3] कार्यां कर्म च शान्तिकम् ॥ ३२ ॥

सर्वसिद्धिः स्फुलिङ्गिन्यामानने दक्षिणेतरे ।
विश्वरूपरसज्ञायामणि[4]मादिमहाफलम् ॥ ३३ ॥

करालिका विजयदा पुष्टिदा च मनोजवा ।
कार्ष्ण्यं लौहित्यमेतासां वर्णश्श्यामत्वमेव च ॥ ३४ ॥

स्फुलिङ्गरूपं च ततो वर्णः स्फटिकसन्निभः ।
तपनीयनिभः प्रोक्तो [5]जिह्वायामानुपूर्वशः ॥ ३५ ॥

---

1. भागमथोत्तरे T, P_1, P_2 2. तु P_2 3. वशीकारः P_2
4. °आदिककल्पनम् A 5. जिह्वानाम्° T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिलानाघार[1]संमिश्रान् जुहुयाज्जातशान्तये ।
अष्टोत्तरशतं वारान् द्वादशाक्षरविद्यया ॥ ३६ ॥

पूर्णाहुत्यवसाने तु ध्यात्वा ज्वलनमर्चयेत् ।
गन्धाद्यैरात्मनो दद्यादक्षतानि च वर्मणा ॥ ३७ ॥

[2]परिषिच्य जलेनाग्निं तन्मध्ये योगपीठिकाम् ।
कल्पयित्वा च तन्मन्त्रैर्जुहुयात् सर्पिषासकृत् ॥ ३८ ॥

तत्रावतार्य हृदयाच्चिद्रूपं परमेश्वरम् ।
सकलीकृत्य मन्त्रस्य न्यासं कुर्याद्यथाविधि ॥ ३९ ॥

अर्घ्यपूर्वं निवेद्यान्नं [3]जुहुयात्सर्पिषा सकृत् ।
[4]जपार्थं च सकृन्मन्त्रैर्जुहुयात् सर्पिषा ततः ॥ ४० ॥

समिद्भिर्वा [5]तिलैः पुष्पैर्बीजैर्वाप्यथवा फलैः ।
परिवारार्थमप्येवं सर्पिषा जुहुयात्सकृत् ॥ ४१ ॥

आराधनं हरेरेतत्सप्तार्चिषि चतुर्मुख ।
आराधनं चेदन्यत्र प्रतिमादावनन्तरम् ॥ ४२ ॥

जुहुया[6]त्समिदाज्यान्नैर्वक्ष्यमाणेन वर्त्मना ।
आयामस्समिधां तालः कनिष्ठानहनं क्रमात् ॥ ४३ ॥

चर्महीने विनाशस्स्याच्छेदे क्षीणं कुलं भवेत् ।
आर्द्रासु बन्धुनाशस्स्यात्पुत्रनाशः पुरातने ॥ ४४ ॥

क्षतासु भार्यामरणं कलहाय च शाखिनी ।
उद्वेगाय भवेत् स्थूला ह्रस्वाऽवग्रहकारिणी ॥ ४५ ॥

---

1. समिधो P_1, P_2 2. परिषिञ्चत्° P_2 3. सर्पिषा जुहुयात् P_2
4. जपार्थं...; समिद्भिर्वा; परिवारार्थं...इति त्रयोऽर्धश्लोकाः T कोशे न दृश्यन्ते।
5. दलैः P_1, P_2 6. समिदाद्यैस्तैः P_1, P_2, T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीर्घातिवृष्टिकरिणी त्याज्या दोषयुता समित् ।
शतं तदर्धं पादो वा समिधोऽष्टौ यथोदिताः ॥ ४६ ॥

तदर्धं वा घृताक्तास्ता जुहुयान्मूलविद्यया ।
आज्यावसिक्ताश्चरवः प्रत्यृचं ग्रासमुद्रया ॥ ४७ ॥

नृसूक्तेन च होतव्यं मूलमन्त्रेण सर्पिषा ।
शतादिसंख्यया होमो ध्यात्वा परमपूरुषम् ॥ ४८ ॥

स्रुवेण जुहुयादाज्यं हस्तेन समिधः[1] पुनः ।
चरुं पलाशपत्रेण यद्वा हस्तादिना भवेत् ॥ ४९ ॥

[2]कृत्वा पूर्णाहुतिं पूर्वं ततश्शान्तिं प्रकल्पयेत् ।
यज्ञवृक्षोद्भवैश्शान्तिः सौभाग्यं कुसुमैश्शुभैः ॥ ५० ॥

धूपद्रव्यैः सदारोग्यं पुष्टिं दध्ना पयश्शुचिः ।
अन्नेन विविधान् कामानाज्येनायुष्मतीः प्रजाः ॥ ५१ ॥

श्वेतपद्मैस्तु जुहुयादिच्छन् ब्रह्मश्रियं नरः ।
लक्ष्मीपुष्पैस्तु जुहुयाल्लक्ष्मीकामोऽथ वारुणैः ॥ ५२ ॥

पद्मैर्बिल्वसमिद्भिर्वा ज्ञानकामस्तु सर्पिषा ।
कन्याकामः कालपुष्पैः गोकामो गोमयैः पुनः ॥ ५३ ॥

आयुष्कामस्तु दूर्वाभिर्भूमिकामस्तु मृत्स्नया ।
[3]यवैर्वेन्द्रियकामस्तु तिलैः सर्वजनप्रियः ॥ ५४ ॥

ब्रह्मवर्चसकामस्तु ब्रह्मवृक्षसमुद्भवैः ।
वेणुभिश्च यवैश्चैव नीवारै[4]श्शालिजैस्तथा ॥ ५५ ॥

---

1. समिधं P_2 2. हुत्वा P_1, P_2, T 3. यवाग्वेन्द्रिय° P_1, P_2; यवावेन्द्रिय° T 4. शालिभिः P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वे कामाः प्रसिद्ध्यन्ति [1]होमबीजैर्यथोदितैः ।
लाजहोमेन सिद्ध्यन्ति सर्वे कामा न संशयः ॥ ५६ ॥

अन्नैरन्नादिकामस्तु पुत्रकामस्तु पायसैः ।
निम्बपुष्पैर्हिरण्यार्थी सर्वं सिद्ध्यति सर्पिषा ॥ ५७ ॥

होमे सर्पिर्मधुक्षीरधारा स्याच्चतुरङ्गुला ।
शुक्तिर्दध्याहुतिर्ग्रासं पाय[2]साद्याहुतिर्भवेत् ॥ ५८ ॥

भक्ष्याहुतिस्तदर्धं स्यात्फलैः पुष्पैरखण्डितैः ।
निष्पावबीजमाना तु धूपद्रव्याहुतिर्भवेत् ॥ ५९ ॥

तिलव्रीहियवाद्यैस्तु मुष्ट्यर्धार्धाहुतिः [3]क्रमात् ।
अष्टाङ्गुला तदर्धा वा समिद्दूर्वा षडङ्गुला ॥ ६० ॥

मृद्वीकाक्षप्रमाणा तु गोमयाहुतिरिष्यते ।
पूर्णाहुतिर्घृतस्य स्यात्कुडुपेन[4] चतुर्मुख ॥ ६१ ॥

न्यूनाधिकप्रमाणं तु हव्यकव्याहुतिं कृताम् ।
भुञ्जन्ति दानवा दैत्याः न फलाय च कल्प्यते ॥ ६२ ॥

कुक्कुटाण्डप्रमाणं तु चरोः पिण्डं घृताप्लुतम् ।
निक्षिप्य च स्रुचोर्गर्तेऽभिघार्य स्रुवेण च ॥ ६३ ॥

ससमिद्दर्भकुसुमं जुहुयान्मूलविद्यया ।
प्रायश्चित्तार्थमाज्येन पञ्चोपनिषदा पुनः ॥ ६४ ॥

[5]स्रुचमाज्येन संपूर्य सदर्भं समिधान्वितम् ।
उद्धृत्य नासिकाग्रान्तमभिघार्य स्रुवेण च ॥ ६५ ॥

---

1. होतृबीजै० P_2 2. ०आज्याहुतिः P_1 3. भवेत् T, P_1
4. चतुर्थांशे M_1 5. एष श्लोकः M_1 कोशे न दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जुहुयान्मूलमन्त्रेण पूर्णाहुत्या तु साधकः ।
[1]स्रुचं जलेन संपूर्य बहिः कुण्डात्प्रदक्षिणम् ॥ ६६ ॥

सेचयेद्वारिशेषं तु निनयेच्छिरसि स्वयम् ।
भस्मना तिलकं कृत्वा हरिमग्नेस्समुत्सृजेत् ॥ ६७ ॥

गृहीत्वार्घ्यं प्रदद्याच्च धाम्नि देवाय पूजकः ।
भक्त्या यदग्नौ विहितं यथाशक्ति यथाविधि ॥ ६८ ॥

आराधनं [2]तदेवेति गृहाण परमेश्वर ।
अग्निकार्यविधिर्ह्येवस्संक्षेपात्कथितो मया ॥ ६९ ॥

विधिनानेन यः कुर्यादग्निकार्यं दिने दिने ।
स याति ब्राह्मणस्स्थानं भुक्त्वा भोगान्यथेप्सितान् ॥ ७० ॥

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
अग्निकार्यविधिर्नाम चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः ॥

नित्योत्सवसमाराधनकालविभागः ॥

श्रीभगवानुवाच[3] :—

अथ नित्योत्सवविधिं कथयामि चतुर्मुख ।
सर्वदुःखहरं पुंसां सर्वभूतप्रहर्षणम् ॥ १ ॥

[4]राज्ञो राष्ट्रस्य ग्रामस्य यजमानस्य सद्मनः ।
सुखावहं शान्तिकरं पुण्यमायुर्विवर्धनम् ॥ २ ॥

---

1. तज्जलेन च संस्पृश्य M_1 2. तदेवेदं M_1 3. P_2 omits उवाच
4. राष्ट्रस्य राज्ञो P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आवाह्य तण्डुले शुद्धे [1]पात्रस्थे परमेश्वरम् ।
शक्तिभिर्दशभिर्द्वाभ्यां [2]सह प्रातर्दिने दिने ॥ ३ ॥

परिक्रमेदायतनं मध्याह्ने त्वन्नकल्पिते ।
सायं कुसुमसंघाते त्रिसन्ध्यं त्रिषु कल्पयेत् ॥ ४ ॥

बिम्बेन [3]वाथ परिधौ त्रिसन्ध्यमनुवासरम् ।
अथवान्नेन मध्याह्ने कालेऽन्यत्र द्वयेऽर्चना ॥ ५ ॥

त्रिसन्ध्यमथवान्नेन कुर्यान्नित्योत्सवं हरेः ।
मध्यन्दिने वा सर्वार्थं परिक्रम्य बलिं क्षिपेत् ॥ ६ ॥

यद्वोत्सवप्रतिकृतेरन्वगग्रे[4]ऽथवा नयेत् ।
त्रिसन्ध्यं चामर[5]च्छत्रवितानध्वजसंयुतम् ॥ ७ ॥

तण्डुलादिकमन्नं वा[6] केवलं कमलासन ।
पञ्चावरणके धाम्नि पञ्चस्वावरणेष्वपि ॥ ८ ॥

बलिं दत्त्वा पर्यटनं गेयवाद्यपुरस्सरम् ।
उत्सवं प्राहुरुत्कृष्टं [7]तदूनं मध्यमं विदुः ॥ ९ ॥

[8]हीनेऽधमं[9] जघन्यं [10]तन्न्यूने क्षुद्रमथेतरे ।
बलिप्रदानेन विना नोत्सवोऽभ्युदयावहः ॥ १० ॥

शुक्लाम्बरधरं सौम्यं शुक्लयज्ञोपवीतिनम् ।
सोत्तरीयं च सोष्णीषं स्वनुलिप्तमलङ्कृतम् ॥ ११ ॥

परिचारकमाहूय भावितं गरुडात्मना ।
तन्मूर्धनि च [11]वा पृष्ठे तण्डुलेऽन्ने प्रसूनके ॥ १२ ॥

---

1. पाश्वंस्थे T, P_1 2. सायं T 3. वा परीयायात् T, P_1 4. च वा भवेत् T, P_1, P_2 5. चामरं P_2 6. °अन्नेन T, P_1 7. एकोनं T, P_1 8. एष दशमश्लोकः P_1 कोशे न दृश्यते। 9. व्यूनेऽधमं P_2 10. त्रिन्यूने T 11. पात्रस्थे P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवमावाहयेन्मूलबेरादाराधकस्स्वयम् ।
इष्ट्वा च गन्धपुष्पाद्यैस्तत्र देवं यथाविधि ॥ १३ ॥

[1]विश्वादिमूर्तीश्च पुनः पूजयित्वा प्रदक्षिणम् ।
प्रागाद्येषु द्वादशसु पात्रस्थेषु दलेषु च ॥ १४ ॥

सूक्तं सर्वं स्वस्त्ययनं तथान्यच्चापि मङ्गलम् ।
पठन् पात्रं च बिभ्राणो व्रजेच्च परिचारकः ॥ १५ ॥

चण्डप्रचण्डप्रमुखान् द्वारपालान् प्रपूजयेत् ।
घोषयेन्मद्दतालाद्यैः बलिदानपुरस्सरम् ॥ १६ ॥

नृत्तं च[2] वैजयन्ती स्यादृषभं गेयमिष्यते ।
वितानधवलच्छत्रचामरव्यजनादिभिः ॥ १७ ॥

परि[3]भ्रमेत बल्यर्थं सर्वानावरणान् क्रमात् ।
पीठं प्रदक्षिणीकृत्य प्रविशेदालयं पुनः ॥ १८ ॥

तं [4]च प्रदक्षिणीकृत्य प्रविशेद्गर्भमन्दिरम् ।
दत्त्वार्घ्यं मूलमन्त्रेण मूलबेरे [5]समुत्सृजेत् ॥ १९ ॥

बलिशेषं क्षिपेत्किञ्चिद्विष्वक्सेनस्य मूर्धनि ।
परिशिष्टं महापीठे निक्षिपेदक्षतादिकम् ॥ २० ॥

नित्योत्सवश्चे[6]द्बिम्बेन तद्बिम्बं शिबिकादिषु ।
आरोप्य यद्वा शिरसि परिभ्रमणमिष्यते ॥ २१ ॥

आतोद्यनृत्तैर्बहुधा [7]वाद्यमानैस्समेधितम् ।
[8]तत्र नृत्तं बहुविधं तानि वक्ष्ये समासतः ॥ २२ ॥

---

1. विष्णवादिं T, P_1, P_2 2. तु P_2 3. ०क्रमेत A, P_2 4. तु P_2
5. नियोजयेत् M_1 6. आरोप्य P_1, P_2 7. भिद्यमानैः T, P_1, P_2
8. अस्ति T, P_1; हस्ति M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विलासं कर्तरी विष्णुक्रान्तमालीढमङ्गले ।
[1]भद्रमाली तार्क्ष्यपक्षौ करणं स्वस्तिकाह्वयम् ॥ २३ ॥

चारी प्रचारी सूची च सावर्तं पारिभद्रकम् ।
सौम्यं विषमसूची च खेटकं चावकुञ्चितम् ॥ २४ ॥

कटिबन्धमलङ्कारमश्मरी पिष्टकुट्टिमम् ।
उल्लंघी वामजान्वाख्यमासुरी चापवेष्टितम् ॥ २५ ॥

वासवेश्वरसञ्चारिभावौ स्यातां निकुट्टिमौ ।
कुट्टिमं घटितं स्थायिभावो यच्च विजृम्भितम् ॥ २६ ॥

मण्डलं कुषितार्धादि[कुञ्चितार्धेन्दु] पताका सर्वमङ्गलम् ।
कान्तारकुट्टिमाह्वानं प्रपूर्वं घटितं तथा ॥ २७ ॥

विलासं सर्वतोभद्रं शुद्धं कुञ्चितमिष्यते ।
मार्गचारी कराधीनमावभासमनन्तरम् ॥ २८ ॥

आवेष्टितं परीवर्तं निर्धूतं देशिमण्डलम् ।
समपूर्वं च घटितं पदं विषमपूर्वकम् ॥ २९ ॥

कर्करी विकलासश्च भवेद्विगलितं तथा ।
[2]अत्र भेदाः पृथग्भावा गात्रावयवचेष्टितैः ॥ ३० ॥

आतोद्यगीतिभेदानामानन्त्यान्नेह [3]तन्यते ।
पुष्पप्रभासमोपेतं ध्वजच्छत्रादिसंयुतम् ॥ ३१ ॥

सर्ववादित्रसुभगं सर्वगेय[4]समन्वितम् ।
ब्रह्मविद्ब्रह्मघोषेण सहितं दीपसङ्कुलम् ॥ ३२ ॥

---

1. क्षुद्रमाली A 2. नृत्त° T, P_1, P_2 3. गीयते A
4. °समेधितम् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्णुकान्तं खगेशस्य नृत्तं गेयं च मध्यमम् ।
विलासं सर्वतोभद्रं खेटकं चक्रमण्डलम् ॥ ३३ ॥

कान्तार[1]कुट्टिमं [2]पृष्टिकुट्टिमं कटिबन्धनम् ।
वामजानूर्ध्वनृत्तं च पुरुहूतादिषु स्मृतम् ॥ ३४ ॥

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च[3] निषादश्च[4] पुरुहूतादिषु स्वराः ॥ ३५ ॥

सप्त ज्ञेया धैवतस्तु भवस्य स्वर इष्यते ।
नृत्तं च[5] विष्वक्सेनस्य स्वस्तिकं ऋषभस्वरः ॥ ३६ ॥

हस्तिनृत्तं गणेशस्य स्वरः पञ्चम इष्यते ।
धैवतं स्यात्स्वरो नृत्तं दुर्गायास्सर्वमङ्गलम् ॥ ३७ ॥

अन्येषामपि देवानां नृत्तं स्यात्सर्वमङ्गलम् ।
गानं च धैवतं प्रोक्तं गान्धारं पञ्चमं तथा ॥ ३८ ॥

तदवान्तर[6]भेदे वा गेयागेयविचक्षणैः ।
समतालाह्वयं वाद्यमैन्द्यां दिशि हविर्भुजः ॥ ३९ ॥

बद्धावतालाभिधानं यमस्य दिशि [7]भृङ्गिणी ।
नैरृत्यां [8]मट्टतालं स्याद्वारुण्यां मङ्गलाह्वयम् ॥ ४० ॥

वायव्यां जयतालाख्यं कौबेर्यां भद्रसंज्ञितम् ।
ऐशान्यां [9]ढक्करीतालं तार्क्ष्यस्य गरुडाह्वयम् ॥ ४१ ॥

भूतानां बलितालाख्यं सेनेशस्यापि तादृशम् ।
अन्येषामपि देवानां तालं भद्रं प्रशस्यते ॥ ४२ ॥

---

1. कान्तारं P_2 2. पृष्ठकुट्टिमं T, P_1 3. चैव P_2 4. P_2 omits च
5. तु P_2 6. ०भेदा वा T, P_1, P_2 7. शृङ्गिणी M, P_1 8. मल्ल० P_2
9. कर्करी P^1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिक्षु सर्वासु सर्वेषु मन्दिरावरणेषु च ।
नृत्तं गेयं च वाद्यं च साकल्येन समीरितम् ।। ४३ ।।

खगध्वजं दर्शयित्वा मङ्गलाष्टकमेव च ।
सन्निधाने च देवस्य सर्वत्र बलिरिष्यते ।। ४४ ।।

निवेद्य तत्र ताम्बूलं भक्ष्यं च पृथुकादिकम् ।
सर्वेष्वावरणेष्वेवं स्थानं प्रति समाचरेत् ।। ४५ ।।

केवलाम्बुजनादेन प्राकारद्वारि निर्गमः ।
निर्गत्य[1] च महापीठे मन्दिराभिमुखं स्थितः ।। ४६ ।।

दिक्षु सर्वासु पीठस्य वादित्रे घोषिते भृशम् ।
क्षालिते पीठिकामूर्ध्नि पूजयेद्विष्णुपार्षदान् । ४७ ।।

बलिं निरवशेषेण दत्त्वा पीठस्य मूर्धनि ।
पीठं परीत्य धामान्तः प्रविश्य मुखमण्टपे ।। ४८ ।।

प्रदाय पादुके पीठे यानादेरवरोप्य च ।
प्राङ्मुखं विष्टरे देवमवस्थाप्य सभाजयेत् ।। ४९ ।

उपहारमशेषेग प्रदायावसरोचितम् ।
प्रवेशयेद्गर्भगेहं देवमाराधकस्स्वयम् ।। ५० ।।

वाद्ये गेये तथा नृत्ते बहिरङ्गणभूमिषु ।
न्यूनीभावं समाधातुं शुद्धताण्डवमाचरेत् ।। ५१ ।।

महावातादिसंक्षोभे न नित्योत्सवमाचरेत् ।
बलिप्रदानमात्रं च[2] कुर्याच्च सति सम्भवे ।। ५२ ।।

---

1. निर्गम्य P_2 2. तु P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]बलिं चण्डप्रचण्डे तु केवलं वा विनिक्षिपेत् ।
तयोर्मध्ये तु पुरतो मूलमन्त्रेण साधकः ॥ ५३ ॥

भूतेभ्यो नम इत्येवं [2]विक्षिपेत्सोदकं बलिम् ।
आराधनविधिर्द्वेधु कालभेदेषु शस्यते ॥ ५४ ॥

अह्नि रात्रौ च तान् ब्रह्मन्नधुना कथयामि ते ।
एकस्त्रयो वा षड् वापि कालो द्वादश एव वा ॥ ५५ ॥

पञ्चकालश्चतुष्कालस्तत्कालो बहुधा मतः ।
यथाविभवमुद्दिष्टं समाराधनकर्मणि ॥ ५६ ॥

एको मध्याह्नसमयः प्रातर्मध्यन्दिनं निशा ।
त्रयश्चेत् षट्सु पूर्वे स्युः कालभेदाः पुनस्त्रयः ॥ ५७ ॥

[3]मध्यरात्रोऽपराह्णश्च तथा प्रत्यूष ईरितः ।
प्रत्यूषश्चार्धरात्रं च प्रातर्मध्यन्दिनं निशा ॥ ५८ ॥

पञ्च काला इमे प्रोक्तास्ततः कालचतुष्टयम् ।
[4]एतेषु हीनः प्रत्यूषो विज्ञेयश्चतुरानन ॥ ५९ ॥

काला द्वादश विज्ञेयाः पञ्च पञ्च च नाडिकाः ।
इतरे कालभेदाः स्युः[5] प्रत्येकं यामसंमिताः ॥ ६० ॥

उत्सवावसितं श्रेष्ठमाराधनमुदाहृतम् ।
होमान्तं मध्यमं प्रोक्तं प्रापणान्तमथाधमम् ॥ ६१ ॥

क्षुद्रं [6]च धूपदीपमधमाराधनं हरेः[7] ।
घटिके द्वे भवेत्स्नाने घटिकैकार्चने भवेत् ॥ ६२ ॥

---

1. चण्डप्रचण्डयोस्स्थाने केवलं वा विनिक्षिपेत् । A 2. प्रक्षिपेत् P_2
3. अयं श्लोकः P_2 कोशे 'पञ्चकाले' त्यनन्तरं दृश्यते । 4. एकेन P_1,P_2 5. तु P_2
6. तु T, P_1, P_2 7. भवेत् P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नृत्ते गेये तथा चैका तदर्धेन निवेदनम् ।
[1]होमश्चैका चोत्सवे द्वे शुद्धनृत्तावसानिके ॥ ६३ ॥

प्रहारकाल[2]पूजायां स्नानादिविधिरीदृशः ।
घटिकास्नान[3]समयस्तथार्धघटिकार्चनम् ॥ ६४ ॥

[4]गेयं नृत्तं च घटिका तदर्धेन निवेदनम् ।
[5]होमार्धं परिशिष्टार्धं भवेन्नित्योत्सवक्रिया ॥ ६५ ॥

कालभेदेषु सर्वेषु श्रेष्ठं कालत्रयं विदुः ।
प्रातर्मध्यन्दिनं रात्रिर्मुख्यं च कमलासन ॥ ६६ ॥

अवश्यम्भाविनौ तेषु बलिनित्योत्सवावुभौ ।
होमपर्यन्तमन्यत्र कालभेदेषु शस्यते ॥ ६७ ॥

उत्सवाद्यङ्गबिम्बानि सेनान्यं विहगेश्वरम् ।
चण्डप्रचण्डौ द्वारस्थौ सर्वकालेषु पूजयेत् ॥ ६८ ॥

मध्यन्दिने प्रदोषे च पुरस्ताद्वाद्यवादनम् ।
नीराजयेत्प्रदोषेषु [6]एवं तदपि कथ्यते ॥ ६९ ॥

स्वर्णपात्राणि युग्मानि विपुलानि यथावसु ।
तन्मध्ये शालिपृष्ठेषु[7] वर्तिदीपान् [8]प्रदीपयेत् ॥ ७० ॥

तथाविधानि पात्राणि करैरुद्धृत्य योषितः ।
कल्याणवस्त्राभरणा निर्गताश्च महानसात् ॥ ७१ ॥

श्रेणीबद्धाः पुरोगीतनृत्तवाद्यसमन्विताः ।
अन्तिके देवदेवस्य विन्यसेयुर्महीतले ॥ ७२ ॥

आधारेषु ततः पात्राण्यर्चयेद्विश्वविद्यया ।
आचार्यो ध्रुवबेरादौ [9]अङ्गन्यासं समाचरेत् ॥ ७३ ॥

---

1. एका होमे A, P_1 2. °भेदोऽयं P_2 3. °समये P_2 4. गेयनृत्तस्य T, P_1, P_2 5. होमाद्यैः परिशिष्टस्तु भवेन्नित्योत्सवे क्षणः । M_1 6. देवं T, P_1, P_2 7. °पिष्टेषु M_1 8. प्रकल्पयेत् P_1 9. षडङ्गन्यासमाचरेत् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इष्ट्वा च देवमर्घ्याद्यैर्दीपपात्राणि पूजकः ।
उद्धृत्य भ्रामयेद्देवमापादतलमस्तकम् ॥ ७४ ॥

गुणमन्त्रैस्त्रिभिः पात्राण्यनु योषित्सु निक्षिपेत् ।
अर्चनामेव[1]मन्यत्र पात्राण्येकैकशः क्रमात् ॥ ७५ ॥

भ्रामयेद्[2] ध्रुवबेरस्य यद्वा सर्वाणि पद्मज ।
एवं नीराजनं दद्यात् श्रीभूम्योरिष्यते पृथक् ॥ ७६ ॥

नीराजने तन्यमाने तूर्यघोषमुदीरयेत् ।
नृत्तगीतप्रकारांश्च कुर्युर्वारपुरन्ध्रयः ॥ ७७ ॥

दीपपात्राणि सर्वाणि बलिपीठे समुत्सृजेत् ।
[3]नित्योत्सवं नदीस्नानं विधायार्चनमन्यतः ॥ ७८ ॥

[4]अर्धरात्रे तु संप्राप्ते कृत्वा स्नानादिकं हरेः ।
शुद्धपायसमुद्गान्नमपूपादिहविः क्रमात् ॥ ७९ ॥

गोक्षीरं सितखण्डादि मधुरं च निवेदयेत् ।
भास्करस्योदयात्पूर्वं बह्वस्सूतमागधाः ॥ ८० ॥

प्रबोधयेयुर्देवेशं स्तुवन्तो वाद्यवादनैः ।
रात्रौ बिम्बेषु सर्वेषु कुर्यान्नीराजनं हरेः ॥ ८१ ॥

राजोपचारवत्सर्वमुपचारं प्रदर्शयेत् ।
अह्नि रात्रौ च ये प्रोक्ताः कालभेदाश्चतुर्मुख ॥ ८२ ॥

जघन्यमुख्यभेदेन तेष्वित्थं हरिमर्चयेत् ।

इति श्री पञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
नित्योत्सवसमाराधनकालविभागो नाम पञ्चमोऽध्यायः ॥

---

1. ०अन्यासां T, P_1, P_2 2. मूल० P_1, P_2 3. नित्योत्सवान्तं स्नानादि विधायार्चनमन्यतः P_2 4. ७९, ८० श्लोकद्वयमिदं M_1 कोशे नोपलभ्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठोऽध्यायः ॥

नृसूक्तोपचारनीराजनविधिः ॥

ब्रह्मा :—

सूक्तस्याङ्गेषु भगवन् पौरुषस्य कथं भवेत् ।
न्यासः कथं वा तेन त्वां अर्चयामि [1]कथं [प्रभो] ॥ १ ॥

पृच्छतः संशयानस्य गृहार्चनविधिः कथम् ।
याथातथ्येन वक्तव्यो मयि चेदस्त्यनुग्रहः ॥ २ ॥

श्रीभगवानु[2]वाच :—

छन्दोऽनुष्टुबृषिस्तस्य वासुदेवस्स देवता ।
मूर्ध्नि फाले नयनयोर्नासिकायां तथा मुखे ॥ ३ ॥

गले बाह्वोश्च हृदये नाभावङ्गे च मेहने ।
ऊर्वोश्चरणयोर्न्यासः [3]प्रथमाद्या ऋचः क्रमात् ॥ ४ ॥

आद्ययाऽऽवाहयेद्देवमासनं च द्वितीयया ।
पाद्यं तृतीयया चार्घ्यं चतुर्थ्या वितरेदृचा ॥ ५ ॥

पञ्चम्याचमनं स्नानं षष्ठ्या [4]सप्तम्या चाम्बरम् ।
उपवीतमृचाष्टम्या नवम्या गन्धलेपनम् ॥ ६ ॥

पुष्पं दशम्यैकादश्या द्वादश्या धूपदीपकौ ।
निवेदनं त्रयोदश्या चतुर्दश्या नमस्कृतिः ॥ ७ ॥

प्रदक्षिणं पञ्चदश्या षोडश्योद्वासनं [5]भवेत् ।
समिदन्नाज्यहोमाश्च[6] प्रत्यृचं जातवेदसि ॥ ८ ॥

---

1. यथा मम T, P_1, P_2 2. P_2 omits उवाच 3. प्रथमादिऋचां P_1, P_2 4. सप्त ऋचाम्बरम् T, P_1, P_2 5. हरेः T, P_1, P_2 6. ०होमश्च P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वगृहे पूजयेद्विष्णुं शुचौ देशे गृहे क्वचित् ।
स्थले [1]रत्नमये ध्यात्वा विमाने च तथाविधे ॥ ९ ॥

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
पुष्पोदपात्रमादाय तिष्ठन्नावाहयेद्धरिम् ॥ १० ॥

[2]ओंपूर्वाभिर्व्याहृतिभिः प्रत्येकं पुरुषोत्तमम् ।
व्यस्ताभिश्च समस्ताभिर्वेदाद्येनासनं ततः ॥ ११ ॥

पात्रस्थमम्भस्साविऋ्या अभिमन्त्र्य पवित्रकम् ।
तदर्घ्यं विष्णुगायत्र्या दद्यात् त्रीणि[3] पदेति च ॥ १२ ॥

पाद्यमाचमनीयं च प्रणवेन प्रकल्पयेत् ।
मन्त्रैः स्नपनमब्लिङ्गैरङ्गञ्च विमृजेत्ततः ॥ १३ ॥

व्याहृत्या प्लोत[4]वस्त्रेण जितं त इति विद्यया ।
वासो [5]विद्यादिना दद्यादुपवीतं च लेपनम् ॥ १४ ॥

इदं विष्णुरिति प्रोच्य प्रणवेन प्रसाधनम् ।
तद्विष्णोरिति पुष्पाणि जितं त इति धूपकम् ॥ १५ ॥

उद्दीप्यस्वेति दीपं च देवस्य त्वेति वै हविः ।
वासुदेवादिमन्त्रैश्च मत्स्याद्यैः केशवादिभिः ॥ १६ ॥

पुष्पाणि [6]दत्त्वा ध्यात्वा च तां तां मूर्तिं यथायथम् ।
चतुर्मुखादिदेवानां परिवारतयार्चनम् ॥ १७ ॥

न स्वातन्त्र्येण यष्टव्यः वैष्णवेन गृहार्चने ।
जपकाले नृसूक्तं वा द्वादशाक्षरमेव वा ॥ १८ ॥

---

1. रत्नमयस्थाने विधाय च तथाविधे P_2 2. ओंभूरादिव्याहृतिभिः T, P_1, P_2 3. पदेत्यृचा T, P_1, P_2 4. श्वेत॰ M_1 5. वेदादिना M_1 6. दद्याद् P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टाक्षरं वा यद्वान्यं मन्त्रं प्रणवमेव वा ।
जपेत्समाहितमना यद्वा त्र्य्यन्तगोचरान् ॥ १९ ॥

यो नित्यं पूजयेद्विष्णुं गृहस्थो वेश्मनि स्वयम् ।
स नयेत् स्वकुलोद्भूतान् पुरुषानेकविंशतिम् ॥ २० ॥

विष्णोः पदं वा सालोक्यं यद्वाऽन्यदपि[1] वाञ्छितम् ।
उपचारा हरेरद्य सपर्याविधिगोचराः ॥ २१ ॥

अष्टोत्तरशतं विंशच्छ्रुता ये मन्मुखोद्गताः ।
आवाहनं नमस्कारं[2] प्रत्युत्थानमनन्तरम् ॥ २२ ॥

पुष्पाञ्जलिस्स्वागतोक्तिरासनं पादपीठिका ।
अर्घ्यं पाद्यं प्रतिग्राहः पाद्यं क्षौताभिमर्शनम् ॥ २३ ॥

आलेपनं चरणयोश्चन्दनक्षोदवारिणा ।
[3]अपामाचमनीयानां प्रतिग्रहणदर्शनम् ॥ २४ ॥

उपस्पर्शनमालेप[4]श्चन्दनाद्यम्बुचर्चया ।
पुष्पमाला धूपदानं मधुपर्कनिवेदनम् ॥ २५ ॥

घनसारो नागवल्ली स्नानविष्टरगोचराः ।
पादुके स्नानपीठं च स्नानशाटकमन्वतः ॥ २६ ॥

दन्तकाष्ठमथादर्शो जिह्वानिर्लेखपट्टिका ।
ताम्बूलवीटिका वस्त्रपरार्धप्रसारितम् ॥ २७ ॥

अभ्यङ्गो मौलिमाला च तालवृन्तमनन्तरम् ।
[5]चन्दनैश्चर्चनं तन्वा गन्धामलकवारिभिः[6] ॥ २८ ॥

---

1. अभि॰ T, P_1, P_2 2. आवाहननमस्कारौ P_2 3. अपामाचमनीयन्तु T, P_1 ; आचमनीयाम्भः P_2 4. ॰आलेपचन्दन॰ P_2 5. चन्दनोद्वर्तनं T, P_1 6. ॰वारि च P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कङ्कतं रजनीस्नानं वस्त्रं गन्धानुलेपनम् ।
उत्तरीयं पवित्रं च नृत्तं गेयमनन्तरम् ॥ २९ ॥

पाद्यं दशशत[1]च्छिद्रैः स्नानं धाराभि[2]रम्भसाम् ।
नीराजनं शिखा[3]प्लोतमुष्णीषं प्लोतवाससा ॥ ३० ॥

अङ्गाभिमर्शनं वस्त्रमुपवीतमनन्तरम् ।
उत्तरीयं त्रिंशदेते कथिताः कमलासन ॥ ३१ ॥

अलङ्कारासनस्थस्य हरेस्तत्कालगोचराः ।
[4]उपानहौ शिरस्त्राणं पीतकौशेय[5]धारणम् ॥ ३२ ॥

कर्पूररजसा लेपमापादतलमस्तकम् ।
कस्तूरिका मृगमदश्चन्दनेनानुलेपनम् ॥ ३३ ॥

व्यजनं चामरव्यूहः कुङ्कुमेनानुलेपनम् ।
गन्धं च कृत्रिमा भूषा ब्रह्मसूत्रप्रकल्पना[6] ॥ ३४ ॥

उत्तरीयं मौलिमाला बाहु[7]मालाविलम्बनम् ।
मृत्स्नया तिलकं कुर्याद् अञ्जनं च शलाकया ॥ ३५ ॥

पुष्पाविकिरणं ब्रह्मन् महादर्शप्रदर्शनम् ।
ताम्बूलिका धूपदीपौ शालितण्डुलपात्रिका[8] ॥ ३६ ॥

स्वाध्यायाध्ययनं दानं नाट्यं वेणुनिनादनम् ।
वीणादिवादनं पाठो मङ्गलानामनन्तरम् ॥ ३७ ॥

नीराजनं च पिण्डानां पञ्चानां क्षेपणं दिशि ।
यात्रासनोपचारास्तु हरेस्तत्कालगोचराः ॥ ३८ ॥

---

1. °शतैः P_2 2. एव च A, P_1; अर्णनाम् P_2 3. शिरः° P_1, P_2
4. उपचाराः M_2, P_1, P_2 5. °वाससा T, P_1, P_2 6. °प्रकल्पनम् A, P_2; ऽनन्तरम् P_1, M_2 7. °मूलाविडम्बनम् T, P_1 8. °मात्रया T, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपानहौ चामराणि मुक्तातपनिवारणम् ।
मयूरपिञ्छव्यजनं तालवृन्तं रथो गजः ॥ ३९ ॥

अश्वश्च शिबिकायानं वैनतेयध्वजोन्नतिः ।
क्रीडायष्टिश्च ताम्बूली क्रीडाफलसमृद्धयः ॥ ४० ॥

एवं पञ्चदश प्रोक्ता यात्रासनगताः परे ।
भोजनासनमारूढे हरौ तत्कालगोचराः ॥ ४१ ॥

मधुपर्कं च ताम्बूलवीटिका मुखशाटिका ।
अर्हणाम्भः पायसान्नं मुद्गान्नञ्च गुडोदनम् ॥ ४२ ॥

दध्योदनं पानकं च पानीयं हस्तशाटिकम् ।
शुद्धिश्च करयोरेला चन्दनाक्षोदवारिणा ॥ ४३ ॥

सुखासीने च दाशार्हे चन्दनोदकचर्चया ।
अङ्गेष्वालेपनं माल्यमपूपपृथुकास्तथा ॥ ४४ ॥

सक्तवस्तिलपिण्डाश्च फलानि कथितं जलम् ।
नालिकेराम्बुदानं च ताम्बुलीदलवीटिका ॥ ४५ ॥

प्रदक्षिणनमस्कारस्स्तुतिरात्मनिवेदनम् ।
अर्घ्यमुद्रासनं चैते [1]शताष्टोत्तरविंशतिः ॥ ४६ ॥

उपचारा हरेर्ब्रह्मन् विस्तरेण प्रदर्शिताः ।
आवाहननमस्कारौ सपर्यासनमन्वतः ॥ ४७ ॥

पादपीठं तथैवार्घ्यं [2]पाद्यादीनां प्रतिग्रहः ।
पाद्यमाचमनीयाम्भः प्रतिग्रहणमेव च ॥ ४८ ॥

---

1. शतमष्टौ च विंशतिः T, P_1, P_2 2. पाद्यनीरप्रतिग्रहाः P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचामो मुखवासश्च पादुके स्नानविष्टरम् ।
स्नानशाटी दन्तकाष्ठं जिह्वानिर्लेखनं तथा ॥ ४९ ॥

ताम्बूलाभ्यञ्जनं चैव व्यजनं चाङ्गपेषणम् ।
गन्धामलकजं स्नानं कङ्कतेन विशोधनम् ॥ ५० ॥

रजनीचर्चया स्नानमुत्तरीयपरिष्कृतिः ।
वारिधारासहस्रेण स्नानं नीराजनं तथा ॥ ५१ ॥

प्लोताभिमर्शनं वासो ब्रह्मसूत्र[1]प्रकल्पनम् ।
उत्तरीयमलङ्कारविष्टरं केशशोषणम् ॥ ५२ ॥

परिधानं दुकूलेन गन्धद्रव्य[2]विलेपनम् ।
व्यजनं भूषणं माला पुष्पाणां नयनाञ्जनम् ॥ ५३ ॥

ताम्बूलं दर्पणं धूपदीपौ मात्रापरिव्ययः ।
दानं नीराजनं छत्रमुपानच्चामरं ध्वजाः ॥ ५४ ॥

वाहनं शिबिकायानं [3]तूर्यं क्रीडा फलं तथा ।
भोजनासनसम्प्राप्तिर्मधुपर्कनिवेदनम् ॥ ५५ ॥

अर्हणं [4]प्रापणादीनि पानीयं सुखविष्टरम् ।
निवेदनमपूपादेस्ताम्बूली स्तोत्रशंसनम् ॥ ५६ ॥

विसर्जनमिति ब्रह्मन् षष्टिश्च चतुरुत्तरा ।
उपचारानथो वक्ष्ये द्वात्रिंशत्तु यथातथम् ॥ ५७ ॥

आवाहनासने पश्चादर्घ्यं पाद्यमनन्तरम् ।
आचामो मुखवासश्च पादुके दन्तधावनम् ॥ ५८ ॥

---

1. °अनन्तरम् A, P_1 P_2 2. °अनुलेपनम् T, P_1, P_2 3. त्र्यं P_1
4. प्रापणान्तानि T ; प्रापणं पानं P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जिह्वानिर्लेखनं तैलं धान्त्र्या स्नानं हरिद्रया ।
वासश्चैवोत्तरीयं [1]च गन्धालेपश्च भूषणम् ॥ ५९ ॥

मालाऽञ्जनं तथादर्शदानं धूपश्च दीपिका ।
मात्रादान[2]मथ च्छत्रं चामरं तूर्यघोषणम् । ६० ॥

मधुपर्कार्हणं चैव निवेदनमनन्तरम् ।
भक्ष्यं तथा नागवल्ली विसर्जनमथान्तिमम् ॥ ६१ ॥

उपचाराः षोडश स्युरात्मनश्शक्त्यपेक्षया ।
आवाहनासने पूर्वमर्घ्यं पाद्यमनन्तरम् ॥ ६२ ॥

उपस्पर्शस्तथा स्नानं वस्त्रं यज्ञोपवीतकम् ।
गन्धालेपस्तथा भूषा माला धूपः प्रदीपिका ॥ ६३ ॥

मधूपर्कं प्रापणं च विसर्जनमथान्तिमम् ।
आसनेषु च सर्वेषु पाद्यं पाद्यप्रतिग्रहः ॥ ६४ ॥

पादप्लोतश्चरणयोर्गन्धालेपश्चतुर्मुख ।
आचामश्च तदम्बूनां प्रतिग्रहणमिष्यते ॥ ६५ ॥

भोज्य[3]यात्रासने त्यक्त्वा कर्तव्यं पादविष्टरम् ।
उपक्रमोपरमयोर्मधुपर्कनिवेदनन् ॥ ६६ ॥

भोजनान्ते च वस्त्रस्य परिधाने तथाप्लवे ।
जिह्वानिर्लेखनान्ते च सर्वत्राचमनक्रिया ॥ ६७ ॥

निवेदने च वस्त्राणां केशानां शोषणे तथा ।
घण्टानादं विना धूपो न विनान्यत्र घण्टया ॥ ६८ ॥

---

1. उपवीतं च T, P_1, P_2 2. ततश्छत्र० P_2 3. ०पात्रेति पाठः समीचनः प्रतिभाति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीपोपचारे नैवेद्ये घण्टास्वननमन्यथा ।
विभवानां [1]क्षयस्थाने [2]स्याच्च पूजाऽऽसुरी कृता ॥ ६९ ॥

निर्लेखनं [3]त्रिसन्ध्यायां दन्तकाष्ठं च निक्षिपेत्[4] ।
उपस्पर्शनवारीणां प्रतिग्रहणभाजने ॥ ७० ॥

भक्षणाद्यन्नपानान्ते वाससा हस्तमार्जनम् ।
तथाञ्जनं नयनयोर्मार्जनं वाससा भवेत् ॥ ७१ ॥

अर्हणं भोजने दद्यान्न पानादौ कदाचन ।
परस्य सूक्ष्मस्य तथा स्थूलस्य तदनन्तरम् ॥ ७२ ॥

चिन्तासङ्क्रमणं तस्य बिम्बे प्रत्युद्गमस्तथा ।
स्वागतोक्तिर्नमस्कारस्सांन्निध्यप्रार्थना तथा ॥ ७३ ॥

इत्यावाहनमष्टाङ्गं परस्य परमात्मनः ।
रत्नेषु स्फटिके स्वर्णे रजते ताम्रजेऽपि वा ॥ ७४ ॥

क्षणिके [5]चार्चयेद्देवमावाह्य विधिपूर्वकम् ।
चक्राब्जमण्डलं कुम्भं सोदकं सूत्रवेष्टितम् ॥ ७५ ॥

बीजं पिष्टं तथैवान्नं फलं पुष्पं जलं तथा ।
गन्धं वेदिः शकृत्कूर्चमित्यादि क्षणिकं मतम् ॥ ७६ ॥

आलये स्थापितं [6]देवं सदा नीराजयेद्धरिम् ।
सम्पूर्णमम्भसा कुम्भं हेमादिद्रव्यनिर्मितम् ॥ ७७ ॥

स्रग्विणं सपिधानं च मुखेऽश्वत्थदलैर्युतम् ।
अक्षतैरर्चितं गन्धवारिणाऽभ्युक्षितं तथा ॥ ७८ ॥

---

1. क्षये P_2 2. सार्चा P_2 3. रसज्ञाया P_2 4. निर्वपेत् M_2, P_2
5. वार्चयेत् T, P_1, P_2 6. बिम्बं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुष्टयाङ्गुलो[1]त्सेधं दीपवर्तिविराजितम् ।
उच्चैरादाय हस्ताभ्यामापादतलमस्तकम् ॥ ७९ ॥

त्रिःपरिभ्राम्य देवेशं बलिपीठे विनिक्षिपेत्[2] ।
एतन्नीराजनं घोरशान्त्यर्थं पुष्टिवर्धनम् ॥ ८० ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
नृसूक्तोपचारनीराजनविधिर्नाम षष्ठोऽध्यायः ॥

सप्तमोऽध्यायः ॥

मण्डपाराधनाचार्याभिषेकविधि ॥

ब्रह्मोवाच :—

भगवान् कथ्यतां कीदृक् चक्राब्जं नाम मण्डलम् ।
यदाराध्यं समाराध्य तरन्ति भववारिधिम् ॥ १ ॥

श्रीभगवान् :—

चतुर्भिर्याज्ञिकैः काष्ठैः षडङ्गुलघनैश्शुभैः ।
द्वादशाङ्गुलविस्तारैराकारं चतुरश्रकम् ॥ २ ॥

मण्डलानुगुणायामविस्तारं परिकल्पयेत् ।
अष्टतालायतान् स्तम्भान् सुवृत्तांश्चतुरस्तथा ॥ ३ ॥

[3]सन्निकृष्टस्य कोणेषु चतुर्ष्वेतस्य मङ्गलान् ।
स्थापये[4]दुपरिष्टाच्च स्तम्भानां सन्निवेशयेत् ॥ ४ ॥

---

1. °उत्सेधदी° P_2 2. क्षिपेत्ततः M_1 3. सन्निकृष्टेषु T; सन्निविष्टस्य P_1; सन्निविष्टेषु A 4. °अष्टदिक्षु M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चत्वारि चैव दारूणि यथा पूर्वोक्तलक्षणम् ।
[1]तच्चतुष्कं च दारूणां वितानध्वजमालया ॥ ५ ॥

भूषयेत्परितो मुक्तादामानि च विलम्बयेत् ।
शुद्धया च मृदाऽधस्ताच्चतुष्कोष्ठस्य चान्तरम् ॥ ६ ॥

पूरयेदन्तरं तस्य गोमयेनोपलेपयेत् ।
चक्राब्जादीनि बिम्बानि कुर्यात्तत्र महीतले ॥ ७ ॥

तेषामायामविस्ताराविष्येते हस्तसंमितौ ।
द्विगुणौ त्रिगुणौ वापि स्यातामथ चतुर्गुणौ ॥ ८ ॥

यद्वा पञ्चगुणौ ब्रह्मन्नवकाशानु[2]सारतः ।
चन्दनार्द्राणि सूत्राणि प्राञ्चि सप्तदश क्षितौ ॥ ९ ॥

निपातयेत्तथोदञ्चि तावन्ति कमलासन ।
षट्पञ्चाशत्समधिके [3]सन्त्येव द्वे शते पुनः ॥ १० ॥

कोष्ठानि सन्ति तत्रान्तष्षट्त्रिंशत्कोष्ठमध्यतः ।
स्थापयित्वा ततश्शङ्कुं भ्रामयेत् सूत्रवर्त्मना ॥ ११ ॥

पञ्चवृत्तानि बिम्बानि समान्येकं तु मध्यमम् ।
कर्णिकाक्षेत्रमेतस्माद्बहिर्बिम्बं त्रिधा पुनः ॥ १२ ॥

विभज्य सूत्रमार्गेण प्रथमा केसरावनिः ।
दलभूमिर्द्वितीया तु तृतीया नाभिमण्डलम् ॥ १३ ।

तदेकं द्विविधं वापि त्रिविधं सूत्रवर्त्मना ।
विभजेन्नाभिभूभागाद्बहिर्द्वे मण्डले भवेत् ॥ १४ ॥

---

1. चतुरश्रं च M_1 2. ०रूपतः M_1, A 3. सत्येव M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अरक्षेत्रं बहिर्नेमिभूरेकं मण्डलं भवेत् ।
कोष्ठैरथाष्टविंशत्या परितो बहिरासनम् ॥ १५ ॥

चतुरश्रं भवेत्कोष्ठैरशीत्या वीथिका बहिः ।
पङ्क्तिद्वयेन विश्वात्मन् चतुरश्राद्बहिः पुनः ॥ १६ ॥

कोष्ठानि द्वादशाधिक्यं शतं पङ्क्तिर्द्वयोर्भवेत् ।
प्रत्याशं तेषु कोष्ठेषु चतुर्द्वारं प्रकल्पयेत् ॥ १७ ॥

कोष्ठैश्चतुर्भिः प्रत्येकं द्वयोः पङ्क्त्योश्चतुर्मुख ।
चतुर्षु कोणेषु तथा प्रत्येकं शंखसिद्धये ॥ १८ ॥

कोष्ठद्वयं तु संमार्ज्यं द्वयोः पङ्क्त्योश्चतुर्मुख ।
प्रतिद्वारं तदभ्यर्णे पार्श्वयोरुभयोरपि ॥ १९ ॥

अर्धशोभा[1]प्रसिध्यर्थं बाह्यानन्तरथ्ययोः ।
द्वे द्वे कोष्ठे बहिः पंक्त्यामेकैकं तदनन्तरे[2] ॥ २० ॥

संमार्ज्यमेवं शोभार्थमेकैकं बहिरन्यतः ।
त्रीणि त्रीणि च कोष्ठानि मार्जनीयानि पद्मज ॥ २१ ॥

उपशोभार्थमप्येवं व्यत्यासेन चतुष्टयम् ।
संमार्जनीयं कोष्ठानां विनियोगः [3]प्रदर्शितः ॥ २२ ॥

यद्वा पीठादिनिर्माणं विना कोष्ठानि विंशतिः ।
शतद्वयं च परितः [4]परिमृज्य चतुर्मुख ॥ २३ ॥

आदिपद्मप्रमाणेन कुर्यादावरण[5]त्रयम् ।
चतुर्दिशं चतुर्द्वारकल्पनं पद्ममानतः ॥ २४ ॥

---

1. ०प्रक्लृप्त्यर्थं P_1 2. तदनन्तरम् P_2 3. प्रशिक्षितः M_2
4. परिगृह्य M_2 5. ०द्वयम् T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यद्वैकवलयं कुर्यादभीष्टदिशि पद्मज ।
द्वादशाब्जानि कल्प्यानि प्रत्यावरणकल्पनम् ॥ २५ ॥

चतुर्षु कोणेष्वेकैकं द्वे द्वे वलयपार्श्वयोः ।
दलैर्द्वादशभिर्युक्तं कर्णिकाकेसरान्वितम् ॥ २६ ॥

आदिपद्मार्धमानेन पद्मजातं प्रकल्पयेत् ।
मध्यमे पङ्कजे बिन्दून् कर्णिकायां प्रकल्पयेत् ॥ २७ ॥

द्वादशा[1]ब्जजरेखाश्च शतं च नवतिं तथा ।
[2]केसराणां विधायान्वग्दलक्षेत्रे प्रकल्पयेत् ॥ २८ ॥

विदिक्षु दिक्षु च तथा चतस्रो विंशतिं तथा ।
रेखे द्वे द्वे दलानि स्युस्सूच्यग्रवदनन्तरे ॥ २९ ॥

प्रदर्शयेदुपदलान्यरक्षेत्रे दिशः प्रति ।
अरे द्वे द्वे विदिक्षु स्यादेकैकं द्वादशारता ॥ ३० ॥

अराणीन्दीवरदलैस्तुल्यान्यब्जपलाशवत् ।
यद्वा यवोदराभानि मातुलुङ्गसमानि च ॥ ३१ ॥

पिपीलिकोदराभानि परस्परसमानि च ।
अन्तरालानि चैतेषां तुल्यमानानि पद्मज ॥ ३२ ॥

ईदृशं मण्डलं शस्तं वासुदेवसमर्चने ।
नारायणे तु यष्टव्या बिन्द्वाद्याः पूर्वमीरिताः ॥ ३३ ॥

अष्टावष्टौ विधातव्याः केसरा नवतिस्सषट् ।
पूर्वेरितानि कोष्ठानि मार्जयित्वा षडुत्तरम् ॥ ३४ ॥

---

1. °अब्जार° M_2 2. केसरोर्व्यां T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रिंशच्च तत्र नाभ्यादि विना पद्मं प्रकल्पयेत् ।
शङ्कुमाहृत्य सूत्रेण तत्समं विभजेद्द्विधा ॥ ३५ ॥

प्रथमं कर्णिकाक्षेत्रं द्वितीयं विभजेत् त्रिधा ।
त्रिष्वाद्यं केसरक्षेत्रं दलक्षेत्रमनन्तरम् ॥ ३६ ॥

तृतीयमन्तरालं स्याद्दलपीठिकयोर्द्वयोः ।
अष्टौ द्वादश वा कुर्याद्भिन्द्वादीन् कमलासन ॥ ३७ ॥

मण्डलं भद्रकं नाम तदिदं सर्वकामदम् ।
चिकीर्षन् स्वस्तिकं बिम्बं क्षेत्रं षट्त्रिंशद्भिर्युतम् ॥ ३८ ॥

[1]संमृज्य तत्र[च] कोष्ठान्येकादश[2] च पातयेत् ।
प्रागायतानि[च] सूत्राण्युदीचीनायतानि च ॥ ३९ ॥

संमृज्यं मध्यतो द्वे द्वे वीथीं प्रागायतामपि ।
तथोदगायतामेकां कुर्यान्निर्गमनं पुनः ॥ ४० ॥

प्रागायताभ्यां कोष्ठाभ्यां बहिः पङ्क्त्या[ह्यु]उदङ्मुखम् ।
प्राचीनं पश्चिमं चापि [3]दक्षिणं मुखमिष्यते ॥ ४१ ॥

तथोद[4]गायतायां स्यादुदङ्[5]प्रत्यङ्मुखं शुभम् ।
दक्षिणाग्रं भवेत्प्राच्यामिति स्वस्तिकमीरितम् ॥ ४२ ॥

द्विधा विभज्य पूर्वोक्तं षट्त्रिंशत्कोष्ठमण्डलम् ।
मध्यतः पद्मकरणमवशिष्टे त्रिधा कृते ॥ ४३ ॥

द्वाभ्यां सुवृत्तं भागाभ्यां भ्रान्तं वृत्तस्य मण्डलम् ।
अविशिष्टेन भागेन त्वन्तरालं[6] भवेद्बहिः ॥ ४४ ॥

---

1. अयं श्लोकः M_1 कोशे नोपलभ्यते । 2. एकं दश च T, P_1, P_2
3. दक्षिणामुख° T, P_1, P_2 4. °आयताभ्यां T, P_1 5. °पङ्क्त्यामुदङ्मुखम् A
6. चान्तरालं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौरमण्डलमेतत् स्यादेतदेवेन्दुमण्डलम् ।
सर्वेष.मेव बिम्बानां पीठाद्याद्यं यथापुरम् ॥ ४५ ॥

विना विधध्यात्पीठादीन् केवलं चक्रपङ्कजम् ।
चक्रं [1]विना वा पद्मं स्यात् कर्तुः शक्तिसमीक्षया ॥ ४६ ॥

मण्डलं शोभयेद्रत्नैः पञ्चवर्णैस्सितादिभिः ।
अथवा चूर्णितै रत्नैर्लोहजैर्वाथ धातुजैः ॥ ४७ ॥

चन्दनागरुकुष्ठादिगन्धचूर्णैरथापि वा ।
शाल्यादितण्डुलैः पिष्टैस्सितैर्व्रीहिभिरप्युत ॥ ४८ ॥

पुटदग्धैरवक्षुण्णैरसितैर्याज्ञिकच्छदैः ।
श्यामैश्शुक्लैरवक्षुण्णैः कौसुम्भैरपि पाटलैः ॥ ४९ ॥

निशाचूर्णैः प्रसूनैर्वा पञ्चवर्णैश्च कालजैः ।
शोभयेत्कर्णिकादीनि यद्वर्णानि चतुर्मुख ॥ ५० ॥

तद्वर्णैरेव [2]रत्नादिद्रव्यैराकारशोभनम् ।
अन्तरालानि सर्वत्र कृष्णैः श्यामैरथापि वा ॥ ५१ ॥

शोभयेत्कर्णिकां पीतैश्शुक्लैर्बिन्दूनि शोभयेत् ।
पाटलैः कर्णिकारेखां कृष्णैर्वा [3]केसरावलिम् ॥ ५२ ॥

द्विधा कृत्वा पूर्वभागं श्वेतैर्भागमथोत्तरम् ।
पीतै रक्तैर्विरामेषु प्रतिकेसरमर्जुनैः ॥ ५३ ॥

बिन्दून्विदध्या[4]द्रत्नैस्तु दलकोटिषु रेखयेत् ।
आद्यन्तानि च बर्हाणां सितरक्तैर्विशोभयेत् ॥ ५४ ॥

---

1. विनापि A 2. वर्णादि॰ T, P_1 ; रत्नादिदीपैः॰: M_1 3. केसरावनिम् T, P_1, P_2 4. रक्तैस्तु T, P_1

पा—9

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बहिरन्तवलयं रक्तैः सितैर्वा भूषयेत्पृथक् ।
श्यामैः पीतैश्च रक्तैश्च नाभिरेखात्रयं क्रमात् ॥ ५५ ॥

द्विनाभित्वे श्यामपीतैः श्यामैरेवैकनाभिके ।
रेखयेदसितैरेव त्वरकोटीरराणि तु ॥ ५६ ॥

रक्तैररान्तवलयं कृष्णैर्नेम्यन्तमेदिनीम् ।
सितैर्नेमिमहीभागं द्विधा कृत्वै[1]कमादितः ॥ ५७ ॥

भागं कृष्णैः सितैरन्यन्नेमिभागं विशेषयेत् ।
पीठं पीतैः पाटलैर्वा सितैर्वा वीथिकां पुनः ॥ ५८ ॥

लतावितानपत्रादियुक्तां चूर्णैश्च चित्रयेत् ।
रक्तैरशोभां तथा पीतैरुपशोभां च शोभयेत् ॥ ५९ ॥

द्वारं शुक्लैश्च रक्तैश्च पीतैः कृष्णैर्यथाक्रमम् ।
शोभयेदुत्तरादींश्च कोणान् कृष्णैरथार्जुनैः ॥ ६० ॥

[2]शंखं च कुर्यात्ते[3]नैव स्वस्तिकं पाटलप्रभम् ।
यद्वा पीतनिभं ; [4]सौरमण्डलं पाटलप्रभम् ॥ ६१ ॥

मण्डलं चैन्दवं शुक्लमन्तरालं च सर्वशः[5] ।
[6]यथेष्टवर्णं सुभगं मण्डले हस्तसंमिते ॥ ६२ ॥

रेखासु चूर्णैरुत्सेधः कनिष्ठांगुलिसंमितः ।
द्विहस्तेऽनामिका मानस्त्रिहस्तेऽनामिकासमः ॥ ६३ ॥

चतुर्हस्ते मण्डले तु तर्जन्यंगुलिसंमितः ।
पञ्चहस्ते [7]समोऽङ्गुष्ठैरित्युत्सेधः प्रदर्शितः[8] ॥ ६४ ॥

---

1. एवमादितः M_1 2. शङ्खांश्च M_1 3. तैरेव P_2 4. सौरं मण्डलं P_2 5. सर्वतः A 6. यथेष्टवर्णसुभगं P_2 7. समाङ्गुष्ठैः M_1 8. प्रकीर्तितः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मण्डलं चित्रयित्वेवमारभेत समर्चनम् ।
आराधयेत्कर्णिकायां मन्त्राध्वानमनन्तरम् ॥ ६५ ॥

तत्त्वाध्वानं केसरेषु वर्णाध्वानं दलेषु च ।
पदाध्वानं नाभिभागे कलाध्वानमरेषु च ॥ ६६ ॥

षष्ठं तु भुवनाध्वानं नेमिभागे चतुर्मुख ।
कर्णिकायां द्वादशसु बिंदुषु द्वादशार्चयेत् ॥ ६७ ॥

अक्षराणि समावाह्य कर्णिकायां समाहिताः ।
यजेत परमात्मानं सकलीकृत्य [1]कृत्यवित् ॥ ६८ ॥

केसरेषु श्रियादींश्च यजेत दळभूमिषु ।
शक्तीस्तदीया दश च द्वे च पूज्या यथाविधि ॥ ६९ ॥

श्रीवत्साद्याश्शक्तयस्तु[2] व्याप्याद्याः परितस्स्थिताः ।
दलान्तवलये पूज्ये विष्णुः प्रथमनाभिगः ॥ ७० ॥

ब्रह्मा द्वितीयनाभिस्थः त्रिणेत्रस्तु तृतीयगः ।
द्वादशारेषु विष्ण्वाद्याः पूज्या द्वादशमूर्तयः ॥ ७१ ॥

अरान्तवलये पूज्या मीनाद्या दश मूर्तयः ।
प्रथमे नेमिवलये शङ्खाद्यायुधपूजनम् ॥ ७२ ॥

पीठकोणचतुष्केषु वराहो नरकेसरी ।
अनन्तश्च हयग्रीवस्तथाग्नेयादिषु क्रमात् ॥ ७३ ॥

[3]पीठिकायां लोकपालाः पुरुहूतादयः क्रमात् ।
पूज्या द्वारेषु चण्डाद्या द्वौ द्वौ प्रतिचतुर्ष्वपि ॥ ७४ ॥

---

1. तत्त्ववित् T, P_1 2. °शक्तयश्च P_2 3. वीथिकायां T, P_1, P_2; वेदिकायां P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ईशानकोणे रथ्यायां विष्वक्सेनं समर्चयेत् ।
गरुडोऽभिमुखस्तिष्ठन् पूर्वद्वाराद्बहिःक्षितौ ॥ ७५ ॥

चक्रं च दक्षिणद्वारि गदां च द्वारि पश्चिमे ।
वलजे चोत्तरे शंखं प्रथमावरणे ततः ॥ ७६ ॥

विष्ण्वादिमूर्तयः पूज्या द्वादशाब्जेषु पङ्कज ।
अनन्तरे चावरणे पद्मेषु द्वादशस्वपि ॥ ७७ ॥

वासुदेवादिकृष्णान्ता मूर्तयो द्वादशैव ते ।
पद्मेष्वावरणे चान्ते द्वादशादित्यपूजनम् ॥ ७८ ॥

एतस्मिन् मण्डले देवं वासुदेवं समर्चयेत् ।
बिंबे नारायणाख्ये तु बिन्दुष्वष्टसु तावताम् ॥ ७९ ॥

अष्टाक्षराणां न्यसनं व्याप्त्याद्याश्शक्तयोऽष्ट च ।
केसरेषु समाराध्य दळेष्वष्टौ श्रियादयः ॥ ८० ॥

अरेष्वष्टसु शङ्खादीन्यायुधान्यष्ट पूजयेत् ।
चतुर्विंशतिपद्मेषु चतुर्विंशतिमूर्तयः ॥ ८१ ॥

त्रिषु चावरणेष्वेषु पूज्यास्तन्मण्डले हरिम् ।
नारायणं समावाह्य यजेत परमेश्वरम् ॥ ८२ ॥

दर्शे च पौर्णमास्यां च संक्रान्तौ श्रवणेषु च ।
द्वादश्यां विषुवे चैव ग्रहणेष्वयनेषु च ॥ ८३ ॥

जन्मऋक्षे विशेषेण मण्डले हरिमर्चयेत् ।
मण्डलाराधनमिदं धर्मकामार्थमोक्षदम् ॥ ८४ ॥

चक्राब्जमण्डले शस्ता दीक्षास्तस्याश्च मण्डलम् ।
एकद्वारं भवेत्तच्च सौम्यं स्यादग्रजन्मनाम् ॥ ८५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चित्रितं श्वेतवर्णेन प्राग्द्वारं पृथिवीभुजाम् ।
रक्तेन चित्रितं द्वारं पाश्चात्यं पीतवर्णकम् ॥ ८६ ॥

विशां भवेद्दाक्षिणात्यमसितं पादजन्मनाम् ।
द्वाराणि चानुलोमानामुत्पादकवदिष्यते ॥ ८७ ॥

सूतस्य वलजं प्राच्यां शूद्राणामिव योषिताम् ।
शिष्यं सुतं वा सर्वज्ञमनसूयं जितेन्द्रियम् ॥ ८८ ॥

आचार्यवंशजन्मानं निग्रहानुग्रहे क्षमम् ।
शान्तिके पौष्टिके चैव कर्मणि क्षमसर्थिनाम् ॥ ८९ ॥

वेदवेदाङ्गतत्त्वज्ञमाचार्यपदकांक्षिणम् ।
देशिकेन्द्रो विधानेन वक्ष्यमाणेन तत्त्ववित् ॥ ९० ॥

कर्षणादिषु सर्वेषु विधानेष्वधिकारिणम् ।
कुर्यान्मण्डलपूजादि कुंभयागावसानिकम् ॥ ९१ ॥

दीक्षायामिव तत्सर्वं कृत्वा शिष्यस्य संनिधौ ।
आज्येन चरुणा चैव समिद्भिः कुसुमैस्तिलैः ॥ ९२ ॥

जुहुयान्मूलमन्त्राभ्यामष्टोत्तरसहस्रकम् ।
शिष्यस्य दक्षिणे हस्ते बद्ध्वा प्रतिसरं गुरुः ॥ ९३ ॥

नृत्तैर्गेयैस्तथा वाद्यैर्वेदघोषैर्नयेन्निशाम् ।
ततः प्रभाते शिष्यं तं स्नातं नूतनवाससम् ॥ ९४ ॥

समाहूय समाराध्य मण्डलं कुम्भमेव च ।
चतुर्विधं निवेद्यान्नं होमं कुर्या¹द्यया निशि ॥ ९५ ॥

---

1. यथाविधि T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कलशांश्चतुरो द्रोणपूर्णान् हेमादिनिर्मितान् ।
मृन्मयान्वा [1]यथावित्तं सूत्रवस्त्रादिवेष्टितान् ॥ ९६ ॥

संस्थाप्य धान्यराशौ तु रत्नादीनि विनिक्षिपेत् ।
आग्नेयकुंभे रत्नानि सर्वाणि विनिवेशयेत् ॥ ९७ ॥

नैऋते सर्वलोहानि गन्धद्रव्याणि मारुते ।
ईशाने तीर्थवारीणि ततो देवं समर्चयेत् ॥ ९८ ॥

अग्निकोणे वासुदेवं संकर्षणमनन्तरे ।
प्रद्युम्नं वायुकोणे तु कोणे रौद्रेऽनिरुद्धकम् ॥ ९९ ॥

ततोऽनु शिष्यं संस्थाप्य पीठे भद्रादिविद्यया ।
शिष्यं प्राङ्मुखमासीनं षडङ्गन्यासपूर्वकम् ॥ १०० ॥

अर्चयित्वा घृतारोपमाचरेदविलंबयन् ।
[तूर्य]घोषेण गेयेन ब्रह्मघोषेण घोषयेत् ॥ १०१ ॥

चतुर्दिक्षु ततो गंधैः पुष्पैस्ताम्बूलवीटिभिः ।
धनैर्बहुविधैरिष्टैस्सदस्यांस्तोषयेद् द्विजान् ॥ १०२ ॥

तोषयेच्च विशेषेण भगवद्भक्तिमाश्रितान् ।
मुहूर्ते शोभने प्राप्ते ब्राह्मणानामनुज्ञया ॥ १०३ ॥

ऋग्वेदमन्त्रितं कुम्भमाग्नेयदिशि निष्ठितम् ।
[2]समुपादाय पाणिभ्यां सूक्तेन पुरुषात्मना ॥ १०४ ॥

द्वादशाक्षरमंत्रेण संपुटी[3]कृत्य मूर्तिना ।
अभिषिञ्चेद् गुरुः शिष्यं कुम्भेन तदनन्तरम् ॥ १०५ ॥

---

1. समालभ्य A, M_2 2. तमुपादाय T, P_1, P_2 3. °कृतमूर्तिना T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नैर्ऋतस्थेन यजुषा मन्त्रितेन समाहितः ।
वैष्णवेन च सूक्तेन ब्रह्मन्नाद्यावसानयोः ॥ १०६ ॥

संकर्षणाख्यमंत्रेण संपुटी[1]कृत्य मूर्तिना ।
कुम्भेन मारुतस्थेन सामघोषितवारिणा ॥ १०७ ॥

प्रद्युम्नसंपुटेनाथ ब्रह्मन्वारुणसामभिः ।
कुम्भेनाथर्ववेदेन पवित्रीकृतवारिणा ॥ १०८ ॥

ईशानकोणसंस्थेन संपुटीकृत्य मूर्तिना ।
अनिरुद्धाख्यमन्त्रेण नारायणसमाह्वया ॥ १०९ ॥

विद्यया कलशैस्सर्वैरभिषिंचेद्यथोदितम् ।
अभिषिक्तस्ततः शिष्यो नवाम्बरधरश्शुचिः ॥ ११० ॥

आचान्तश्चन्दनक्षोदैर्लिप्ताङ्गस्समलङ्कृतः ।
स्रग्वी वासोभिरुष्णीषं बद्ध्वा मकुटसंनिभम् ॥ १११ ॥

उत्तरीयं च बिभ्राणो बिभ्राणो योगपट्टिकाम् ।
अञ्जनाक्तेक्षणद्वन्द्वो बहुमालापरिष्कृतः ॥ ११२ ॥

निरीक्षितादर्शतलो ब्राह्मणैः स्वस्तिवाचितैः ।
दत्तप्रसववृष्टिश्च श्वेतव्यजनवीजितः ॥ ११३ ॥

दत्तोपानत्सितच्छत्रो दत्ताश्वगजवाहनः ।
नीराजितश्च कल्याणो जायते गुर्वनुग्रहात् ॥ ११४ ॥

अनेनैवाभिषेकेण लब्ध्वाचार्यपदं स्वयम् ।
आचार्यकृत्यमखिलं कर्तुमिच्छेच्चतुर्मुख ॥ ११५ ॥

---

1. °कृत T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गुरवे दक्षिणां दद्याद् गोभूहेमादिकं तथा ।
यथाविभवविस्तारं ततो हस्त्यादिवाहनम् ॥ ११६ ।

आरुह्य धवलच्छत्रश्वेतचामरवीजितः ।
आचार्यचिह्नैरखिलैर्लक्षितो ब्राह्मणैस्सह ॥ ११७ ॥

रथयानेनाग्रहारं प्रादक्षिण्येन रथ्यया ।
गत्वा देवस्य सदनं प्रविशेत्स्वस्य धाम वा ॥ ११८ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
मण्डलाराधनाचार्याभिषेकविधिर्नाम सप्तमोऽध्यायः ॥

अष्टमोऽध्यायः ॥

महाभिषेकः ॥

ब्रह्मोवाच[1]—

राज्ञो राष्ट्रस्य मर्त्यानां यदभ्युदयसाधनम् ।
यच्चोत्पातप्रशमनं व्याधीनां चापनोदनम् ॥ १ ॥

यदभिप्रेतमखिलं साधयत्यविलम्बितम् ।
कुर्वतां भगवंस्तन्मे तदर्चनमनुत्तमम् ॥ २ ॥

कथ्यतां मयि चेदस्ति दया परमपूरुष ।
रहस्यमपि तन्मह्यमाख्येयं जगतो हितम् ॥ ३ ॥

श्रीभगवान् :—

महाभिषेको नामाग्र्यं स्नपनं [2]मम संमतम् ।
विषुवे सङ्क्रमे चैव ग्रहणे चायनद्वये ॥ ४ ॥

---

1. P_2 omits उवाच 2. कमलासन P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वादश्यां श्रवणे चैव तथा कर्तुर्द्विजन्मसु ।
दिनत्रये व्यतीपाते रोहिण्यां च तिथित्रये ॥ ५ ॥

दर्शे च पौर्णमास्यां च पुनर्वस्वोर्विशेषतः ।
पञ्चम्यां शुभनक्षत्रे तिथिवारेषु चाब्जज ॥ ६ ॥

प्रयुज्यमानं सर्वार्थिसाधनं सर्वशान्तिदम् ।
कर्तव्यं तत् त्रिधा ब्रह्मन्नुत्तमाधममध्यमम् ॥ ७ ॥

जात्युत्कर्षं धनोत्कर्षमथवावेक्ष्य तत्त्ववित् ।
प्रयुञ्जीतोत्तमं स्नानमितरेष्वितरद्भवेत् ॥ ८ ॥

पूर्वेद्युरङ्कुरन्यासो बद्ध्वा कौतुकमङ्गलम् ।
अधिवासश्च बिम्बस्य सद्यो वा सकलं भवेत् ॥ ९ ॥

स्नपनं प्रतिमायां स्यादधिवासश्चतुर्मुख ।
तीर्थप्रतिकृतौ वापि पूर्वालाभेऽ[1]धिवासयेत् ॥ १० ॥

यद्वोत्सवार्थप्रतिमां बलिबिम्बमथापि वा ।
बिम्बं कर्मार्थमथवा [2]असत्सु कुशकूर्चकम् ॥ ११ ॥

लेपमृन्मयभित्तिस्थ[3]पटस्थेषु च दर्पणम् ।
कूर्चं मूर्त्यन्तराभावे क्लृप्तिरेषा सनातनी ॥ १२ ॥

प्रासादस्याग्रतः कुर्यात्ततः स्नपनमण्टपम् ।
दशहस्तप्रविस्तारं द्विगुणेनायतं शुभम् ॥ १३ ॥

चतुर्द्वारं चतुर्दिक्षु चतुस्तोरणभूषितम् ।
सर्वावरण[4]भूष्वे[5]तद्दिक्षु सर्वासु वा भवेत् ॥ १४ ॥

---

1. अधिवासनम् A, P_1 2. तेष्वसत्सु च कूर्चकम् A, P_1 3. पद्मस्थेषु T
4. °भूष्वेव P_2, M_2 5. P_2 omits तद्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वल्लसे वा मण्टपे कुर्यादवकाशानुसारतः ।
विभज्य तत्त्रिधा कुर्यात्तृतीयेंऽशेऽथ पश्चिमे ॥ १५ ॥

अवलम्ब्य ब्रह्मसूत्रं चतुरश्रं समन्ततः ।
चतुर्हस्तां स्नानवेदिं हस्तोत्सेधां शिलादिभिः ॥ १६ ॥

उपानहादिसंयुक्तं दर्शनीयां सलक्षणाम् ।
उपरिष्टाच्च वलयं वृत्तं वा चतुरश्रकम् ॥ १७ ॥

प्रादेशेन [1]च विस्तीर्णं ततमष्टाङ्गुलेन वा ।
षडङ्गुलेन वा ब्रह्मन् चतुरङ्गुलमुन्नतम् ॥ १८ ॥

वेदिकोपरि तद्धाराकुल्यामाश्वश्रमेदिनीम् ।
मृन्मयादिषु बिम्बेषु बहिर्वेदिप्रकल्पनम् ॥ १९ ॥

[2]एकबेरे तु न बहिरस्नानवेदीप्रकल्पनम् ।
दुकूलक्षौमवसनैर्मण्टपं सर्वतोदिशम् ॥ २० ॥

शोभयेत्पूर्णकुम्भाद्यै[3]स्तोरणानि विभूषयेत् ।
वेष्टयेद्दर्भमालाभिर्मुक्तादामानि लम्बयेत् ॥ २१ ॥

आस्थानमण्टपे स्नानमथ चैवार्घमण्टपे ।
तोरणादि न कर्तव्यं गृहार्चायां तथैव च ॥ २२ ॥

नित्ये च स्नपने चापि कौतुकं चाङ्कुरार्पणम् ।
निशाचूर्णैर्न स्नपनमिष्यते मण्टपस्थले ॥ २३ ॥

गोमयाम्भोभि[4]रालिप्य सुधाचूर्णैश्च भूषयेत्[5] ।
दीपानारोपयेत्तत्र न्यसेदङ्कुरपालिकाम्[6] ॥ २४ ॥

---

1. प्र° P_2 2. अयमर्धः P_2 कोशे दृश्यते । 3. तोरणैश्च P_1, P_2; तोरणाद्यैः T
4. आलिप्ते P_2 5. शोभयेत् P_2 6. °पालिकाः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कोणे रौद्रे मण्टपस्य जलद्रोण्यादिभाजनम् ।
कल्पयेद्गालितस्वादु सुगन्धिजलपूरितम् ॥ २५ ॥

पवमानादिभिस्सूक्तैर्मन्त्रितं सापिधानकम् ।
वेदिदक्षिणतो भूमावुपस्नानाम्बुकल्पनम् ॥ २६ ॥

अर्घ्यादिदीपपर्यन्तं पूजाद्रव्याणि कल्पयेत् ।
चन्दनार्द्राणि सूत्राणि [1]चतुर्दश निपातयेत् ॥ २७ ॥

प्रागायतानि तावन्ति सूत्राण्येव चतुर्मुख ।
उदगायतानि सन्त्येवं कोष्ठान्येकोनसप्ततिः ॥ २८ ॥

शतं च तेषामायामं विस्तारं षोडशाङ्गुलम् ।
धान्यपीठानुरूपं वा कलशानां चतुर्मुख ॥ २९ ॥

दिक्ष्वष्टासु तथा मध्ये प्रत्येकं नवभूमिषु ।
नव कोष्ठानि कुम्भानां पदानि कमलासन ॥ ३० ॥

एवमेकाधिकाशीतिकोष्ठानि कलशास्पदम् ।
अन्यान्यष्टोत्तराशीतिरथ्यां संमृज्य कल्पयेत् ॥ ३१ ॥

व्रीहिभिः पीठिकां कुर्यात्कोष्ठभूषु पृथक्पृथक् ।
आढकेन तदर्धेन तदर्धार्धेन [2]वा भवेत् ॥ ३२ ॥

पीठिकाधान्यतुर्यांशास्तण्डुलाः पीठिकोपरि ।
तत्तुर्यांशास्तिलास्तेषां भवेयुरुपरि स्थिताः ॥ ३३ ॥

[3]द्वे द्वे कुशाग्रे [4]प्रत्यस्येत्पीठिकासु चतुर्मुख ।
[5]सौवर्णा राजतास्ताम्रा मृन्मया वा यथावसु ॥ ३४ ॥

---

1. चतुर्दिक्षु M_1 2. भावयेत् A, P_2 3. द्वौ द्वौ कुशाग्रौ T, P_1
4. प्रत्यस्य वीथिकासु M_2, P_2 5. सौवर्ण° P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कलशा लक्षणोपेताः पक्वबिम्बफलोपमाः ।
अच्छिद्रास्स्वनवन्तश्च कालमण्डलवर्जिताः ॥ ३५ ॥

अभिन्ना मृन्मयाः कुम्भाः पाषाणस्फोटवर्जिताः ।
द्रव्यकुम्भा द्रोण[1]पूर्णास्त[2]दर्धार्धेन वाथवा ॥ ३६ ॥

[3]पादेन कलशाश्शिष्टाः पूर्या वार्धाढकेन तु ।
[4]प्रक्षाल्य विष्णुगायत्र्या द्रव्यकुम्भांस्तथेतरान् ॥ ३७ ॥

स्थापयित्वा करतले सव्येऽसव्येन पाणिना ।
इन्द्रं नत्वेति मन्त्रेण तन्तुना परिवेष्टयेत् ॥ ३८ ॥

तन्तुना वेष्टितानां स्यादन्तरालं यवान्तरम् ।
अर्धाङ्गुलान्तरालं स्याद्द्वैकाङ्गुलमन्तरम् ॥ ३९ ॥

कलशास्पदमेदिन्याः पश्चिमे धरणीतले ।
धान्यपीठं विधायास्मिन् कलशानधिवासयेत् ॥ ४० ॥

धान्यपीठे ततस्तस्मिन् कुशानास्तीर्य विश्वतः ।
प्रागग्रानुदगग्रांश्च तेषु कुम्भानधोमुखान् ॥ ४१ ॥

ओमित्युच्चार्य [5]विन्यस्येन्नवभूषु यथोत्तरम् ।
[6]न्यस्तानामपि कुम्भानामुपरिष्टाद्यथापुरम् ॥ ४२ ॥

दर्भैस्तृणीयादाचार्यो मन्त्रेण परमेष्ठिना ।
प्रोक्षयेदर्घ्यतोयेन प्राङ्मुखः पुरुषात्मना ॥ ४३ ॥

विश्वमन्त्रेण विकिरेदक्षतान्यधिवासिते ।
उत्तानितेषु कुम्भेषु निवृत्त्याह्वानविद्यया ॥ ४४ ॥

---

1. °पूर्याः M_1 2. तदर्धेनाथवाथवा । P_2 3. पादोनकलशाः T 4. अयमर्धः A कोशे नोपलभ्यते । 5. विन्यस्य नव° P_2 6. नवानामपि A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]अस्थि रत्नं सिरा तन्तुर्मांसं मृत्स्ना प्रकीर्तिता[2] ।
शोणितं रक्तमृद्भिस्तु जलं मेदस्तथैव च ॥ ४५ ॥

कूर्चं [3]तु [4]शुक्लमित्युक्तं चर्मणाम्बरवेष्टनम् ।
तत्तत्प्रतिकृति[5]र्जीवं क्रमादेवं[6] स्मरेद् [7]द्विजः ॥ ४६ ॥

सर्पिषाष्टोत्तरशतं विष्णुगायत्रिया कृते ।
होमे हुताज्यशेषेण स्नपनद्रव्यसेचनम् ॥ ४७ ॥

घृतादिस्नपनद्रव्यैरस्त्र[8]पूतैः परिष्कृतैः ।
पूरयेत्कलशांस्तांस्तान् मन्त्रैः पूर्णान् समुद्धरेत् ॥ ४८ ॥

सर्वमन्त्रेण विश्वात्मन् [9]कुम्भान् सप्तदशोद्यतान् ।
द्रव्यकुम्भान्धान्यपीठे स्थापयेद्विष्णुपूर्वया ॥ ४९ ॥

गायत्र्या च चतुष्षष्टि द्वादशाक्षरविद्यया ।
उदकुम्भान् क्रमेणान्यान् प्राङ्मुखो वाप्युदङ्मुखः ॥ ५० ॥

नवके मध्यमे स्थाने [10]स्थापनीये तु मध्यमे ।
घृतकुम्भं स्थापयित्वा पदे [11]सौत्रामणेस्ततः ॥ ५१ ॥

उष्णोदकुम्भं [12]विन्यस्येद्रत्नकुम्भमनन्तरे ।
फलकुम्भं यमपदे लोहकुम्भं [13]च नैर्ऋते ॥ ५२ ॥

प्राचेतसे मार्जनाम्भः कुम्भं गन्धाम्बुमारुते ।
अक्षताम्बु च कौबेरे पदे शार्वे यवोदकम् ॥ ५३ ॥

---

1. ४५, ४६ श्लोकद्वयं P_1 कोशे नोपलभ्यते । 2. प्रकीर्तितम् A, T, P_2
3. वै P_2 4. शुक्रम् M_1 5. जीवः P_2 6. क्रमादेवं P_2 7. बुधः P_2
8. वस्त्र° M_1 9. कूर्चान् M_2 10. स्थापनीयास्तु P_2 11. सौत्रामणी P_2
12. विन्यस्य P_2 13. तु P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राच्यां तु कुम्भनवके मध्ये पाद्यघटं [1]पदे ।
अर्घ्यकुम्भं पदे याम्ये पदे प्राचेतसे पुनः ॥ ५४ ॥

उपस्पर्शनपानीयं पञ्चगव्यमुदक्पदे ।
आग्नेयकुम्भनवके मध्ये दधिघटं पदे[2] ॥ ५५ ॥

नैर्ऋते मध्यतः क्षीरं [3]वायवीये घटं मधोः ।
कषायकुम्भमीशाने सर्वत्र परितो घटान् ॥ ५६ ॥

शुद्धोदकांश्चतुष्षष्टिमष्टावष्टौ निवेशयेत् ।
सप्तभिः पञ्चभिर्वापि यद्वा दर्भैस्त्रिभिः [4]कृतान् ॥ ५७ ॥

कूर्चान् कुम्भेष्ववागग्रान् निक्षिपेल्लक्षणान्वितान् ।
महाकुम्भे कुशैः कूर्चं चतुर्विंशतिभिः कृतम् ॥ ५८ ॥

चक्रमन्त्रेण तान् [5]सर्वान् शरावैरपिधापयेत् ।
वासोभिर्द्रव्यकलशान् 'युवा सुवास' इत्यृचा ॥ ५९ ॥

कण्ठेषु वेष्टयेदन्यान् वासोभिश्छादयेन्नवैः ।
अधीयानैस्त्रयीविद्यां विद्वद्भिर्ब्राह्मणैस्सह ॥ ६० ॥

ऋत्विग्भिस्सह देवस्य यायान्मन्त्रविदन्तिकम् ।
ऋत्विजो देवमुत्थाप्य गुरुश्चोत्तिष्ठविद्यया ॥ ६१ ॥

साम्ना रथन्तराख्येन ब्रह्मयाने गुरुः स्वयम् ।
स्थापयेदृत्विजैस्सार्धं ब्राह्मणैर्वेदपारगैः ॥ ६२ ॥

शिबिकायां स्थापयित्वा मृद्वास्तरणकल्पिते ।
निवेशयेयुः प्रतिमां स्नानवेदीतले [6]शुचौ ॥ ६३ ॥

---

1. न्यसेत् M_2, P_2 2. न्यसेत् P_1, P_2 3. वायव्ये घटमम्मयम् M_1
4. क्रमात् T 5. कुम्भान् P_1, P_2 6. शुभे A, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुण्याहं वाचयेत् पश्चात्पञ्चकालपरायणैः ।
अयुग्मैस्तोषयेद्वित्तैस्तान् विभूत्यनुसारतः ॥ ६४ ॥

द्वारतोरणकुम्भादीन् समभ्यर्च्य यथापुरम् ।
द्वारेष्वध्ययनं नृत्तं वाद्यं गेयं प्रवर्तयेत् ॥ ६५ ॥

सर्पिषा जुहुयादग्नौ यावत् कलशसंख्यया ।
मूलमन्त्रेण जुहुयाच्चरुं पूर्वोक्तसंख्यया ॥ ६६ ॥

नृसूक्तेन समभ्यर्च्य कलशान् स्थापितान् गुरुः ।
अर्घ्यादिभिस्तथा देवं घृतारोपणमाचरेत् ॥ ६७ ॥[1]

दन्तकाष्ठं [2]तथा तैलं गन्धामलकवारि च ।
वस्त्रं दत्त्वा चोत्तरीयमर्घ्याद्यैरर्चयेत्पुनः ॥ ६८ ॥

दीपान्तमर्चनं कृत्वा पाद्यकुम्भमुखैर्घटैः ।
घृतकुम्भावसानैश्च स्नापये[3]द्देशिकः क्रमात् ॥ ६९ ॥

छिन्नैकतन्तुमुद्धृत्य पाद्यकुम्भं समर्चितम् ।
पुष्पैर्दद्यात्करतले देशिकेन्द्रस्य मूर्तिपः ॥ ७० ॥

कूर्चमादाय कुम्भस्थं [4]तद्धस्ते देशिकोत्तमः ।
[5]अर्वागग्रेण कूर्चेन तीर्थैर्ब्रह्मादिभिस्ततः ॥ ७१ ॥

[6]शुद्धैर्वैष्णवगायत्र्या स्नापयेत्पाद्यवारिभिः ।
तद्विष्णोरिति मन्त्रेण स्नापयेदर्घ्यवारिभिः ॥ ७२ ॥

न ते विष्णो इति श्रुत्या कुम्भेनाचमनाम्बुना ।
विष्णोः कर्मेति मन्त्रेण पञ्चगव्याभिषेचनम् ॥ ७३ ॥

---

1. एतदनन्तरं, 'सप्तधातूनि देवानां कुम्भेषु कलशेषु च। सर्वतः संस्मरेद् ब्रह्मन्नाचार्यस्तदनु प्रभोः॥' इत्ययं श्लोकः A, P_2 कोशयोरधिको दृश्यते। 2. गन्धतैलं तथामलकवारि च P_1,P_2 3. देशिकोत्तमः P_1,P_2 4. स्वहस्ते P_1 5. अवागग्रेण T,P_2 6. शुभैः P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दधिक्राविण्णयजुषा दध्ना देवाभिषेचनम् ।
साम्ना पयोवृतेनैव पयसा मधुना पुनः ॥ ७४ ॥

मधुवातेति मन्त्रेण स्नपनं मधुविद्विषः ।
ओषध्य इति मन्त्रेण [1]कषायाम्भोभिषेचनम् ॥ ७५ ॥

तद्विष्णोरिति मन्त्रेण स्नानमुष्णाम्बुधारया ।
फलिनीत्यनुवाकेन स्नपनं फलवारिभिः ॥ ७६ ॥

शं नो देवीरिति स्नानं मन्त्रितैर्मार्जनाम्बुभिः ।
[2]सावित्र्याक्षतपाथोभिस्त्रातारमिति सामभिः ॥ ७७ ॥

रत्नोदकैर्लोहतोयैर्महाव्याहृतिविग्रहया ।
गन्धद्वारेति मन्त्रेण स्नपनं गन्धवारिणा ॥ ७८ ॥

[3]शतधारेति मन्त्रेण स्नानं स्याद्यववारिभिः ।
[4]घृतस्नातेति मन्त्रेण घृतेन स्नपनं हरेः ॥ ७९ ॥

अथवा पौरुषैः सूक्तैः क्रमात्पाद्यादिवारिभिः ।
ऋग्भिष्षोडशभिः स्नानमृचेदं विष्णुरित्यपि ॥ ८० ॥

अष्टाक्षरेण[वा]यद्वा द्वादशाक्षरविग्रहया ।
विष्णुगायत्रिया वापि स्नानं यद्वा चतुर्मुख ॥ ८१ ॥

स्वमूर्तिविग्रहया वापि स्नपनं मधुविद्विषः ।
क्षालनं च घृतस्नाने सामान्यैरुष्णवारिभिः ॥ ८२ ॥

पाद्यादिद्रव्यकुम्भानामुद्धारेष्वन्तरान्तरा ।
शुद्धोदकुम्भैरन्यैश्च स्नानमष्टभिरष्टभिः ॥ ८३ ॥

---

1. कषायैरभिषेचयेत् M_2, A; कषायैरभिषेचनम् M_1 2. 'सावित्र्याक्षततोयेन अग्नआयाहि मन्त्रतः । रत्नोदकैरिवेत्वेति लोहतोयेन सेचयेत् ॥' अयं श्लोकः M_2 कोशे दृश्यते । 3. शतधारेण P_2 4. घृतेन स्नापयेद्देवं ततः शक्रमसीत्यृचा A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टाक्षरेण मन्त्रेण भवेद्देवस्य पङ्कज ।
उपस्नानं तथा प्लोतं वस्त्रं चैवोत्तरीयकम् ॥ ८४ ॥

अर्घ्यं पाद्यं तथाचामं [1]गन्धं पुष्पं च धूपकम् ।
दीपं चैतानि देयानि प्रतिद्रव्यघटाप्लवम् ॥ ८५ ॥

उद्धरेद् द्रव्यकलशान् विष्णुगायत्रिविद्यया ।
शुद्धोदकांश्च कलशान् द्वादशाक्षरविद्यया ॥ ८६ ॥

हरिद्रातण्डुलैस्स्वर्णचूर्णैः कुम्भान् ससूत्रकान् ।
पूरयेन्नव निर्दोषान् सप्त वा पञ्च वाथवा ॥ ८७ ॥

त्रीण्येककुम्भमथवा ते च स्थाप्याः परिव्यये ।
सापिधानेषु कुम्भेषु सकूर्चेषु समर्चयेत् ॥ ८८ ॥

श्रियं ; कुम्भान् समुद्धृत्य श्रीसूक्तेनाभिषेचयेत् ।
पूर्णाहुतिर्यथा होमे चूर्णैः स्नानं तथा भवेत् ॥ ८९ ॥

वासुदेवतनुभ्रष्टान् चूर्णान् परमपावनान् ।
ये वहन्ति शिरोभिस्ते[2] नरा निर्धूतकल्मषाः ॥ ९० ॥

ते यान्ति वैष्णवं[3] स्थानं पुनरावृत्तिवर्जितम्[4] ।
अभिषेकजलं विष्णोर्ये पिबन्ति वहन्ति [5]च ॥ ९१ ॥

ते सर्वतीर्थाभिषेकफलमश्नुवते महत् ।
कृत्वा प्रदक्षिणं नत्वा स्तुत्वा स्तोत्रैश्च देशिकः ॥ ९२ ॥

ततस्सहस्रधाराभिः स्नापयित्वा जर्नादनम् ।
नीराजनान्तमिष्ट्वैवं ततोऽलङ्कारविष्टरे ॥ ९३ ॥

---

1. फलं M_2 2. तैः P_2 3. परमं P_2 4. ०वर्जिताः M_1
5. वा P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजेत मात्रादानान्तं मात्रा[1]संख्या परिव्ययया ।
खारि द्रोणं तदर्धं वा देयास्स्युर्देशिकाय ते ॥ ९४ ॥

चतुर्विधानि चान्नानि भोजयेद्भोजनासने ।
होमान्तमर्चयेद्देवं देशिकेन्द्रो यथाविधि ॥ ९५ ॥

स्नपनान्ते ततो देवं सुखमासीनमासने ।
याचेत यजमानोऽपि सर्वमिष्टं जनार्दनम् ॥ ९६ ॥

दक्षिणां देशिकेन्द्राय सौवर्णशतनिष्ककाम् ।
तदर्धं पादमथवा दद्याद्वित्तानुसारतः ॥ ९७ ॥

कुर्यादाचार्यसात्सर्वं द्रव्यं पूजाङ्गमाहृतम् ।
वस्त्रादिकं तथान्येषां ऋत्विजां तुष्टिमावहेत् ॥ ९८ ॥

नृत्तगेयरतानां च तथा स्वाध्यायशालिनाम् ।
ब्राह्मणानां यथा तुष्टिः तथा [2]वित्तविसर्जनम् ॥ ९९ ॥

अधमोत्तम[3]मेवं च स्नपनं परिकीर्तितम् ।
कोणेषु [4]कुम्भान् द्वात्रिंशत् केवलोदकपूरितान्[5] ॥ १०० ॥

तैर्विहीनं भवेत् स्नानं ज्ञेयं [6]चाधममध्यमम् ।
शुद्धोदकुम्भैर्यद्धीनं सर्वैस्तदधमाधमम् ॥ १०१ ॥

पाद्यकुम्भे तथा चार्घ्ये तथोपस्पर्शनाम्भसि ।
कुम्भे कषायफलयोः कुम्भे चाक्षतगन्धयोः ॥ १०२ ॥

एकैकस्मिन् घटेष्वेषु द्रव्याणामष्टकं क्षिपेत् ।
पाद्यादिषु क्रमाद्द्रव्यं तत्प्रमाणं च कथ्यते ॥ १०३ ॥

---

1. °संज्ञा M_1 2. वित्तं विसर्जयेत् A 3. °एतत्तु T, P_1, P_2
4. कुम्भैः P_2 5. °पूरितैः P_2 6. त्वधम° P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तुलसी च तथा पद्मं दूर्वा च स्यात्तथाऽक्षतम् ।
श्यामाकं विष्णुपर्णं च बिल्वपत्राणि चन्दनम् ॥ १०४ ॥

[1]शिष्टानि मुष्टिमात्राणि तत्पलं चन्दनस्य च ।
सिद्धार्थमक्षतं चैव कुशाग्रं च तथा फलम् ॥ १०५ ॥

यवास्तिलाश्चन्दनं च प्रसवाश्च सुगन्धयः ।
फलं सुपक्वमेतेषु चन्दनं च त्रिनिष्ककम् ॥ १०६ ॥

शिष्टानि मुष्टिमात्राणि तक्कोलं [2]चम्पकस्य च ।
मुकुलं घनसारं च जातिरेलाफलानि च ॥ १०७ ॥

लवङ्गत्वक् चन्दनं च पुष्पाणि सुरभीणि च ।
फलार्धपरिमाणानि प्रत्येकं कमलासन ॥ १०८ ॥

शमीपलाशखदिरं बिल्वाश्वत्थ[3]विकङ्कतम् ।
औदुम्बरश्च न्यग्रोधश्शम्यादीनां [4]त्वचस्तथा ॥ १०९ ॥

प्रत्येकं पलमानास्स्युः कदलीबीजपूरकम् ।
आम्रमामलकं बिल्वं नालिकेरफलं[5] तथा ॥ ११० ॥

पनसं मातुलुङ्गं च भिन्नान्येतानि निक्षिपेत् ।
नीवारवेणुशालीनां प्रियङ्गुयवयोरपि ॥ १११ ॥

कङ्कुषाष्टिकयोश्चैव गोधूमस्य च तण्डुलाः ।
मुष्टिप्रमाणं विज्ञेयाः कुङ्कुमं कोष्ठचन्दने ॥ ११२ ॥

अगरूशीरमूलानि ह्रीबेरं गिरिसम्भवम् ।
मांसी मुरं च प्रत्येकं पलमात्राणि पद्मज ॥ ११३ ॥

---

1. द्रव्याणि चन्दनं मुक्त्वा मुष्टिमात्राणि तत्पलम् T, P_1 P_2 2. चन्दनस्य P_2
3. °विकङ्कताः M_2, P_2 4. त्वचः स्मृताः T, P_2 5. फलानिच M_2, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

माणिक्यं पद्मरागं च नीलं वज्रं च पुष्यकम् ।
प्रवालं मौक्तिकं चैव तथा मरकतं क्षिपेत् ॥ ११४ ॥

वैडूर्यं नवरत्नानि तानि रत्नघटोदके ।
सुवर्णं रजतं ताम्रं सीसकं त्रपुकं तथा ॥ ११५ ॥

कांस्यमायसक्षारं च सप्तलोहघटोदके ।
प्रत्येकं निष्कमानानि; रजनी सूर्यवर्तिनी ॥ ११६ ॥

सहदेवी शिरीषं च सदाभद्रं कुशाभ्रकम ।
मार्जनानि षडेतानि मुष्टिमात्राणि निक्षिपेत् ॥ ११७ ॥

यवा वेणुयवाश्चैव व्रीहयश्चेति तत् त्रिकम् ।
यवोदके निधातव्यं प्रत्येकं कुडपं भवेत् ॥ ११८ ॥

पञ्चगव्यानि [1]सङ्गृह्य मृत्पात्रे नूतने शुभे ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च पञ्चमम् ॥ ११९ ॥

कपिलाया जराया वा पञ्चगव्यं प्रशस्यते ।
तयोरभावे त्वन्यासां गवां गव्यं विधीयते ॥ १२० ॥

नार्ताया न च गर्भिण्या न वृद्धायाः कदाचन ।
नावत्साया उपादेयं धेनोर्मूत्रं शकृद्द्वयम् ॥ १२१ ॥

भूमिष्ठं गोमयं ग्राह्यं सोष्णं कृम्याद्यदूषितम् ।
निष्पीड्य सम्यग्गृह्णीयाद्गोमयस्य रसं पुनः ॥ १२२ ॥

सद्यस्तप्तं घृतं शुद्धमहोरात्रोषितं दधि ।
क्षीरं ग्राह्यमतप्तं च दशाहाज्जन्मनः परम् ॥ १२३ ॥

---

1. गृह्णीयात् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गोमूत्रं विष्णुगायत्र्या गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥ १२४ ॥

घृतं शुक्रमसीत्येवं गव्यानि सह योजयेत् ।
विष्णुगायत्रिया यद्वा पञ्चोपनिषदैस्तु वा ॥ १२५ ॥

परमेष्ठी शकृन्मन्त्रे गोमूत्रस्य तु पुरुषः[1] ।
विश्वमन्त्रो भवेद्दध्नो निवृत्तिस्सर्पिषो भवेत् ॥ १२६ ॥

पयसस्सर्वमन्त्रः स्यात्सर्वेषामष्टवर्णकम् ।
[2]दधि द्विगुणमाधारात्पीयूषं त्रिगुणं ततः ॥ १२७ ॥

षड्गुणं मूत्रमेतस्माच्छकृद्वारि चतुर्गुणम् ।
स्नपने कथितं मानं प्रोक्षणे पञ्चकं समम् ॥ १२८ ॥

गोमयेन समं मूत्रं दधि स्याद् द्विगुणं ततः ।
ततश्चतुर्गुणं सर्पि[3]स्तस्मादष्टगुणं पयः ॥ १२९ ॥

प्राशने पञ्चगव्यानां प्रमाणमिदमीरितम् ।
द्रोणमानं पञ्चगव्यं घृतमानं च तत्समम्[4] ॥ १३० ॥

तादृगेव दधि क्षीरं [5]तादृगेव च माक्षिकम् ।
अर्धं वा स्यादाढकं वा न्यूनं चेदासुरं भवेत् ॥ १३१ ॥

गृहार्चास्नपने न्यूनं [6]प्रस्थेनैव प्रकल्पयेत् ।
पाद्ये द्रव्यान्तरालाभे दूर्वा चार्घ्येस्व[7]सर्षपः ॥ १३२ ॥

शस्तमाचमनीये तु तक्कोलं मार्जनाम्भसि ।
सहदेवीगन्धतोये चन्दनक्षोद इष्यते ॥ १३३ ॥

---

1. पूरुषम् P_2 2. दध्नो द्विगुणमाधारः T, P_1 3. ०सर्पिषः P_2
4. तादृशम् P_2 5. तावदेव P_1, P_2 6. व्यस्तेनैव M_1 7. ०अथ० T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कषायतोये चाश्वत्थश्शीतमुष्णोदकेऽसति ।
रत्नोदके वज्रमेकं कदल्येका फलाम्भसि ॥ १३४ ॥

सुवर्णं लोहपानीये शालितण्डुलमक्षते ।
यवोदकघटे व्रीहिश्शस्यते कमलासन ॥ १३५ ॥

[1]अलाभे दधिनि क्षीरं [2]क्षीरालाभे भवेद्दधि ।
मधुन्यलाभे[3] सर्पींषि तदलाभे भवेन्मधु ॥ १३६ ॥

अलाभे पञ्चगव्यानां घृतमेवैकमिष्यते ।
पञ्चगव्येषु यस्य स्यादलाभस्तत्पदे घृतम् ॥ १३७ ॥

स्नपनं मध्यमं वक्ष्ये [4]यथा तदवधारय ।
मध्ये पूर्वोक्तकलशस्थापने विहिते सति ॥ १३८ ॥

द्वौ द्वौ बहिस्ततः पङ्क्तीस्संमृज्य कमलासन ।
परितो वीथिकाः[5] कुर्यात् बहिस्ताभ्यो घटास्पदम् ॥ १३९ ॥

[6]पञ्चाशतमथैकोनं कलशानां विनिक्षिपेत् ।
पूर्वादिषु प्रतिदिशं चतसृष्वम्बुजासन ॥ १४० ॥

चत्वारो द्रव्यकलशास्तेषु शुद्धोदकाः परे ।
गुलोदकं चेक्षुरसं नालिकेरजलं तथा ॥ १४१ ॥

शान्तिवारि च पूर्वादौ क्रमान्न्यस्येच्चतुष्टयम् ।
गुलाभावे चेक्षुरसस्तदभावे[7] गुलोदकम् ॥ १४२ ॥

गुलमानं पलाशीतिरर्धमर्धार्धमेव वा ।
नालिकेरजलाभावे तत्स्थाने क्षीरमिष्यते ॥ १४३ ॥

---

1. अलब्धे P_2 2. क्षीराभावे तु तद्दधि P_1, P_2 3. मधुन्यलब्धे P_2
4. यथावदवधार्यताम् M_2, P_2 5. वेदिकाः M_2 6. पञ्चाशतमथैकोनकलशान् दिक्षु विनिक्षिपेत् P_1 7. ॰तस्याभावे T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तुलसीवेणुनीवारयवाश्च श्वेतसर्षपाः ।
तिलाश्च षट् शान्तिकुम्भे द्रव्याणि तुलसी भवेत् ॥ १४४ ॥

मुष्टिमात्रं द्रव्यमन्यत् पृथ[1]क्कुडुबसंमितम् ।
तुलसीदलमन्येषामलाभे ग्राह्यमिष्यते ॥ १४५ ॥

गुलोदकादिभिर्द्रव्यैस्स्नपने विहिते सति ।
पाद्यादिद्रव्यकलशैर्घृतान्तस्स्नापयेद्धरिम् ॥ १४६ ॥

मधुवातेति मन्त्रेण स्नपनं गुलवारिणा ।
मधु नक्तमिति स्नानमैक्षवेन रसेन च ॥ १४७ ॥

मधुमान्न इति स्नानं नालिकेराम्बुना पुनः ।
वेदाहमिति मन्त्रेण शान्तिद्रव्यघटाम्बुभिः ॥ १४८ ॥

जितं त इति शुद्धेन वारिणा स्नपनं हरेः ।
मध्यमोत्तममुद्दिष्टं मध्यमे मध्यमं पुनः ॥ १४९ ॥

चतुर्भिर्द्रव्यकलशैः स्नानं शुद्धोदकैर्विना ।
बहिष्ठैर्देवदेवस्य मध्यमाधममाप्लवः ॥ १५० ॥

सर्वैरेव द्रव्यकुम्भैः सर्वैश्शुद्धोदकैर्विना ।
[2]उत्तमं स्नपनं वक्ष्ये यथावदव[3]धार्यताम् ॥ १५१ ॥

विदिक्षु दिक्षुवत् कुम्भाः स्थाप्याः पूर्वोक्त[4]संख्यया ।
तेषु च द्रव्यकलशाश्चत्वारोऽन्ये चतुर्मुख ॥ १५२ ॥

शुद्धोदकाः विदिश्यग्रेविन्यसेन्मङ्गलोदकम् ।
इन्द्रवल्ल्यङ्कुराश्वत्थपल्लवाश्च कुशेशयम् ॥ १५३ ॥

1. °कुण्डाम्बु° P_2 2. उत्तमस्नपनं M_1 3. °अवधारय P_1, P_2
4. °वर्त्मना A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकपत्राम्बुजं कुष्ठं कुङ्कुमं रोहिणद्रुमम् ।
पुण्यास्सुमनसश्चाष्टौ यूथिका मल्लिकापि वा[1] ॥ १५४ ॥

त्रीण्युत्पलानि जातिश्च चम्पकं केतकी तथा ।
द्रव्याणि मङ्गलानीति प्रास्येन्मङ्गलपाथसि ॥ १५५ ॥

अङ्कुरद्वयमेकैकमेकपत्रं च पङ्कजम् ।
मुष्टिमात्रं सुमनसश्चैकैकं चन्दनादिकम् ॥ १५६ ॥

[2]पलत्रयं पृथक्कुम्भे नैऋते सकलौषधीः ।
मांसी कुष्ठं हरिद्रे द्वे मुरा शैलेयचम्पके ॥ १५७ ॥

मुस्ता वचा च कर्पूरं प्रत्येकं [3]फलसंमितम् ।
पिष्ट्वा सर्वौषधिघटे निक्षिपेत्कमलासन ॥ १५८ ॥

[4]वायव्ये सर्वगन्धद्रव्याणां क्षेपणं घटे ।
कर्पूरं कुङ्कुमं कुष्ठं मांसी मलयजं मुरम् ॥ १५९ ॥

प्रियङ्गु केसरं मुस्ता तमालं नागकेसरम् ।
मूलद्वयं च कच्चोरं सुरपर्णिककेसरम् ॥ १६० ॥

उशीरं तगरं लोध्रं तथैव हरिचन्दनम् ।
अगरुद्वयं सितं कुष्ठं कालेयं ग्रन्थिपल्लवम् ॥ १६१ ॥

मुकुलं चम्पकस्येति प्रत्येकं [5]फलसंमितम् ।
[6]चूर्णीकृत्य समस्तं [7]तन्न्यसेद्गन्धोदके घटे ॥ १६२ ॥

मूलौषधिघटे शार्वे मूलौषधिसमर्पणम् ।
व्याघ्री [8]शिवा बला चाग्निश्शतपुंखा शतावरी ॥ १६३ ॥

---

1. च T, P_1, P_2 2. फलं पृथक् T, P_1, P_2 3. पलसंमितम् M_1
4. वायवीये T, P_1, P_2 5. पलसंमितम् M_1 6. चूर्णीकृतं P_2
7. च न्यसेत्॰ P_2 8. सिंही T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिल्वमूलं वचा [1]चूर्णी [2]पोरण्डं शतमूलिका ।
प्रत्येकं पलमानास्स्युः [3]पिष्ट्वा कुम्भे विनिक्षिपेत् ॥ १६४ ॥

मङ्गलोदकवस्तूनामलाभे चन्दनं वरम् ।
सर्वौषधीनामेतासामलाभे कुष्ठमिष्यते ॥ १६५ ॥

अलाभे सर्वगन्धानां शस्यते चन्दनं वरम् ।
मूलौषधीनां सर्वासामलाभे शस्यते बला ॥ १६६ ॥

[4]अधिदैवं समभ्यर्च्य उद्धृत्य स्नापयेत्क्रमात् ।
पूर्वादिदिक्षु प्रथममाग्नेयादि ततः परम् ॥ १६७ ॥

विष्णोर्नुकमिति प्रोच्य स्नापयेन्मङ्गलाम्भसा ।
ओषध्य इति मन्त्रेण सर्वौषधिजलेन च ॥ १६८ ॥

नारायणानुवाकेन सर्वगन्धाम्बुभिर्हरिम् ।
या ओषधीति मन्त्रेण मूलौषधिजलैस्ततः ॥ १६९ ॥

[5]अत्र शुद्धोदकैस्स्नायाद्विद्ययाष्टाक्षरात्मना ।
पाद्यपूर्वं घृतान्तं च [6]स्नायाद्देवं यथापुरम् ॥ १७० ॥

उत्तमोत्तममे[7]तच्च स्नपनं परिकीर्तितम् ।
अर्धशुद्धोदकैर्हीनं भवेदुत्तममध्यमम् ॥ १७१ ॥

सर्वशुद्धोदकैर्हीनमुत्तमाधममुच्यते ।
विंशतिः पञ्च च ब्रह्मन् संक्षेपे कलशा मताः ॥ १७२ ॥

चतुश्शतं च विस्तारे [8]सप्ततिश्च त्रिरुत्तरा ।
द्रव्याणामथ सर्वेषां कथयाम्यधिदेवताः ॥ १७३ ॥

---

1. शुण्ठी T, P_1, P_2 2. कोरण्डं T, P_1, P_2 3. पुष्पकुम्भे M_2, P_2
4. अधिदेवान् T 5. अथ T 6. स्नानं देवे P_1, P_2 7. ॰एतत्तु T, P_1, P_2 8. सप्ततिश्च त्रिरुत्तरम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घृतस्य [1]परमात्मा च वासुदेवोऽपि[2]देवता ।
उष्णोदकुम्भे पुरुषस्सत्यस्स्यात्तु फलोदके ॥ १७४ ॥

अच्युतो मार्जने देवमनन्तश्चाक्षतोदके ।
रत्नोदके केशवस्स्याद्गृहे नारायणस्स्मृतः ॥ १७५ ॥

गन्धोदके माधवस्स्याद् गोविन्दस्स्याद्यवोदके ।
पाद्योदके भवेद्विष्णुरर्घ्ये च मधुसूदनः ॥ १७६ ॥

त्रिविक्रमस्तथाचामे पञ्चगव्येषु वामनः ।
दधनि श्रीधरो देवो हृषीकेशः पयस्यपि ॥ १७७ ॥

मधुनः पद्मनाभस्स्याद्दामोदरः कषायके ।
गुलोदके वराहः स्यान्नृसिंहश्चेक्षवोदके ॥ १७८ ॥

श्रीधरो नालिकेरस्य हयास्यः शान्तिवारिणः ।
वासुदेवो मङ्गलस्य कुम्भस्य कमलासन ॥ १७९ ॥

सर्वौषध्यम्बुकलशे देवस्सङ्कर्षणस्स्मृतः ।
प्रद्युम्नस्सर्वगन्धस्य मूलौषध्योऽनिरुद्धकः ॥ १८० ॥

मूर्तिरेतेषु कुम्भेषु साङ्गं पीठं समर्चयेत् ।
[3]शुद्धोदकेषु [4]सर्वेषु नारायणसमर्चनम् ॥ १८१ ॥

धान्यानां कलशानां च देवता स्याद्वसुन्धरा ।
कूर्चानां दैवतं चास्त्रं चक्रिकाणां सुदर्शनम् ॥ १८२ ॥

[5]वाससां दैवतं विष्णुस्सर्वेषां वा जर्नादनः ।
इत्येवं स्नपनं प्रोक्तं नवधा तव पद्मज ॥ १८३ ॥

---

1. परमात्मा स्यात् P_2 2. ०दैवतम् P_2 3. गन्धोदकेषु M_2
4. सर्वत्र M_1 5. वाससो P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एषाम[1]न्यतमं कुर्यात्स्नानं वित्तानुसारतः ।
पञ्चम्यां स्नपनं विष्णोर्यथोक्तं[2] फलमश्नुते ॥ १८४ ॥

त्रिजन्मर्क्षे दशगुणं श्रवणे द्विगुणं भवेत् ।
त्रिगुणं शशिनः [3]प्रोक्तं क्षये शतगुणं भवेत् ॥ १८५ ॥

चतुर्गुणं तु[4] द्वादश्यां त्रिगुणं तारकात्रये ।
सङ्क्रान्त्यां षड्गुणं [5]विद्याद्विषुवे [6]त्रिगुणं भवेत् ॥ १८६ ॥

अयने दक्षिणे स्नानमेकं शतगुणं भवेत् ।
अयनेऽन्यत्र विहिते [7]सहस्रगुणमाप्लवे[8] ॥ १८७ ॥

विधौ विधुन्तुदग्रस्ते स्नानं त्रिंशद्गुणं हरेः ।
सूर्ये शतसहस्रं तु युगान्ते कोटिसंमितम् ॥ १८८ ॥

अनन्तं स्याद्व्यतीपाते कालेष्वेतेषु पूजनम् ।
अनन्तरोक्तफलदं कल्पते चतुरानन ॥ १८९ ॥

अष्टोत्तरेण कुम्भानां शतेन कमलासन ।
स्नपनं कथ्यते विष्णोर्यथावदवधार्यताम् ॥ १९० ॥

ब्राह्मदिव्यमानुषेषु भागेषु त्रिषु भागयोः ।
आद्ययोः स्फालयेत्सूत्राण्ये[9]कादश पृथक् क्षितौ ॥ १९१ ॥

प्रागायतानि तिर्यक् च तत्र[10] मध्ये विदिक्षु च ।
चत्वारि चत्वार्यष्टसु कुम्भस्थानानि वीथिकाः[11] ॥ १९२ ॥

---

1. °अन्यतमं तु स्यात् T; °अन्यतमेन स्यात् P_1, P_2 2. यथोक्तफलं P_2
3. पूर्तौ M_1 4. स्यात् T, P_1, P_2 5. चैव P_1, P_2; विद्धि M_2
6. द्विगुणं T 7. सहस्रगुणः P_2 8. आप्लवः P_2 9. सप्तदश T, M_2
10. दिक्षु M_2, P_1 11. पञ्चज M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यानि कुर्यादेवं च षट्त्रिंशत्कोष्ठकं भवेत् ।
तत्र कुम्भांस्तोयपूर्णान्विन्यसेन्मानुषे पुनः[1] ॥ १९३ ॥

भागे नव नवांशासु कुम्भानष्टौ[2] समुद्धरेत् ।
अष्टोत्तरशतं कुम्भास्सम्पद्यन्ते तथा सति ॥ १९४ ॥

ब्राह्मे तु मध्यमे स्थाने कलशानां चतुष्टये ।
एकस्मिन् द्रव्यमाधारं शिष्टं शुद्धोदकं त्रिकम् ॥ १९५ ॥

दिव्ये तु भागे प्राचीने कलशानां चतुष्टये ।
एकस्मिन्नुष्णमुदकं दिश्यग्ने रत्न[3]शम्बरम् ॥ १९६ ॥

याम्ये फलोदकं लोहं नैर्ऋत्यामथ वारुणे ।
मार्जनं वायुभागे तु गन्धतोयमुदग्दिशि ॥ १९७ ॥

अक्षतोदकमीशाने यवाम्भः कथिता नव ।
द्रव्यकुम्भा बहिर्भागे मानुषे पूर्ववद्भवेत्[4] ॥ १९८ ॥

पाद्यादिद्रव्यकलशाः पूर्वादिषु यथोदिताः ।
कल्पनीया यथापूर्वमुद्धृत्य स्नापयेत् क्रमात् ॥ १९९ ॥

कुम्भैरेकोनपञ्चाशकलशैरन्यदीर्यते ।
चन्दनार्द्राणि सूत्राणि दश प्रागायतानि च ॥ २०० ॥

तथोदगायतानि स्युः [5]स्फाल्यानि कमलासन ।
मध्ये नवसु कोष्ठेषु विन्यसेत्कलशान्नव ॥ २०१ ॥

दिक्षु प्रतिदिशं कुम्भान् षट्सु कोष्ठेषु तावतः ।
विन्यसेच्चतुरः कुम्भान्विदिक्ष्वपि पृथक्पृथक् ॥ २०२ ॥

---

1. ०पदे T, P_1, P_2 2. ०अष्टसु कल्पयेत् 3. ०संयुतम् T, P_1, M_2
4. ०पदे P_1, P_2 5. स्थाप्यानि T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वीथयोऽन्यानि कोष्ठानि द्रव्याणि च यथापुरम् ।
कुम्भानां पञ्चविंशत्या स्नानमन्यदुदीर्यते ॥ २०३ ॥

पूर्ववद्दश सूत्राणि स्फालयित्वा भुवःस्थले ।
मध्ये नवसु कोष्ठेषु नवकुम्भान् प्रकल्पयेत् ॥ २०४ ॥

प्रागादिदिक्षु प्रत्येकं कलशांस्त्रीन् प्रकल्पयेत् ।
आग्नेयादिषु कुम्भानां कोणेष्वेकैककल्पनम् ॥ २०५ ॥

द्वौ द्वौ पूर्वादिषु घटौ पार्श्वतः केवलोदकौ ।
अष्टौ तान्वर्जयित्वान्ये द्रव्यकुम्भा यथोदिताः ॥ २०६ ॥

मध्यमे कुम्भनवके यथोक्तद्रव्यपूरणम् ।
गन्धद्रव्यैः पूरयेद्वा कलशान् पञ्चविंशतिम् ॥ २०७ ॥

चन्दनागरुकाश्मीरकुष्ठातगरवीरणैः ।
[1]असितागरुणा चापि हरिचन्दनवारिणा ॥ २०८ ॥

[2]ह्रीवेरकर्दमेनापि [3]नवमेन घटान्नव ।
मध्यादीशानपर्यन्तं पूरयेत्कमलासन ॥ २०९ ॥

तमालसित[4]मुस्ताभ्यां सुरपर्णीरजःकणैः ।
कर्पूरनागसुमनोमुस्ताचम्पककुड्मलैः ॥ २१० ॥

प्रियङ्गुपुष्पकालेयग्रन्थिपल्लवबीजकैः ।
मांसीखर्जूरशैलेयह्रीबेरैश्च सुरद्रुमैः ॥ २११ ॥

मुरेण तैर्यथायोगं बहिष्ठानपि षोडश ।
हित्वा बहिर्विदि[5]क्कुम्भान् यद्वान्यैस्स्नापयेद्धरिम् ॥ २१२ ॥

---

1. इत आरभ्य चत्वारः श्लोकाः A कोशे नोपलभ्यते । 2. श्रीं° M_1
3. नवकेन M_1 4. °कुष्ठाभ्यां T, P_1, P_2 5. वीथि° T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्फालयेन्नव[1] सूत्राणि यथापूर्वं भुवःस्थले ।
ब्राह्मे स्थाने चतुष्कोष्ठे विन्यसेच्चतुरो घटान् ॥ २१३ ॥

द्वौ द्वौ स्यातां च पूर्वादिदिक्ष्वेकैकं विदिक्षु च ।
रत्नं लोहं तथा गन्धमाधारं च यथाक्रमम् ॥ २१४ ॥

द्रव्याणि कुम्भेष्वाग्नेयकोणादिस्थेष्वनुक्रमात् ।
बहिरैन्द्रपदे कोष्ठे द्वयोः कलशयोर्यथा ॥ २१५ ॥

पाद्यमर्घ्यं [2]तथाग्नेयकोणे दधिघटो भवेत् ।
याम्ये चाचमनीयं प्राक् पञ्चगव्यं तु पश्चिमे ॥ २१६ ॥

कोणे तु नैर्ऋते क्षीरं पश्चिमे तु [3]घटद्वये ।
दक्षिणेऽक्षतमन्यत्र मार्जनाम्भस्तथानिले ॥ २१७ ॥

कोणे मधु तथा सौम्ये कषायं च कुशोदकम् ।
यवोदकं शार्वकोणे [4]द्रव्यैः पाद्यादिभिः क्रमात् ॥ २१८ ॥

ऋग्भिष्षोडशभिस्सूक्तैः पौरुषैः स्नापयेद्धरिम् ।
कुम्भैर्द्वादशभिर्वापि चतुर्भि[5]र्मध्यतस्स्थितैः ॥ २१९ ॥

रत्नेन लोहेन तथा सर्वगन्धेन सर्पिषा ।
पूरितैर्बहिरिन्द्रादिकोष्ठस्थैरष्टभिर्घटैः ॥ २२० ॥

प्राचीमारभ्य पाद्येन दध्यर्घ्यक्षीरपूरितैः ।
तथैवाचमनीयेन मधुना पञ्चगव्यकैः ॥ २२१ ॥

फलोदकेन यद्वान्यैर्द्रव्यैर्द्वादशसंमितैः ।
मध्येऽग्निकोणे [6]कोष्ठेन नैर्ऋते वरुणानिले ॥ २२२ ॥

---

1. सस° T, M_2 2. अथ° M_1 3. घटद्वयम् M_2, P_1
4. पाद्यद्रव्यादिभिः M_2 5. मध्यमस्थितैः P_2 6. कुष्ठेन M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रन्थिपल्लवबीजेन शार्वे मलयजाम्भसा ।
बहिःक्रमेण पूर्वादिदिक्ष्वष्टासु चतुर्मुख । २२३ ॥

काश्मीरजेन मांस्या च तमालेन मुरेण च ।
मूलेन पर्वतोत्थेन सुरपर्णीरजःकणैः ॥ २२४ ॥

चम्पकप्रसवक्षोदैः खर्जूरेण प्रपूरितैः ।
कलशैः स्नापयेद्देवं नवभिर्वा विधेः पदे ॥ २२५ ॥

प्रागादिदिक्षु चाष्टासु क्रमेणाज्येन वस्तुना ।
[1]पाद्येन च तथार्घ्येण क्षीरेणाचम[2]नाम्भसा ॥ २२६ ॥

मधुना पञ्चगव्येन फलेन परिपूरितैः[3] ।
रत्नैर्वा नवभिः पूर्णैः कुम्भैर्नवभिराप्लवः ॥ २२७ ॥

पञ्चभिर्वा घटैर्मध्ये दिक्षु [4]पूर्वादिषु स्थितैः ।
मणिभिश्च प्रवालैश्च[5] मुक्ताभिः पूरितैः क्रमात् ॥ २२८ ॥

वज्रैर्वैडूर्य[6]शकलैः लोहैर्वा पञ्चभिश्शुभैः ।
पञ्चामृतैर्वा मधुना गुलेनाज्येन [7]पूरितैः ॥ २२९ ॥

दध्ना च पयसा यद्वा पञ्चगव्यैः क्रमाद्भवेत् ।
एकेन वा हरेस्स्नानं द्रव्यैः पूर्वोदितैः भवेत्[8] ॥ २३० ॥

व्यस्तैस्समस्तैर्वा [9]वित्तदेशकालानुसारतः ।
देया च दक्षिणा स्वर्णनिष्काः कलशसंमिताः ॥ २३१ ॥

---

1. पाद्येन दध्ना चार्घ्येण T, P_1 2. °अम्बुना P_1, P_2 3. फलेनापि च पूरितैः T, P_1, P_2 4. प्रागादिषु P_1, P_2 5. °वा P_2 6. °कलशैः M_1 7. पूरयेत् P_1, P_2, M_2 8. क्रमात् M_1 9. वित्तं P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्धं पादं तदर्धं वा यथावित्तानुसारतः ।
स्नपनं दक्षिणाहीनं निष्फलं फलकामिनः ॥
कर्तुस्तस्मा[1]द्दक्षिणेयं देयाऽल्पापि फलार्थिभिः ॥ २३२ ॥

इति श्रीपाञ्चरात्रे महोपनिष[दि] पाद्मे तन्त्रे
चर्यापादे महाभिषेको नामाष्टमोऽध्यायः ॥

नवमोऽध्यायः ॥

सहस्रकलशाभिषेकविधिः ॥

ब्रह्मा[2]:—

नियुक्तोऽहं प्रजासृष्टौ त्वया कैटभसूदन ।
मुह्यामि च प्रजाः स्रष्टुं कथं कर्तव्यमित्यहम् ॥ १ ॥

श्रीभगवानुवाच[3] :—

देवराज्यात्परिभ्रष्टो देवेन्द्रो ब्रह्महत्यया ।
मां समाराध्य विधिना प्राप्तवानात्मनः पदम् ॥ २ ॥

एवमन्ये च राजानो ममाराधनमुत्तमम् ।
कृत्वा निर्धूय पापानि पातकानि महान्त्यपि ॥ ३ ॥

प्रापुर्लोकान् सुदुष्प्रापानिष्टानत्ययवर्जितान् ।
एकोत्तरेण [4]कलशसहस्रेणाभिषेचनम् ॥ ४ ॥

पवित्रवस्तुसहितैः पवित्रजलपूरितैः ।
आराधनं मम ब्रह्मन् प्रीणनं परमं मतम् ॥ ५ ॥

---

1. दक्षिणा च M_2, P_1, P_2 2. M_1 adds उवाच 3. M_1 omits उवाच
4. कलशैः P_1, P_2, T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पापापनोदनैकान्तं सर्वाभ्युदयसाधनम् ।
प्राजानामपि राष्ट्रस्य राज्ञश्चायुर्विवर्धनम् ॥ ६ ॥

अनुष्ठितं पुत्रकामैस्तथा विजयकाङ्क्षिभिः ।
दुर्भिक्षदुर्निमित्तादिघोराणां शमनं परम् ॥ ७ ॥

सर्वसम्पत्करं सर्वपुरुषार्थैकसाधनम् ।
आराधनेन तेन त्वं मामाराध्य यथाविधि ॥ ८ ॥

ब्रह्मा :—

निर्मुक्तमोहो निष्पापः प्रजास्त्वं स्रष्टुमीशिषे ।
सहस्रकलश[1]स्नानविधिः कीदृक्कथं भवेत् ॥ ९ ॥

पवित्राणि च वस्तूनि कानि, [2]को हि भवेत् क्रमः ।
स्थापनं कलशानां च[3] को वा स्थापक इष्यते ॥ १० ॥

श्रीभगवान् :—

द्वात्रिंशद्धस्त[4]विस्तारं द्विगुणेनायतं शुभम् ।
कलशास्पद[5]भूभागे वैपुल्यानुगुणं महत् ॥ ११ ॥

मण्टपं कल्पयित्वा तु[6] द्वाराणि च [7]यथापुरम् ।
कलशस्थापनाभूमिं पञ्चविंशतिधा समम् ॥ १२ ॥

विभज्य सूत्र[8]पातेन मध्यमे ब्रह्मणः पदे ।
एकाशीतिघटास्स्थाप्या दिव्ये तु तदनन्तरे ॥ १३ ॥

भागे प्रत्येकमाशासु पूर्वादिचतसृष्वपि ।
एकाशीतिघटाः स्थाप्याः [9]कोणानां च चतुष्टये ॥ १४ ॥

---

1. °स्नानं कीदृक्को वा तस्य विधिर्भवेत् M_2 2. को वा विधेः क्रमः P_1, P_2, T
3. °वा P_1,T 4. °विस्तीर्णं M_2 5. °भूभागं P_1,T 6. °अन्यद्वाराणि P_1,P_2,T
7. यथाविधि P_2 8. °मार्गेण P_1, P_2 9. कोणेऽपि च P_1, P_2 ; कोणेषु च T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]ऊना चैकोनपञ्चाशत् प्रत्येकं मानुषे पुनः ।
भागे षोडशदिक्षु स्यात्प्रत्येकं पञ्चविंशतिः ॥ १५ ॥

वीथिकाश्च यथायोगं कल्पनीयाः पदे पदे ।
ब्राह्मे भागे तु नवके मध्यमे [2]मध्यमे घटे ॥ १६ ॥

[3]सर्वलोहानि रत्नानि सर्वाणि च फलानि च ।
सर्वौषधीश्च सर्वांश्च गन्धचूर्णांश्च निक्षिपेत् ॥ १७ ॥

श्रीवत्साद्याः प्रतिकृतीः कृत्वा निष्कप्रमाणिकाः ।
[4]स्वर्णं ताम्रं च रजतं केवलं चैव निक्षिपेत् ॥ १८ ॥

श्रीवत्सं वनमालां च शंखं चक्रं गदां तथा ।
[5]पद्मं खड्गं तथा शार्ङ्गमष्टौ चिह्नानि शार्ङ्गिणः ॥ १९ ॥

वासोभ्यां वेष्टिते कुम्भे वासुदेवं समर्चयेत् ।
ब्राह्म एव च भूभागे परितो नवकोष्ठके ॥ २० ॥

प्राचीनकुम्भनवके मध्यमे कलशे क्षिपेत् ।
सूर्यकान्तं पद्मरागं पुरुषस्तस्य देवता ॥ २१ ॥

[6]नवकानां तथान्येषां क्रमाद्द्रव्यं च देवताः ।
कुम्भस्य वक्ष्यते ब्रह्मन् मध्यमस्य पृथक्पृथक् ॥ २२ ॥

वैडूर्यमिन्दुकान्तं च द्वयं [7]द्रव्यं च देवता ।
वासुदेवश्चेन्द्रनीलोऽप्ययस्कान्तश्च तद् द्वयम् ॥ २३ ॥

---

1. स्थाप्याश्चैकोन॰ P_1, P_2 2. च महाघटे A, M_2, P_1 3. सूर्यकान्तं पद्मरागं पुरुषस्तस्य देवता । अयमर्धः M_1 कोशेऽधिकतया दृश्यते, २१ तमे श्लोकेऽप्युत्तरार्धे दृश्यते । 4. सुवर्णताम्ररजतैः केवला वा विनिक्षिपेत् M_2 5. पद्मं शार्ङ्गं तथा खड्गं P_1, P_2 6. नवानाश्च A 7. द्रव्यस्य देवता M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवता सत्यमूर्तिः स्यात्प्रवालो वस्तु गारुडम् ।
सङ्कर्षणो देवता स्यात्पुष्यकं स्फटिकद्वयम् ॥ २४ ॥

द्रव्यं देवोऽच्युतः, पद्मरागः कनकमेव च ।
प्रद्युम्नो देवता तस्य वज्रं रजतमेव च ॥ २५ ॥

अनन्तो देवता तस्य ताम्रं मुक्ता च वस्तुनि ।
देवता चानिरुद्धस्स्यात्सर्वकुम्भेषु मौक्तिकम् ॥ २६ ॥

द्वितीये भागे दिशि प्राच्यामेकाशीतिघटास्पदे ।
नवके मध्यमे मध्यकलशे कदलीफलम् ॥ २७ ॥

पनसाम्रं मातुलुङ्गं द्रव्यजम्बुककेसराः ।
बदराणि च तत्त्वात्मा देवता तस्य कथ्यते ॥ २८ ॥

देवता द्रव्यमन्यत्र नवकेष्वष्टसूच्यते ।
[1]क्रमान्मध्यघटे द्रव्यं मातुलुङ्गं सदाडिमम् ॥ २९ ॥

पृथिवी देवता तस्य, जम्बूनारङ्गमेव च ।
देवताऽपामधिष्ठात्री, तक्कोलैलाफलद्वयम् ॥ ३० ॥

तेजस्वी पुरुषो देवः, क्षीरिकामलकद्वयम् ।
द्रव्यं देवो जगत्प्राणो द्राक्षाखर्जूरजं फलम् ॥ ३१ ॥

द्रव्यं विष्णुपदं देवश्चूतं पारावतान्वितम् ।
[2]देवो मनः, फलं क्षुद्रपनसं वस्तु, देवता ॥ ३२ ॥

[3]अहङ्कारं, फलं बिल्वकदल्योर्वस्तु, देवता ।
बुद्धिस्सर्वेषु कुम्भेषु बदराणि च निक्षिपेत् ॥ ३३ ॥

---

1. ०मध्यगते T ; मध्ये घटे P_2 2. वासुदेवो मनः क्षुद्रपनसस्तु स देवता M_2
3. अहङ्कारः P_1, T ; अहङ्कारफलं P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टाक्षरेण मन्त्रेण पञ्चोपनिषदा पुनः ।
कुम्भानामपि सर्वेषामभिमन्त्रणमिष्यते ॥ ३४ ॥

[1]एकाशीतिघटे याम्ये मध्ये नवकमध्यमे ।
उशीरं कुङ्कुमं कुष्ठं मांसी मलयजं मुरम् ॥ ३५ ॥

ह्रीबेरमगरुं पिष्ट्वा कुम्भे तत्र विनिक्षिपेत् ।
त्रैलोक्यमोहनं देवमर्चयेन्मन्त्रवित्तमः ॥ ३६ ॥

[2]नवकेषु तथाऽन्येषु प्राच्यादिषु यथाक्रमम् ।
जलजो वीरणीमूलं, बभ्रुर्देवस्सभाज्यते ॥ ३७ ॥

कर्पूरकाश्मीरमुभौ द्रव्यं, शौरिश्च देवता ।
चम्पकं मुकुलं मांसी दाशार्हश्चाधिदेवता ॥ ३८ ॥

चन्दनं चन्दनं रक्तमन्त्राधिपतिरच्युतः ।
सूरपर्णीरजो मूरं कर्दमो वस्तु, देवता ॥ ३९ ॥

वैकुण्ठी गिरिजं मूलं प्रियङ्ग्वाश्च रजःकणाः ।
पुरुषोत्तमदैवत्यं कुष्ठे द्वे द्रव्यमुच्यते ॥ ४० ॥

मुकुन्दः कृष्णधवलो वक्ररूपी वृषाकपिः ।
तमालपत्रं सर्वेषु निक्षिपेत्पुरुषात्मना ॥ ४१ ॥

पवमानादिभिर्मन्त्रैर्मन्त्रयेत्तान् सकृत्सकृत् ।
[3]प्रत्येकं गन्धवस्तूनि कलान्यष्टौ यथोदितम् । ४२ ॥

[4]एकाशीतिघटग्रामे वारुणे ब्रह्मणः पदे ।
घटे वापिसरित्कूप[5]ह्रदवृष्टिहिमापगाः ॥ ४३ ॥

---

1. अयमर्धः P_2 कोशे नोपलभ्यते । ४१ तमे श्लोके उत्तरार्धं उपलभ्यते च ।
2. नवकोष्ठे T
3. उत्तरार्धो M_1 कोशे न दृश्यते ।
4. श्लोकार्धोऽयं M_1 कोशे ३५ तमे श्लोके पूर्वार्धतयोपलब्धोऽत्र पुनरुपलभ्यते ।
5. ०ह्रदानां तीर्थमेव वा M_2, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पत्युः पाथांसि चाहृत्य तटाकेषु च निक्षिपेत् ।
नवकानामथान्येषामष्टानां मध्यमे घटे ॥ ४४ ॥

पूर्वोक्तान्येव वाप्यादिनीराणि [1]क्रमशः क्षिपेत् ।
[2]मध्यमान् द्रव्यकलशान् सर्वानेव प्रपूरयेत् ॥ ४५ ॥

नलिनीनिर्झराम्भोभिर्मत्स्यकूर्मावपि द्वयम् ।
निष्कद्वय[3]परिच्छिन्नकाञ्चनेन विनिर्मितम् ॥ ४६ ॥

कलशेष्वेव नवसु मध्यमेषु विनिक्षिपेत् ।
मत्स्यादिरूपिणं देवं वर्जयित्वा च भार्गवम् ॥ ४७ ॥

यथोक्तकुम्भनवके क्रमेणैव सभाजयेत् ।
एकाशीतिपदे सौम्ये मध्ये नवकमध्यमे ॥ ४८ ॥

यवगोधूमकव्रीहिशालि मुद्गप्रियङ्गुकान् ।
माषश्यामाकनीवारान्नि[4]क्षिपेत्तत्र पूजयेत् ॥ ४९ ॥

देवेशं गरुडारूढं पद्मनाभं यथाविधि ।
धान्यान्येतानि चैकैकमन्येष्वष्टसु निक्षिपेत् ॥ ५० ॥

घटेषु मध्यभूतेषु क्रमात्सर्वत्र शालयः ।
पूजयेद्वनमालां च शंखं चक्रं च कौस्तुभम् ॥ ५१ ॥

पद्मं शार्ङ्गं गदां खड्गं क्रमादुक्तं घटाष्टके ।
पञ्चाशीतिघटेष्वग्नेरेकोनेषु तथा दिशि ॥ ५२ ॥

मध्यमं कुम्भनवकमाधारेण प्रपूरयेत् ।
षट्स्वैन्द्रेषु च गोमूत्रं क्षीरं [5]याम्येषु वारुणे ॥ ५३ ॥

---

1. कलशे M_2 2. ४५ उत्तरार्धादारभ्य ४७ पूर्वार्धपर्यन्तं P_2 ग्रन्थे अर्धेन्दुरेखितं दृश्यते । 3. °परिच्छिन्नं P_2 4. क्षिपेत्तत्र च P_2 5. याम्ये तु M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दधि षट्सु तथा सौम्ये गोमयं षट्सु निक्षिपेत् ।
चतुर्षु कुम्भेष्वाग्नेये कोणे वाप्युष्णमुच्यते ॥ ५४ ॥

नैर्ऋते पञ्चगव्यानि पञ्चामृतमथानिले ।
ऐशाने सक्तुभिस्तेषु नारायणसभाजनम् ॥ ५५ ॥

नैर्ऋतेकोनपञ्चाशद्घटेषु ब्रह्मणः पदे ।
तैलेन नवकं पूर्य [1]गन्धाद्भिष्षट् पुरःस्थिताः ॥ ५६ ॥

घनसारद्रवैर्याम्ये लाजैः [2]कुम्भे तु वारुणे ।
सौम्येऽभिमन्त्रिताम्भोभिः कोणेषु गुलवारिभिः ॥ ५७ ॥

यजेत तेषु कुम्भेषु वासुदेवं जगद्गुरुम् ।
मारुतैकोनपञ्चाशद्घटेषु नवकं पुनः ॥ ५८ ॥

पूर्य सर्षप[3]तोयेन प्राच्यां षट्पाद्यवारिभिः ।
याम्ये षडर्घ्यैः षट्कुम्भाः[4] प्रतीच्याचमनाम्बुभिः ॥ ५९ ॥

षट् सौम्ये [5]मङ्गलाम्भोभिः पूरयेत्कमलासन ।
कोणेष्विक्षुरसैस्तत्र समाराध्योऽनिरुद्धकः ॥ ६० ॥

[6]ईशानैकोनपञ्चाशद्घटेषु ब्रह्मणः पदे ।
नवकं मधुभिः पूर्य प्राच्यां षट् सर्वगन्धकैः ॥ ६१ ॥

शान्तिवारिभिरन्यत्र षट्कं [7]कोणे तु नैर्ऋते ।
आग्नेये च स्थिताः कुम्भा नालिकेरजलैरपि ॥ ६२ ॥

शार्वे च वायवीये च पीयूषैर्नालिकेरजैः ।
यष्टव्यो हरिरेतेषु कुम्भेषु कमलाशन ॥ ६३ ॥

---

1. गन्धाद्भिः षट्सु आस्थिताः P_1 2. कुम्भेषु P_2 3 °तैलेन P_1, P_2 4. कुम्भान् P_1, T 5. मार्जनाम्भोभिः M_2 6. ऐशानैकोन° P_1 7. कोणेषु A; कोणे च P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भागे तु मानुषे प्राच्यां कुम्भानां पञ्च[1]विंशके ।
मध्यमं पूरयेन्मृद्भिर्वक्ष्यमाणाभिरष्टभिः ॥ ६४ ॥

क्षेत्रतीर्थाब्धिशैलेषु गजसूकरयोरपि ।
वल्मीकवृषयोर्मृत्स्ना न्यस्यते मध्यमे घटे ॥ ६५ ॥

अष्टास्वन्येषु कलशेष्वेकैकां तां विनिक्षिपेत् ।
अर्च्यश्च केशवस्तेषु क्रमादन्यत्र चोच्यते ॥ ६६ ॥

सहदेवी वचा चैव शतमूला शतावरी ।
कुमारी च गुलूची च सिंही व्याघ्रीति चाष्टमी ॥ ६७ ॥

मूलानि मध्ये चैतेषां कलशे मध्यमे क्षिपेत् ।
एकैकमष्टास्वन्येषु तेषु नारायणार्चनम् ॥ ६८ ॥

न्यग्रोधोदुम्बराश्वत्थजम्बूबिल्वत्वचां रसाः ।
तथा पलाशमधुकशिरीषाणामपि त्वचः ॥ ६९ ॥

न्यसनीया घटे मध्ये प्रत्येकमितराष्टके ।
पूज्यश्च माधवस्तेषु तुरूणां पल्लवा इमे ॥ ७० ॥

[2]पलाशबिल्वपत्रं च कदम्बाम्रशिरीषजाः ।
न्यग्रोधाश्वत्थजाश्चापि न्यसनीया विधेः पदे ॥ ७१ ॥

एकैकमितरेष्वर्च्यो गोविन्दो जातिमल्लिके[3] ।
प्रियङ्गुपद्मबकुलनन्द्यावर्तक[4]चूतकाः ॥ ७२ ॥

[5]कुन्दश्च पुष्पाण्येतेषां न्यसनीयानि मध्यमे ।
एकैकमष्टकेऽन्यत्र तेषु विष्णुश्च देवता ॥ ७३ ॥

---

1. °विंशतिः M_2, P_1, P_2 2. पलाशबिल्वबकुल° P_2 3. °मल्लिकैः P_1, P_2
4. चम्पकाः T, P_1, P_2 5. कुन्दं चैतानि पुष्पाणि P_1, P_2, कुन्दपुष्पाण्येतानि A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सिद्धार्थो राजसिद्धार्थो वंशो गोरोचनापि च ।
इन्द्रवेणुर्यवष्षष्ठिश्शमी च चणकस्तथा ॥ ७४ ॥

[1]एतानि मध्यमे कुम्भे एकैकमितरेषु तत् ।
तेषु [2]पूजा मधुरिपोस्सरसीरुहसम्भव ॥ ७५ ॥

तिलमारण्यकं [3]ग्राम्यं जीरकद्वयमेव च ।
अतसी[4]सम्भवं बीजं[5] शतपुष्पं कुमारकम् ॥ ७६ ॥

ऋषिबीजं च कलशे मध्यमेऽन्यत्र पूर्ववत् ।
तेषां त्रिविक्रमो देवो यष्टव्यस्साङ्गपीठकः ॥ ७७ ॥

श्यामाकष्षष्टिकश्शालि[6]नीवारस्स्याच्चतुर्भुज ।
दूर्वाकुशेन्द्रवल्लीनामङ्कुराः पिप्पलस्य च ॥ ७८ ॥

न्यस्यन्ते मध्यमे कुम्भे [7]घटेष्वन्यत्र पूर्ववत् ।
देवता वामनस्तेषु कुशा दिव्यौषधास्त्रयः ॥ ७९ ॥

[8]कांस्यमूलमुशीरस्य शरपुंखस्य मूलिका ।
मूलिकास्तगरस्यापि तथापामार्गमूलिका ॥ ८० ॥

ते मध्ये च घटे [9]पूर्वे घटेष्वन्यत्र पूर्ववत् ।
देवता श्रीधरस्तेषां तुलस्यौ च सितासिते ॥ ८१ ॥

वेणुकेसरिणोः पत्रे पत्रे केतकबिल्वयोः ।
शमीपर्णं तथा जातेर्मध्यमेऽन्यत्र पूर्ववत् ॥ ८२ ॥

देवता च हृषीकेशो द्वयं मुस्ताकचोरकम् ।
कुमुदोत्पलयोः कन्दं कह्लारं शीतलीयकम् ॥ ८३ ॥

---

1. एकैकं मध्यकुम्भेषु A 2. पूज्यो मधुरिपुः A, P_1, P_2 3. ग्राह्यं A
4. °संभवच्छिन्नम् M_2 5. चैव P_2 6. नीवारस्य च तण्डुलाः P_1, P_2
7. कुम्भेषु° P_2 8. काश° T_1, P_1 9. सर्वे P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न्यसेन्मध्ये कुवलयं कुम्भेष्वष्टसु पूर्ववत् ।
तेषां देवः पद्मनाभो मुद्गमाषयवाङ्कुराः ॥ ८४ ॥

निष्पावं तु वरीव्रीहिकुलुत्थानामथाङ्कुराः ।
आढकस्य च कुम्भानां मध्यमेऽन्यत्र पूर्ववत् ॥ ८५ ॥

दामोदरार्चनं तत्र [1]शंखपुष्पी बलां तथा ।
विष्णुक्रान्ता सदाभद्रा पद्ममेकदलं [2]मुरम् । ८६ ॥

सहा च [3]सहदेव्यौ च न्यसनीया विधेः पदे ।
अन्यत्र पूर्ववद्देवो[4] यज्ञनारायणो भवेत् ॥ ८७ ॥

श्वेतार्कश्च तथैवाग्नि[5]र्भद्रा ब्रह्मसुवर्चला ।
सरसा च विरक्ता च पृश्निपर्णी स्थिरा तथा ॥ ८८ ॥

एरण्डकं घटे मध्ये अन्यत्र स्याद्यथापुरम् ।
अर्चनीयो हरिस्तत्र सुरभिः पद्मकेसरम् ॥ ८९ ॥

पत्रमेला लवङ्गत्वङ् नागकेसरमेव च ।
लता जातिफले मध्ये न्यसनीया विधेः पदे ॥ ९० ॥

एकैकमितरेषु स्यात्तेषु कृष्णश्च देवता ।
सुवर्णं रजतं ताम्रं प्रत्येकं निष्कपञ्चकम् ॥ ९१ ॥

कृत्वा पद्माकृतिं कांस्यं दर्पणं [6]चषकानि च ।
अयोलवित्राद्याकारं [7]त्रपुसीसकपित्तलाः[8] ॥ ९२ ॥

त्रयं प्रकृतिरूपेण न्यस्यते मध्यमे घटे ।
प्रत्येकमितरेष्वेतद्धयग्रीवोऽधिदैवतम् ॥ ९३ ॥

---

1. पुष्पफलं M_2 2. वरम् P_1,P_2 3. सहदेवी A,P_1 4. पूर्ववत्पूज्यो P_1 देववत्पूर्वो P_2 5. तथा M_1 6. चाष्टकानि च T 7. त्रपुं P_1, P_2 8. सीसकपित्तले P_1, P_2

पा—14

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुम्भेष्वन्येषु सर्वेषु पूरणं गन्धवारिभिः ।
सहस्रकलशस्नाने देशिका बहवः स्मृताः ॥ ९४ ॥

चत्वारो द्विगुणं वापि तेषां षोडश ऋत्विजः ।
पुण्याहं वाचयित्वान्बगविदेवार्चनं भवेत् ॥ ९५ ॥

पञ्चोपनिषदैर्मन्त्रैः सहस्रं सर्पिषाहुतिः ।
शान्त्यर्थं मूलमन्त्रेण जुहुयात्समिदादिभिः ॥ ९६ ॥

यावद्रजोभिः हारिद्रैस्स्नपनं मधुविद्विषः ।
मृत्स्नाभिर्मानुषे भागे प्रक्रम्य ब्रह्मणः पदे ॥ ९७ ॥

रत्नोदकान्तं कलशैः सहस्रेणाभिषेचनम् ।
मृदा विष्णोर्नुकमिति स्नपनं मूलवारिभिः ॥ ९८ ॥

तद्विष्णोरिति देवस्य कषायकलशाम्बुभिः ।
प्रतद्विष्णुरितीशस्य विद्यया पल्लवाम्बुभिः ॥ ९९ ॥

देवस्य त्वेति कुसुमै[1]स्तवामीत्यपि सर्षपैः ।
ध्रुवः पात्विति मन्त्रेण स्नपनं तिलवारिभिः ॥ १०० ॥

भद्रं कर्णेति मन्त्रेण षाष्टिकाम्बुभिराप्लवः ।
न ते विष्णुरिति स्नानं कुशमूलाम्बुभिर्हरेः ॥ १०१ ॥

इरावतीति मन्त्रेण तुलसीदलवारिभिः ।
मुस्ताम्बुभिरतो देवा अवन्त्विति चतुर्मुख ॥ १०२ ॥

इदं विष्णुरिति स्नानं मुष्णै[2]स्त्रीणि पदेति च ।
शंखपुष्प्यम्बुभिः [3]श्वेतै रक्तैः कर्माणि पश्यत ॥ १०३ ॥

---

1. तावानित्यपि T 2. मुद्गैः M_2 3. चेतैः विष्णोः P_1, P_2 श्वेतैरर्कैः T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्विष्णोः परममिति सुरभ्यादिजलैस्ततः[1] ।
तद्विप्रास इति स्नानं लोहैर्भागे नृणामपि ॥ १०४ ॥

दिव्ये भागे तु पौरस्त्ये एकाशीतिघटास्पदे ।
प्रागादिब्रह्म[2]भूम्यन्तं क्रमेण स्नानमिष्यते ॥ १०५ ॥

ऐन्द्रे फलाम्बुभिः स्नानं यज्ञायज्ञीयमन्त्रकम् ।
क्रमेण मन्त्राः कथ्यन्ते द्रव्यकुम्भाष्टके यथा ॥ १०६ ॥

इन्द्राविष्णू पदे मन्त्रो मनीषापदलक्षितः ।
वषट् ते विष्णोरित्येतत्तिस्रो [3]वाच इतीरितः ॥ १०७ ॥

इषे त्वोर्जेति मन्त्रेण [4]स्तरिरित्वमितीति च ।
यस्मिन्विश्वानि विद्या च पर्जन्यायेति लक्षितः ॥ १०८ ॥

एकाशीतिपदे याम्ये स्नानं [5]गन्धोदकैर्घटैः ।
नारायणानुवाकस्य ऋग्भिरष्टाभिरादितः ॥ १०९ ॥

व्यस्ताभिरष्टभिः स्नानं सर्वाभिर्मध्यमेन तु ।
दिग्भागे पश्चिमे ब्रह्मन्नेकाशीतिघटास्पदे ॥ ११० ॥

प्रागादिब्रह्मभूम्यन्तं स्नानं वाप्यादिभिर्जलैः ।
मन्त्राः क्रमेण वक्ष्यन्ते प्रतिद्रव्यघटाष्टकम् ॥ १११ ॥

या आप इति मन्त्रेण सिन्धुद्वीपेति विद्यया ।
एष ते चेत्यृचा स्नानमिमं मे वरुणेति च ॥ ११२ ॥

शं नो देवीरभीत्येष यासां राजेति मन्त्रतः ।
समुद्र[6]ज्येष्ठमन्त्रेण यासां देवेति विद्यया ॥ ११३ ॥

---

1. तथा P_1,P_2 2. °पर्यन्तं T 3. वात M_1 4. सावित्री त्वमसीति च P_1 5. घर्मोदकैः A 6. °ज्योति° T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूक्तेन वारुणेनैव स्नानं द्रव्य[1]घटैरिति ।
एकाशीति घटे सौम्ये पूर्वाद्यब्जपदावधि ॥ ११४ ॥

धान्यादिवस्तुकुम्भानां नवानां मन्त्र उच्यते ।
त्रातारमिन्द्रसाम्ना च मन्त्रश्चारवा वहन्त्विति ॥ ११५ ॥

मन्त्रो जितं त इत्येष आपो वहति लक्षितः ।
मन्त्रश्च तावतीरयेष स त्वं नो अग्नवित्यृचा ॥ ११६ ॥

त्वं नो अग्न इत्यृचा च महाव्याहृतयस्तथा ।
अणोरणीयानित्यन्तो मन्त्रः स्नानविधौ क्रमात् ॥ ११७ ॥

एकोनपञ्चाशत्कुम्भेष्वग्नेः कोणे यथाक्रमम् ।
गोमूत्रादिघटस्नाने मन्त्राणां कथ्यते क्रमः ॥ ११८ ॥

गायत्री प्रथमा तासां पयो वृतमनन्तरम् ।
दधिक्राव्णेति च स्नानं गन्धद्वारामितीदृशम् ॥ ११९ ॥

विष्णोरराटमिति च मूर्धानं दिव इत्यृचा ।
हिरण्यगर्भमन्त्रेण आप्यायस्वेति विद्यया ॥ १२० ॥

घृतस्नातेति मन्त्रश्च घृतस्नानविधौ क्रमः ।
एकोनपञ्चाशत्कुम्भे पदे निर्ऋतिगोचरे ॥ १२१ ॥

मन्त्राः क्रमेण [2]वक्ष्यन्ते वस्तुकुम्भैरथाप्लवे ।
रक्षोघ्नमिति सामाद्यं पवित्रं न इतीति च ॥ १२२ ॥

भगवान् वासुदेवेति सामवेदव्रताह्वयम् ।
[3]वैराजसामकथितं तथा चैवापराजिताः ॥ १२३ ॥

---

1. °घटेन तु P_2 2. कथ्यन्ते M_1 3. वैयाघ्र° M_2, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कथ्यन्ते वायुकोणेऽपि मन्त्रस्नानविधौ तथा ।
द्वादशाक्षरमन्त्रश्च द्रुपदादिव इत्यसौ ॥ १२४ ॥

अष्टाक्षराह्वयो मन्त्रश्शं नो देवीरिति स्मृतः ।
हिरण्यपाणिरिति च वेदाहमिति च क्रमात् ॥ १२५ ॥

ईशानकोणे मन्त्रोक्तिरानोवीयुरिति स्मृतः ।
श्रीसूक्तं मधुमान्नश्च मधुनक्त इतीति च ॥ १२६ ॥

मधुवातेति कोणेषु मन्त्रक्लृप्तिरुदाहृता ।
ब्राह्मे पदे तु सूक्तस्य पौरुषस्यादितः क्रमात् ॥ १२७ ॥

अष्टासु द्रव्यकुम्भानामष्टानां मन्त्र [1]इष्यते ।
मध्यमे नवके पूर्वमष्टभिश्शुद्धवारिभिः ॥ १२८ ॥

स्नापयेन्मूलमन्त्रेण सहस्रेण घटैरिति ।
स्नापिते देवदेवेशे पश्चाद्द्रव्यघटाम्बुभिः ॥ १२९ ॥

सूक्तेन पौरुषेणैव स्नापयेद्देशिकस्स्वयम् ।
घटैश्शुद्धोदकैरन्यैः स्नपनं मूलविद्यया ॥ १३० ॥

हरिद्राचूर्णसम्पूर्णैः पञ्चविंशतिभिर्घटैः ।
स्नपनं [2]सप्तदशभिर्यद्वा षोडशसंमितैः ॥ १३१ ॥

यद्वा द्वादशभिः कार्यं नवभिर्वा यथावसु ।
आराध्य देवमुचितं निवेद्य च महाहविः ॥ १३२ ॥

होमस्सहस्रैराज्येन समिद्भिर्मूलविद्यया ।
अन्नैश्चतुर्विधै[3]श्चैव प्रत्यृचं पुरुषात्मना ॥ १३३ ॥

---

1. उच्यते M_1 2. पञ्चदशभिः M_2 3. चतुर्गुणैः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूक्तेन तुष्टिं वस्त्राद्यैर्देशिकानामनन्तरम् ।
सहस्रकलशस्नाने तत्संख्या स्वर्णदक्षिणा ॥ १३४ ॥

तदर्धमथवा पादो यथाश्रद्धं यथावसु ।
यावती दक्षिणा तेषां स्यादर्धमथ ऋत्विजाम् ॥ १३५ ॥

सहस्रं ब्राह्मणानन्नैर्भोजयेद्दक्षिणामपि ।
दद्यात्तुष्टिकरीमन्यानागतानपि तोषयेत् ॥ १३६ ॥

सेवां कुर्वन्ति ये मर्त्याश्श्रद्धाभक्तिसमन्विताः ।
देवस्य स्नानसमये सहस्रकलशाम्बुभिः ॥ १३७ ॥

गङ्गादि[1]सरितां स्नानफलमश्नुवते महत् ।
सहस्रकलशस्नाने यत्फलं [2]राजसूयके ॥ १३८ ॥

[3]पूजान्ते तदशेषेण प्रागुक्तमिति नोच्यते ।
महोत्सवफलेनैतत् [4]विद्धि तुल्यफलं स्मृतम् ॥ १३९ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
सहस्रकलशाभिषेकविधिर्नाम नवमोऽध्यायः ॥

दशमोऽध्यायः ॥

ध्वजारोहणविधिः

ब्रह्मोवाच[5] :—

[6]कदा महोत्सवः कश्चित्कीदृक्तस्य फलं च किम् ।
फलकामैरनुष्ठातुमविज्ञातो न शक्यते ॥ १ ॥

---

1. ॰स्नानफलदमश्नुते महतो महत् M_2 2. राजराष्ट्रयोः P_1, P_2 3. प्रजानां A; पूजनं M_1 4. किञ्चित् P_1, P_2, T 5. P_2 omits उवाच 6. कथं P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मह्यं जिज्ञासमानाय प्रसीद भगवन्निदम् ।
आख्यातुमर्हसि यथा महोत्सवमनुत्तमम् ॥ २ ॥

श्रीभगवान् :—

आराधनमिदं ब्रह्मन् मोक्षकामैरनुष्ठितम् ।
पश्वादिफलकामैस्तु दुरनुष्ठान[1]मद्भुतम् ॥ ३ ॥

तोषणं मम कल्याणमनुष्ठितममानुषम् ।
देवैरेव पुरा वृत्र[2]वधपापापनुत्तये ॥ ४ ॥

इन्द्रेणापि दिविष्ठेन मामुद्दिश्य कृतं शुभम् ।
रूपं तस्य प्रवक्ष्यामि यथा[3]वदवधारय ॥ ५ ॥

सर्वे सांसारिकं दुःखमुत्तरन्ति तदम्बुधिम् ।
[4]अष्टाक्षरेति विद्वांसो निर्ब्रुवन्त्युत्सवाह्वयम् ॥ ६ ॥

नित्यो नैमित्तिकः काम्यस्त्रिविधस्स महोत्सवः ।
तत्र नित्यं प्रतिसमं मासपक्षव्ययस्तथया ॥ ७ ॥

शुभे च तिथिनक्षत्रे विषुवे चायनद्वये ।
कल्पितावभृथस्नानः सेवितस्सर्वदैवतैः ॥ ८ ॥

नैमित्तिकस्स विज्ञेयो [5]निमित्ते सति कल्पितः ।
अवग्रहे च दुर्भिक्षे चोरकापाते तथा निशि ॥ ९ ॥

दर्शने सुरचापस्य नाल[6]मीनस्य दर्शने ।
[7]देवताप्रतिकायानां कम्पने भेदने तथा ॥ १० ॥

---

1. दुरनुष्ठेय० T, P_1, P_2 2. वधे तत्पापनुत्तये T, P_1, P_2 3. ०तदव० T, P_1, P_2 4. यष्टार इति T, P_1, P_2 5. यो निमित्तैस्तु M_2 6. ०ऋक्षस्य M_2
7. देवतानां निकायानां M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हसने चलने चैव रोदने पतने तथा ।
गोपुरालयसालानां मण्टपस्य च भेदने ॥ ११ ॥

[1]भङ्गे वा पतने वापि पर्वतानां तथैव च ।
निपाते चैत्यवृक्षस्य भङ्गे ज्वलनदर्शने ॥ १२ ॥

[2]वृक्षे त्वन्यफले दृष्टे दिवानक्षत्रदर्शने ।
भूतादिदर्शने घोरे भूमिकम्पे तथैव च ॥ १३ ॥

दिग्दाहे च महावाते महावृष्टौ तथैव च ।
ग्रहयुद्धे च सञ्जाते प्रतिसूर्यस्य दर्शने ॥ १४ ॥

नृपे रोगाभिभूते च ग्रामे जनपदे तथा ।
मसूरिकादिघोराणां व्याधीनां च प्रवेशने ॥ १५ ॥

परचक्रप्रवेशे च व्योम्नि नेमिस्वने तथा ।
दिव्यदुन्दुभिनिर्ह्रादे निर्मले गगने सति ॥ १६ ॥

वर्षे[3] वाशनिपाते च शक्रध्वजनिपातने ।
जलेऽग्निजनने चैव तथैवाद्भुतदर्शने ॥ १७ ॥

एवमादौ महोत्पाते नैमित्तिकमहोत्सतः ।
चतुर्णां पुरुषार्थानामुद्दिश्यान्यतमं फलम् ॥ १८ ॥

उत्सवोऽनुष्ठितः काम्यः सङ्कल्पितफलप्रदः ।
कथ्यतेऽवभृथस्नानसमयस्त्रिविधोत्सवे ॥ १९ ॥

मासर्क्षे विषुवे चैव ग्रहणे चायनद्वये ।
दर्शे च पौर्णमास्यां च श्रवणे सार्वमासिके ॥ २० ॥

---

1. भङ्गे चायतने चापि A 2. 'A' ग्रन्थे एष अर्धश्लोको न दृश्यते ।
3. अवर्षेऽशनिपाते च M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रोहिण्याञ्च पुनर्वस्वोः प्रतिष्ठादिवसे तथा ।
राज्ञो जन्मदिने कुर्यादभिषेकदिने तथा ॥ २१ ॥

[1]उक्तेष्ववभृथस्नानं ब्रह्मन् सर्वार्थ[2]साधनम् ।
मासेन वा तदर्धेन द्वादशाहेन वा पुनः ॥ २२ ॥

नवाहे नोत्सवः कार्यस्सप्ताहे न चतुर्मुख ।
अहोभिः पञ्चभिर्वापि, त्रिभिर्वैकेन वा पुनः ॥ २३ ॥

एकाहे त्र्यहके धीमान् ध्वजकर्म न कारयेत् ।
सङ्कल्पपूर्वमालोच्य मासे ऋक्षे तथा तिथौ ॥ २४ ॥

तीर्थावगाहनं यद्वा संयोगे तिथितारयोः ।
[3]विषुवे चायने चैव नादरस्तिथि[4]तारयोः ॥ २५ ॥

दुष्टवारादिसंयोगे शुभमेव यथोदितम् ।
पत्तने नगरे ग्रामे प्रतिलोमानधिष्ठिते ॥ २६ ॥

अशून्ये बलिदानादिरथ्यासु बहिराचरेत् ।
नो चेदावरणेष्वेव कुर्यादन्तर्महोत्सवम् ॥ २७ ॥

ग्रामादिरहिते धाम्नि नोत्सवं बहिराचरेत् ।
अन्तरावरणेष्वेव न तु त्याज्यं कथञ्चन ॥ २८ ॥

वास्त्वङ्गे च स्वतन्त्रे च धामन्युत्सवसम्पदि ।
यौगपद्येन दोषस्स्याद्द्वेषो वास्त्वङ्गयोर्द्वयोः ॥ २९ ॥

स्वतन्त्रं परतन्त्रं चा(प्या)श्रयं समुदाहृतम् ।
उत्तमादिविभेदेन आलयस्त्रिविधो भवेत् ॥ ३० ॥

---

1. एतेष्ववभृथ° T, P_1, P_2 2. °साधकम् M_2 3. एष अर्धश्लोकः 'A' ग्रन्थे नास्ति । 4. °वारयोः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्ण्वालयं पुरा कल्प्य पश्चाद् ग्रामादिकल्पनम् ।
स्वतन्त्रमिति विज्ञेयमालयं तूत्तमं भवेत् ॥ ३१ ॥

[1]ग्रामालयं पुरा कल्प्य पश्चादा[2]लयकल्पनम् ।
अस्वतन्त्रमिति ख्यातमालयं मध्यमं भवेत् ॥ ३२ ॥

स्वतन्त्रालयवल्लस्मासु रथ्यावीथीषु पङ्कज ।
अन्तरे स्थापितं यत्तदाश्रयन्त्वधमालयम् ॥ ३३ ॥

स्वतन्त्रे परतन्त्रे चाप्युत्सवादौ कृते सति ।
पूर्वं स्वतन्त्रे कर्तव्यं वास्त्वङ्गे द्विगुणार्चनम् ॥ ३४ ॥

आश्रयादिषु बिम्बेषु उत्सवादौ कृते सति ।
तत्तदावरणे कुर्याद्बाह्यवीथ्यां तु नाचरेत्[3] ॥ ३५ ॥

मोहाद्वा यदि वा लोभाद्विपरीते कृते सति ।
अरातिभिः परिभवो महाव्याध्यादिपीडनम् ॥ ३६ ॥

प्राङ्गणेषु च सर्वेषु प्रासादादिषु मूर्तिषु ।
प्रीत्याभिषेकमात्रं च स्नपनाद्युत्सवं विना ॥ ३७ ॥

[4]कारयेद्यदि संमोहात् प्रजानां पीडनं तथा ।
तस्मात् सर्वप्रयत्नेन विपरीतं तु नाचरेत् ॥ ३८ ॥

अन्यथा कारयेन्मोहाद्राजा राष्ट्रं च नश्यति ।
ग्रामाश्रयादिबेराणामालयाश्रयकेषु च ॥ ३९ ॥

ग्रामवास्तुबलिहीनं केवलोत्सवमाचरेत् ।
देवतान्तरकल्याणे वर्तमानेऽपि वैष्णवम् ॥ ४० ॥

---

1. ग्रामादिकं T, P_1, P_2 2. °ग्रामादिकल्पनम् T 3. न चाचरेत् M_1
4. सदा देशाधिपस्य स्यात् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुर्याद्देवोत्सवं नैव वैष्णवेऽन्यं कदाचन ।
वासुदेवो हि देवानां देवताम्नायते यतः ॥ ४१ ॥

उत्सवे देवदेवस्य ध्वजारोहणपूर्वके ।
प्रवर्तिते देवयागे चौलादिर्नैव संस्क्रिया ॥ ४२ ॥

ग्रामाद्यनन्तायतने प्रवृत्तेऽप्युत्सवे पुनः ।
कुर्याद्देवान्तरं यागं चौलादिर्नैव संस्क्रिया ॥ ४३ ॥

तोरणादीनि चान्येषां देवानामुत्सवे [1]सताम् ।
उत्पाट्य रथ्यासु हरेरुत्सवो नान्यथा भवेत् ॥ ४४ ॥

क्लृप्तानामुत्सवे विष्णो रथ्यादिष्वितरोत्सवः ।
स्थिराणां तोरणादीनां कार्यं नोत्पाटनं भवेत् ॥ ४५ ॥

अधिके मासि [2]शुक्रे च गुरौ चास्तमिते सति ।
नोत्सवः प्रथमः कल्प्यः कल्पने राजराष्ट्रयोः ॥ ४६ ॥

प्रजानां चैव दुःखं स्याद्व्याधिर्वा मृतिरेव वा ।
उत्सवे च द्वितीयादौ नोक्तदोषः कथञ्चन ॥ ४७ ॥

मासादावुत्सवदिने पञ्चाहावधिके क्रमात् ।
ध्वजारोहणकालस्तु ब्रह्मन्नत्र प्रदर्श्यते ॥ ४८ ॥

एकोनविंशतितमे दिने तीर्थाङ्कुरार्पणात् ।
अष्टादशदिने वापि प्रागेव समये शुभे ॥ ४९ ॥

वैनतेयध्वजारोहाद् द्वादशाहेऽथवा भवेत् ।
यद्वा कल्याणदिवसं त्रिगुणीकृत्य तावताम् ॥ ५० ॥

---

1. सति A 2. शुक्रादौ P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदौ दिनानां कर्तव्यं ध्वजारोहणमब्जज ।
अङ्कुरानर्पयित्वाह्नि पुण्ये पूर्वं यथोदिते ॥ ५१ ॥

ध्वजमारोपयेत्पश्चान्मङ्गलं मङ्गले दिने ।
देवाद्वा मानुषाद्वापि कुतश्चित्कारणाद्यदि ॥ ५२ ॥

उत्सवारम्भणात्पूर्वं यथोक्तेन कृते ध्वजे ।
उत्सवारम्भणदिने दिवारोप्य ध्वजं निशि ॥ ५३ ॥

भेरीताडन[1]मन्वक् च पालिकास्वङ्कुरान् क्षिपेत् ।
आघोष्य भेरीं प्रथमं ध्वजारोहणमन्वतः ॥ ५४ ॥

ततोऽङ्कुरार्पणं यद्वा यद्वा निश्यङ्कुरार्पणम् ।
प्रदोषेऽन्वक् ध्वजारोहो भेरीताडनमन्वतः ॥ ५५ ॥

तत्कालेऽपि ध्वजारोहे त्रैविध्यं चतुरानन ।
तन्तूत्थं क्षौमवसनं निर्दोषं सूक्ष्ममाहृतम् ॥ ५६ ॥

कार्पासं वा यथावित्तं ध्वजार्थे कल्पयेद् बुधः ।
आयतं दशभिर्हस्तैर्विस्तीर्णं पञ्चभिर्दृढम् ॥ ५७ ॥

नवभिर्वाष्टभिर्वापि सप्तभिर्वा चतुर्मुख ।
मूलबेरसमायामं द्वारायाममथापि वा ॥ ५८ ॥

आयामार्धेन विस्तीर्णं पादेन कृतशेखरम् ।
शेखरेण समं पुच्छं तदर्धं कर्णपुच्छकम् ॥ ५९ ॥

निर्णेजितं खलीयुक्तं शोषितं लक्षणान्वितम् ।
आहृत्य मध्ये वस्त्रस्य गरुडं काञ्चनप्रभम् ॥ ६० ॥

---

1. °आकल्प्य A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नवतालप्रमाणेन द्विभुजं धृतकञ्चुकम् ।
धृतपुष्पाञ्जलिपुटं श्वेताम्बरधरं विभुम् ॥ ६१ ॥

दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ।
नीलनासाग्रसंयुक्तं कुञ्चितासव्यपादकम् ॥ ६२ ॥

पृष्ठे निविष्टसव्याङ्घ्रिं पक्षविक्षेपशोभितम् ।
गगने गमनारम्भं [1]सुवृत्तं घोरदर्शनम् ॥ ६३ ॥

करण्डिकामकुटिनं ललाटे रचितालकम् ।
हारकेयूरवलयनूपुराभरणोज्वलम् ॥ ६४ ॥

अनन्तो वामकटको यज्ञसूत्रं च वासुकिः ।
उरसि न्यस्तकार्कोटं कटिसूत्रिततक्षकम् ॥ ६५ ॥

बिभ्राणं दक्षिणे कर्णे पद्माह्वयसरीसृपम् ।
महापद्मं तथान्यत्र शंखं शिरसि भोगिनम् ॥ ६६ ॥

गुलिकं चाङ्गदे सर्पं वर्णस्तेषां च कथ्यते ।
स्फटिकाभश्शोणिताभः पीताभो धूम्रवर्णकः ॥ ६७ ॥

रक्ताम्बुजनिभश्चैव पिङ्गलस्तुहिनप्रभः ।
भ्रमराभः क्रमाच्छत्रं मुक्ताहेमपरिष्कृतम् । ६८ ॥

उपरिष्टाच्च कर्तव्यं पार्श्वयोश्चामरद्वयम् ।
अधस्तादम्बुजं पूर्णकुम्भमद्भिश्च पालिकाः ॥ ६९ ॥

साङ्कुरा लिखितव्याः स्युर्दीपौ द्वौ पार्श्वयोर्द्वयोः ।
पञ्चवर्णैर्लिखेदेवमन्तरं श्यामवर्णकम् ॥ ७० ॥

---

1. वृत्ताक्षं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्तरालं [1]तु कृष्णेन चित्रयेच्चित्रकृत्तमः ।
ध्वजार्धसंमितां चैव पताकां चैव चित्रयेत् ॥ ७१ ॥

अधिवासदिने प्राप्ते तमिस्रायां गुरुः स्वयम् ।
कारुशालां प्रविश्याथ कारयित्वाथ शिल्पिना ॥ ७२ ॥

नयनोन्मीलनं तस्मिन्विसृष्टे शिल्पिनीप्सितैः ।
अर्थैश्च तोषिते पश्चा[2]न्निक्षिप्य शिरसि ध्वजम् ॥ ७३ ॥

मूर्तिपस्य सुवर्णादिलोहपात्रे समर्पितम् ।
प्रादक्षिण्येन धामादीन्नीत्वा तूर्यनिनादितम् ॥ ७४ ॥

ततः प्रवेशयेद्यागमण्टपं देशिकोत्तमः ।
नयनोन्मीलनादन्यत्प्रतिष्ठायामिवाचरेत् ॥ ७५ ॥

छायाधिवासनं सद्यो जले कुर्याद्यथाविधि ।
कुम्भैष्षोडशभिः स्नायात् स्नपनं दर्पणे भवेत् ॥ ७६ ॥

पौरुषेणैव सूक्तेन गायत्र्या स्वस्य पूजयेत् ।
शाययेच्छालिभारादावास्तीर्णे नववाससि ॥ ७७ ॥

शायितस्य पटस्या[3]धोऽपसव्ये सहाष्टभिः ।
परितो न्यस्तकलशैर्वर्धन्या च घटं क्षिपेत् ॥ ७८ ॥

आवाह्य गरुडं कुम्भे करके च सुदर्शनम् ।
इन्द्रादीनष्ट पूर्वादिकलशेषु सुपूजयेत् ॥ ७९ ॥

शोधयित्वा च गरुडं पटस्थं शोषणादिभिः ।
संहृत्य तत्त्वानि ततः क्रमादुत्पाद्य पक्षिणम् ॥ ८० ॥

---

1. च T, P_1, P_2 2. निक्षिपेत् M_2 3. ॰अथ॰ T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्षु पार्श्वकुण्डेषु होमस्थण्डिल[1]भूमिषु ।
कुण्डे महानसे वापि [2]समिदाज्यैर्यथापुरम् ॥ ८१ ॥

शान्ति[3]होमस्पर्शनं च सेचनं च [4]यथापुरम् ।
पटं विस्तीर्य गरुडं मन्दिराभिमुखं यथा ॥ ८२ ॥

प्रदर्श्यावाहयेत्तत्र व्याहृत्या सन्निधिं ततः ।
प्रार्थयेत गुरुस्तस्य गाथया वक्ष्यमाणया ॥ ८३ ॥

महाबल महाबाहो वैनतेय वयोऽधिप ।
सन्निधत्स्व पटे तुभ्यं नमः प्रणवमूर्तये ॥ ८४ ॥

कर्मणां सिद्धिमाहूतः करुष्व विहगेश्वर ।
आहूतव्यास्त्रयो लोका देवस्योत्सवसम्पदि ॥ ८५ ॥

यजेदात्मीयगायत्र्या तमर्घ्याद्युपचर्यया ।
निवेदयेत्ततस्तस्मै [5]नैवेद्यं च चतुर्विधम् ॥ ८६ ॥

कुम्भाय च निवेद्यान्नं स्तोत्रैर्गरुडतोषणम् ।
वाहनाय महाविष्णोस्तार्क्ष्यायामिततेजसे ॥ ८७ ॥

गरुडाय नमस्तुभ्यं सर्वसर्पेन्द्रमृत्यवे ।
नमो नमस्ते पक्षीन्द्र स्वाध्यायवपुषे नमः ॥ ८८ ॥

विहगेन्द्र नमस्तेऽस्तु समुत्पाटितकल्पक ।
आश्रितामृतकुम्भाय जननीदास्यमोचिने ॥ ८९ ॥

सुरासुरेन्द्रजयिने नागेन्द्राभरणाय ते ।
यदाधारमिदं सर्वं तदाधाराय ते नमः ॥ ९० ॥

---

1. ०भूषु वा T, P_1, P_2 2. समिदाद्यैः M_2 3. ०होमः P_2
4. समाचरेत् A 5. निवेद्यं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पक्षौ यस्य बृहत्साम रथन्तरमपि द्वयम् ।
अक्षिणी चापि गायत्री [1]त्रिवृत्साम शिरः स्मृतम् ॥ ९१ ॥

स्तोम आत्मा नमस्तस्मै वामदेव्याङ्गसम्पदे ।
नमः प्राणादिवायूनामीशाय गरुडात्मने ॥ ९२ ॥

दोषानपनयाखण्डान् गुणानावह सर्वतः ।
विघ्नानि जहि सर्वाणि आत्मसात्कुरु मामपि ॥ ९३ ॥

स्तुत्वैवं गारुडं मन्त्रं जपेदेकाग्रमानसः ।
तूर्यघोषैर्वेदघोषैर्जागरेण नयेन्निशाम् ॥ ९४ ॥

निवेद्यं कबलीकृत्य मन्त्रयित्वा च मन्त्रवित् ।
पौरुषैर्गारुडैर्मन्त्रैर्वन्ध्यानामपि योषिताम् ॥ ९५ ॥

क्षिपेदञ्जलिषु ध्यात्वा गरुडं चाच्युतं हरिम् ।
भक्षयित्वा त्रयः पिण्डान् जनयेयुस्सुतान् बहून् ॥ ९६ ॥

तं प्रभाते समाराध्य निवेद्य च हविः क्रमात् ।
वस्त्राभरणपुष्पैस्तु पटस्थं शोभयेत् खगम् ॥ ९७ ॥

आरोप्य हस्तिपृष्ठे वा रथे वान्यत्र मङ्गले ।
शिबिकादौ नयेद् ग्रामं प्रादक्षिण्येन धाम वा ॥ ९८ ॥

भेरीमृदङ्गपटहैः शंखकाहलचिह्नकैः ।
घोषयेत् पुरतस्तस्य नृत्तैर्गेयैश्च सर्वतः ॥ ९९ ॥

खगेशवाद्ययोर्मध्ये पालिकाश्चाङ्कुरान्विताः ।
वहेयुर्ब्राह्मणास्सर्वे शिरोभिः संयतेन्द्रियाः ॥ १०० ॥

1. बृहत्साम M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिम्बमौत्सवमन्वच्च गरुडस्यान्तिकेऽथवा ।
इच्छया यजमानस्य सर्वमङ्गलसंयुतम् ॥ १०१ ॥

अग्रतो बलिपीठस्य बहिर्वा धामगोपुरात् ।
ध्वजस्तम्भं खनेद्भूमौ निर्दोषं दारवं स्थिरम् ॥ १०२ ॥

अन्तस्सारो बहिस्सारो निस्सारो त्रिविधस्तरुः ।
कमुकादि बहिस्सारं प्रशस्तं विदुरुत्तमम् ॥ १०३ ॥

अन्तस्सारं चन्दनादि प्रशस्तं स्तम्भकल्पने ।
निस्सारं वर्जयेत् स्तम्भं शततालायतं शुभम् ॥ १०४ ॥

मानाङ्गुलप्रमाणेन विंशत्यूनमथापि वा ।
प्रासादोच्छ्रायमथवा यद्वा गोपुरसंमितम् ॥ १०५ ॥

चतुर्धा विभजेत् स्तम्भमेकांशेनैव मस्तकम् ।
तस्य चाधारभूतानां [1]छिद्रितानां च मूलतः ॥ १०६ ॥

त्रयाणामपि पीठानां स्तम्भाग्रे विनिवेशनम् ।
आयतानि च पीठानि द्वितालेन चतुर्मुख ॥ १०७ ॥

विस्तीर्णानि तदर्धेन तदर्धेन घनानि च ।
मूले स्थूलानि सूक्ष्माणि चाग्रे युञ्जीत भूरुहान् ॥ १०८ ॥

अग्रे पीठद्वयोश्छिद्रे ध्वजयष्टिं च संस्कृताम् ।
निवेशयेच्छिद्रयित्वा ध्वजस्तम्भं चतुर्मुख ॥ १०९ ॥

निवेशयेद्वेणुकं वा नव वा सप्त पञ्च वा ।
इत्थम्भूतं ध्वजस्तम्भं पीठस्योत्तरपार्श्वतः ॥ ११० ॥

---

1. छेदितानां तु T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आनाय्य वेदविद्विप्रैः प्रागग्रं शाययेद् गुरुः ।
यद्वोदगग्रं प्रक्षाल्य स्तम्भमब्लिङ्गमन्त्रतः ॥ १११ ॥

कुशैश्च साग्रैः प्रच्छाद्य स्तम्भमूर्ध्वमुखैश्शुभैः ।
संवेष्ट्य दर्भमालाभिर्विष्णुसूक्तेन देशिक ॥ ११२ ॥

ध्वजस्तम्भावटे न्यस्य लोहबीजादि शोधितम् ।
तत्रावटे ध्वजस्तम्भं स्थापयित्वा दृढं यथा ॥ ११३ ॥

प्रासादाभिमुखं तस्य वेण्वग्रविवरे ध्वजम् ।
पाशेनाङ्गुष्ठनाहेन त्रिगुणीकृत्य तन्तुना ॥ ११४ ॥

ध्वजं निवेशयेद्यद्वा स्तम्भमारुह्य बन्धयेत् ।
बद्धध्वजाग्रस्तम्भं वा स्थापयेच्छक्त्यपेक्षया ॥ ११५ ॥

[1]एवं नियोज्य यष्ट्यग्रे मुहूर्ते शोभने गुरुः ।
पूर्वाह्णे वाथ मध्याह्ने ध्वजमारोपयेत्तथा ॥ ११६ ॥

बद्ध्वा पुरुषमंत्रेण सपताकं सघण्टकम् ।
सुपर्णोऽसीति मन्त्रेण ध्वजस्यारोपणं[2] भवेत् ॥ ११७ ॥

प्रासादाभिमुखं स्थाप्य खगेन्द्रं पटसंस्थितम् ।
तूर्यघोषं तथाम्नायघोषं दिक्षु च घोषयेत् ॥ ११८ ॥

खगेशमालामन्त्रादींस्तत्काले देशिको जपेत् ।
स्तम्भमूलस्थले वेदिं हस्तैस्सप्तभिरायताम् ॥ ११९ ॥

तावद्भिरेव विस्तीर्णामेकहस्तसमुच्छ्रिताम् ।
पञ्चभिर्वा त्रिभिर्वापि चतुरश्रां प्रकल्पयेत् ॥ १२० ॥

---

1. इदं पादोनश्लोकद्वयं मूलमातृकायां नोपलभ्यते; M_1 कोशे केवलश्लोकसंख्यया सूचितम् । 2. °आरोहणं P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेदिकायास्तृतीयांशे मध्ये पीठं प्रकल्पयेत् ।
[1]चतुष्टयाङ्गुलोत्सेधं मेखलात्रयसंयुतम् ॥ १२१ ॥

भागे तृतीये तस्यापि पद्ममष्टदलैर्युतम् ।
कर्णिकास्थो यथा स्तम्भस्तथा कुर्याद्विचक्षणः ॥ १२२ ॥

षोडशस्तम्भसंयुक्ता प्रपा स्यात्परितस्ततः ।
चतुर्द्वारसमायुक्तां दर्भमालाद्यलङ्कृताम् ॥ १२३ ॥

पुण्याहं वाचयित्वाथ प्रोक्षयेत्कुम्भवारिणा ।
गारुडेनैव मन्त्रेण कलशैश्चाष्टभिस्तथा ॥ १२४ ॥

इन्द्राद्यैः प्रोक्षयेत्स्तम्भं स्वैस्स्वैर्मन्त्रैर्यथाक्रमम् ।
प्रार्थयेत स्थितिं तस्य गरुडस्य ध्वजोदरे ॥ १२५ ॥

उत्सवावभृथं यावत् गाथया वक्ष्यमाणया ।
पक्षीन्द्र पक्षविक्षेपतरङ्गानिलसम्पदा ॥ १२६ ॥

निरस्तासुरसन्नाह समरे शत्रु[2]बर्हण ।
सन्निधत्स्व पटे यावदुत्सवावभृथावधि ॥ १२७ ॥

उत्सवप्रतिमां यानमारोप्य शिबिकादिकम् ।
ध्वजस्तम्भसमीपोर्वीमानीयादर्शयेत् खगम् ॥ १२८ ॥

आह्वानार्थमशेषाणां लोकानां पतगेश्वरम् ।
नियुज्य देवस्तदनु प्राप्नुयान्मण्डपावनिम् ॥ १२९ ॥

आराधयेत् त्रिकालं [3]च गरुडं च निवेदयेत् ।
अनिर्वाणं यथा दीपं रक्षेन्नक्तन्दिवं सदा ॥ १३० ॥

---

1. चतसृणांगुलोत्सेधं A 2. ०सूदन T, P_1, P_2 3. तु T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्सवप्रतिमां तत्र मण्डपे च यथाविधि ।
पूजयित्वा निवेद्याथ हविर्होमान्तमर्चयेत् ॥ १३१ ॥

रात्रौ च पूजयित्वैवं भेरीताडनसिद्धये ।
ध्वजपीठस्य पुरतः क्षितिं गोमयवारिणा ॥ १३२ ॥

आलिप्य चतुरश्रं च सुधाचूर्णैश्च शोभयेत् ।
चतुरश्रं धान्यपीठं [1]शालीनां द्रोणपञ्चकम् ॥ १३३ ॥

कल्पयित्वा कालचक्रं तस्य मध्ये निवेशयेत् ।
बल्यर्चामपि तत्रैव स्थापयेद् ध्वजसंमुखम् ॥ १३४ ॥

पूजयित्वा निवेद्याथ हवींषि विविधानि वा ।
आलिप्ते पुरतस्तस्य भूतले धान्यपीठके ॥ १३५ ॥

तावदेव[2] महाभेरीं वेष्टितां नववाससा ।
दक्षिणेतरयोस्तस्या भेरिकाया यथाक्रमम् ॥ १३६ ॥

भागयोरर्चयेद्विष्णुं श्रियं चैव यथाविधि ।
त्रिगुणां प्रकृतिं चैव मध्यभागे सभाजयेत् ॥ १३७ ॥

मुहूर्ते शोभने भेरीं शब्दतन्मात्रविग्रहाम् ।
कोणेन ताडयेन्मूर्तित्रयं ध्यायेद् गुरुः स्वयम् ॥ १३८ ॥

ततः पारशवःस्नातो [3]दर्भपाणिरलङ्कृतः ।
सोपवीतोत्तरीयश्च वहन् भेरीमलङ्कृताम् ॥ १३९ ॥

शंखादिवाद्यसहितां तालभेदविधानवित् ।
घोषयेद् गुरुणेन्द्रादौ हूयमाने मरुद्गणे ॥ १४० ॥

---

1. द्रोणपञ्चकशालिना T, P_1, P_2 2. स्थापयित्वा A 3. दर्भादिभिः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिव्यायुधानामाह्वानं तथा वैकुण्ठवासिनाम् ।
तथा पारिषदास्सर्वे विष्वक्सेनाभिरक्षिताः ॥ १४१ ॥

आहूतव्या मखे तस्मिन् कुमुदाद्यास्सनायकाः ।
ऋषिभिश्च मरीच्याद्यैर्ब्रह्मलोकनिवासिभिः ॥ १४२ ॥

समाह्वानं विरिञ्चस्य [1]इन्द्रलोकनिवासिभिः ।
सार्धं प्रमथसार्थैश्च रुद्रश्च वृषवाहनः ॥ १४३ ॥

आहूतव्यास्तथान्ये च तत्तल्लोकनिवासिनः ।
वाहनैः परिवारैश्च साकं तस्मिन्महोत्सवे ॥ १४४ ॥

विद्याश्च मूर्तिधारिण्यस्त्रयी चाङ्गैर्वपुष्मती ।
आहूतव्यास्समाह्वानं सर्वेषां च स्वनामभिः ॥ १४५ ॥

नित्योत्सवार्चा परितो वीथिकासु सुदर्शनम् ।
अन्नमूर्तिविधानं च प्रदीपैर्बहुभिर्वृतम् ॥ १४६ ॥

गमयित्वा प्रतिदिशं भेरीताडनपूर्वकम् ।
ग्राममध्यं समासाद्य तत्रावाह्य चतुर्मुखम् ॥ १४७ ॥

[2]अर्चयित्वा मखे तस्मिन् याचित्वा सन्निधिं गुरुः ।
इन्द्रादींश्च प्रतिदिशं बरयर्थं सन्निधिं [3]तथा ॥ १४८ ॥

अर्चयित्वा तूर्यघोषं घोषयित्वा स्वतालवित् ।
अन्यत्र गारुडं [4]तस्या अन्तरालेषु घोषयेत् ॥ १४९ ॥

प्रविश्य मन्दिरं तत्र यथापूर्वं निवेशयेत् ।
आदायोत्सवबिम्बं वा केवलं वा सुदर्शनम् ॥ १५० ॥

---

1. रुद्र° T, P_1, P_2 2. एष अर्धश्लोकः M_1 कोशे नोपलभ्यते ।
3. तदा T, P_1, P_2 4. तालं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्नमूर्तिविधानं वा भेरीमादाय केवलाम् ।
रथ्यासु देवताह्वानं तत्र तत्र यथाविधि ॥ १५१ ॥

देवताह्वानवेलायां भेरीं शृण्वन्ति ये नराः ।
तैर्नदीतरणं नैव यानं वा योजनात्परम् ॥ १५२ ॥

अनादृत्योत्सवं मोहाद्दूरं यायाज्जनो यदि ।
स याति निरयस्थानं प्रेत्य दुःखमिहापि वा ॥ १५३ ॥

तस्मादवभृथं यावद्वसेत्तत्रैव नो व्रजेत् ।
ध्वजार्थमङ्कुरा येन न्यस्तास्स यदि कारणात् ॥ १५४ ॥

कुतश्चिदसमर्थो वा मृतो वा देशिकोत्तमः ।
शेषं समापयेदन्यः पुत्रो वा तदनुज्ञया ॥ १५५ ॥
शिष्यो वा यदि वा भ्राता ऋत्विग्वा गुणवत्तरः ।

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे
चर्यापादे ध्वजारोहणविधिर्नाम दशमोऽध्यायः ॥

एकादशोऽध्यायः ॥

महोत्सवविधिः ॥

श्रीभगवानुवाच—

उत्सवारम्भदिवसादर्वागहनि सप्तमे ।
अङ्कुरानर्पयेल्लग्ने शोभने देशिकोत्तमः ॥ १ ॥

[1]अष्टोत्तरशतेष्वेव पालिकासु यथाविधि ।
[2]षट्त्रिंशत्स्वथवा पश्चाद[3]लङ्कारैस्समाचरेत् ॥ २ ॥

---

1. अष्टोत्तरशतं वापि पालिकानां A 2. षट्त्रिंशद्भिस्तु वा M_2
3. °अलङ्कारं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रमुकैर्दारुजैर्वापि तोरणैर्वीथिकामुखम् ।
चत्वराणि तथाग्रेषु गोपुराणामलङ्क्रिया ॥ ३ ॥

फलभारावनम्राश्च कदलीक्रमुकादयः ।
पार्श्वेषु तोरणानां स्युः स्याप्यागमनवीथयः ॥ ४ ॥

समभूमितलाः कार्यास्सिकताभिश्च शोभिताः ।
दुकूलक्षौमबासोभिर्दर्भमालाशतेन च ॥ ५ ॥

ध्वजैश्च सर्वतो दिक्षु शोभयेच्च प्रपादिभिः ।
शोधयेत्सर्वभूभागं गोमयाम्भोभिराप्लुतैः ॥ ६ ॥

प्रासादभित्तयः कार्याश्चित्रिता वर्णपञ्चकैः ।
[1]रम्भाभिः पूर्णकुम्भैश्च दीपिकावलिभिस्तथा ॥ ७ ॥

मुक्तादामभिरन्यैश्च साङ्कुरैः पालिकाशतैः ।
देशाद्देशात्समेतानां वर्णानां च तदुत्सवे ॥ ८ ॥

सेवितुं देवदेवेशमन्नाद्यैस्तुष्टिमावहेत् ।
प्रपापानीयशालाद्यैर्यजमानो दिवानिशम् ॥ ९ ॥

रोगार्तानथ भैषज्यैर्भिषजेद् धनराशिभिः ।
प्रथमावरणे ब्रह्मन् [2]कारयित्वा च मण्टपम् ॥ १० ॥

यद्वावकाशानुगुणं द्वितीयावरणे भवेत् ।
अन्तरालेषु सर्वत्र दिशामिष्टे च[3] तद्भवेत् ॥ ११ ॥

सप्तहस्तायतं यद्वा पञ्चहस्तायतं [4]शुभम् ।
विस्तारायामसदृशं चतुर्द्वारसमन्वितम् ॥ १२ ॥

---

1. अम्भोभिः M_2 2. कारयेद्यागमण्डपम् T,, P_1, P_2 3. क्वचिद्भवेत् T, P_1, P_2 4. तु वा T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मण्डपं कारयेत्तस्य परितः कारयेत् प्रपाम् ।
तस्य मध्ये त्रियंशे तु वेदिं हस्तसमुच्छ्रिताम् ॥ १३ ॥

विस्तीर्णां द्वित्रिहस्तेन वेद्याः प्राच्यां प्रकल्पयेत् ।
कुण्डमाहवनीयस्य चतुरश्रं यथोदितम् ॥ १४ ॥

दक्षिणस्यां दक्षिणाग्नेर्दिशि चापसमाकृति ।
कुण्डं च[1] गार्हपत्यस्य प्रतीच्यां वृत्तमद्भुतम् ॥ १५ ॥

सभ्यस्य कुण्डं कौबेर्यां त्रिकोणं तदनन्तरम् ।
ऐशान्यामग्निकोणे वा कुण्डं च चतुरश्रकम् ॥ १६ ॥

आवसथ्यस्य शिखिनः पञ्चाग्न्युत्सवमुत्तमम् ।
यद्वावसथ्यरहितं चतुरग्नि चतुर्दिशम् ॥ १७ ॥

सभ्यावसथ्यरहितं यद्वाग्नित्रयसंयुतम् ।
एकमाहवनीयं वा कल्पयेत्कर्तुरिच्छया ॥ १८ ॥

अश्वत्थादिद्रुमैर्द्वारतोरणानि चतुर्दिशम् ।
स्रुक्स्रुवौ कारयेदष्टमङ्गलानि यथापुरम् ॥ १९ ॥

आसनान्यृत्विजां[2] होमपात्राणि विविधानि च ।
मण्टपानां च पुरतः प्रपा स्यात्पार्श्वयोरपि ॥ २० ॥

दुकूलक्षौम[3]कौशेयैर्विचित्रै[4]र्मण्टपं प्रपाम् ।
[5]वितानयेद्वेष्टयेच्च स्तम्भानन्तर्बहिःस्थितान् ॥ २१ ॥

मुक्तादामानि सर्वत्र लम्बयेद् दीपमालिकाः ।
आरोपयेच्च स्तम्भेषु पताकावलिबन्धनम् ॥ २२ ॥

---

1. तु P_1, P_2 2. आसनं त्वृत्विजां T, P_1, P_2 3. °कार्पासैः M_2
4. विचित्रं T, P_1, P_2 5. वितानैः T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मुक्तावितानं बध्नीयात्पुष्पमालाश्च सर्वतः ।
एवमादिपरिष्कारैर्भूषयेन्मण्टपादिकम् ॥ २३ ॥

तिरस्करिण्यो विपुला बध्नीयाच्च विचित्रिताः ।
अग्रे चतुर्णां वरणमाचार्याणामथ[1]र्त्विजाम् ॥ २४ ॥

षोडशानां तथान्येषां स्वीकारः परिचारिणाम् ।
[2]ते च भूष्या यथावित्तं भूषणैः कटकादिभिः ॥ २५ ॥

वासोभिश्च नवैश्चित्रैरधिकारानुसारतः ।
उष्णीषैरुत्तरीयैश्च गन्धद्रव्यानुलेपनैः । २६ ॥

शोभनीयाः प्रयत्नेन यजमानेन सर्वथा ।
स्नपनं चोत्सवारम्भे तदन्ते च यथोदितम् ॥ २७ ॥

कुर्याद्देवस्य पूर्वेद्युः कौतुकं बन्धयेद् गुरुः ।
सौवर्णे राजते वापि पात्रे [3]कलमतण्डुलैः ॥ २८ ॥

[4]खारीद्वयात्तदर्धेन यद्वा पादेन सम्मिते ।
न्यसेत्सूत्रं च सौवर्णं क्षौमं कार्पासमेव वा ॥ २९ ॥

सप्तभिः पञ्चभिर्वापि सूत्रं क्षौमादितन्तुभिः ।
शतेन षष्ट्यारूढेन फलैः क्रमुकजैरपि ॥ ३० ॥

नागवल्लीदलैस्सार्धं फलसंख्या चतुर्गुणैः ।
तदर्धैर्वा तदर्धैर्वा कदल्यादिफलैरपि ॥ ३१ ॥

सार्धं तदनु तत्पात्रं साधारं न्यस्य मूर्धनि ।
वस्त्रेणाच्छादितं छत्रचामरव्यजनान्वितम् ॥ ३२ ॥

---

1. च ऋत्विजाम् T, P_1, P_2 2. M_1 कोशे इदं नोपलभ्यते 3. विमल-तण्डुले P_1, P_2 4. खारीद्वयेन वार्धेन T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सहस्रदीप[1]संयुक्तं सवितानं च मूर्तिपः ।
पठद्भिश्शाकुनं सूक्तं ब्राह्मणैर्वेदपारगैः ॥ ३३ ॥

तूर्यमङ्गलगीतैश्च सार्धं नीत्वा प्रदक्षिणम् ।
धाम विष्णोस्तथा तस्य बहिरावरणानि च ॥ ३४ ॥

प्रादक्षिण्येन वा ग्रामं प्रविशेद्देवतान्तिकम् ।
देवस्य पुरतो भूमौ[2] तले गोमयवारिणा ॥ ३५ ॥

आलिप्ते चतुरश्रे च शालिभारेण पूरिते ।
पात्रं निधाय पुण्याहं वाचयित्वा यथाविधि ॥ ३६ ॥

सभाजयित्वा तत्सूत्रमस्त्रमन्त्रेण देशिकः ।
अङ्गुष्ठानामिकाभ्यां [3]तत् गृहीत्वा हस्तयोर्द्वयोः ॥ ३७ ॥

अपराजितया सूत्रं चन्दनक्षोदवारिणा ।
आलिप्य दक्षिणे हस्ते बध्वा चोत्सवकौतुकम् ॥ ३८ ॥

स्पृष्ट्वा दक्षिणहस्तेन सूत्रं [4]वारांश्च तज्जपेत् ।
अस्त्रमन्त्रं तथार्घ्याद्यैरिष्ट्वा देवं निवेदयेत् ॥ ३९ ॥

महापूपं तथापूपान् पृथुकांश्च फलान्यपि[5] ।
गेयं नृत्तं तथा वाद्यमाचरेद्देवतान्तिके ॥ ४० ॥

त्रिभिर्भागवतैर्देवं स्थानेऽन्यत्र निवेशयेत् ।
स्नानान्तं क्षौमवसनमालिप्तं [6]चाञ्जनादिना ॥ ४१ ॥

भूषितं भूषणैस्सर्वैस्स्रग्विणं देवदैवतम् ।
अर्चयित्वा यथाशास्त्रं परमान्नं निवेदयेत् ॥ ४२ ॥

---

1. बहुप्रदीप° T, P_1 ; बहुदीपक° P_2 2. भूमि° T, P_1, P_2 3. तु P_1, P_2
4. वारान् शतं जपेत् T, P_1, P_2 5. फलानि च M_1 6. चन्दनादिना T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथोदितं प्रतिष्ठायां तथा[1] शय्यानुकल्पनम् ।
बिम्बञ्चोपरि विन्यस्य शयने स्थापयेच्छुभे ॥ ४३ ॥

कोणेषु स्थापयेद्दीपान् पालिकास्साङ्कुरास्तथा ।
तूर्यघोषैस्तथा वेदैस्स्तोत्रैस्स्तुत्वा मधुद्विषम् ॥ ४४ ॥

निशां नयेज्जागरेण समाहितमना गुरुः ।
श्वोभूते शोभने प्राप्ते मुहूर्ते भास्करोदये ॥ ४५ ॥

उत्तिष्ठत्यादि[2]मन्त्रेण त्रिभिर्भागवतैः सह ।
दिक्षु शाकुनिकं सूक्तं पठत्सु ब्राह्मणेष्वपि ॥ ४६ ॥

उत्थाप्य शयनाद्देवं तमिदं विष्णुरित्यृचा ।
आरोपयेयुश्शिबिकां [3]सौवर्णप्रभया सह ॥ ४७ ॥

वहेयुर्भूसुरा[4] यानं ध्यायन्तो विहगाधिपम् ।
विकिरेत्सर्वतो दिक्षु पुष्पाणि सुरभीणि च ॥ ४८ ॥

लाजांश्च साकं मुक्ताभिस्तूर्यघोषैश्च नादयेत् ।
ईदृशैर्मङ्गलैरन्यैस्सर्वावरणभूमिकाः[5] ॥ ४९ ॥

नीत्वा प्रदक्षिणं यानादवरोप्य प्रभान्विते ।
भद्रासने दुकूलादिचित्रास्तरणशोभिते ॥ ५० ॥

पार्श्वे कल्पद्रुमच्छायाशीतले स्वर्णनिर्मिते ।
निवेश्य मण्टपे सर्वमुपचारं समाचरेत् ॥ ५१ ॥

[6]प्राहृतं चाहृतं सर्वं द्रव्यमुत्सवकारणम् ।
देवाय दर्शयेत्सर्वं जनसंसदि देशिकः ॥ ५२ ॥

---

1. यथा शयनकल्पनम् T, P_1, P_2 2. उत्तिष्ठोत्तिष्ठ॰ M_1 3. सुवर्ण॰ T, P_1, P_2 4. शिविका॰ A 5. ॰भूमिषु A 6. प्राभृतं P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]कृत्वोपचारमखिलं [2]तद्बिम्बं स्नानमण्टपे ।
स्नापयेद्देवदेवेशं यथापूर्वोदितैः क्रमैः ॥ ५३ ॥

आचार्यो यजमानश्च समीक्ष्य विभवोदयम् ।
महाहविर्निवेद्यान्ते हुत्वा हव्यैर्यथाविधि ॥ ५४ ॥

गर्भगेहं [3]विमानस्य नयेन्मङ्गलसंयुतम् ।
ततोऽपराह्णसमये चाङ्कुराधारमृत्तिकाम् ॥ ५५ ॥

आनेतुं बहिरुद्यानभूमेर्यद्वा नदीतटात् ।
यानमारोप्य गरुडं सेनान्यं [4]वा परिष्कृतम् ॥ ५६ ॥

देवादेशं पुरस्कृत्य सर्वमङ्गलसंयुतम् ।
वहद्भिः पालिकाः पूर्वं खनित्रं चापि भूषितम् ॥ ५७ ॥

ब्राह्मणैर्बहुभिर्वेदानधीयानैस्समन्ततः ।
नीत्वा प्रदक्षिणं ग्रामं ततो निर्गत्य देशिकः ॥ ५८ ॥

दिशं प्राचीमुदीचीं वा प्रतिसंगृह्य मृत्तिकाम् ।
यथापूर्वोदितं धाम प्रविश्य रजनीमुखे ॥ ५९ ॥

प्रदोषे यागसदसि पालिका द्वादशावराः[5] ।
शरावकुम्भसहितास्तद्वर्गा अपि षोडश ॥ ६० ॥

ईशानभागे संस्थाप्य सोमकुम्भसमन्विताः ।
आवपेत्तासु बीजानि मुहूर्ते शोभने गुरुः ॥ ६१ ॥

ततः प्रविश्य सदनं यजमानो गुरुश्च तौ[6] ।
प्रणम्य दण्डवद्भूमौ देवमुत्सवसम्पदम् ॥ ६२ ॥

---

1. कृतोपचार° T, P_2 2. ततः स्नपनमण्टपे T, P_1, P_2 3. समासाद्य A
4. च M_1 5. °श्चपराः T 6. तं P_1, T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

याचेतां गुरुरन्वक् च बद्ध्वा कल्याणकौतुकम् ।
उत्सवस्नानबल्यर्थं प्रतिमासु यथाक्रमम् ॥ ६३ ॥

सुदर्शने च शयने कल्पितेऽन्यत्र पूर्ववत् ।
बद्ध्वा प्रतिसरं सर्वमधिवास्य यथाक्रमम् ॥ ६४ ॥

उत्थाप्य सद्यश्चाराध्य प्रादक्षिण्येन मन्दिरम् ।
नीत्वा प्रवेश्य यागार्थमण्टपं तत्र चासने ॥ ६५ ॥

नित्योत्सवार्चां चक्रं च निवेश्य तदनन्तरम् ।
वेदिकायां धान्यपीठं कृत्वा पूर्वोदितक्रमात् ॥ ६६ ॥

तत्र प्रक्षालितान् कुम्भान् सूत्रेण परिवेष्टितान् ।
गन्धोदकेन सम्पूर्णान्नवरत्नयुतान्नव ॥ ६७ ॥

सर्वगन्धरजोमिश्रान् करकेण समन्वितान् ।
प्रत्येकं न्यस्तसौवर्णनिष्कानश्वत्थपल्लवैः ॥ ६८ ॥

कुशकूर्चेन सहितान्मुखेष्वेव[1] समल्लिकान् ।
मध्यमं वस्त्रयुग्मेन शिष्टानेकेन वाससा ॥ ६९ ॥

वेष्टितान् वेदिकाभूमौ स्थापयेद्धान्यराशिषु ।
आयतं सप्तभिर्हस्तैः षड्भिर्वा चाथ पञ्चभिः ॥ ७० ॥

विस्तीर्णं वस्त्रमायाममानार्धेन नियोजयेत् ।
भगवन्मयविप्रैश्च पुण्याहमपि वाचयेत् ॥ ७१ ॥

द्वारतोरणकुम्भादीन् प्रतिष्ठायामिवार्चयेत् ।
मध्यकुम्भे मूलबेरं [2]करके च सुदर्शनम् ॥ ७२ ॥

---

1. मुखेष्वपि सपल्लवान् A 2. करकेष्वस्त्रपूजनम् M

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वाद्याशागते कुम्भे वासुदेवादिकान् यजेत् ।
आग्नेयादिषु कोणेषु यष्टव्याः पुरुषादयः ॥ ७३ ॥

[1]क्रमेण पुरुषस्सत्यस्त[2]थैवाच्युतदेवता ।
अनन्तश्चेति हविषा चतुर्णां च निवेदनम् ॥ ७४ ॥

द्वारकुम्भे[3] तथास्त्रे च बलिबिम्बे[4]ऽष्टमङ्गलम् ।
वेष्टितं वाससा वेदेरधस्ताद्धान्यराशिषु ॥ ७५ ॥

न्यस्याभ्यर्च्य चतुर्दिक्षु वेदतूर्यादिघोषणे ।
प्रवृत्ते जुहुयादग्नौ ध्यायन्नाहवनीयके ॥ ७६ ॥

वासुदेवं दक्षिणेऽग्नौ सङ्कर्षणमनन्तरे ।
प्रद्युम्नं पश्चिमे चाग्नावुदीचीनेऽनिरुद्धकम् ॥ ७७ ॥

आवसथ्ये मूलमूर्तिमिष्ट्वा तीर्थावसानिकम् ।
सन्निधिं प्रार्थ्य कुण्डेषु जुहुयात्सर्पिरादिभिः[5] ॥ ७८ ॥

सर्पिषा च प्रसूनैश्च धूपद्रव्यैश्च पद्मज ।
समिधा पयसा दध्ना तिलव्रीहियवैस्तथा ॥ ७९ ॥

तत्तद्दैवतमन्त्रेणा(प्य)ष्टोत्तरशतं पृथक् ।
अष्टाविंशतिवारान्वा कुण्डेषु प्रागुपक्रमः ॥ ८० ॥

पायसैः कृसरैर्गौल्यैर्हरिद्रान्नैश्च मौद्गिकैः ।
होतव्यं पौरुषैः सूक्तैः पृथगग्निषु पञ्चसु ॥ ८१ ॥

---

1. तथैव T, P_1, P_2 2. क्रमेणाच्युत° T, P_1, P_2 3. कुम्भे कुम्भे T, P_1, P_2 वारिकुम्भे A; कुम्भे कुम्भे तथास्त्रे च विन्यसेत् अष्टमङ्गलम् M_2 4. बलिबिम्बे चैवाष्टमङ्गलम् P_1, P_2, T 5. समिदादिभिः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चमे परमान्नेन ब्रह्माद्युद्दिश्य[1] दैवतम्[2] ।
तत्तन्नाम्ना[3] चतुर्थ्यन्तं परिवारपदान्वितम् ॥ ८२ ॥

स्वाहान्तं मन्त्रमुच्चार्य ध्यात्वा ब्रह्मादिदैवतम्[4] ।
ब्रह्मा प्रजापती रुद्रस्सर्वे देवा यथाक्रमम् ॥ ८३ ॥

छन्दांसि वेदा ऋषयो गन्धर्वाश्च सरीसृपाः ।
यक्षाश्चाप्सरसश्चैव मासाद्यैः सह वत्सराः । ८४ ॥

सरितश्च समुद्राश्च पर्वताश्च तथापगाः ।
भूतानि पशवो वृक्षास्तथैवौषधयस्स्मृताः ॥ ८५ ॥

वनस्पतिश्चोद्भिदश्च स्वेदजाश्चाण्डजास्तथा ।
जरायुजाश्च भूरादिसप्तलोकास्तथैव च ॥ ८६ ॥

अतलाद्यास्तथा लोकास्सप्त चण्डादिदेवताः ।
इत्येतेभ्यो [5]हविर्द्रव्यं जुहुयान्मूलविद्यया ॥ ८७ ॥

इदं विष्णुरिति प्रोच्य पूर्णाहुतिमथाचरेत् ।
न दहेत्परिधीन् दर्भान् देवान्नोद्वासयेत् स्थितान् ॥ ८८ ॥

प्रत्यहं धारयेदग्निं[6] यावत्तीर्थदिनावधि ।
अहोरात्रं प्रतिदिनं जुहुयादुक्तवर्त्मना ॥ ८९ ॥

एकाग्नावपि होतव्यं होमद्रव्यमशेषतः ।
त्रये चतुष्टये चैवमग्नीनां चतुरानन[7] ॥ ९० ॥

बलिप्रदानं प्रथमं कुर्याद्यागस्य मण्टपे ।
चक्रं च बलिबिम्बं[8] च समादायान्नमूर्तिना ॥ ९१ ॥

---

1. °उद्दिदष्टदेवताः A; ब्रह्मादीन् च पृथक् पृथक् M_2 2. देवताः P_1, P_2
3. °नाम T, P_1, P_2 4. °देवताः T, P_1, $_2$ 5. बलिं दद्यात् A; बलिद्रव्यं T, P_1, P_2 6. °अग्नीन् T, P_1, P_2 7. कमलासन T, P_1, P_2 8. °मूर्तिं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

साकं निष्क्रम्य सदनात्तद्द्वारे कुमुदादिकम् ।
अभ्यर्च्य पुरतो दद्याद्बलिं भूमितले शुचौ ॥ ९२ ॥

पात्रस्थं [1]च बलिद्रव्यं [2]गन्धं प्रसवभाजनम् ।
तोयपूर्णं च करकं दीपपात्रं च दीपिकाम्[3] ॥ ९३ ॥

धूपपात्रं गृहीत्वाग्रे गच्छन्तु परिचारकाः ।
अग्रे गच्छेदस्त्रमूर्तिस्ततश्चक्रमनन्तरम् । ९४ ॥

[4]नित्योत्सवार्चां तदनु वितानादिसमन्विताम् ।
ततश्चण्डप्रचण्डादीन् द्वारेष्वावरणेषु च ॥ ९५ ॥

नित्योत्सवप्रक्रियया बलिमभ्यर्च्य निक्षिपेत् ।
मध्यमारभ्य च ग्रामे ब्रह्मादीनां यथाविधि ॥ ९६ ॥

देशेष्वीशानपर्यन्तं दत्त्वाभ्यर्च्य बलिं [5]तथा ।
महापीठे बलिद्रव्यं परिशिष्टमशेषतः ॥ ९७ ॥

दद्यात्पारिषदान् सर्वानुद्दिश्य कमलासन ।
मुहूर्ते शोभने प्राप्ते गुरुरुत्सवकौतुकम् ॥ ९८ ॥

शयनस्थमुपस्थाप्य[6] मन्त्रमुत्तिष्ठपूर्वकम् ।
उच्चारयन् स्वस्तिसूक्तं पठद्भिर्ब्राह्मणैस्सह ॥ ९९ ॥

निष्क्रम्य मन्दिरात्तस्मादुच्चार्य च रथन्तरम् ।
समारोप्य रथं युक्तं चतुर्भिर्हस्तिपुङ्गवैः ॥ १०० ॥

वाजिभिर्वा बलीवर्दैः शीघ्रगामिभिरुत्तमैः ।
कल्पकद्रुमसंयुक्तं हेमपीठमलङ्कृतम् ॥ १०१ ॥

---

1. तद्बलि० T, P_1, P_2 2. घण्टां T, P_1, P_2 3. दीपिकाः T, P_1, P_2
4. अयं श्लोक M_1 कोशे नोपलभ्यते । 5. वत: P_1 6. ०समुत्थाय T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रथस्योपरि कृत्वा च नयेदास्थितसारथिम् ।
यन्त्रेण वा विप्रवरै[1]रधीयानैर्बलान्वितैः ॥ १०२ ॥

गजे वा स्यन्दनालाभे याने वा तदसम्भवे ।
भद्रं कर्णेति मन्त्रेण यानमारोपयेद् गुरुः[2]: ॥ १०३ ॥

स पुष्पहेमप्रभया युक्तं पुष्पैरलङ्कृतम् ।
हैमेन च वितानेन[3] युक्तं पुष्पादिशोभिना ॥ १०४ ॥

कूटाकारेण वा युक्तं मयूरच्छदशोभिना ।
सर्वालङ्कारयुक्तेन सुमनःपरिवेषिणा ॥ १०५ ॥

याने तत्र समासीनमभ्यर्च्य न्यासपूर्वकम् ।
देवं निवेदयेत्तस्मै भक्ष्यं च पृथुकादिकम् ॥ १०६ ॥

नान्नं चरणयोर्न्यस्येन्निशाचूर्णानि सर्वशः ।
दीपैरुदग्रैर्बहुभिः परिषिक्तैर्घृतादिना ॥ १०७ ॥

परस्सहस्रैस्सर्वत्र दीपयेच्च शतावरैः ।
द्विजेन्द्रमुख्यैर्बहुभिर्भूषितैर्धवलाम्बरैः ॥ १०८ ॥

कञ्चुकोष्णीषसहितैर्व्यालव्यजनपाणिभिः ।
तालव्यजनहस्तैश्च बर्हिबर्हकरैस्तथा ॥ १०९ ॥

मुक्तातपत्रैः श्वेतैश्च[4] मेघडम्बरधारिभिः ।
बिभ्राणैर्धूपपात्राणि गन्धोद्गारीणि विश्वतः ॥ ११० ॥

यानारूढेन पुरतो रचिताञ्जलिकर्मणा ।
[5]उच्चैर्ध्वजाधिरूढेन तथा तार्क्ष्येण पद्मज ॥ १११ ॥

---

1. °वर्यैः T, P_1, P_2 2. तदा T, P_1, P_2 3. विमानेन T, P_1, P_2
4. मुक्तातपत्रहस्तैश्च T, P_1, P_2 5. मत्स्यध्वज° M_2

पा—18

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृष्ठतश्च प्रणमता शिबिकां कनकोज्ज्वलाम् ।
आरूढेन विरिञ्चादीन् समुत्सारयता बहिः ॥ ११२ ॥

विष्वक्सेनेन देवेन वेत्रहस्तेन सेवितः ।
उपानहौ पादुके च पात्रे कनकनिर्मिते ॥ ११३ ॥

समारोप्य पुरो विप्रैर्धारयद्भिरलङ्कृतैः ।
राजचिह्नानि चान्यानि यातव्यमविलम्बितम् ॥ ११४ ॥

विप्रैस्त्रयीमधीयानैर्जपस्तुतिपरायणैः ।
नृत्यता गायता चापि गाणिक्येनानुसेवितम् ॥ ११५ ॥

वीणादिवादनपरैर्वन्दिभिश्च तथा[1]परैः ।
षड्जादिगीतनिपुणैर्वाद्यवादनकोविदैः ॥ ११६ ॥

गद्यं पद्यं तथा मिश्रं पठद्भिस्स्तोत्रमुज्ज्वलम् ।
भाषाश्च बहुधाश्चित्रा[2] भाषमाणैरितस्ततः ॥ ११७ ॥

वैतण्डिकैस्तथा जल्पनिपुणैर्वादशिक्षितैः ।
तथा तत्त्वकथानिष्ठैः पदार्थज्ञैश्च तार्किकैः ॥ ११८ ॥

मीमांसकैर्याज्ञिकैश्च छान्दसैः सांख्यकोविदैः ।
योगज्ञैश्च पुराणज्ञैश्शाब्दिकैस्तत्त्ववेदिभिः ॥ ११९ ॥

मौहूर्तिकैश्च गणशः परस्परजिगीषुभिः ।
तत्तच्छास्त्रोक्तमार्गेण प्रमेयं बहुधा स्थितम् ॥ १२० ॥

उच्चैर्ब्रुवाणैर्विद्वद्भिः पञ्चरात्रपरायणैः ।
वासुदेवस्य माहात्म्यं कथयद्भिश्च [3]सात्त्वतैः ॥ १२१ ॥

---

1. °विधैः T 2. भिन्नाः T, P_1, P_2 3. सात्त्विकैः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संस्कृतं प्राकृतं मिश्रमीरयद्भिरितस्ततः ।
शास्त्रेषु नैपुणं सर्वं प्रदर्शयितुमुद्यतैः ॥ १२२ ॥

देवस्य पुरतः पृष्ठे पार्श्वतश्च स्थितैर्जनैः ।
सेनया सर्वतो दिक्षु चतुरङ्गबलाढ्यया ॥ १२३ ॥

देवस्य पार्श्वयोः पूर्वे लाक्षारञ्जितमस्करैः ।
यन्त्रैर्दारुमयैश्चित्रैः पक्ष्याकारैरितस्ततः ॥ १२४ ॥

देवताकृतियन्त्रैश्च तथा यन्त्रैर्गजादिभिः ।
निषादिभिस्समारूढैः स्त्रीभिश्च भरतोदितैः ॥ १२५ ॥

मार्गैर्बहुविधैर्नृत्तं दर्शयन्तीभिरद्भुतम् ।
[1]लेखायन्त्रैस्स्त्रियारूढैर्यन्त्रैरन्यैस्तथाविधैः ॥ १२६ ॥

गतागतानि कुर्वाणैरनुयातस्समाकुलैः ।
इत्थमावरणं सर्वं परिक्रम्य बहिस्तथा ॥ १२७ ॥

ग्रामादिवीथिकाश्चापि परिक्रम्य प्रदक्षिणम् ।
प्रवेशसमये चापि प्राकारवलयं तथा ॥ १२८ ॥

प्रादक्षिण्येन गत्वान्तः प्रविशेन्मण्टपावनिम् ।
तत्रावरोपयेद्देवं बलिबेरं तु मन्दिरे ॥ १२९ ॥

चक्रं च यागसदने बलिपीठे बहिः स्थिते ।
अन्नमूर्तिं क्षिपेन्नित्यं समाराधनकल्पितैः ॥ १३० ॥

वस्तुभिर्द्विगुणैर्नित्यं ध्रुवबेरं समर्चयेत् ।
रात्रिशेषे व्यतिक्रान्ते मण्टपे सिंहविष्टरे ॥ १३१ ॥

1. डोला॰ M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अवस्थाप्यौत्सवं बिम्बमर्चयेच्छास्त्रवर्त्मना ।
स्नपनं तत्र वा बिम्बे यद्वा स्नपनकौतुके ॥ १३२ ॥

एकबेरविधाने तु मूलबिम्बेऽभिषेचनम् ।
प्रत्यहं स्नपनं कुर्याद्यथाशक्ति यथावसु[1] ॥ १३३ ॥

महाहविर्निवेद्याथ बिम्बे कल्याणकल्पिते ।
मण्डनालयमासाद्य शोभयेद् भूषणादिभिः ॥ १३४ ॥

बिम्बे तत्र[2] स्थिते यागमण्टपं प्राप्य देशिकः ।
कुम्भादिकं समभ्यर्च्य निवेद्य च [3]यथोदितम् ॥ १३५ ॥

हुत्वा च पूर्ववत्पीठे बलिं दत्त्वा यथाविधि ।
सर्वमन्यच्च बल्यर्चां नीत्वा ग्रामादि[4]वीथिकाम् ॥ १३६ ॥

यथानिशं विधायान्वगुत्सवार्चां नयेद्बहिः ।
यथापुरमलङ्कारं कृत्वा परिकरांस्तथा ॥ १३७ ॥

दिवसानुगुणानन्यान् ध्वजादीन्विष्वगुच्छ्रितान् ।
ताम्बूलवीटिकां दत्त्वा स्थाने स्थाने [5]समाहृताम् ॥ १३८ ॥

पृथुकादींस्तथा भक्ष्यान्नालिकेरफलानि च ।
पानीयाचमनादीनि चोदितानि यथाविधि ॥ १३९ ॥

दत्त्वा निवेद्यमखिलमद्भिः प्रोक्ष्यास्त्रविद्यया ।
निवेदयेदपूपादीन् पक्वं तूष्णीं प्रदर्शयेत् ॥ १४० ॥

पानीयं च तथा स्वादु पयःप्रभृति चाहृतम् ।
पुष्पमालादि यच्चान्यच्चन्दनक्षोदभाजनम् ॥ १४१ ॥

---

1. यथाविधि T, P_1, P_2 2. अन्यत्र M_1 3. समाहितम् M_2; यथासुखम् A 4. ०वीथिका: T, P_1, P_2 5. समाहिताम् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूषणं चाङ्गुलीयादि भक्त्या यत्प्रतिदीयते ।
प्रोक्ष्य सर्वमथास्त्रेण देवाङ्गे योजयेद् गुरुः ॥ १४२ ॥

ग्रामं प्रदक्षिणं नीत्वा तथैवावरणानि च ।
प्रवेश्य[1] धाम शिबिकामन्यामारोप्य मङ्गलाम् ॥ १४३ ॥

स्नानमण्टपभूभागे काञ्चने परमासने ।
सुखास्तरणसंयुक्ते यानादेरवरोप्य तम् ॥ १४४ ॥

निवेश्याभीष्टदिग्भागे संमुखं मखकौतुकम् ।
आराधयेद्भगवतः सर्वालङ्कारसंयुतः ॥ १४५ ॥

अहतेन [2]सुसूक्ष्मेण वाससा श्लक्ष्णतन्तुना ।
बद्धोष्णीषोत्तरासङ्गः कर्णिकाद्यैरलङ्कृतः ॥ १४६ ॥

सौवर्णवारबाणेन धवलेन विराजितः ।
बद्धस्वदेहसंनाहः पवित्रितकरश्शुचिः ॥ १४७ ॥

समाराधनवस्तूनि नयद्भिः परिचारकैः ।
कञ्चुकोष्णीषवासोभिर्भवितव्यं समन्ततः ॥ १४८ ॥

देवस्य दक्षिणे[3] पार्श्वे पूजकेन्द्रोपवेशनम् ।
आसितव्यं भगवतः पार्श्वयोः पृष्ठतस्ततः ॥ १४९ ॥

एकाग्रमानसैस्सर्वैरेकान्तिभिरुपासकैः ।
आसितव्यं यतिवैरस्त्रिदण्डैरेकदण्डिभिः ॥ १५० ॥

ब्रह्मध्यानपरैरन्वगाराधनविधिक्रमम् ।
अनुसन्धायिभिश्शश्वदुपवेष्टव्यमन्तिके ॥ १५१ ॥

---

1. प्रविश्य M_1 2. तु M_1 3. वामपार्श्वे तु देशिकेन्द्रोपवेशनम् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बहिस्तेषां च कल्याणैर्वैष्णवैः संयतेन्द्रियैः ।
[1]आनन्दजाश्रुसलिलैराप्लुताङ्गैर्महीसुरैः ॥ १५२ ॥

उपासितव्यमन्यैस्तु सदस्यैर्मण्टपाद्बहिः ।
अधस्तात्सर्वतो दिक्षु प्रपायामुपवेशनम् ॥ १५३ ॥

अधस्तादग्रतो नृत्तगीतवाद्यविशारदैः ।
नाट्यं बहुविधं वाद्यं प्रकृष्टं बहुधा स्थितम् ॥ १५४ ॥

[2]नृत्तं गीतं च षड्जाद्यैः स्वरैः कालानुसारिभिः ।
प्रदर्शयद्भि[3]र्वाद्यानि निबद्धानीतराणि च ॥ १५५ ॥

आविष्कुर्वद्भिरन्यांश्च श्राव्यं दृश्यं च तद्द्वयम् ।
दर्शयद्भिरधीयानैस्त्रयीं [4]स्वाध्यायकल्पिताम् ॥ १५६ ॥

इतिहासपुराणानि कथयद्भिर्यथा तथा[5] ।
सन्निधातव्यमन्याभिर्वर्णिनीभि[6]स्समन्ततः ॥ १५७ ॥

इत्थं संसेविते तत्र मण्टपे मधुविद्विषम् ।
आर्चयित्वा ततस्स्नानपीठे नीत्वा यथापुरम् ॥ १५८ ॥

सहस्रधारापर्यन्तं स्नापयेत्पुरुषोत्तमम् ।
अलङ्कारासने नीत्वा तत्र कृत्यमशेषतः ॥ १५९ ॥

कृत्वा यात्रासने देवमारोप्य सपरिच्छदम् ।
प्रवेश्य मण्टपं तत्र न्यसेत्तं भोजनासने ॥ १६० ॥

महाहविर्निवेद्याथ पानकान्तं यथोदितम् ।
सुखासने स्थापयित्वा राजवत्सर्वमाचरेत् ॥ १६१ ॥

---

1. तदानन्दाश्रु॰ M_1 2. गीतं च दिव्यं षड्जाद्यैः T, P_1, P_2 3. लास्यानि T, P_1, P_2 4. त्रयन्त॰ M_2 5. यथायथम् T, P_1, P_2 6. सर्वाण्येभिः M_2, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अलङ्कारासनं नीत्वा यानमारोप्य मङ्गलम् ।
अवरोप्यासने तत्र मण्डयित्वा यथापुरम् ॥ १६२ ॥

होमादिबलिदानान्तं कृत्वा सर्वमशेषतः ।
औत्सवं बिम्बमादाय कुर्यादेवं महोत्सवम् ॥ १६३ ॥

[1]प्रत्यहं च [2]मयोक्तेन विधिना विहितं क्रमात् ।
अपूर्वाभरणैर्माल्यैरपूर्वैश्चाम्बरैस्तथा ॥ १६४ ॥

अपूर्वोद्यानयानाद्यैर्यथा कौतूहलं भवेत् ।
तथा विशिष्य कर्तव्यं यावत्तीर्थदिनावधि ॥ १६५ ॥

यस्मिन्नास्थानभूभागे ये भोगाः कल्पिताः पुरा ।
तत्रैव ते विधातव्या देवस्य सति सम्भवे ॥ १६६ ॥

[3]श्रिया वसुधया सार्धं ग्रामादौ नित्यमुत्सवे ।
परिक्रमण[4]मीशस्य केवलस्यापि वा भवेत् ॥ १६७ ॥

अहनि प्रथमादौ स्याद्बलिदानमनुक्रमात् ।
पललं रजनीचूर्णं करम्भान् लाजसंयुतान् ॥ १६८ ॥

चरुणा सह संयोज्य बलिं दद्याद्यथाविधि ।
द्वितीयेऽहनि संयोज्य चरुणा तिलतण्डुलम् ॥ १६९ ॥

मिश्रिताश्चरुणा लाजान् [5]धान्यधान्यापूपिकांस्तथा ।
तृतीये च चतुर्थे च नालिकेरजलैस्सह ॥ १७० ॥

सक्तुं च[6] शालिपिष्टं च संयोज्य चरुणा सह ।
पञ्चमे पञ्चबीजानि पायसं शालितण्डुलम् ॥ १७१ ॥

---

1. उत्सवं M_1 2. प्रत्यहमहमुक्तेन   3. धरया A   4. भ्रमण T, P_1, P_2 5. धानानि° P_2 6. सक्तूंश्च P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठे [1]अपूपान् संयोज्य चरुणा निक्षिपेद्बलिम्[2] ।
सप्तमादिषु सर्वत्र सार्धमन्नैश्चतुर्विधैः ॥ १७२ ॥

अपूपांश्च तथा सक्तून् प्रत्यहं निक्षिपेद्बलिम् ।
ब्रह्मादीशानपर्यन्तं स्थानेष्वष्टसु पूर्ववत् ॥ १७३ ॥

विधाय बलिपीठानि गोमयालिप्तभूमिषु ।
तेषु वाद्यं तथा नृत्तं गेयं नित्योत्सवं तथा[3] ॥ १७४ ॥

कृत्वा दद्यात्तोयपूर्वं बलिं तोयोत्तरं तथा ।
बलिमुद्रां दर्शयित्वा दर्शयेन्मङ्गलाष्टकम् ॥ १७५ ॥

बलिं प्रदक्षिणीकृत्य गच्छेयुर्बलिदायिनः ।
आरम्भदिवसे रात्रौ समाप्तिदिवसेऽहनि ॥ १७६ ॥

बलिमेकां क्षिपेन्मध्यदिवसेषु बलिद्वयम् ।
अह्नि रात्रौ च सर्वत्र बलिदानं यथाविधि ॥ १७७ ॥

अवसानदिने रात्रौ ग्रहणे विषुवे दिने[4] ।
प्राप्ते कुर्यादवभृथं यदि तस्मिन् बलिद्वयम् ॥ १७८ ॥

ग्रामादिरहिते स्थाने मध्ये तु पुरतो बलिम् ।
महापीठस्य वितरेद्ब्रह्मणे[5] देशिकोत्तमः ॥ १७९ ॥

पूर्वेद्युस्तीर्थदिवसाद्देवस्य मृगया भवेत् ।
मृगयादिवसात्पूर्वं जलद्रोण्यवगाहनम् ॥ १८० ॥

अवगाहदिनात्पूर्वदिवसे देवमर्चयेत् ।
श्रीभूमिभ्यां सहैकस्मिन्विष्टरे विपुले स्थितम् ॥ १८१ ॥

---

1. त्वपूपान् T, P_1, P_2 2. °बहिः A 3. नित्योत्सवे यथा T, P_1, P_2
4. °अयने T, P_1, P_2 5. ब्रह्मणो A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उद्यानादौ च देवीभ्यां सार्धं देवस्य निर्गमः ।
क्रीडाश्च तत्र बहुधा दर्शयेच्चोपदाः पुनः ॥ १८२ ॥

देशाद्देशादाहृतानि प्राभृतानि गुरुः स्वयम् ।
प्रदर्श्य देवदेवाय जनसंसदि मण्टपे ॥ १८३ ॥

इतो यात मिथस्सर्वं[1] इतो यातमितीर्य च ।
देवादीनपि [2]चाहर्तॄन् काले विज्ञापयेत्ततः ॥ १८४ ॥

तन्मयत्वाद्देशिकेन्द्रो देवोऽहमिति [3]भावयेत् ।
कुर्यादनुग्रहं सर्वं देवस्यालोक्य [4]चाननम् ॥ १८५ ॥

अभिप्रायं यथाराज्ञो ज्ञात्वा तेन [5]प्रदर्शनम् ।
ब्रुवन्ति तत्समीपस्था राज्ञां तत्तदनुग्रहम् ॥ १८६ ॥

सुदर्शनान्नमूर्तिभ्यां [6]सहिताभ्यां विनापि च[7] ।
सह बल्यर्चया कुर्याद्विना वा तं महोत्सवम् ॥ १८७ ॥

केवलोत्सवबिम्बेन दिनेष्ववभृथावधि ।
जलद्रोणीं जलस्नानदिने कृत्वा यथापुरम् ॥ १८८ ॥

उत्सवं देवदेवस्य प्रातरारभ्य मङ्गलम् ।
अपराह्णे जलद्रोण्यामवगाहनमिष्यते ॥ १८९ ॥

सोपानदेशे सरसि जलद्रोणीं निवेशयेत् ।
कटाहं वापि सौवर्णं पूरयेद्गन्धवारिभिः ॥ १९० ॥

मुक्ताकाराण्यक्षतानि[8] परितो विकिरेत् स्थले ।
जलेष्वावाह्य गङ्गाद्यास्सरितस्तास्सभाजयेत् ॥ १९१ ॥

---

1. यातमिदंसर्वं T, P_1, P_2 2. च भक्तान् M_1 3. भावयन् T, P_1, P_2
4. चासनम् P_2 5. प्रदर्शितम् T, P_1, P_2 6. सह ताभ्यां T, P_1, P_2
7. वा P_1 8. मुक्ताभान्यक्षतान्यत्र T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जलेऽभिमन्त्रिते मन्त्रैरब्लिङ्गैर्देवमर्चितम् ।
उपचारैर्यथापूर्वं [1]स्नानान्तैरवगाहयेत् ॥ १९२ ॥

काले तस्मिन्नधीयीरन् सूक्तं वारुण[2]मुच्चकै ।
तन्मया दिक्षु सर्वासु घोषयेत्तुर्यमुच्चकैः ॥ १९३ ॥

अवगाहनतो[3] देवं यानमारोप्य मण्टपम् ।
अन्यमानीय तत्रापि यथापूर्वं सभाजयेत् ॥ १९४ ॥

अनुष्ठितमिदं तीर्थं ब्रह्माद्यैरपि दैवतैः ।
एतश्चै तीर्थसलिलैः पीतैश्शिरसि धारितैः ॥ १९५ ॥

स्नानैर्निर्धूतपाप्मानो यान्ति ब्रह्म सनातनम् ।
मृगयादिवसे [4]वापि प्रातरारभ्य पूर्ववत् ॥ १९६ ॥

कृत्वोत्सवमशेषेण तस्यान्ते मृगया भवेत् ।
मृगयानुगुणैस्सर्वैर्भूषणैर्भूषितं ततः[5] ॥ १९७ ॥

तद्योग्यायुधसन्नाहं हस्त्यादौ[6] परिकल्पिते ।
आरोप्य कृत्रिमे चाश्वे नयेद् ग्रामादि पूर्ववत् ॥ १९८ ॥

देवीभ्यां सह [7]सिंहादौ सैन्यैर्हस्त्यादिभिर्युतम् ।
उद्यानमण्डपे चापि मध्ये सौवर्णविष्टरे ॥ १९९ ॥

आसने तत्र चासीनं स्नानपूर्वं समर्चयेत् ।
मण्टपेऽन्यत्र विधिना निवेद्य च महाहविः ॥ २०० ॥

यानमारोप्य तद्रात्रौ मन्दिरान्तर्भुवं नयेत् ।
नित्योत्सवं यथापूर्वं कुर्यात्तदनु मङ्गलम् ॥ २०१ ॥

---

1. स्नातं तैः M_2 2. शाकुनम्° M_2 3. अवगाढं ततो T, P_1, P_2
4. चापि M_1 5. तथा M_1 6. साधु M_1 7. सोमादौ T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पश्चिमे रात्रिभागे तु तीर्थबिम्बाधिवासनम् ।
बद्ध्वा प्रतिसरं तीर्थबिम्बाभावे चतुर्मुख ॥ २०२ ॥

नित्योत्सवप्रतिकृतेरभावे त्वधिवासनम् ।
स्नानार्चायां भवेद्यद्वा बिम्बस्योत्सवकारिणः ॥ २०३ ॥

उत्सवं प्रातरारभ्य कुर्यात्पूर्वोदितक्रमात् ।
उत्थाप्य शायितं बिम्बं निवेश्य मुख[1]मण्डपे ॥ २०४ ॥

आदाय स्थापितान् कुम्भान्यागमण्डपभूमिषु ।
नीत्वा प्रदक्षिणं धाम तीर्थबिम्बस्य सन्निधौ ॥ २०५ ॥

स्थापयित्वा धान्यराशौ तीर्थबिम्बं यथाविधि ।
वस्त्रान्तमर्चयित्वान्ते मुहूर्ते शोभने गुरुः ॥ २०६ ॥

एकबेरे मूलबेरमन्यथा तीर्थकौतुकम् ।
कुम्भैरभ्युद्धृतैर्देवं मूलमन्त्रेण मन्त्रवित् ॥ २०७ ॥

पूर्वादिमध्यकुम्भान्तमभिषिञ्चेद्यथाविधि ।
स्नानादिदीपपर्यन्तं प्रतिकुम्भं समर्चयेत् ॥ २०८ ॥

पठत्सु विप्रवर्येषु दिक्षु स्वाध्यायमुच्चकैः ।
घोषयत्सु च वाद्येषु मन्त्रैरब्दैवतैर्गुरुः ॥ २०९ ॥

नववस्त्रोत्तरीयाद्यैर्दीपान्तैरर्चिते हरौ ।
ध्वजपीठस्य पुरतः क्षितौ गोमयवारिणा ॥ २१० ॥

आलिप्ते चतुरश्रे च शालिभारैर्विकीर्य च ।
वस्त्रपूर्वाद्यलङ्कारैरुलूखलमलङ्कृतम् ॥ २११ ॥

---

1. स्नान॰ M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षालितं स्थण्डिले पीठे स्थापयित्वा चतुर्मुख ।
श्रीसूक्तविद्यया लक्ष्मीं [1]ध्यायन् मन्त्रितमर्चितम् ॥ २१२ ॥

मुसलं क्षालितं चापि मन्त्रितं मूलविद्यया ।
आदाय मूर्तिपैस्सार्धं देशिकेन्द्रस्समाहितः ॥ २१३ ॥

अवहन्यान्निशाचूर्णं निक्षिप्तं तदुलूखले ।
गायन्त्यो गणिका [2]गाथां [3]मङ्गलं देवदासिकाः ॥ २१४ ॥

अवहन्युर्निशाचूर्णं यथा सूक्ष्मतरं भवेत् ।
निक्षिप्तचूर्णं तदनु कुम्भं वेष्टितवाससम् ॥ २१५ ॥

सकूर्चं [4]मल्लकं पीठे तण्डलैः परिकल्पितम्[5] ।
स्थापितं मूलमन्त्रेण गन्धादिभिरथार्चितम् ॥ २१६ ।

[6]आदाय कुम्भचूर्णैस्तैः श्रीसूक्तेनाभिषेचयेत् ।
ऋत्विजो देशिकेन्द्रश्च देवं गत्वा प्रदक्षिणम् ॥ २१७ ॥

अष्टाङ्गप्रणिपातेन प्रणिपत्य विकीर्य च ।
पुष्पाण्यञ्जलिभिर्देवं स्तुत्वा स्तोत्रैरनेकशः[7] ॥ २१८ ॥

अलङ्कृतैर्भागवतैश्छत्रचामरधारिभिः ।
तैरेव सर्वैर्बहुभिर्भाव्यं देवसमीपके[8] ॥ २१९ ॥

आरोप्य देवं हस्त्यादौ तीर्थबिम्बमलङ्कृतम् ।
पश्चादुत्सवबिम्बेन नीयमानेन पूर्ववत् ॥ २२० ॥

सहितं सरितस्तीर्थं नीत्वा यद्वा सरित्तटम् ।
दर्शे च पौर्णमास्यां चा(प्य)र्वाक् चेद्योजनावधौ ॥ २२१ ॥

---

1. ध्यात्वा M_2 2. गीतं T, P_1, P_2 3. मन्दिरे T, P_1, P_2
4. पल्लवं M_2 5. परिकल्पिते P_1, P_2 6. आचार्यः M_2 7. ॰अनेकधा M_1
8. ॰समीपगैः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समुद्रतीरमथवा मण्डपे तत्र कल्पिते ।
अवरोप्यासने यानान्निविष्टे तीर्थकौतुके ॥ २२२ ॥

कलशानग्रतः पञ्चविंशतिं दश सप्त च ।
यद्वा यद्वा [1]नव न्यस्य यथाविधि [2]यथापुरम् ॥ २२३ ॥

कलशैरभिषिञ्चेत चक्रं शिष्टैश्च वारिभिः ।
सरिदादौ च तीर्थेषु तीर्थान्यावाह्य [3]नामतः ॥ २२४ ॥

निमज्जयेत्तत्र [4]बिम्बं चक्रमन्त्रैर्यथाविधि ।
तीर्थार्थमौत्सवे बिम्बे समानीते तु वारिभिः ॥ २२५ ॥

प्रोक्ष्य कूर्चाग्रपतितैर्बिम्बं चक्रं निमज्जयेत् ।
चक्राभावे तु तत्कूर्चं केवलं देवसन्निधौ ॥ २२६ ॥

देवेन सह तत्काले निमज्जन्ति च ये जनाः[5] ।
ते निर्धूयाशुभं सर्वं महापातकमप्यथ ॥ २२७ ॥

यान्ति ध्रुवं सुदुष्प्रापं स्थानमाचन्द्रतारकम् ।
मण्टपे देवमानीय पूजयित्वा यथापुरम् ॥ २२८ ॥

महाहविर्निवेद्याथ ब्राह्मणान् भोजयेत्ततः[6] ।
प्रत्यहं भोजयेद्विप्रान् सहस्रं शतमेव वा ॥ २२९ ॥

आलयाभ्यन्तरं यानमारोप्य प्रापयेत्ततः ।
तद्रात्रौ मण्डपे देवं नीत्वाभ्यर्च्य यथाविधि ॥ २३० ॥

निवेद्य च यथान्यायं प्रभाते मण्टपान्तरे ।
भक्तैर्भागवतैश्चैव सेविते भूतले क्वचित् ॥ २३१ ॥

---

1. नवं T, P_1, P_2 2. यथाक्रमम् T, P_1, P_2 3. नामभिः T, P_1, P_2
4. कुम्भं चक्रं मन्त्रैर्यथाविधि A 5. नाराः T, P_1, P_2 6. भोजयेत्तमाम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चक्राब्जं वर्तयित्वोक्तवर्त्मना वरुणान्वितम् ।
प्रसवैः कालजैः श्यामैः कृष्णैश्च तुलसीदलैः ॥ २३२ ॥

न्यूनातिरेकरहितैर्वर्णैरेव सितादिभिः ।
विचित्रयेत्पञ्चवर्णैश्चित्रिते तत्र[1] मध्यतः ॥ २३३ ॥

भद्रपीठे [2]यथायुक्ते न्यस्ते कल्याणकौतुकम् ।
निवेश्याराधयेदर्घ्यपाद्यादिभिरनुक्रमात् ॥ २३४ ॥

द्वादशाक्षरमन्त्रस्थान्यक्षराणि यथायथम् ।
उद्दिश्य भूषापर्यन्तैरर्घ्याद्यैर्नवभिः क्रमात् ॥ २३५ ॥

प्रत्यक्षरं समस्तानि पुष्पै[3]रुपचरेद्धरिम् ।
हृदयादीनि चाङ्गानि समुद्दिश्याञ्जलिस्थितैः ॥ २३६ ॥

फलं भवतु मे पुष्पैर्नम इत्यवसानकम् ।
[4]तं तं मन्त्रं समुच्चार्य मन्त्रवित् देशिकोत्तमः ॥ २३७ ॥

[5]भूषणानि तथोद्दिश्य श्रीवत्सादीन्यनुक्रमात् ।
आयुधानि च दिव्यानि चक्रादीनि यथाक्रमम् ॥ २३८ ॥

तथैवावरणस्थानां देवतानां समर्चनम् ।
मत्स्यादिमूर्तिदशकं केशवादींस्तथापरान् ॥ २३९ ॥

चतुर्विंशति संख्यातानुद्दिश्य कुसुमार्चनम् ।
पौरुषेण तु सूक्तेन प्रत्यृचं कमलासन ॥ २४० ॥

नारायणानुवाकेन विष्णुसूक्तेन देशिकः ।
पुष्पाणि दद्याद्देवस्य चरणाम्भोजयोर्द्वयोः ॥ २४१ ॥

---

1. तस्य T, P_1, P_2 2. प्रभा० T, P_1, P_2 3. अभ्यर्चयेद्धरिम् T, P_1, P_2
4. तन्त्रमन्त्रं T, P_1, P_2; तत्र मन्त्रं A 5. एष श्लोकः M_1 कोशे नोपलभ्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथोपनिषदैर्मन्त्रैः पञ्चभिस्सर्वपावनैः ।
दिक्षु वेदांश्च चतुरः पठेयुर्मन्त्रवित्तमाः ॥ २४२ ॥

विदिक्ष्वेकायनां शाखां तन्मयास्सुमुखास्तथा ।
अधीयीरंस्तथा [1]स्तोत्रैर्नृत्तैश्च सततोद्यतैः ॥ २४३ ॥

तोषयेद्देवदेवेशं गेयैश्च बहुधा स्थितैः ।
पुष्पाभिषेकं प्रहितैः[2] पुष्पैरेव सितादिभिः ॥ २४४ ॥

देवस्य कृत्वा देवाय पायसादि चतुर्विधम् ।
अन्नं निवेद्य जुहुयाद्दिश्यग्नेर्मण्टपस्य च ॥ २४५ ॥

समिद्भिराज्यैश्चरुभिश्चतुर्थ्यैश्च[3] पृथक्पृथक् ।
अष्टोत्तरशतं वारान् मूलमन्त्रेण मन्त्रवित् ॥ २४६ ॥

ततः प्रदक्षिणं कृत्वा देवं स्तुत्वा च भूतले ।
प्रणमेद्दण्डवद्यानमारोप्य शिबिकादिकम् ॥ २४७ ॥

प्रवेशयेदावरणं प्रथमं तत्र च स्थितः ।
सेवानुभूतिविवशान् भक्तान् भागवतांश्च सः ॥ २४८ ॥

ब्रह्मादीनपि कल्याणमनुसन्धातुमागतान् ।
प्रणतानालयं स्वं स्वं गन्तुं सर्वेश्वरो हरिः ॥ २४९ ॥

नियुज्यावरणस्थं [4]च परिक्रम्य प्रदक्षिणम् ।
सार्धमभ्यन्तरैर्नित्यै[5]स्सेवकैरनुयायिभिः ॥ २५० ॥

अभ्यन्तरं मन्दिरस्य प्रविशेन्मङ्गलान्वितम् ।
तदहर्निशि पूर्वस्मिन्न्यसेत्[6] स्नपनमण्टपे ॥ २५१ ॥

---

1. ॰श्चातोद्यैः M_2 2. पुष्पाभिषेकसहितैः M_2 3. चतुर्भिश्च T, P_1, P_2
4. नियुज्यावरणं तच्च T, P_1, P_2 5. नित्यं M_2 6. यामे स्नपन॰ M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्सवान्तोचितं स्नानं कलशैराचरेत् क्रमात् ।
महाहविर्निवेद्याथ नीत्वा तं मण्डपान्तरे[1] ॥ २५२ ॥

यागमण्टपमासाद्य होमं कुर्याद्यथाविधि ।
शान्तिहोमं ततः कुर्याद्यथापूर्वोदित[2]क्रमम् ॥ २५३ ॥

प्रायश्चित्तं तु जुहुयात्पञ्चोपनिषदा घृतम् ।
सहस्रं वा शतं वापि हुत्वा पूर्णाहुतिं चरेत् ॥ २५४ ॥

अग्नीन्विसर्जयेद्देवांस्तत्रस्थांस्तोरणादिषु ।
ध्वजस्तम्भं समासाद्य पूजयित्वा खगाधिपम् ॥ २५५ ॥

हविर्निवेद्य गरुडं परिक्रम्य प्रदक्षिणम् ।
तमुद्वसेत्पटात्ताक्ष्र्यं संहारक्रममाश्रितः ॥ २५६ ॥

अवरोप्य ध्वजस्तम्भमुत्पाट्य च महानिशि ।
[3]स्तम्भं ध्वजं च गृह्णीयाद्देशिकेन्द्रः स्वयं ततः ॥ २५७ ॥

ग्रहणं देशिकेन्द्रेण ताक्ष्र्यतृप्तिकरं भवेत् ।
स्थाने चावाहितान् देवांस्तत्र तत्र स्थितानपि ॥ २५८ ॥

बलिं दत्त्वा तूर्यघोषैस्स्थाने स्थाने सकृत्सकृत् ।
घोषयित्वा [4]चतुर्वक्त्र समुद्वास्य स्वन मभिः ॥ २५९ ॥

मूकैः परिजनैस्सार्वं गुरुरष्टाक्षरं जपेत् ।
प्रविश्य धाम देवस्य विज्ञाप्य शकटादिकम् ॥ २६० ॥

यानमारोप्य धामान्तः प्रापयेन्मखकौतुकम् ।
प्रभाते[5] तन्निशाया वानुष्ठिते यागकर्मणिः ॥ २६१ ॥

---

1. तन्मण्डपान्तरे P_1, P_2 2. °क्रमात् T, P_1, P_2 3. सह ध्वजं M_2
4. चतुर्मुख A 5. प्रभातायां निशायां T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजमानो गुरुं वस्त्रैर्भूषणैः कटकादिभिः ।
सौवर्णैर्गन्धपुष्पाद्यैरलङ्कृत्याभिपूज्य च ॥ २६२ ॥

दक्षिणामुत्तमां स्वर्ण[1]शतेनैकान्ततोऽधिकाम् ।
यथाविभूति दत्त्वान्या दक्षिणाः प्रतिवासरम् ॥ २६३ ॥

[2]दशनिष्कं तदर्धं वा तदर्धं वा यथावसु ।
निष्करूपां यथाश्रद्धमाचार्याय तदर्धकाम् ॥ २६४ ॥

तदर्धमृत्विजां [3]दत्त्वा तदर्धं परिचारिणाम् ।
हेम[4]वस्त्रैस्तथान्नाद्यैस्तोषयेदुपचर्यया ॥ २६५ ॥

गायकाद्यान् जनान् सर्वानधिकारानुसारतः ।
कर्माङ्गभूतानन्यांश्च कल्याणं द्रष्टुमागतान् ॥ २६६ ॥

भक्तान् भागवतांश्चैव सामान्यांश्चेप्सितैर्धनैः ।
अत्यल्पिकां वापि दद्या[5]द्दक्षिणां[6] यागकर्मणि ॥ २६७ ॥

कर्मिभ्यो दक्षिणाहीनो निष्फलः कर्तुरब्जज ।
यज्ञः प्रत्युत कर्तॄणां प्रत्यवायाय कल्पते ॥ २६८ ॥

तस्मादर्थानुगुण्येन दातव्या दक्षिणा भवेत् ।
श्रद्धया वासुदेवस्य साङ्गोपाङ्गं सदक्षिणम् ॥ २६९ ॥

उत्सवं देवदेवस्य यः कुर्यात्सकलं स्वयम्[7] ।
उत्तारयन् स्वयं विष्णोस्सायुज्यं गच्छति ध्रुवम् ॥ २७० ॥

हयमेध[8]सहस्राणि यजते [9]च समाहितः ।
यश्चोत्सवेन यजते तयोस्तुल्यफलान्वयः ॥ २७१ ॥

---

1. °शतनिष्कां T, P_1, P_2 2. शतनिष्कं A, M_2 3. दद्यात् T, P_1, P_2
4. °वस्त्राब्जयानाद्यैः T, P_1, P_2 5. अत्यल्पिकापि दातव्या T, P_1, P_2
6. दक्षिणा P_1, P_2 7. स्वकम् T, P_1, P_2 8. °सहस्रेण T, P_1, P_2 9. यः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यागानामपि सर्वेषां फलमुत्सव[1]कर्मणा ।
देवस्याश्नुवते सर्वं यष्टारो [2]नात्र संशयः ॥ २७२ ॥

उपकुर्वन्ति ये मर्त्या देवस्योत्सवकर्मणि ।
कर्मणा मनसा वाचा तेऽपि यान्ति यथेप्सितम् ॥ २७३ ॥

ग्रामे वा नगरे वापि पत्तने वा महोत्सवः ।
विष्णोः प्रवर्तते यत्र देशे राष्ट्रेऽपि वा भवेत् ॥ २७४ ॥

भयं न मृत्योर्न व्याधेर्न दुर्भिक्षादिसम्भवः ।
नश्यन्ति तस्करास्तत्र नाधर्मस्सम्प्रवर्तते ॥ २७५ ॥

धर्मयुक्तो भवेद्राजा जना धर्मपरायणाः ।
भवन्ति सुखिनस्सर्वे सर्वदुःखविवर्जिताः ॥ २७६ ॥

महोत्सवे वर्तमाने यदर्थिभ्यः प्रदीयते ।
पानीयमन्नं वस्त्रं वा तत्सहस्रगुणं भवेत् ॥ २७७ ॥

पुष्पमालाफलैरिज्या देवस्याभरणादिकैः ।
क्रियमाणा यथाशक्ति फलानन्त्याय[3] कल्पते ॥ २७८ ॥

सेवन्ते तत्र ये देवमहर्निशमतन्द्रिताः ।
तेषामिदमियच्चेति फलं वक्तुं न शक्यते ॥ २७९ ॥

आलेपनं मार्जनं च रजःप्रशमनं तथा ।
वारिभिर्दीपिकारोपं क्ष्वेलनास्फोटनादिकम् ॥ २८० ॥

कुर्वन्ति ये ब्रह्मलोकं ते यान्त्यमरदुर्लभम् ।
यानं वहन्ति ये विप्रास्ते यान्ति [4]ब्रह्मणः पदम् ॥ २८१ ॥

---

1. °कर्मणि A 2. नास्ति T, P_1, P_2 3. फलाधिक्याय M_1
4. परमं M_1, A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रथं वहन्ति ये [1]चान्ये तेऽपि यान्ति सुरालयम् ।
छत्रादिधारिणश्चापि मोदन्ते दिवि मानवाः ॥ २८२ ॥

देशिको मूर्तिपाश्चैव तथैव परिचारकाः ।
उत्सवेऽधिकृता विष्णोः प्राप्नुवन्ति यथेप्सितम् ॥ २८३ ॥

ऋचो यजूंषि सामानि ये तत्राधीयते[2] जनाः ।
ते परे व्योम्नि देवस्य पार्श्वे वर्तन्ति निःस्पृहाः ॥ २८४ ॥

सर्वशान्तिकरं सर्वदुःखोत्सादनमुत्तमम् ।
राज्ञो राष्ट्रस्य सुखदमायुरारोग्यवर्धनम् ॥ २८५ ॥

प्रजानां वासुदेवस्य [3]कल्याणं साधनं महत् ।
इमं देवादयस्सर्वे विष्णोरुत्सवमुत्तमम् ॥ २८६ ॥

कृत्वा शाश्वतिकं स्थानं प्रापुरत्यन्तदुर्लभम् ।
उत्सवे त्रिदिनैकाहसाध्ये श्रद्धा प्रवर्तिते ॥ २८७ ॥

बलिप्रदानं सुमनोयजनं चाधिवासनम् ।
नवानामपि कुम्भानां तथा तीर्थावगाहनम् ॥ २८८ ॥

मृगया च जलद्रोणी वर्जनीयानि पद्मज ।
तावत्येवोत्सवदिने तीर्थान्ते ग्रामवीथिषु ॥ २८९ ॥

ब्रह्मादिदेवता[4]स्सद्यस्समावाह्य बलिं क्षिपेत् ।
केवलोदनमग्नौ च होमो निश्यधिवासनम् ॥ २९० ॥

स्नपनं विषुवाद्येषु नद्यादाववगाहनम् ।
पुष्पयागो जलद्रोणी मृगया च न युज्यते ॥ २९१ ॥

---

1. चारवा: T, P_1, P_2 2. ॰अधीतिनो A 3. कल्याणाराधनं T, P_1, P_2
4. सर्वा: M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यत्सर्वं यथापूर्वं कर्तव्यं फलकाङ्क्षिभिः ।
इति गुह्यतमं ब्रह्मन्नुत्तमाराधनं परम् ।। २९२ ।।

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
महोत्सवविधिर्नाम एकादशोऽध्यायः ॥

द्वादशोऽध्यायः ॥

पुष्पहविर्विधानम् ॥

ब्रह्मोवाच :—

समाराध्यो हरिः पुष्पैः कैः पत्रैर्वा[1] हवींषि च ।
फलमूलानि चान्यानि कानि योग्यानि कथ्यताम् ।। १ ।।

श्रीभगवान् :—

पुष्पाणि नन्दनवनादारामादात्मनोऽपि वा ।
अरण्याद्वा गृहीत्वा च विक्रीतान्यापणस्थलात् ।। २ ।।

अयाचितानि लब्धानि यद्वा कमलसम्भव ।
पूर्वपूर्वोदितालाभे ग्राह्यमुत्तरमुत्तरम् ।। ३ ।।

अन्यायोपार्जितान्यन्यदेवतार्थानि वा पुनः ।
अग्राह्याणि तथा भिन्नं मुकुलं पतितं तथा ।। ४ ।।

जीर्णं पर्युषितं कीटदूषितं पादलंघितम् ।
म्लानं स्पृष्टं तथास्पृश्यैर्नीतं च प्रतिलोमजैः ।। ५ ।।

स्नातश्शुद्धाम्बरो मौनी [2]पादौ प्रक्षाल्य वारिणा ।
पात्रे पुष्पाणि गृह्णीयाद्वेत्रजे तृणजेऽथवा ।। ६ ।।

---

1. कालपत्रैः वा T, P_1, P_2 2. पाणि T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

(सत् ?) कल्पकद्रु[1]मानीतं पारिजातसमुद्भवम् ।
हरिचन्दनसन्तानमन्दारद्रुमसम्भवम् ॥ ७ ॥

सौगन्धिकोद्भवं पुष्पं षडेते सुरदारुजाः ।
पालाशं सप्तमं पुष्पमुपयुक्तानि चार्चने ॥ ८ ॥

अनिर्माल्यानि[2] देयानि पुनः प्रक्षाल्य वारिभिः ।
उत्तरोत्तरमेकैकं सहस्रगुणमिष्यते ॥ ९ ॥

प्रातः पद्मद्वयं शस्तमुत्पलत्रयमर्चने ।
फलं च पूर्ववज्ज्ञेयं तथैव शतपत्रिका ॥ १० ॥

चम्पकं [3]केतकं श्रीमन्मालती माधवी तथा ।
नन्द्यावर्तं च पुन्नागं सुरपर्ण्येकपर्णिका ॥ ११ ॥

प्रियङ्गुपाटलद्वन्द्वं मन्दारद्वयमेव च ।
लक्ष्मीश्च कर्णिकारश्च यूथिका कुरबस्तथा ॥ १२ ॥

पङ्क्तैकैतानि शस्तानि फलं पूर्ववदिष्यते ।
शस्तं मध्यन्दिने श्वेतकरवीरजमर्चने ॥ १३ ॥

किङ्किरातं[4] च सौवर्णं पुष्पं सहचरी तथा ।
पूर्ववच्च फलं [5]विद्यात्प्रदोषे च प्रशस्यते ॥ १४ ॥

जातीयुग्मं विचकिलं मल्लिकाद्वयमेव च ।
बकुलं [6]वनजातिश्च तथा च नवमल्लिका ॥ १५ ॥

कुमुदं वनमल्ली च पूर्ववच्च फलं स्मृतम् ।
प्रातःकालोदितं पुष्पं युक्तं मध्यन्दिनेऽपि च ॥ १६ ॥

---

1. ०द्रुमसंजातं T,P_1,P_2 2. समारोप्याणि M,A 3. केतकीयुग्मं T,P_1,P_2 4. केङ्किरातं T, P_1, P_2 5. दद्यात् A, M_2 6. पारिजातं च A

Digitized by Madhuban Trust, Delhi
CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रदोषे [1]कथितं पुष्पं मध्यरात्रे च शस्यते ।
दिवापुष्पैर्दिवा पूजा निशापुष्पैस्तथा निशि ॥ १७ ॥

[2]आपत्काले यथायोगमर्चयेत्[3] पुरुषोत्तमम् ।
मालत्या पूजयेत्प्रातर्मध्याह्ने [4]करवीरजैः ॥ १८ ॥

सायाह्ने जातिपुष्पैस्तु प्रदोषे बकुलैरपि ।
मध्यरात्रे मल्लिकाभिर्यजेत जलजैस्सदा ॥ १९ ॥

प्रत्यूषे नन्दिकावर्तैः काल एष उदाहृतः ।
पद्मादिजलपुष्पाणामर्वाक् [5]कर्तुस्त्र्यहाद्भवेत् ॥ २० ॥

न च पर्युषितो दोषो नीरजनां भवेत्तथा ।
अबद्धेभ्यः प्रसूनेभ्यो बद्धा माला प्रशस्यते ॥ २१ ॥

मालाभ्यः स्रग्वरा माला सजातीया प्रसूनजा[6] ।
[7]स्रक् तु नानाविधैः पुष्पैर्निर्मिता[8] कदलीत्वचा ॥ २२ ॥

ह्रीबेरं च तमालं च तथा दमनकत्रयम् ।
न पर्युषितमेतैश्च सदैवाराधयेद्धरिम् ॥ २३ ॥

तुलस्यौ सितकृष्णे च केवलाक्षपकास्तथा ।
चत्वारस्तुलसीभेदा दूर्वा बिल्वदलानि च ॥ २४ ॥

सर्वदाराधनार्हाणि पूजितुं[9] करवीरजैः ।
गृहे कुलक्षयकरी पुष्पपत्राद्यसन्निधौ ॥ २५ ॥

अक्षतैरर्चनं कुर्याद्धरेः कलमजैस्सितैः ।
नीवारावेणवश्शालि[10]कलमाद्या यवा अपि ॥ २६ ॥

---

1. प्रथितमिति पाठेन भाव्यम् । 2. देशे काले T, P_1, P_2; प्रातःकाले M_2
3. पूजयेत् A 4. ०वीरकैः M_1 5. कर्तुं M_1 6. सजातीयप्रसूनका T, P_1, P_2
7. सूत्रं M_1 8. निर्मितं M_1 9. पूजा तु T, P_1, P_2 10. शाल्यः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हविर्योग्या व्रीहयश्च तदभावे प्रियङ्गवः ।
अन्ये च याज्ञिका धान्यभेदाः कोद्रववर्जिताः ॥ २७ ॥

नीचैर्दत्तास्तथा स्पृष्टाः पतितैः प्रतिलोमजैः ।
आशौचवद्भिरपरैरपक्वाः कलमादयः ॥ २८ ॥

शस्यन्ते चरुपाकेषु पक्वाश्च तदसन्निधौ ।
चातुर्वर्ण्यैरुपहृता तण्डुला दोषवर्जिताः ॥ २९ ॥

अखण्डिताः खण्डिताश्चा(प्य)भावे [1]निष्फलीकृताः ।
चरुपात्रं ताम्रमयं प्रशस्तं मृन्मयं तु वा ॥ ३० ॥

विष्णुगायत्रिया भाण्डे क्षालिते गालितैर्जलैः ।
पूर्णे प्रणवसंस्पृष्टे तण्डुलान्मूलविद्यया ॥ ३१ ॥

यद्वा पञ्चोपनिषदा क्षालयेद्वारिभिः पुनः ।
पूरयेत्प्रणवेनैव पिदध्याच्चक्रमुद्रया[2] ॥ ३२ ॥

अधिश्रित्य च मूलेन मन्त्रेणाग्निं समेधयेत् ।
पञ्चोपनिषदैर्मन्त्रैः काष्ठैः कीटाद्यदूषितैः ॥ ३३ ॥*

पक्के जलमपि स्राव्य सिक्त्वाज्येन चरुं पुनः ।
उदगुद्वासयेद्दर्भैः फलके यज्ञदारुजे ॥ ३४ ॥

साधयेद्दीक्षितः पाकं विधिनोक्तेन तत्[3] स्त्रियः ।
यद्वा तूष्णीं साधयेयुरुपदंशांश्च शोधितान्[4] ॥ ३५ ॥

फलमूलानि तत्रादौ फलानि कदलीफलम् ।
आम्रं[5] पनसमुर्वारुं बृहतीं कर्करीमपि ॥ ३६ ॥

---

1. निस्तुषीकृताः M_2 2. ०विद्यया P_1, P_2 * P ग्रन्थे एष अर्धश्लोकः अत्र अधिकतया दृश्यते "यज्ञवृक्षोद्भवैः काष्ठैः पाचयेत् पाचकः क्रमात्"। 3. न M_2 4. चोदितान् T, P_1, P_2 5. वेत्रं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कारवल्लीमलाबुं च कूष्माण्डं तिन्त्रिणीमपि ।
करवर्त[1] च निष्पावं गवाक्षं त्रपुसं तथा ॥ ३७ ॥

मुद्गभेदांश्च निर्दोषान् सदोषान् परिवर्जयेत् ।
उच्छिष्टं क्रिमिणा दष्टं शिवाद्यैर्लङ्घितं तथा ॥ ३८ ॥

घ्रातं लालाजलस्पृष्टममेध्यप्रभवं तथा ।
पादस्पृष्टं च पतितमकाले चाशुचि[2] स्थितम् ॥ ३९ ॥

भु(मु ?)क्तशेषं तथास्पृश्यैः स्पृष्टं दत्तावशिष्टकम् ।
वर्ज्यं वल्लीत्रयं कन्दं सूरणद्वयमुत्पलम् ॥ ४० ॥

पिण्डारद्वितयं चापि हविर्योग्यं चतुर्मुख ।
जीवन्तीं वास्तुकं शाकं कारवल्लीदलं तथा ॥ ४१ ॥

तुम्बीदलं च भार्ङ्गी (च) [3]शिम्बी मुद्गदलानि च ।
शाकिनीं शतपर्वाणं तथैवाश्वास[4]मर्दिनम् ॥ ४२ ॥

आगस्त्यं पाचयेच्छाकं विहितं ब्राह्मणस्य च ।
[5]एकमूलानि चान्यानि गृह्णीयादनिषेधने ॥ ४३ ॥

अङ्कुराण्यपि वेण्वादिवस्तूनां कमलासन ।
छेदयित्वा लवित्रेण लवणैर्मरिचैस्तथा ॥ ४४ ॥

सर्षपैर्जीरकैर्हिङ्गु[6]श्रीपर्णीदलमिश्रितैः ।
नालिकेरफलैराज्यैर्यथायोगं निवेशितैः ॥ ४५ ॥

संस्कार्यं व्यञ्जनं यूषयुक्तं रहितमेव वा ।
सर्पिषा वाऽऽयसे पात्रे घृष्टं मृन्मय एव वा ॥ ४६ ॥

---

1. करवर्तिं M_1 2. स्थले T, P_1, P_2 3. शिम्ब° T, P_1, P_2
4. °मर्दिनीम् T, P_1, P_2 5. शाक° A 6. °वापि M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कलायमुद्‌गनिष्पावशिम्बमाषकुलुत्थकाः ।
सयूषा वा वियूषा वा पचनीया गुणान्विताः ॥ ४७ ॥

त्वचो व्यपोह्य कुल्माषाः कार्या यद्वा यथोदितम्[1] ।
[2]आम्रादीनां च शुष्काणां फलानुगुणतिन्त्रिणी ॥ ४८ ॥

मिश्राणि पचनीयानि तथा लवणवासितम् ।
आम्रं च शृङ्गिबेरं च तथा केवलमिष्यते ॥ ४९ ॥

पनसं कदली चाम्रं कपित्थं बदरीफलम् ।
द्राक्षा राजादनं जम्बूफलं तोटकमप्यथ ॥ ५० ॥

खर्जूरं वेत्रजं चैव मातुलुङ्गं च दाडिमम् ।
फलान्येतानि पक्वानि कालपक्वानि योजयेत् ॥ ५१ ॥

[3]क्षीरमेको गुणस्तस्य तोयमर्धं तदर्धकम् ।
तण्डुलस्तावदेव स्याद्भिन्नो मुद्गस्तदर्धकः ॥ ५२ ॥

घृतं समुदितं सर्वं परमान्नं निवेदयेत् ।
समभागं तु[4] पूर्वोक्तैस्तण्डुलैस्सम्मितं समम् ॥ ५३ ॥

गुलं फलेन निक्षिप्य गुलान्नं तद्विदुर्बुधाः ।
तण्डुलैस्संमितं निस्त्वङ्[5] मुद्गभिन्नं सुसाधितम् ॥ ५४ ॥

मुद्गान्नं कालपक्वैस्तु फलैराज्यपरिप्लुतम् ।
निवेदयेत्केवलान्नं तण्डुलैरेव साधयेत् ॥ ५५ ॥

फलानि कन्दाश्शाकानि[6] मुद्गभेदास्तथाङ्कुराः ।
पयो दधि घृतं चापि कालपक्वं तथा फलम् ॥ ५६ ॥

---

1. यथोदिताः T, P_1, P_2 2. आम्रादीनि च शुष्काणि फलानि गुलतिन्त्रिणी T, P_1, P_2 3. क्षीरश्चैको T, P_1, P_2 4. समवाये तु A 5. सम्यक् T 6. कन्दशाकानि P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आम्रादिर्लवणैश्चापि शृङ्गिबेरादि साधितम् ।
मत्स्यण्डिगुलभेदाश्च यच्चान्यदुपदंशकम् ॥ ५७ ॥

[1]परिमाणममीषां च यथाश्रद्धं यथावसु ।
मरीच्यादि यथायोग्यं द्रव्यसंस्कारकं भवेत् ॥ ५८ ॥

नागवल्लीदलानि स्युरशीतिरवरास्तथा ।
विंशतिः क्रमुकस्यापि फलान्यवरसंख्यया ॥ ५९ ॥

अङ्गानि तैलं तक्कोलं लवङ्गं जातिरेव च ।
मातुलुङ्गत्वगन्यच्च चूर्णं कर्पूरमिश्रितम् ॥ ६० ॥

पाषाणजं नालिकेरफलं पक्वं च निर्जलम् ।
कर्पूरं केवलं वाप्यामं (वापि चामं) वा शुष्कमेव वा ॥ ६१ ॥

एतैर्वस्तुभिरन्यैश्च न्यूनभावविवर्जितैः ।
ताम्बूलं वीटिका[2]स्तैलमृदुपूगफलान्वितम्[3] ॥ ६२ ॥

निवेद्य यजमानस्य श्रद्धावित्तानुसारतः ।
गोधूमशालिपिष्टोत्था अपूपाश्चापि संस्कृताः ॥ ६३ ॥

गुलभेदाज्यमारीचजीरकाद्यैर्यथायथम् ।
वस्तुभिर्विविधाकारा गुलपाकपरिप्लुताः ॥ ६४ ॥

पुटदग्धांस्तिलानिक्षुरसपाकपरिप्लुतान् ।
मरीचैर्जीरकैर्युक्तान् पललांश्च निवेदयेत् ॥ ६५ ॥

पृथुकान् पुटदग्धान्वा केवलान्वा गुलाप्लुतान् ।
मरीचैर्जीरकैर्युक्तान् नालिकेरफलैस्सह ॥ ६६ ॥

---

1. परिमाणं यथा साध्यं M_1
2. ताम्बूलवीटिका P_2
3. फलान्विता: T_1, T_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सक्तून् गुलद्रवैर्मिश्रान् मरीचैरपि जीरकैः ।
करम्भानपि पूर्वोक्तैस्संस्कारैरपि संस्कृतान् ॥ ६७ ॥

पाकस्थानाच्च भाण्डान्वा वारिभिः क्षालितान् बहिः ।
भस्मना च चतुर्दिक्षु कृतोर्ध्वाकारपुण्ड्रकान् ॥ ६८ ॥

अस्त्रमन्त्रेण वासोभिश्छन्नान्वा वेत्रपञ्जरे ।
यद्वा प्रतिष्ठितान् भूमौ जलधारापुरस्सरम् ॥ ६९ ॥

वहेयुर्विधृतोष्णीषास्सितकञ्चुकसंवृताः ।
परिचर्यापरा विप्रा मण्टपे मन्दिरेऽपि वा ॥ ७० ॥

देवस्य दक्षिणे पार्श्वे नीत्वा फलकभूमिषु ।
सौवर्णादीनि पात्राणि विष्णुगायत्रिया ततः ॥ ७१ ॥

क्षालितानि [1]परामृज्य प्रणवेनाज्यधारया ।
पात्राणि [2]सिद्धमन्त्रेण तथा दर्व्या हवींषि च ॥ ७२ ॥

आदायादाय निक्षिप्य मन्त्रेणान्नमथार्पितम् ।
खारि तदर्धं पादं वा तदर्धं वा परं मतम् ॥ ७३ ॥

प्रतिस्थालीं पायसादि भक्तमानं चतुर्मुख ।
यथायथं व्यञ्जनानि निक्षेप्याणि घृतैस्सह ॥ ७४ ॥

दध्ना च सर्वाण्यन्नानि प्रकल्प्य व्यञ्जनैस्सह ।
निवेदयेयुर्धनानि यानि कानि च पूजकाः[3] ॥ ७५ ॥

चोष्याणि लेह्यखाद्यानि यथाविभवविस्तरम् ।
निवेदितानां तुर्यांशं विष्वक्सेनाय कल्पयेत् ॥ ७६ ॥

---

1. परामृश्य T, P_1, P_2 2. सिक्त्वा T, P_1, P_2; सिक्त्वा चाज्येन A
3. निवेदयेयुर्देवाय पानकानि च पूजकाः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तच्चागाधे जले[1] क्षिप्य तद्भक्तान्वापि भोजयेत् ।
तेनैव पार्षदास्तृप्ता भवेयुर्भूततृप्तये ॥ ७७ ॥

दास्यो वा गणिका भोज्या देवस्य [2]परिचारिकाः ।
ब्रह्मेशानादिदेवानां नैव भोज्यं [3]निवेदितम् ॥ ७८ ॥

न स्पृश्यं लङ्घनीयं च चण्डादीनां [4]तथैव च ।
देवीनां च श्रियादीनां विनतानन्दनस्य च ॥ ७९ ॥

चक्रादीनामायुधानां वस्तु यद्यन्निवेदितम् ।
भोक्तव्यमेव सर्वेषां विप्रादीनामशङ्कितम् ॥ ८० ॥

विष्णोर्निवेदितं शुद्धं पावनानां च पावनम् ।
प्रापणं दुर्लभं भोज्यं न त्याज्यं स्यात्कदाचन ॥ ८१ ॥

भुञ्जानानामेधते श्रीः त्यजतां परिहीयते ।
व्रतोपवासस्तुलितम् त्वशनं तस्य पावनम् ॥ ८२ ॥

शुनामिव पुरोडाशो न नीचेषु तदिष्यते ।
विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् ॥ ८३ ॥

पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते ।
धारितं विष्णुनिर्माल्यं चन्दनाद्यनुलेपनम् ॥ ८४ ॥

अहर्निशं धारयतो[5] न पुनर्जननं भवेत् ।
तथाहि[6] चरणस्पर्शि विष्णोस्त्रिपथगाजलम् ॥ ८५ ॥

पुनाति सिद्धदेवर्षिसंघानंहोविघातकम् ।
पादोदकं च देवस्य पवित्रं परमं मतम् ॥ ८६ ॥

---

1. ॰अगाधजले P_1, P_2 2. परिचारका: A 3. निवेदनम् M_1
4. निवेदितम् T, P_1, P_2 5. धारयतां T, P_1, P_2 6. यथाहि M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पाद्यं दत्त्वा जलं विष्णोर्मूलमन्त्रेण देशिकः ।
गृहीत्वा शतधारेण मूर्ध्नि धार्यं विशुद्धये ॥ ८७ ॥

शोधनं सर्वपापानां सर्वदुःस्वप्ननाशनम्[1] ।
लक्ष्मीविवर्धनं नित्यमायुर्वृद्धिकरं परम् ॥ ८८ ॥

म्रियमाणस्स्वयं विष्णोश्चरणस्पर्शितं जलम् ।
पीत्वा सद्गतिमाप्नोति [2]न चोर्व्यां जायते पुनः ॥ ८९ ॥

पितॄणां [3]तर्पितं शस्तं वारिणा तेन तर्पिताः ।
ऋणेभ्यः पितरो मुक्ता वसन्ति दिवि देववत् ॥ ९० ॥

भक्ताय देयं पादोदं[4] शान्ताय शुभकर्मणे[5] ।
पञ्चकालविधिज्ञाय तदनुष्ठानशीलिने[6] ॥ ९१ ॥

न नास्तिकाय दातव्यं दातव्यं नाभ्यसूयवे ।
पाषण्डिने न दातव्यं तेभ्यो रक्षेत्प्रयत्नतः ॥ ९२ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
पुष्पहविर्विधानं नाम द्वादशोऽध्यायः ॥

त्रयोदशोऽध्यायः ॥

पञ्चकालविधिः ॥

ब्रह्मोवाचः—

पञ्चकालविधिज्ञानं प्रशस्तं भगवन्निह ।
विहितं[7] पञ्चके काले विषयश्चापि पञ्च के ॥ १ ॥

---

1. °दुष्कृतनाशनम् T,P_1,P_2 2. न चेह जायते पुनः T,P_1,P_2; पुनर्नैवेह जायते A 3. तर्पणं T,P_1,P_2 4. पादोत्थं P_2 5. °कर्मिणे P_2
6. °शालिने P_2 7. कथितं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मह्यं जिज्ञासमानाय कथयस्व यथातथम् ।
न चेद्रहस्यमत्यन्तं यदहं पृष्टवानिदम् ॥ २ ॥

श्रीभगवान् :—

आद्यं कर्माभिगमनमुपादानमतः परम् ।
इज्या च पश्चात्स्वाध्यायस्ततो योगस्ततः परम् ॥ ३ ॥

पञ्चैते विधयस्तेषां कालाः पञ्चैव ते क्रमात् ।
कल्याणाचरणान्तं यत् कर्मजातं चतुर्मुख ॥ ४ ॥

उत्थानादि क्रमादेतदभियानमुदीरितम् ।
ब्राह्मे मुहूर्ते बुध्येत ध्यायन्नारायणं परम् ॥ ५ ॥

उत्थायासीत शयने कीर्तयन् नाम वैष्णवम् ।
क्रमेण स्पृष्ट्वा तत्त्वानि देहमुत्पाद्य तत्त्ववित् । ६ ॥

न्यस्य देहे षडङ्गानि मन्त्रमुच्चार्य मानसम् ।
दशावतारान् व्यूहांश्च चतुर्णा मासपानपि ॥ ७ ॥

ध्यात्वा स्वनामभिस्तानि कीर्तयित्वा पृथक्पृथक् ।
अवकुण्ठ्य च वस्त्रेण शरीरं दक्षिणांघ्रिणा ॥ ८ ॥

आक्रम्य भूमिं प्रथमं त्रिविक्रममनुस्मरन् ।
नमः क्षितिधरायेति मन्त्रमुच्चार्य वाग्यतः[1] ॥ ९ ॥

ग्रामाद्बहिर्दिशं गत्वा नैर्ऋतिं न्यस्य दक्षिणे ।
उपवीतं कर्णदेशे व्यवधाय तृणादिना ॥ १० ॥

भूमौ समुत्सृजेन्मूत्रं किट्टं च तदनन्तरम् ।
उदङ्मुखो दिवा कुर्यात्सन्ध्ययोरुभयोरपि ॥ ११ ॥

---

1. मानसम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणाभिमुखो रात्रौ वाति वातेऽनुसारिणि ।
दक्षिणेतरहस्तेन गृह्णीयान्मेहनं ततः ॥ १२ ॥

दक्षिणे मृत्तिकां हस्ते समुत्थाय जलाशयम् ।
प्रागुदीच्यां प्रतीच्यां वा गत्वा शौचं समाचरेत् ॥ १३ ॥

मृत्तिकाभिर्द्वादशभिर्गुदं षड्भिश्च मेहनम् ।
अन्तरा चान्तरं वामकरं प्रक्षाल्य वारिभिः ॥ १४ ॥

मृन्मात्राभिस्तदन्ते च[1] करौ द्वादशसंख्यया ।
संशोध्य चरणौ जङ्घे कटिं चोरुञ्च वारिभिः ॥ १५ ॥

प्रत्येकं मृत्तिकामात्रा चतुष्केण विशोधयेत् ।
आचम्य प्राङ्मुखो भूत्वा दन्तधावनमाचरेत् ॥ १६ ॥

न्यग्रोधोदुम्बराश्वत्थप्लक्षाम्राजुनधातकी ।
पालाशवेणुखदिरशमीदारूणि धावने ॥ १७ ॥

दन्तानामुदितान्येकादश चाम्भोरुहासन ।
दन्तधावनकाष्ठं च[2] द्वादशाङ्गुलमायतम् ॥ १८ ॥

दशाङ्गुलं तथा मानमष्टाङ्गुल[3]मथायतम् ।
ब्राह्मणक्षत्रियविशां क्रमेण तदुदाहृतम् ॥ १९ ॥

जिह्वानिर्लेखनं कुर्याद्गण्डूषाचमनं पुनः ।
क्षालयित्वा मुखं तोयैराचान्तस्स्नानमाचरेत् ॥ २० ॥

अवगाहो भवेद्वाप्यां स्नायाद्वा सरसीषु च[4] ।
वाप्याद्य(दि ?)सम्भवे [5]नैव कूपेष्वाप्लवनं भवेत् ॥ २१ ॥

---

1. द्वौ T, P_1, P_2 2. वद् P_1 3. ०अथापि वा T, P_1, P_2
4. वा P_1 5. एव A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्नानं वा तप्ततोयेन दोषवैषम्यसम्भवे ।
नाभेरधस्ताद्वा देहं क्षालयित्वात्मनस्तनुम् ॥ २२ ॥

आचम्य प्रोक्षयेद्देहं वारिभिर्मन्त्रवित्तमः[1] ।
ओंपूर्वया च गायत्र्या वारिभिश्चाभिमन्त्रितैः ॥ २३ ॥

आत्मानं परिषिच्योर्ध्वमुत्क्षिपेत्सलिलाञ्जलिम् ।
योद्धुकामानि रक्षांसि सन्ध्ययोरुभयोरपि ॥ २४ ॥

शाम्यन्ति तैर्वज्र[2]हतैर्हस्ताभिप्रेरितैर्जलैः ।
प्रायश्चित्तं तु हिंसायाः परिभ्रमणमात्मनः ॥ २५ ॥

तर्पयेदुपविश्याथ तत्तन्मन्त्रमुदीरयन् ।
देवादीन् सलिले तिष्ठन् सावित्रीं प्राङ्मुखो जपेत् ॥ २६ ॥

यावत्सूर्योदयं दृष्ट्वा प्राञ्जलिस्तिमिरापहम् ।
उपस्थाय स्वशाखोक्तैर्मन्त्रैर्ध्यायन् हृदि स्थितम् ॥ २७ ॥

अभिवाद्य गुरून् वृद्धान् तथा भागवतान् क्रमात् ।
प्रविश्य[3] स्वाश्रमं देवमभिगम्य यथाविधि ॥ २८ ॥

अर्चयेज्जपहोमान्तं दद्याद् ग्रासं यथाविधि[4] ।
अञ्जनालेपनैस्स्रग्भिः [5]वासोभिः भूषणैस्तथा ॥ २९ ॥

अलक्तकरसाद्यैश्च [6]ताम्बूलमुखशोधनैः ।
उपेतो मङ्गलैरन्यैर्नयेदभिगमक्रियाम् ॥ ३० ॥

---

1. ॰तनुम् P_1, P_2 2. ॰घातैः M_2, P_2; ॰भूतैः P_1, T 3. प्रणम्य T, P_2
4. गवामपि P_1, P_2 5. दूर्वाभिः M_1 6. ताम्बूली॰ T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपादद्यात्ततः पूजासाधनानि [1]यथाविधि ।
पुष्पाणि फलमूलानि विविधान्योषधीरपि ॥ ३१ ॥

दध्यादि च हविर्योग्यं तण्डुलानि गुलानि च ।
स्नानीयानि च वस्त्राणि स्वादूनि सलिलानि च ॥ ३२ ॥

दर्भान् पर्णानि समिधो यथाशक्ति यथावसु ।
आहृत्य याज्ञिकार्थैर्वा पूजास्थाने निवेशयेत् ॥ ३३ ॥

नीत्वोपादानसमयमित्थं तदनु पूजयेत् ।
प्राप्ते मध्याह्नसमये स्नानं कुर्याद्यथाविधि ॥ ३४ ॥

न्यासमग्रे षडङ्गानां कृत्वादाय मृदं करे ।
सव्ये निधाय कृत्वा तु त्रिधा मूलाग्रमध्यतः ॥ ३५ ॥

मूले स्थितां मृदं पूर्वमभिमन्त्र्यास्त्रविद्यया ।
विदिक्षु दिक्षु चोर्ध्वायामधरायां [2]विनिक्षिपेत् ॥ ३६ ॥

ततो मध्यस्थितां मृत्स्नामुदके मूलविद्यया ।
निक्षिप्य भागमग्रस्थं कराभ्यां करयोर्द्वयोः ॥ ३७ ॥

[3]विधाय पङ्कमम्भोभिर्दर्शयित्वा च पूषणम् ।
अस्त्रहीनाङ्गविद्याभिरापादतलमस्तकम् ॥ ३८ ॥

आलिप्य देहमखिलमवगाह्य च वारिषु ।
देवमावाह्य लक्ष्मीशं दत्त्वा चार्घ्यादिकं ततः[4] ॥ ३९ ॥

तत्पादक्षालनाम्भोभिः पाणिभ्यां कुम्भमुद्रया ।
पावनैः शिरसि न्यस्तैरात्मानमभिषिच्य च ॥ ४० ॥

1. यथायथम् T, P_1, P_2 2. अपि क्षिपेत् T, P_1, P_2 3. पिधाय M_2
4. तथा M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वासुदेवमभिध्यायन्नघमर्षणमाचरेत् ।
उत्तीर्य कर्म निखिलं मध्याह्नसमयोचितम् ॥ ४१ ॥

कृत्वा यजेत देवेशं होमान्तं कमलासन ।
स्तोत्रेणाभिष्टुयाद्देवं दण्डवत्पतितः क्षितौ ॥ ४२ ॥

"जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥ ४३ ॥

नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ।
अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः ॥ ४४ ॥

महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥ ४५ ॥

सहस्रबाहवे तुभ्यं सहस्रनयनाय ते ।
[1]अमूर्ताय नमस्तुभ्यमेकमूर्ताय ते नमः ॥ ४६ ॥

अनेकमूर्तये तुभ्यमक्षयाय[2] च ते नमः ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥ ४७ ॥

चिन्मात्ररूपिणे तुभ्यं नमस्त्वय्यन्त[3]भूमये ।
अणिष्ठाय[4] स्थविष्ठाय महिष्ठाय च ते नमः ॥ ४८ ॥

नेदिष्ठाय [5]दविष्ठाय क्षेपिष्ठाय च ते नमः ।
वर्षिष्ठाय[6] यविष्ठाय कनिष्ठाय च ते नमः[7] ॥ ४९ ॥

पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिणे नमः ।
कल्पनापोढरूपाय सृष्टिस्थित्यन्तहेतवे ॥ ५० ॥

---

1. अमृताय P_1, P_2 2. ॰अक्षराय P_1, P_2, T 3. ॰मूर्तये T 4. अभीष्टाय M_1
5. यविष्ठाय T 6. वरिष्ठाय विशिष्टाय M_1 7. गरिष्ठाय नमो नमः । M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नमस्ते गुणरूपाय गुणरूपातिवर्तिने ।
व्यस्ताय च समस्ताय [1]समस्तव्यस्तरूपिणे ॥ ५१ ॥

आदिमध्यान्तशून्याय [2]तद्वते च नमो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपिणे ॥ ५२ ॥

लोकयात्राप्रसिध्यर्थं [3]सृष्टब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहादिमूर्तिभेदाय विष्णवे ॥ ५३ ॥

[4]पातकैः कर्मणः क्लेशैरस्पृष्टवपुषे नमः ।
नमो ब्रह्मण्यदेवाय तेजसां निधये नमः ॥ ५४ ॥

नित्यासाधारणानेकलोकरक्षापरिच्छद ।
सच्चिदानन्दरूपाय वरेण्याय नमो नमः ॥ ५५ ॥

यजमानाय यज्ञाय यष्टव्याय नमो नमः ।
इज्याफलात्मने तुभ्यं नमस्स्वाध्यायशालिने ॥ ५६ ॥

नमः परमहंसाय नमः सत्त्वगुणाय ते ।
स्थिताय परमे व्योम्नि भूयो भूयो नमो नमः ॥ ५७ ॥

संसारसागरे घोरे विषयावर्तसङ्कुले ।
अपारे दुस्तरेऽगाधे पतितं कर्मभिस्स्वकैः ॥ ५८ ॥

अनाथमगतिं भीरुं दयया परया हरे ।
मामुद्धर दयासिन्धो सिन्धोरस्मात्सुदुस्तरात्[5] ॥ ५९ ॥

---

1. नमोऽस्त्वव्यक्तमूर्तये A ; नमोऽस्त्वव्यक्तरूपिणे M_2 2. तद्वदेव T, P_1, P_2 ; तत्त्वस्थाय A, M_2 3. विष्णु° M_1 4. विपाकैः कर्मभिः क्षोभैः A, T, P_2
5. सुदुस्सहात् A, M_1, T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रहानिं क्रियाहानिं [1]हानिं वान्यां त्वदर्चने ।
क्षमस्व[2] देवदेव[3] त्वमपराधसहो ह्यसि" ॥ ६० ॥

"[4]जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोऽस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥ ६१ ॥

[5]नाहं हितं विजानामि त्वां भजाम्येव केवलम् ।
बुद्ध्वैवं नय गोविन्द [6]मामुपायेन वर्त्मना ॥ ६२ ॥

त्वमेव [7]वेत्थ श्रेयो मे [8]नेदमेतदितीति च ।
बुद्धियोगं च मे देहि येन त्वामुपयाम्यहम्" ॥ ६३ ॥

इति विज्ञाप्य देवेशं वैश्वदेवं स्वधामनि ।
कुर्यात्पञ्च महायज्ञानपि गृह्योक्तवर्त्मना ॥ ६४ ॥

अतिथीनपि तत्काले यथाशक्ति समर्चयेत् ।
पोष्यवर्गान् भोजयित्वा भुञ्जीत नियतस्स्वयम् ॥ ६५ ॥

इज्यायास्समयस्तस्याः कथितः कमलासन ।
मन्दिरे वा हरेर्नद्यास्तीरे वा मठभूमिषु ॥ ६६ ॥

विविक्ते विपिने वापि पर्वते वा गृहेऽपि वा ।
ऋचो यजूंषि सामानि भिद्यमानान्यनेकधा ॥ ६७ ॥

शाखाभेदैर्मूलशाखामेकायनसमाश्रयाम्[9] ।
त्रयीमयीमधीयीत सुखासीनस्समाहितः ॥ ६८ ॥

---

1. भक्तिहीनं यदर्चनम् J 2. तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरु J
3. मम देव P_1, P_2
4. अपराधसहस्रभाजनं पतितं भीममहार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥
अयं श्लोकः A, T, P_1, P_2 ग्रन्थेष्वेवोपलभ्यते । अथापि स्तोत्ररत्नस्थस्यास्यात्र प्रक्षिप्तत्वेन भाव्यम् । 5. अहं हितं न जानामि त्वां व्रजाम्येव केवलम् । 6. मुक्त्युपायेन P_1
7. वेत्ता P_2; वेत्सि J 8. नैतदेतदितीति च P_1, P_2 9. °समाह्वयाम् P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यैरसाधम[1]धीयानैष्षडङ्गेषु च कोविदैः ।
[2]अध्यापयीत वा शिष्यान् शास्त्राणि विविधानि च ॥ ६९ ॥

इतिहासपुराणानि धर्मशास्त्राणि वा पुनः ।
तथाराधननिष्ठानि समभ्यस्येद्यथायथम् ॥ ७० ॥

संसाराभीरुभिर्विप्रैस्तत्त्वनिष्कर्षकोविदैः ।
सहासीतोपदेशादिप्रकारचतुरैरपि ॥ ७१ ॥

स्वाध्यायकालः कथितः स्वाध्यायोऽपि च कीर्तितः ।
ततः पश्चिमसन्ध्यायां प्राप्तायां तत्र चोदितम् ॥ ७२ ॥

जपहोमादिकं सर्वं कृत्वा परमपूरुषम्[3] ।
अर्चयित्वा यथान्यायं यथापूर्वमशेषतः ॥ ७३ ॥

भुक्त्वा संविश्य शयने समुत्थाय महानिशि ।
आचम्य [4]प्रयतो भूत्वा ध्यात्वा परमपूरुषम् ॥ ७४ ॥

योगासने सुखासीनो[5] युञ्जीतात्मानमात्मनि ।
यथोक्तेन प्रकारेण यथाशक्ति चतुर्मुख ॥ ७५ ॥

संहारक्रममाश्रित्य तत्त्वान्यात्मनि संहरेत् ।
आत्मानं वापि हृत्पद्मे परमात्मनि [6]निष्ठिते ॥ ७६ ॥

संहरेदुत्थितो योगात्स्वापं [7]क्लेशापहं व्रजेत् ।
इत्येषः कथितो ब्रह्मन् योगः कालश्च पञ्चमः ॥ ७७ ॥

पञ्चैते [8]हि मया पञ्च विधयस्तेषु दर्शिताः ।
इत्थमेतेषु कालेषु दर्शितैः कर्मभिर्नरः ॥ ७८ ॥

---

1. ॰अनूचानैः A 2. अयं श्लोकार्धः, ७०, ७१ पूर्वार्धश्च च अर्धचन्द्ररेखाभ्यां P_1,P_2 ग्रन्थयोर्निविष्टाः । 3. ॰पूरुषान् M_1 4. प्रणतो A,M_2 5. योगासनसमासीनः M_2 6. विष्ठिते M_2 7. क्लेशावहं त्यजेत् T,P_1,P_2 8. समयाः T,P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आराधनं भगवतः कुर्वन्नैवावसीदति ।
वर्षेषु द्वादशस्वेवमनुतिष्ठन् समाहितः ॥ ७९ ॥

क्रियाकलापमखिलं याति सायुज्यसम्पदम् ।
षट्सु वर्षेषु [1]सारूप्यसामीप्यादि सुनिश्चितम् ॥ ८० ॥

सालोक्यं फलमेकस्मिन् वत्सरे नात्र संशयः ।

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे
चर्यापादे पञ्चकालविधिर्नाम त्रयोदशोऽध्यायः ॥

चतुर्दशोऽध्यायः ॥

पवित्राद्युत्सवविधिः ॥

ब्रह्मोवाच :—

मासि मासि प्रशस्तानि नक्षत्राणि जनार्दन ।
भगवान् कानि येषु स्यादर्चनं परमं स्मृतम् ॥ १ ॥

कानि चांशावताराणां जन्मर्क्षाणि युगे युगे ।
उच्यतां तानि देवेश श्रोतुमिच्छामि तत्त्वतः ॥ २ ॥

श्रीभगवान् :—

चैत्रे मासि पुनर्वस्वोर्जन्म रामस्य मङ्गलम् ।
तिथौ नवम्यां लग्ने च कुलीरे कमलासन ॥ ३ ॥

राघवस्याप्रमेयस्य नक्षत्रे तत्र राघवम् ।
देव्या च सीतया सार्धमर्चयित्वा यथाविधि ॥ ४ ॥

---

1. सामीप्यं त्रिषु निश्चितम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्सवश्च भवेत्तस्मिन् सर्वमङ्गलसंयुतः ।
पुष्ये च मीनलग्ने च भरतस्समजायत ।। ५ ।

तत्र स्यादर्चनं देव्या माण्डव्या सह पूर्ववत् ।
उत्सवाश्च तथा सार्पे नक्षत्रे लक्ष्मणोऽपि च ।। ६ ।।

शत्रुघ्नश्च कुलीरे च लग्ने जातस्तदर्चनम् ।
उभयोस्तत्र दिवसे देव्या चोर्मिलया सह ।। ७ ।।

लक्ष्मणस्येतरस्यापि श्रुतकीर्त्या महोत्सवः ।
रामस्य जन्मनक्षत्रे सर्वे वा भरतादयः ।। ८ ।।

अर्चनीया हनुमता [1]एतैः सर्वैर्महोत्सवः ।
तत्रैव श्रवणे चैव सायाह्ने नरकेसरी ।। ९ ।।

अर्चनीयस्स हि तदा[2] हिरण्यमवधीद्रिपुम् ।
तस्मिन्नेव सिते पक्षे त्रयोदश्यां समर्चयेत् ।। १० ।।

विष्णुं यद्वा पुनर्वस्वोः पौर्णमास्यामथापि वा ।
वसन्तकालतृप्त्यर्थं तत्समृद्धिभिराहृतैः ।। ११ ।।

पुष्पैर्नानाविधैर्देवमर्चयेद्दक्षिणामुखम् ।
आसीनं मण्डपे क्लृप्ते वेदिमध्ये[3] मनोरमे ।। १२ ।।

उद्याने मन्दिरे वापि कृत्रिमोद्यानशोभिते ।
नद्यादौ च[4] यथायोगं फलपुष्पोदकान्विते ।। १३ ।।

पौर्णमास्यां तिथौ तस्मिन्मासे दमनिकादलैः ।
पुष्पान्वितैः प्रपां कृत्वा मण्टपे पूजयेद्धरिम् ।। १४ ।।

---

1. सार्धं T, P_1, P_2 2. तथा M_1 ; नृसिंहस्तु A 3. वापि मध्ये P_1
4. वा P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुष्पैर्दमनिकाभिश्च सर्वालङ्कारमाचरेत् ।
उत्सवश्च भवेत्तस्मिन् होमो दमनिकादलैः ॥ १५ ॥

वैशाखे मासि वा कुर्याद्वसन्तोत्सवमब्जज ।
दमनीदलकल्याणमपि वा पूर्वमीरितम् ॥ १६ ॥

वैशाखे मासि वा चैत्रे सिते पक्षे शुभे दिने ।
दमनीदलवत्कुर्यात्कल्हारकुसुमोत्सवम् ॥ १७ ॥

स्थानेषु पूजयेद्देवं कुम्भादिषु चतुर्ष्वपि ।
महाहविर्निवेद्याथ होमं कृत्वा समापयेत् ॥ १८ ॥

फलान्यपि समाहृत्य वन्यजानपदान्यपि ।
ज्येष्ठे वा श्रावणे वापि देवाय विनिवेदयेत् ॥ १९ ॥

सर्वालङ्कारसंयुक्तं विदध्याच्च महोत्सवम् ।
एवं यः कारयेत्पूजां श्रद्धापूतेन चेतसा ॥ २० ॥

सर्वान् कामानिहावाप्य विष्णुलोकं स गच्छति ।
श्रावणे जन्म पूर्वाह्णे वामनस्य त्रिविक्रमम् ॥ २१ ॥

मध्यन्दिने च [1]तत्काले पूजा च मधुविद्विषः ।
पौर्णमास्यां च वैशाख्यां [2]हरेरर्चनमिष्यते ॥ २२ ॥

अनूराधे हनुमतो जन्म तस्मिन् सभाजयेत् ।
तं राघवेण सहितं सीतया लक्ष्मणेन च[3] ॥ २३ ॥

आञ्जनेयं तदत्यन्तप्रीणनं राघवात्मनः ।
अनूराधे पौर्णमास्यां कलशैः स्नपनं हरेः ॥ २४ ॥

---

1. तत्कालद्वये पूजा मधुद्विषः T, P_1, P_2 2. उत्सव इष्यते T, P_1, P_2
3. च विशेषतः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आषाढे शुक्लपक्षे च द्वादश्यां कमलासन ।
चक्राब्जमण्डले देवमर्चयित्वा यथाविधि ॥ २५ ॥

कल्पिते शयनागारे मन्दिरे वा यथावसु ।
पर्यङ्के कल्पिते तत्र शाययित्वाथ कौतुकम् ॥ २६ ॥

देवीभ्यां सह कूर्चं वा त्रितयं तदभावतः ।
तत्र नित्यार्चनं मासांश्चतुरो मङ्गलान्वितम् ॥ २७ ॥

नयेच्च शयनेनैव शाययेदन्यकौतुकम् ।
व्रतोपवासनियमान् कल्पयित्वा [1]तदादिकान् ॥ २८ ॥

तथानु[2]ष्ठायिनस्तत्र चातुराश्रम्यमाश्रिताः ।
आसीनास्तत्र[3] नियतास्तरेयुस्ते[4] तरङ्गिणीम् ॥ २९ ॥

देवस्य यावदुत्थानं भोगिपर्यङ्कशायिनः ।
श्रावणे मासि कृष्णे च पक्षेऽष्टम्यां तिथौ हरेः ॥ ३० ॥

रोहिण्यां जन्म कृष्णस्य लोकानां मङ्गलावहम् ।
जयन्ती नाम सा [5]ख्याता जयत्यशुभमित्यसौ ॥ ३१ ॥

मध्यरात्रे ततस्तस्मिन् कल्याणं सर्वमाचरेत् ।
तिथ्ययोगेऽपि[6] नक्षत्रे केवलेऽर्चनमिष्यते ॥ ३२ ॥

देवस्य देवकीसूनोरपरेद्युर्महोत्सवः ।
नित्यं नैमित्तिकं काम्यं कर्म यच्छ्रुतिचोदितम् ॥ ३३ ॥

तत्कुर्वतामाश्रमेषु स्थितानामानुपूर्वशः ।
वर्णानां मन्त्रलोपादिशान्त्यर्थं प्रत्यहं [7]नरैः ॥ ३४ ॥

---

1. तदात्मकान् A, M_2 2. तदनु° T, P_1, P_2 3. आसीरंस्तत्र T, P_1, P_2 4. न तरङ्गिणीम् M_1, P_1, P_2 5. प्रोक्ता T, P_1, P_2 6. च M_2 7. हरेः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आराधनं भगवतः पूर्णाहुत्या [1]समं मतम् ।
तस्य न्यूनातिरेकाभ्यां दुष्कृतं सकलं भवेत् ॥ ३५ ॥

कर्मजातं ततः पूर्णमाराधनमभीप्सितम् ।
प्रतिसंवत्सरं मासि श्रावणे तन्तुनिर्मितम् ॥ ३६ ॥

पवित्रभूषणं विष्णोरारोप्यं बहुमाल्यवत् ।
आराध्य विधिवद्भाद्रपदे चाश्वयुजेऽपि वा ॥ ३७ ॥

मन्त्रलोपादिना कर्म पतितं विहितं पुनः ।
प्रायश्चित्तेन तत्कर्म कर्तारं त्रायते पुनः[2] ॥ ३८ ॥

तत्पवित्रं फलैर्भूयो रोहत्येव समाहितम् ।
इति निर्वचनात्तज्ज्ञैः पवित्रारोहणं मतम् ॥ ३९ ॥

पूर्वोदितेषु मासेषु द्वादश्यां प्रतिपद्यपि ।
दशम्यां पौर्णमास्यां वा पञ्चम्यामथवा तिथौ ॥ ४० ॥

एकादश्यां त्रयोदश्यां द्वितीयायामथापि वा ।
सिते पक्षे शुभे वारे लग्ने शुभतरेऽथवा[3] ॥ ४१ ॥

श्रवणे पुष्यरोहिण्यां रेवत्यां भरणीषु च ।
स्वातौ हस्तपुनर्वस्वोरश्विन्यां मित्रदैवते ॥ ४२ ॥

ऋक्षेष्वन्यतमे कार्यं पवित्रारोपणं हरेः ।
तन्तून् ब्राह्मणकन्याभिर्निर्मितान् दोषवर्जितान् ॥ ४३ ॥

कार्पासान्वाथ कौशेयान् क्रीतान्वा शुद्धवारिभिः ।
क्षालितान्मिश्रितांश्चूर्णैर्मौद्गकै[4]श्शोधयेद्बहिः ॥ ४४ ॥

---

1. स्वयं T, P_1, P_2 2. यतः M_2 3. तथा M_1
4. शोषयेत् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आतपेषु ततश्शुद्धान् शोषितांस्त्रिगुणीकृतान् ।
पुनस्तांस्त्रिगुणीकृत्य तावतोऽपि चतुर्गुणान् ॥ ४५ ॥

यद्वा त्रिगुणितान्नीत्वा चातुर्गुण्यं चतुर्मुख ।
त्रिगुणांस्त्रिगुणीकृत्य यद्वा तानेकतां नयेत् ॥ ४६ ॥

गोमयालेपिते भूमितले मानानुसारतः ।
शङ्कोस्स्थापितयोर्यज्ञद्रुमसम्भूतयोस्ततः ॥ ४७ ॥

आरोप्य भगवद्भक्ताः प्राङ्मुखा वाप्युदङ्मुखाः ।
आसीना गुरुरन्यो वा[1] तत्प्रयुक्ताः समाहिताः ॥ ४८ ॥

स्नाता निर्माणनिपुणा मनुष्या भगवन्मयाः ।
कुर्युः पवित्रं कल्याणं यथा स्याद् भूषणोत्तमम् ॥ ४९ ॥

पवित्रमधिवासार्थमाद्यं नाभ्यवधि स्मृतम्[2] ।
अष्टोत्तरशतैस्सूत्रैर्द्वात्रिंशद्ग्रन्थिभिर्युतम् ॥ ५० ॥

मूलबेरादिबेराणां पवित्रमि[3]दमिष्यते ।
पवित्रं मण्डले पद्मतुल्यमानं घटेऽपि च ॥ ५१ ॥

कुण्डे च मेखलामानं पूर्वेद्युर्मानमीरितम् ।
अपरेद्युः पवित्रेषु मानं संप्रति कथ्यते[4] ॥ ५२ ॥

पद्मनाभ्यरनेमीनां चक्राब्जे मण्डले सताम् ।
तन्मानानि पवित्राणि बाह्यमानं बहिस्समम् ॥ ५३ ॥

ग्रन्थयस्तन्तवश्चैषां कथ्यन्ते च यथाक्रमम् ।
चतुश्शतानि सूत्राणि ग्रन्थयस्सप्तविंशतिः ॥ ५४ ॥

---

1. गुर्वनुज्ञाताः M_2 2. स्थितम् M_1 3. प्रमाणम्° M_2
4. कीर्त्यते M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शतत्रयं तन्तुसंख्या ग्रन्थयो द्विगुणा मताः ।
द्वे शते [1]त्रिगुणा ग्रन्थिश्शतमेकमनन्तरम् ॥ ५५ ॥

चतुर्गुणा ग्रन्थिसंख्या बाह्यसूत्रं चतुश्शतम् ।
ग्रन्थयः पञ्चगुणिताः कुम्भे चाष्टोत्तरं शतम् ॥ ५६ ॥

तन्तवो ग्रन्थिसंख्या च सप्तविंशतिरिष्यते ।
एकाधिकाशीतिसंख्यास्तन्तवः करके मताः ॥ ५७ ॥

सप्तविंशतिसंख्याश्च ग्रन्थयः परिकीर्तिताः ।
पवित्रसंख्या बेराणां दश तानि वदामि ते ॥ ५८ ॥

प्रामाण्यं ग्रन्थिसंज्ञं [2]तदलङ्काराह्वयं तथा ।
उत्तमाधममध्याख्यं किरीटाह्वमनन्तरम् ॥ ५९ ॥

श्रीवत्सकौस्तुभाह्वानं वनमालाह्वयं तथा ।
[3]मानान्येषां च सूत्राणि ग्रन्थयश्च यथाक्रमम् ॥ ६० ॥

कथ्यन्ते नाभिमर्यादा सूत्राण्यष्टोत्तरं शतम् ।
द्वात्रिंशद्ग्रन्थयस्तस्य हृदयान्तमनन्तरम् ॥ ६१ ॥

सूत्राण्यशीतिस्तस्योक्ता[4] ग्रन्थयः पञ्चविंशतिः ।
जङ्घा[5]मध्यस्थमायामं निर्मितं शततन्तुभिः ॥ ६२ ॥

अष्टोत्तरैर्ग्रन्थिभिश्च द्वात्रिंशद्गुणितैर्युतम् ।
उत्तमाख्यस्य सूत्राणां भवेत्संख्या चतुश्शतम् ॥ ६३ ॥

शतमष्टोत्तरं संख्या ग्रन्थीनां जानुसीम तत् ।
शतानि त्रीणि तन्तूनां ग्रन्थयोऽशीतिरि[6]ष्यते ॥ ६४ ॥

---

1. द्विगुणा T, P_1, P_2 2. चापि० P_1, P_2 3. मानानि तेषां T, P_1, P_2; मानञ्च तेषां सूत्राणां M_2; मानस्तेषां च सूत्राणि A 4. ०संख्योक्ताः M_2, A
5. ०मध्यान्त० T, P_1, P_2 6. ०उच्यते A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आयतं चोरुमध्यान्तं द्वे शते तन्तवः पुनः ।
नाभ्यन्तं ग्रन्थयष्षष्टिस्तन्तवश्च[1] चतुश्शतम् ॥ ६५ ॥

किरीटमानं द्वात्रिंशद्ग्रन्थयस्तदनन्तरम् ।
शतानि त्रीणि तन्तूनां हाराकारप्रकल्पितम् ॥ ६६ ॥

ग्रन्थिभिस्सप्तविंशत्या द्वे शते ग्रन्थयः[2] पुनः ।
द्वात्रिंशत् स्तनमर्यादं सहस्रं चाष्टभिर्युतम् ॥ ६७ ॥

तन्तवश्चरणायाममनेकग्रन्थिभिर्युतम् ।
विष्टरस्य सहोर्ध्वस्य[3] पवित्रं तत्समं ततम्[4] ॥ ६८ ॥

तन्तवोऽष्टोत्तरशतं ग्रन्थयः पञ्चविंशतिः ।
प्रभा पवित्रं तत्तुल्यं ग्रन्थयो बहवस्स्मृताः ॥ ६९ ॥

सर्वेषां च स्वतन्त्राणां बिम्बानामिदमीरितम् ।
परतन्त्रेषु बिम्बेषु त्रितयं[5] तूत्तमादिकम् ॥ ७० ॥

देवीनां च श्रियादीनां पवित्रं तद्वदिष्यते ।
अष्टोत्तरशतैस्सूत्रैर्ग्रन्थिस्सप्तभि[6]र्युतम् ॥ ७१ ॥

अग्निकुण्डे मेखलासु पवित्रं प्रतिमेखलम् ।
तन्तुभिस्सप्तविंशत्या तावद्भिर्ग्रन्थिभिर्युतम् ॥ ७२ ॥

अग्नेः पवित्रं हस्तेन समायामं प्रकीर्तितम् ।
मध्यमं पञ्चविंशत्या द्वाविंशत्याधमं[7] मतम् ॥ ७३ ॥

सूत्राणां पञ्चविंशत्या पवित्रं स्रुक्स्रुवादिषु ।
तदायामसमायामं ग्रन्थिभिर्बहुभिर्युतम् ॥ ७४ ॥

---

1. तन्तवोऽथ T, P_1, P_2 2. तन्तवः T, P_1, P_2 3. सहोत्थस्य A, T, P_1, P_2 4. तत्समीरितम् A; तत्समं मतम् P_1, P_2, T 5. तृतीयं P_1 6. बहुभिर्युतम् T, P_1, P_2 7. द्वादशैर्वाधमे मताः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्घ्यपात्रे तथा धूपदीपपात्रे चतुर्मुख ।
घण्टायामक्षमालायां सर्वत्राष्टोत्तरैश्शतैः ॥ ७५ ॥

सूत्रैर्यथेप्सिता ग्रन्थिर्द्वादशाङ्गुलमायतम् ।
विष्वक्सेनस्य तार्क्ष्यस्य तथा दुश्च्यवनादिषु ॥ ७६ ॥

दिग्देवतासु द्रुहिणे दुर्गायां विघ्ननायके ।
रुद्रे च परिवारेषु पवित्रं तन्तुभिः कृतम् ॥ ७७ ॥

शतेनाष्टोत्तरेण स्यात् द्वात्रिंशद्ग्रन्थिभिर्युतम् ।
हस्तमानायतं कार्यं चण्डादिषु तु[1] सर्वतः ॥ ७८ ॥

सप्तविंशतिसूत्रेण ग्रन्थिभिन्नेन निर्मितम् ।
हस्तमानं भवेत् कुम्भ[2]तोरणादिषु तादृशम् ॥ ७९ ॥

बलिपीठपवित्रं तु कर्णिकायास्समं मितम्[3] ।
आचार्याणां यतीनां च पवित्रं तन्तुभिः कृतम् ॥ ८० ॥

अष्टोत्तरशतै[4]स्सूत्रैर्ग्रन्थिभिः पर्वभिर्युतम् ।
ऋत्विजां पूजकानाञ्च ब्राह्मणानां तथैव च ॥ ८१ ॥

एकाशीत्या कृतं सूत्रैर्नाभ्यन्तपरिलम्बितम् ।
राज्ञः पवित्रं सूत्रेण शतेनाष्टोत्तरेण तु ॥ ८२ ॥

यथेष्टग्रन्थिनिचयैस्तूलगर्भैश्च निर्मितम् ।
[5]नाभ्यन्तमानमेतत् स्यात्तथा तदनुजीविनाम् ॥ ८३ ॥

एकाशीत्या कृतं सूत्रैर्वैश्यादीनां च तन्तुभिः ।
चतुर्विंशतिभिस्तेषां पवित्रमुपवीतवत् ॥ ८४ ॥

---

1. च P_1, P_2 2. कुम्भे M_2 3. कर्णिकायामसंमितम् P_1, P_2 4. युक्तं ग्रन्थिभिर्बहुभिर्युतम् A, M_2 5. नाभ्यन्तं त्रयमेतत् स्यात् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पवित्रेषु समस्तेषु विस्तारो विभवे सति ।
पादोनमर्धं पादो वा संख्या स्याद्विभवक्षये ॥ ८५ ॥

ग्रन्थिं ततः[1] पवित्राणां द्रव्यैः कस्तूरिकादिभिः ।
मणिमुक्ताप्रवालाद्यै रत्नैश्चापि यथावसु ॥ ८६ ॥

लोहैश्च कलधौताद्यैस्तूलैर्वा तदसन्निधौ ।
पूरयित्वा दृढं बद्ध्वा ग्रन्थींस्तांस्तन्तुरज्जुभिः ॥ ८७ ॥

ग्रन्थयश्शंखसंस्थानसमानाकृतयोऽथवा ।
धात्रीफलसमाकारा यद्वा मुक्तादिसन्निभाः ॥ ८८ ॥

कुंकुमै रोचनाभिश्च तथा मलयजैरपि ।
लोहितैरप्यवश्यायैस्सम्पिष्टैः कर्दमीकृतैः ॥ ८९ ॥

ग्रन्थीनामन्तरालानि लिम्पेच्छोभा यथा भवेत् ।
ग्रन्थीनां पूरणं यद्वा मल्लिकाद्यैस्सुगन्धिभिः ॥ ९० ॥

पुष्पैस्तदन्तरालानि निशाचर्चाभिरेव वा ।
रञ्जयेत्तन्तवश्चापि ग्रन्थयश्च यथेच्छया ॥ ९१ ॥

यथाविभवविस्तारं कल्पनीयाश्चतुर्मुख ।
विभवे सति सङ्कोचो नैव कार्यो न वासति[2] ॥ ९२ ॥

[3]विस्तारो नैव कार्यस्स्यात्तदेव प्रीणनं हरेः ।
[4]सद्योऽधिवास्य वा तस्मिन्नुपोष्याराधयेद्धरिम् ॥ ९३ ॥

गृहार्चने कौतुके वा मण्डले वा घटेऽपि वा ।
अर्चनं श्रद्धया कार्यं श्रद्धापूतमिदं जगत् ॥ ९४ ॥

---

1. ग्रन्थींस्तत्र M_2; ग्रन्थांस्ततः P_2 2. तथा सति T, P_1, P_2; कार्यस्तथासति P_1, P_2 3. विस्तारेणैव M_1 4. सद्योऽधिवासे M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विहितेषु पवित्रेषु यथोक्तेनैव वर्त्मना ।
आरभेतार्चनं विष्णोर्दशम्यां च निवेदनम् ॥ ९५ ॥

निशामुखे गुरुस्सार्धं मूर्तिपैस्सुसमाहितः ।
यजमानेन सहितः प्रविशेद्विष्णुमन्दिरम् ॥ ९६ ॥

प्रविश्य पूजयित्वा तं गुरुस्तैस्सहितस्स्वयम् ।
विज्ञापयेदिमां गाथामीरयन्[1] प्राञ्जलिस्स्थितः ॥ ९७ ॥

न्यूनातिरेकशान्त्यर्थं पवित्रारोपणं[2] परम् ।
अर्चनं भगवन् सर्वदुरितोत्सारणक्षमम् ॥ ९८ ॥

सम्पदां चापि सर्वासामुत्पादनमनुत्तमम् ।
क्रियते तदविघ्नेन यथा स्यात्कर्म चोदितम् ॥ ९९ ॥

तथानुज्ञापयामि त्वामनुजानीहि कर्म तत् ।
इति विज्ञाप्य निर्गत्य मन्दिरान्मण्डपे[3] पुनः ॥ १०० ॥

संस्तीर्य दर्भान् प्रागग्रांस्तेषु [4]प्रागानतो गुरुः ।
उपविश्योपवासं च कल्पयित्वा समाहितः ॥ १०१ ॥

नयेत्तत्रैव तां रात्रिं जपध्यानपरस्सदा ।
अपरेद्युर्निशायां स्याद[5]धिवासनकर्म तत् ॥ १०२ ॥

आरभेतैकबेरेषु बद्ध्वा तत्रैव कौतुकम् ।
बहुबेरेषु कल्याणबिम्बे कौतुकमङ्गलम् ॥ १०३ ॥

ततो निर्गत्य विपुले मण्डपे तोरणादिकम् ।
अर्चयित्वा यथापूर्वं दिक्षु चैव विदिक्षु च ॥ १०४ ॥

---

1. °ईरयेत् P_1, M_2, A 2. पवित्रारोहणं P_1, P_2 3. मण्डले P_1
4. प्रागासनो P_1, P_2 5. निशीथिन्याम्° T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्वेदविदो विप्रानेकायनविदः तथा ।
अधीयानान् स्थापयित्वा तूर्यघोषेषु [1]सत्सु च ॥ १०५ ॥

मङ्गलेष्वपि चान्येषु कल्पितेषु यथातथम् ।
पवित्रपात्राण्यादाय प्रागुदक्भुवि मण्डपे ॥ १०६ ॥

धान्यराशिषु संस्थाप्य पुण्याहं वाचयेत्ततः ।
दहनाप्यायनध्यानैः पात्रस्थानि विशोधयेत् ॥ १०७ ॥

धूपयेद्गन्धवद्द्रव्यैर्लिम्पेत्कस्तूरिकादिभिः[2] ।
पुष्पाणि विकिरेत्तेषु गन्धवन्ति बहूनि च ॥ १०८ ॥

तानि भूषणपात्राणि वेष्टयेन्नववाससा ।
दर्शयेच्चक्रमुद्रां च [3]पूजयेदस्त्रविद्यया ॥ १०९ ॥

ऐशानीं दिशमारभ्य सूत्रैस्संवेष्ट्य मण्डपम् ।
मण्डपस्योपरि ध्यात्वा चक्रं भूमितले पुनः ॥ ११० ॥

पद्मं गदाञ्च द्वारेषु शङ्खमष्टसु दिक्षु च ।
प्रत्यूहकारिणां तस्य छिद्रमन्विष्य धावताम् ॥ १११ ॥

भूतानां राक्षसादीनां माषान्नेन बलिं क्षिपेत् ।
बहुबेरेषु कल्याणबिम्बं स्नानासने बहिः ॥ ११२ ॥

स्थापयित्वोपवीतान्तमुपचर्य[4] यथाविधि[5] ।
चक्राब्जमण्डलं[6] भूयस्समानीय चतुर्मुख ॥ ११३ ॥

हविर्निवेदनान्ते तु समाराधनकर्मणि ।
निष्ठिते करके कुम्भे देवमावाह्य पूजयेत् ॥ ११४ ॥

---

1. सत्स्वपि M_1 2. ०जलैः T 3. पूजयित्वा० A, M
4. ०उपवीताद्यैरुपचर्य M_2 5. ०वथम् T, P_1, P_2 6. ०मण्डले P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हविर्निवेदयित्वान्ते हुत्वा चाग्निं यथापुरम् ।
एकबेरे तु कल्याणकौतुकाराधनं विना ॥ ११५ ॥

अन्यत्सर्वमनुष्ठेयं यथापूर्वोदितक्रमात् ।
सम्भवे कौतुके तस्मिन् पवित्रं भूषणं पुनः ॥ ११६ ॥

निक्षिपेत्कुम्भकरके दहने तदनन्तरम् ।
चक्राब्जमण्डले [1]मन्त्रमिदं विष्णुरिति ब्रुवन् ॥ ११७ ॥

प्रविश्य मन्दिरं सर्वैर्मङ्गलैस्सह देशिकः ।
मूलबेरं समासाद्य पवित्रन्यसनं ततः ॥ ११८ ॥

पूर्वोदितेन मन्त्रेण [2]सर्वार्चास्स्युर्यथाक्रमम् ।
पवित्रभूषणन्यासः पञ्च[3]रङ्गैश्च तन्तुभिः ॥ ११९ ॥

प्रासादं वेष्टयेद्रात्रौ सर्वमाम्नायघोषणैः ।
वाद्यैर्गेयैश्च नृत्तैश्च स्तोत्रैर्जागरिता जनाः । १२० ॥

नयेयुरपरेद्युश्च कौतुकं मण्डले स्थितम् ।
स्नानवेद्यां समानीय स्नापयित्वा यथाविधि ॥ १२१ ॥

अलङ्कृत्य च देवेशं मण्डले मार्जनादिभिः ।
शोधिते वर्तयित्वा च चक्राब्जं [4]वर्णपञ्चकैः ॥ १२२ ॥

द्वारादियजनं प्राग्वत्कृत्वावस्थाप्य मण्डले ।
देवमाराध्य [5]दीपान्तं कुम्भादीनपि पूजयेत् ॥ १२३ ॥

अन्नं चतुर्विधं चापि कुम्भे देवे निवेद्य च ।
अग्नौ च जुहुयादन्नं पायसादि चतुर्विधम् ॥ २२४ ॥

---

1. तत्र M_1 2. सर्वाचांसु T, P_1, P_2; सर्वासु च M_2 3. ०रागैश्च P_2
4. पञ्चवर्णकैः T, P_1, P_2 5. धूपान्तं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पौरुषेणैव सूक्तेन यवैश्च व्रीहिवेणुभिः ।
तिलैर्लाजैस्तथा पुष्पैस्तथा चागरुभिर्घृतैः ॥ १२५ ॥

समिद्भिर्मूलमन्त्रेण पृथगष्टोत्तरं शतम् ।
मुहूर्ते शोभने प्राप्ते दैवज्ञपरिशोधिते ॥ १२६ ॥

पवित्राणि समादाय चक्राब्जं भूषयेत्पुनः ।
पद्मादीनि तदङ्गानि यथास्वमिदमित्यृचा ॥ १२७ ॥

ततः कुम्भे च करके देवे च तदनन्तरम् ।
स एव मन्त्रः कुण्डेऽपि हव्यवाहेऽपि तोरणे ॥ १२८ ॥

द्वारकुम्भेषु तत्स्थेषु पवित्राणि यथातथम्[1] ।
ततः प्रदक्षिणीकृत्य मण्डलस्थं जगद्गुरुम् ॥ १२९ ॥

प्रविश्य मन्दिरं सर्वैर्मङ्गलैस्सह देशिकः ।
स्नपनादि विधायादौ समाराधनमुच्यते[2] ॥ १३० ॥

हविर्निवेदनान्तं [3]तत् कृत्वा तत्रत्यदेवताः ।
मूलबेरं समारभ्य पवित्रैर्भूषयेत् स्वकैः ॥ १३१ ॥

[4]स्वतन्त्राः परतन्त्राश्च सर्वाः पूर्वोक्त[5]विधया ।
अभ्यर्च्य गन्धपुष्पाद्यैः पवित्राणि पृथक् पृथक् ॥ १३२ ॥

देयानि दानवेलायां वाद्यवादनकोविदाः ।
नर्तकाः गायकाश्चैव तथा स्वाध्यायकोविदाः ॥ १३३ ॥

सर्वे यथा स्वनृत्तादि दर्शयेयुस्तदन्तिके ।
चण्डादिपरिवाराणामन्येषां [6]प्राङ्गणे सताम् ॥ १३४ ॥

---

1. ॰यथम् M; तथा P_1, P_2, T 2. ॰अच्युते P_2; ॰इष्यते A 3. तत् M_1
4. परतन्त्रास्स्वतन्त्राश्च P_1, P_2 5. ॰संख्यया M_2 6. प्राङ्गणासीनानाम् T; प्राङ्गणासिनाम् P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पवित्राणि प्रदेयानि बलिपीठावसानकम् ।
ब्रह्मादिदेवतानां च तार्क्ष्यसेनेशयोरपि ॥ १३५ ॥

[1]अन्येषामप्यनुक्तानां पवित्राणि यथायथम् ।
मन्त्रश्च विष्णुगायत्र्या यद्वेदं विष्णुरित्ययम् ॥ १३६ ॥

यद्वा चाष्टाक्षरेणैव मन्त्रेण द्वादशात्मना ।
देशिको मूर्तिपैस्सार्धं यजमानेन संयुतः ॥ १३७ ॥

प्रविश्य मन्दिरं विष्णो रत्नपूर्णाञ्जलिस्स्वयम् ।
हेमपुष्पाञ्जलिर्वापि यद्वा पुष्पभृताञ्जलिः ॥ १३८ ॥

स्तोत्रैस्स्तुवानो बहुभिर्विकिरेत्तानि पादयोः ।
रत्नानि हेमपुष्पाणि पुष्पाणि सुरभीण्यपि ॥ १३९ ॥

कल्पितानि मनुष्याणां पवित्राणि यथायथम् ।
न्यस्य देवेशपदयोः पुष्पवत् सुसमाहितः ॥ १४० ॥

क्षौमादीनि [2]पवित्राणि देवं विज्ञाप्य देशिकः ।
स्वयं गृहीत्वा क्षौमादि पवित्रं चात्मनः कृतम् ॥ १४१ ॥

दद्यात्पूजकमुख्यानामृत्विजां सहकारिणाम् ।
एकायनीयनिष्ठानामन्येषां विदुषामपि ॥ १४२ ॥

यथाधिकारं क्रमशो देवस्यालोक्य [3]चाननम् ।
स्पृष्ट्वा देवपदाम्भोज[4]माचार्योऽथ जनान्तिके ॥ १४३ ॥

न्यूनातिरेकशान्त्यर्थं गाथामेतामुदीरयेत् ।
[5]भगवन् देवदेवेश शंखचक्रगदाधर ॥ १४४ ॥

---

1. सर्वेषां° T, P_1, P_2 2. च वस्त्राणि M_2 3. चासनम् A
4. °आचार्येण पदान्तिके M_2 5. एष अर्धश्लोकः P_2, M_1 कोशयोरेव दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संवत्सरोपचाराणां पूरणार्थं कृतं मया ।
आराधनं गृहाण त्वं भक्तानां हितकाम्यया ॥ १४५ ॥

नाहं स्वतन्त्रः किञ्चिच्च करोमि विहितं हितम् ।
किं तु त्वत्प्रेरितस्सर्वं करोमि तव [1]न स्वयम् ॥ १४६ ॥

तत् क्षन्तव्यमशेषेण क्रियालोपाद्यनुष्ठितम् ।
समये यजमानस्तु गां भुवं काञ्चनं तथा ॥ १४७ ॥

वस्त्रादीनि[2] तथा धान्यं भोजयित्वा महीसुरान् ।
दत्त्वा यथेप्सितं नत्वा[3] आचार्याय च दक्षिणाम् ॥ १४८ ॥

शतनिष्कावरां गोभूवस्त्रधान्यादिकान्यपि ।
मूर्तिपेभ्यस्तथान्येभ्यस्तत्तत्कर्मानुसारतः ॥ १४९ ॥

यथा तुष्टिकरं देयं यागे तत्रोपकुर्वताम् ।
अपराह्णे बहिर्ग्रामे कुर्यादेवं महोत्सवम् ॥ १५० ॥

प्रोक्ष्य प्रत्यहमेतानि पूजाकालेषु पूजकैः ।
न्यसनीयानि दिवसांश्चतुर्दश चतुर्मुख ॥ १५१ ॥

यद्वैकविंशतिं सप्त यदि वा दिवसानपि ।
त्रिरात्रमेकरात्रं[4] वा पश्चात्तान्यवरोहयेत् ॥ १५२ ॥

उच्चरन् पौरुषं सूक्तं साम यद्वा रथन्तरम् ।
त्रिसुपर्णं तथा मन्त्रं मूलमन्त्रमथापि वा ॥ १५३ ॥

अवरोप्य पवित्राणि देयानि गुरवे ततः ।
गुरवे तानि दत्तानि प्रीणनाय मधुद्विषः ॥ २५४ ॥

---

1. यत्स्वयम् T, P_1, P_2 2. वस्त्रादिकं T, P_1, P_2 3. यथेप्सितानर्थान् T, P_1, P_2 4. ०पञ्चरात्रं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यथा कर्मनैष्फल्यं क्षयस्स्याद्राजराष्ट्रयोः ।
मण्डलस्थं च कुम्भस्थमग्निस्थं च विसर्जयेत् ॥ १५५ ॥

पवित्रारोपणदिने कालोत्कर्षो न युज्यते ।
कृत्वावरोपणं तेषां स्नपनं तदनन्तरम् ॥ १५६ ॥

कार्यं यथोक्तविधिना प्रविशेन्मन्दिरं ततः ।
इत्येष कथितो ब्रह्मन् पवित्रारोपणे विधिः ॥ १५७ ॥

अनेन विधिना विष्णोः पवित्रारोहणं चरेत् ।
कुर्वन् फलान्यनन्तानि प्राप्नुयान्नैव संशयः ॥ १५८ ॥

सुखं जीवति निर्व्याधिर्यावदायुस्समृद्धिमान् ।
आयुश्च विन्दति प्राप्तं धर्मार्थी धर्ममाप्नुयात् ॥ १५९ ॥

कामानवाप्नुयात्कामी अर्थार्थी चार्थमाप्नुयात् ।
मोक्षार्थी मोक्षमाप्नोति प्रजार्थी [1]लभते प्रजाः ॥ १६० ॥

बान्धवैर्लभते चापि प्रवासिभिस्समागमम् ।
कीर्तिं चाप्नोति परमां कीर्तिकामो न संशयः ॥ १६१ ॥

ज्ञानार्थी ज्ञानमाप्नोति शान्त्यर्थी शान्तिमाप्नुयात् ।
शत्रवस्तु प्रणश्यन्ति ग्रहभूताद्युपद्रवाः ॥ १६२ ॥

आरोग्यकामी चारोग्यं श्रीकामः श्रियमाप्नुयात् ।
बहुनात्र किमुक्तेन फलं यद्यदभीप्सितम् ॥ १६३ ॥

तत्सर्वं तस्य हस्तस्थं नात्र कार्या विचारणा ।
भुक्त्वा भोगांश्च विपुलान् ध्यात्वा चान्ते मधुद्विषम् ॥ १६४ ॥

---

1. चाप्नुयात्प्रजाम् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तल्लोकं समवाप्नोति [1]पुनश्चेह न जायते ।
धारयन्ति पवित्राणि ये भक्ताः श्रद्धयान्विताः ॥ १६५ ॥

तेऽपि निर्धूय पापानि मोदन्ते दिवि देववत् ।
आचार्यो मूर्तिपास्सर्वे ये चान्ये परिचारकाः ॥ १६६ ॥

ये शृण्वन्ति च पश्यन्ति कीर्तयन्ति च कर्म तत् ।
ते सर्वेऽपि समृद्धार्था लभन्ते सर्वसम्पदः ॥ १६७ ॥

आग्रयणं श्रावणे मासि मासि प्रोष्ठपदेऽपि वा ।
मासे चा[2]श्वयुजे ब्रह्मन् कार्तिके मासि वा भवेत् ॥ १६८ ॥

वर्षास्वेवं ततोऽन्यत्र [3]तैषे माघेऽपि[4] वा भवेत् ।
[5]फाल्गुने [6]चापि चैत्रे वा वैशाखे वा तथाचरेत् ॥ १६९ ॥

हस्ते च श्रवणे पौष्णे नैर्ऋते च प्रजापतेः ।
नक्षत्रे वारुणे पुष्ये वायव्येऽदितिदैवते ॥ १७० ॥

[7]मघासु मैत्रे चित्रायां श्रविष्ठायामथापि वा ।
सौम्ये त्रिषूत्तराख्येषु सम्भवानुगुणं भवेत् ॥ १७१ ॥

अयुग्मास्तिथयस्सर्वा नवमीपरिवर्जिताः ।
युग्मास्तु तिथयो नेष्टा द्वितीयां दशमीं विना ॥ १७२ ॥

सोमो बृहस्पतिस्सौम्यो भृगुश्चेति ग्रहाश्शुभाः ।
मेषवृश्चिक[8]मीने तु कन्याझषकुलीरके ॥ १७३ ॥

---

1. न देहाज्जायते पुनः T, P_1; न चेहाजायते पुनः P_2 2. वा° M_1 3. तैष्ये T, P_1 4. मासेऽपि° M, P_1 5. फल्गुने P_1 6. मासि T, P_1, P_2 7. मखे च मैत्रे T, P_1; मखे च चित्रे चित्रायां A, M_2 8. ॰मासे M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वपक्षे च [1]कर्तव्यस्तत्रायं कर्मणः क्रमः ।
आदौ दध्योदनं क्षेत्रे क्षेत्रपालाय कल्पयेत् ॥ १७४ ॥

मुहूर्ते लवनस्योक्ते विधाय लवनं [2]ततः ।
धान्यं कणिशभारेण गृह्णीयाद् भूमिकर्षकैः[3] ॥ १७५ ॥

कदलीपनसादीनि तथा दधिघृतादिकम् ।
धान्यभारानपि तथा कदल्यादिदलानि च ॥ १७६ ॥

नयेयुर्नृत्तवादित्रगीतालङ्कारसंयुतम् ।
पुरतः पृष्ठतश्चैव सेनेशविहगाधिपौ ॥ १७७ ॥

अलङ्कृतौ कुञ्जरादियानारूढौ यथावसु ।
छत्रचामरकौशेयध्वजादिपरि[4]बर्हिणौ ॥ १७८ ॥

नीत्वा प्रदक्षिणं ग्राममालयं च मधुद्विषः ।
गोष्ठागारं प्रविश्यान्तर्धान्यं कणिशगोचरम्[5] ॥ १७९ ॥

श्रीसूक्तेन समभ्यर्च्य भाण्डेष्वभिनवेषु तत् ।
निक्षिप्य सङ्ग्रहं तस्य कुर्युस्तत्रालयेषु च ॥ १८० ॥

कर्मिणां देवदेवस्य [6]यथादेवं समर्चितम् ।
यथाधिकारं धान्यादि दद्याच्च समये शुभे ॥ १८१ ॥

तण्डुलान्नूतनानामान्[7] क्षालितांस्त्रिफलीकृतान् ।
मरीचैर्जीरकैर्युक्तान् गुलपाके सुभावितान् ॥ १८२ ॥

---

1. कर्तव्यः M_1 2. पुनः A 3. ॰भूमिकर्षणैः M_1 4. ॰बर्हकौ T, P_1, P_2 5. ॰गोपुरम् A 6. तथा T, P_1, P_2 7. ॰नूतनानन्यान् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नालिकेरफलोपेतानिक्षु[1]दण्डसमन्वितान् ।
मूलबेरादिबेराणां मुहूर्ते शोभने गुरुः ॥ १८३ ॥

निवेदयेत्ततो मूलविद्ययाष्टोत्तरं शतम् ।
तण्डुलैर्जुहुयादग्नौ [2]ब्रह्मादीनां यथापुरम् ॥ १८४ ॥

तस्मिन् दिने परेद्युर्वा नवान्नानि निवेदयेत् ।
प्रभूत[3]संस्तुताने[4]कनिष्ठानि कदलीदले ॥ १८५ ॥

इति पञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
[5]पवित्राद्युत्सवविधिर्नाम चतुर्दशोऽध्यायः ॥

पञ्चदशोऽध्यायः ॥

व्रतानुष्ठानक्रमः ॥

श्रीभगवान् :—

मासि भाद्रपदे देवं श्रावणे चादिपूरुषम् ।
वराह[6]देवं सुभगं हिरण्याक्षासुरद्विषम् ॥ १ ॥

यजेत देव्या धरया[7] सार्धं सर्वार्थसिद्धये ।
अन्येषां मूर्तिभेदानामपि तस्मिन् समर्चनम् ॥ २ ॥

स्नात्वा चाश्वयुजे मासि यजनं स्नपनादिभिः ।
कार्तिके मासि सम्प्राप्ते द्वादश्यां चासितेतरे ॥ ३ ॥

पक्षे प्रबोधयेद्देवमर्चयित्वा यथावसु ।
मन्त्रश्चोदित्यमित्येष उत्तिष्ठेति च बोधने ॥ ४ ॥

---

1. ॰खण्ड॰ P_1, P_2 2. ब्राह्मणानां T, P_1, P_2 3. ॰संस्कृतान्॰ P_1, P_2
4. ॰अन्नानि निष्ठानि A 5. आग्रायणोत्सवविधिर्नाम A 6. ॰रूपं T, P_1, P_2
7. धरया देव्या P_1, P_2

पा—25

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रबोध्य चार्चयेद्देवमुत्थितं विधिवर्त्मना ।
औत्सवं बिम्बमभ्यर्च्य मण्डपे मण्डले स्थितम् ॥ ५ ॥

द्वारतोरणकुम्भादियजनं च यथापुरम् ।
ग्रामे महोत्सवः कार्यस्सर्वमङ्गलसंयुतः ॥ ६ ॥

सर्वे चाश्रमिणः कुर्युर्व्रतानां च विसर्जनम् ।
दशनिष्कं तदर्धं वा दक्षिणां गुरवे तदा ॥ ७ ॥

कृत्तिकासु च कार्तिक्यां पौर्णमास्यां मधुद्विषः ।
कृत्तिकाभिरयोगे वा केवलायां तिथौ भवेत् ॥ ८ ॥

दीपोत्सव[1]स्तदा सर्वं [2]शोभयेद्देव[3]मन्दिरम् ।
आरोप्य सर्वतो दीपान् स्तम्भेषूच्चैर्मधुद्विषः ॥ ९ ॥

दिक्षु सर्वासु सर्वत्र तथा[4] चावरणेषु च ।
कूटाकाराः कल्पनीया[5]स्तेषु[6] स्युर्दीपमालिकाः ॥ १० ॥

प्राकारभित्तिषु तथा मण्टपे गोपुरेषु च ।
बहीभिर्दीपमालाभिर्भाव्यं सर्वासु दिक्षु च ॥ ११ ॥

दीपोत्सवाय पूर्वेद्युर्निशि कल्याणकौतुकम् ।
बध्नीयादौत्सवे बिम्बे सर्वमङ्गलसंयुतम् ॥ १२ ॥

अपरेद्युश्च मूलादिबेराणामर्चनं भवेत् ।
नैमित्तिकं प्रदोषे तु कुर्याद्दीपाधिवासनम् । १३ ॥

पुरस्तान्मूलबेरस्य पात्रमारोप्य नूतनम् ।
धान्यराशौ ततस्तस्मिन्नाज्यमाढकसंमितम् ॥ १४ ॥

---

1. दीपोत्सवं P_1, P_2 2. शोधयेत् M_2 3. ०मम T, P_2
4. तदा P_2 5. कूटाकाराः कल्पयित्वा T, P_1, P_2 6. तेषां T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कापिलं तैलमथवा निक्षिप्य परिशोधितम् ।
ऋजुवर्तिं तन्तुभिर्वा वाससा नूतनेन वा ॥ १५ ॥

कल्पयित्वा समुद्धृत्य कुण्डाग्निं तेन दीपयेत् ।
वर्तिमाग्नेयमन्त्रेण अग्निमुद्रां प्रदर्शयेत् ॥ १६ ॥

अभ्यर्च्य चाग्निमन्त्रैस्तु मुहूर्ते शोभने गुरुः ।
आदाय [1]पात्रन्यस्तेन वह्निना वल्जादिषु ॥ १७ ॥

दीपयेद्दीपिकास्सर्वास्तूर्येषु विदिशो दिशः ।
घोषयत्सु तथा नृत्तगीतादीनां [2]समुद्यमे ॥ १८ ॥

अधीयानेषु विप्रेषु मन्त्राननल[3]दैवतान् ।
औत्सवं बिम्बमादाय सर्वालङ्कारशोभितम्[4] ॥ १९ ॥

यानमारोप्य रथ्यासु नयेदावरणेषु च ।
दृश्यानि नाटकादीनि कृत्रिमाणीतराणि च ॥ २० ॥

दर्शयेद्देवदेवाय [5]भाषाभेदान्यथोदितान् ।
आसाद्य मण्डपे तस्मिन्निवेद्य च महाहविः ॥ २१ ॥

पृथुकान् संस्कृतान् सक्तून् [6]पललानग्नितृप्तये ।
अपूपान् समये तस्मिन्निवेद्य मधुविद्विषे ॥ २२ ॥

अभ्यन्तरं मन्दिरस्य गमयेन्मङ्गलान्वितम् ।
कृत्तिकादीपविधिना समाराधनमीरितम् ॥ २३ ॥

विशां च राज्ञो राष्ट्रस्य सम्पत्करमनुत्तमम् ।
विपत्प्रशमनं ब्रह्मन् प्रीणनं जातवेदसः ॥ २४ ॥

---

1. पात्रं तत्स्थेन T, P_1, P_2 2. समुज्ज्वयेत् A 3. °देवतान् A
4. °संयुतम् A 5. सर्वालङ्कारशोभितम् A 6. पललान्° T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मार्गशीर्षे सिते पक्षे मासि व्रतमनुत्तमम् ।
[1]द्वादशीव्रतपूर्वत्वाद्व्रतमाराधनं हरेः ॥ २५ ॥

आराधनं भगवतः कुर्वंस्त्वादशमुत्तमम् ।
दशम्यां हरिमाराध्य भोजयित्वा च भूसुरान् ॥ २६ ॥

दक्षिणां च यथाशक्ति दत्त्वा तेभ्यस्समाहितः ।
भगवत्सन्निधौ तेषां विज्ञाप्य द्वादशीव्रतम् ॥ २७ ॥

अनुज्ञापूर्विकां पूजां व्रतपूर्वां महाफलाम् ।
सङ्कल्प्य दर्भेष्वासीनः प्राङ्मुखः प्रणिधानवान् ॥ २८ ॥

हविष्याशी [2]व्रती कृत्वा सर्वं कर्माह्निकं तथा[3] ।
रात्रौ च भगवद्योगमास्थाय च यथाविधि ॥ २९ ॥

अपरेद्युः क्रियाजातमेकादश्यां यथाविधि ।
पूर्वं त्रिषवणस्नायी नियमं परमास्थितः ॥ ३० ॥

अनश्नन् देवमाराध्य होमान्तं मौनमास्थितः ।
भगवद्ध्याननिरतो व्यवहारं च लौकिकम् ॥ ३१ ॥

असंस्पृशन्मनः कायकर्मभिश्चेङ्गितादिभिः ।
स्थितो मौनी तदा तद्वद्रात्रौ कौतुकबन्धनम्[4] ॥ ३२ ॥

बद्ध्वा देवेशमाराध्य दर्भशायी नयेन्निशाम् ।
ब्राह्मे मुहूर्ते चोत्थाय कृत्वा सन्ध्यां यथाविधि ॥ ३३ ॥

कर्म देवान्तिकं गत्वा कुर्यात्पूजां यथापुरम् ।
चतुर्वेदविदो विप्रान् दिक्षु प्राच्यादिषु क्रमात् ॥ ३४ ॥

---

1. द्वादश्यां T, P_1, P_2 2. सकृत् T, P_1, P_2 3. तदा P_1, P_2
4. ०मङ्गलम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]दर्भासनेष्वासयित्वा देवस्याभिमुखं यथा ।
कोणेषु च दिशां विप्रानेकायनविदस्तथा ॥ ३५ ॥

अध्यापयेदध्ययनं यथा स्वच्छन्दसां गुरुः ।
सामगानितरालाभे केवलांस्तपसि स्थितान् ॥ ३६ ॥

एकायनविदो वापि हरेस्तत्प्रीणनं परम् ।
प्राशयेद्ब्राह्मणैस्सार्धं व्रतस्थः कायशुद्धये ॥ ३७ ॥

कुशोदकं पञ्चगव्यं प्रापणं च यथाक्रमम् ।
दिवास्वापं परान्नं च पुनर्भोजनकर्म च ॥ ३८ ॥

स्त्रीसेवां तैलसेवां च कांस्यभोजनमेव च ।
मांसाशनं त्यजेत्तस्मिन् दिवसे कर्म गर्हितम् ॥ ३९ ॥

भोजयेच्च यथाशक्ति दद्यादन्ते च दक्षिणाम् ।
उपवासाक्षमो नक्तमेकादश्यां समाचरेत् ॥ ४० ॥

[2]अज्ञानाच्च त्रयोदश्यां पारणं राक्षसं भवेत् ।
वर्ज्याश्च वारा मन्दस्य भृगोरङ्गारकस्य च ॥ ४१ ॥

नक्षत्रं यमदैवत्यं व्रतारम्भे चतुर्मुख ।
पारणं चोपवासश्च न दोषाय तिथित्रये ॥ ४२ ॥

न सम्भाषेत पाषण्डवृत्तिभिर्गर्हितैर्नरैः ।
प्रमादादपि नैवान्यैर्नास्तिकैः प्रतिलोमजैः ॥ ४३ ॥

नाशौचवद्भिर्द्वादश्यां व्रतस्थो नावलोकयेत् ।
आर्द्रायामपि मासेऽस्मिन् जन्मर्क्षे च गरुत्मतः ॥ ४४ ॥

---

1. दर्भासने स्थापयित्वा A
2. अज्ञानाच्चेत् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्प्रीतये समाराध्यो हरिश्शास्त्रोक्तवर्त्मना ।
पायसान्नं गुलान्नं च [1]प्रभाते विनिवेदयेत् ॥ ४५ ॥

बिम्बं चौत्सवमाकल्प्य वीथिकावरणेषु च ।
[2]गरुडेनैव सहितं गमयेन्मङ्गलान्वितम् ॥ ४६ ॥

उत्तरे चायने देवं स्नपनाद्यैस्समर्चयेत् ।
घृतेनाभ्यञ्जयेद्देवं मज्जयेद्वा घृतादिषु ॥ ४७ ॥

घृते वा दध्नि पीयूषे यद्वा मधुनि सम्भृते ।
फलेषु वा [3]फलरसैः पञ्चगन्धरसेषु वा ॥ ४८ ॥

पायसादिषु चान्नेषु कालपुष्पोच्चयेषु वा ।
दलेषु वा तुलस्यादेर्नवरत्नचयेषु वा ॥ ४९ ॥

सुवर्णकलधौतेषु पुष्पाकारेषु [4]शोभने ।
सुवर्ण[5]गोलकाः कृत्वा [6]कल्पितावयवोज्ज्वलाः ॥ ५० ॥

कल्पिताकल्पकल्याणप्रतिमाकारसंमिताः ।
पीठिकाकारतुलितास्ताभिराच्छाद्य भूषयेत् ॥ ५१ ॥

पञ्चायुधसमाकारा हस्तादिसदृशाकृतीः ।
कृत्वा पृथग्यथाशोभं गोलकाः कञ्चुकाकृतीः ॥ ५२ ॥

भूषयेत्ताभिरङ्गानि चायुधानि च सर्वशः ।
आपाद[7]मस्तकां वान्यैर्व्रीह्यादिभिरधोक्षजम् ॥ ५३ ॥

छादयेन्मूलमन्त्रेण पूरणं सर्ववस्तुभिः ।
[8]तिलस्त्रिपादसहितानपि वा द्विगुणांस्तथा ॥ ५४ ॥

---

1. प्रातःकाले निवेदयेत् M_2 2. उत्तरे गरुडेनैव सहितं मङ्गलान्वितम् M_2
3. फलरसे T, P_1, P_2 4. शोधने M_1 5. ॰गोलिकाः M_2 6. लिखिता॰ M_2
7. ॰मस्तकं T, P_1, P_2 8. त्रिपादभारसहिता नाडीर्वा द्विगुणास्तथा M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूरयेत्कालमातोद्यनृत्तगीतादिमङ्गलम् ।
आचरेत्सर्वमेतस्मिन् यथाविभवविस्तरम् ॥ ५५ ॥

जुहुयात्सर्पिषा यावत्पूरणं मूलविद्यया ।
देया च दक्षिणा स्वर्णमाचार्याय यथावसु ॥ ५६ ॥

घृतादिपूरणं चैतत्सर्वकामसमृद्धिदम् ।
पुष्ये च मासि नक्षत्रे पौर्णमास्यामथापि वा ॥ ५७ ॥

आराधनं भगवतस्सर्वपापविनाशनम् ।
माघमासे सिते पक्षे पञ्चम्यां मधुविद्विषम् ॥ ५८ ॥

समाराध्य यथाशास्त्रं देवस्याग्रे महीतले ।
गोमयालेपिते [1]द्वाभ्यां हस्ताभ्यामपि संमिते ॥ ५९ ॥

चतुर्भिर्वा समायामविस्तारे छादिते पुनः ।
वाससा नूतनेनैव सदशेन तथोपरि ॥ ६० ॥

कृष्णाजिनेन शुद्धेन भेदनच्छेदनादिना ।
वर्जितेन [2]समाच्छाद्य वस्त्रं तदुपरि क्षिपेत् ॥ ६१ ॥

तिलानां भारमेकं वा द्वौ वा कृत्वा च वेदिकाम् ।
त्रिमेखलां तिले तस्मिन् पद्माकारसमाकृतिम् ॥ ६२ ॥

निष्कत्रयात्मकं स्वर्णं लेखापद्मं तिलेषु वा ।
निक्षिप्य नवरत्नानि दिक्षु चाष्टासु निक्षिपेत् ॥ ६३ ॥

धान्यपूर्णानि पात्राणि द्वे द्वे प्रतिदिशं क्रमात् ।
प्रस्थतैलं तथा सर्पिर्दधि चापि चतुर्गुणम् ॥ ६४ ॥

---

1. वाद्ये M_1 2. समासाद्य T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पार्श्वयोः पुरतश्चापि पात्रस्थं न्यस्य भूतले ।
[1]तिलाज्याहारः पुरतस्त्रीण्यहानि यतेन्द्रियः ॥ ६५ ॥

उपोष्य वा गुरुः पूर्वमेकरात्रं चतुर्मुख ।
अभ्यर्च्य गन्धपुष्पाद्यैस्तिलान्नैस्तदनन्तरम् ॥ ६६ ॥

अधीयानेषु विप्रेषु तूर्यवादित्रघोषणे ।
मङ्गलेषु तथान्येषु प्रवृत्तेषु यथा[2]तथम् ॥ ६७ ॥

तिलैस्सहस्रकृत्वोऽग्नौ जुहुयान्मूलविद्यया ।
आचार्यं पञ्चकालज्ञं भगवच्छास्त्रकोविदम् ॥ ६८ ॥

कल्याणाचारनिरतं सर्वैस्समुदितं गुणैः ।
तस्मै भागवतायेदमर्चयित्वा[3]क्षतादिभिः ॥ ६९ ॥

तिलपद्मं[4] प्रदातव्यं सन्निधौ वारिपूर्वकम् ।
प्रीयतां भगवान्विष्णुरित्याचार्येण मन्त्रवित् ॥ ७० ॥

तदन्ते देवमभ्यर्च्य [5]भोजयित्वा महीसुरान् ।
दद्याच्च दक्षिणां तेभ्यो गुरवे च यथोदिताम् ॥ ७१ ॥

[6]इत्थं तिलसरोजं यो दद्याद्धान्यादिसंयुतम् ।
पुनाति स पितॄन् सर्वानात्मानं च[7] परावरान् ॥ ७२ ॥

मासर्क्षे पौर्णमास्यां च यजनं स्नपनादिभिः ।
फाल्गुने मासि फल्गुन्यां श्रीकामो हरिमर्चयेत् ॥ ७३ ॥

उपोष्य पूर्वं नियतो ध्यायन्नित्थं[8] समाहितः ।
विपुले बिल्वविपिने मध्ये पुष्करशोभिते ॥ ७४ ॥

---

1. तिलाज्यभारसहितः त्रीण्यहानि जितेन्द्रियः M_2 2. ॰यथम् T, P_1, P_2 3. यथाविधि A 4. तिलपद्मं T 5. पूजयित्वा M_1 6. एवं M_1 7. कुल्यानपि M 8. ध्यायंस्तीर्थ॰ M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

महातटाके शिञ्जानपक्षिसङ्घसमाकुले[1] ।
मण्डले[2] तत्र माहेन्द्रे [3]प्राकारपरिवेषणे ॥ ७५ ॥

[4]चतुर्द्वारे चतुर्दिक्षु कल्पकद्रुममण्डिते ।
सौवर्णे बहुकल्याणरत्नस्तम्भसमन्विते ॥ ७६ ॥

सिंहासने वरे रत्नपद्मेऽष्टदलसंयुते ।
कर्णिकाकेसरोपेते सुखासीनं श्रिया सह ॥ ७७ ॥

पूर्वादिदिक्षु ध्यातव्या वासुदेवादयो दले ।
आग्नेयादिषु कोणेषु चत्वारो हस्तिनः क्रमात् ॥ ७८ ॥

गुग्गुलश्च कुरण्डश्च दमकश्शललस्तथा ।
शङ्खपद्मनिधी चापि सिंहविष्टरपार्श्वयोः ॥ ७९ ॥

अन्योन्याभिमुखौ भूरि वमन्तौ वसु सर्वदा ।
भूम्यादयोऽष्टौ पूर्वादिदिक्षु चामरपाणयः ॥ ८० ॥

इन्द्रादयश्च पूर्वादिदिक्ष्वष्टावष्टसु [5]स्थिताः ।
स्थिताश्चतुर्षु द्वारेषु वेत्रहस्तास्सकुञ्चिकाः[6] ॥ ८१ ॥

कुब्जवेषाः स्त्रियो द्वारि पालयन्त्यो मनोहराः ।
बलाकिनी भीषिका च तथैव वनमालिनी ॥ ८२ ॥

शाङ्करी च क्रमादेताः पूर्वादिषु चतुर्मुख ।
द्वाराणि पालिकाभिश्च पूर्णकुम्भैर्द्विजैस्तथा ॥ ८३ ॥

तोरणैर्दामभिर्मौक्तिकैर्दीपैरन्यैश्च मङ्गलैः ।
परिष्कृतानि ध्यात्वैवं देवीं देवं च पूजयेत् ॥ ८४ ॥

---

1. ०महातले M_1 2. मण्डपे P_1, P_2 3. रत्नप्राकारवेष्टिते T, P_1, P_2
4. चतुर्दिक्षु चतुर्द्वारे P_1, P_2 5. क्रमात A, P_2 6. सकञ्चुकाः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रियं वा केवलां पद्मे कर्णिकायामवस्थिताम् ।
मण्डपे तत्र पूर्वोक्ते परिवारसमन्विते ॥ ८५ ॥

लक्ष्मीप्रसूनकैः पद्मैः होमो बिल्वादिपल्लवैः ।
समिदाज्यैश्च मन्त्रेण श्रियश्चाष्टाक्षरेण च ॥ ८६ ॥

श्रीसूक्तानि चतुर्दिक्षु पाठ्यानि पृथिवीसुरैः ।
आराध्याभिष्टुयादन्ते स्तोत्रैर्बहुविधैः श्रियम् ॥ ८७ ॥

नमामि देवि लोकानां जनयित्र्यब्जसम्भवे[1] ।
सर्वलोकेश्वरैशेशवल्लभे दुर्लभेऽधमैः ॥ ८८ ॥

वासुदेवाङ्गसंस्पर्शसुखैकरसभाजने ।
नमस्ते [2]शुभदे देवि देवानामधिदेवते ॥ ८९ ॥

यदृच्छयापि ते [3]येषु कटाक्षाः पतितास्सकृत् ।
क्षुद्रेष्वपि [4]प्रगल्भन्ते ते त्रिलोकेश्वराः क्रमात् ॥ ९० ॥

न स्पृशन्ति त्रिलोकेशानपि यान् वीक्षणानि ते ।
सम्पाद्यन्ते क्षणात् क्षुद्रा नाकपृष्ठादपि च्युताः ॥ ९१ ॥

लावण्यादिगुणा यत्र काष्ठामश्नुवते पराम् ।
तानि त्वदीयान्यङ्गानि देवि कः स्तोतुमर्हति ॥ ९२ ॥

त्वं माया त्वमविद्यासि बंशन्ती [त्वं शक्तिः] कर्मणामपि ।
चैतन्यशक्तिस्त्वमसि प्रकृतिस्त्रिगुणात्मिका ॥ ९३ ॥

त्वमेव विद्या त्रय्यन्ता त्रयी च त्वं [5]परावरे ।
यस्यास्त[6]वायुतांशांशे देव्यो वागादयस्स्थिताः ॥ ९४ ॥

---

1. जनन्यायब्धिसम्भवे P_2 2. सुभगे M_2; सुखदे T, P_1, P_2 3. देवि T, P_1, P_2 4. प्रकल्पन्ते T 5. परावरा P_1, P_2 6. °आयतापाङ्गे M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सच्चिदानन्दरूपस्य परस्य परमात्मनः ।
आनन्दादिमयी मूर्तिरविभक्ता भवत्यसि ॥ ९५ ॥

प्रभासि तस्य नित्या त्वं भास्वतः परमात्मनः ।
सन्ध्या त्वमसि विप्राणां वन्दनीया दिने दिने ॥ ९६ ॥

भूर्भुवः स्वस्त्रयी च त्वं भूरसि त्वं भुवोऽसि च ।
[1]स्वरसि व्याहृतिश्चासि ऋग्यजुस्सामकारणम् ॥ ९७ ॥

त्वमाहुतिस्त्वमिष्टिश्च दक्षिणासि त्वमेव च ।
सिद्धिश्च कर्मणां त्वत्तो नान्यास्ति कमलालये ॥ ९८ ॥

नीतिरान्वीक्षकी वार्ता विद्या [2]चान्यासि लौकिकी ।
दृष्ट्वा देवि त्वया हीनं मृतप्रायं जगत्त्रयम् ॥ ९९ ॥

यत्नैरम्भोधिमथनप्रायैराविर्बभूविथ ।
आनुषङ्गिकमुत्पन्नं प्राप्तमप्सरसामपि ॥ १०० ॥

तादृगेवामृतादन्यदिन्दिरे हरिमन्दिरे ।
हालाहलविषं चापि जन्मनः श्रेयसे तव ॥ १०१ ॥

प्रत्यूहरूपेणोत्पन्नं क्षीरवारिधिसम्भवे ।
[3]अभ्यर्हिता तवोत्पत्तिरेवं नाम मधुद्विषः ॥ १०२ ॥

कूर्मादितिर्यग्योनित्वं यत्प्राप्तं परमात्मना[4] ।
त्वं सर्वलोकजननी जनको जगतां हरिः ॥ १०३ ॥

त्वया च विष्णुना चैतद्व्याप्तं स्थावरजङ्गमम् ।
मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम् ॥ १०४ ॥

---

1. स्वरपि M_2 2. चाद्यासि T, P_1, P_2 3. अभ्यर्चिता M
4. परमात्मनः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मा शरीरं कलत्रं च त्यजेथा मा च सन्ततिम् ।
श्रुतवान् शीलवान् दक्षो बुद्धिमान्वित्तवानृजुः ॥ १०५ ॥

वृत्तवान् बन्धुमान् श्रीमान् पशुमान् धान्यवानपि ।
गुणवान् कीर्तिमान् लोके तथाभिजनवान् प्रभुः ॥ १०६ ॥

आयुष्मान् विजयी भूमांस्तथैवारोग्यवानपि ।
श्लाघ्य[1]वाग् देवि पुरुषः कटाक्षविषयात्तव ॥ १०७ ॥

गुणैर्यथोक्तै रहितस्त्वद्दर्शनविवर्जितः ।
क्रीडाभूमिर्हरेर्य[2]स्या वक्षोभूमिस्सनातनी ॥ १०८ ॥

आनन्त्यात्तव कल्याणि गुणानां वर्णने क्षमः ।
न वाचस्पते[3]रन्येषां दूरे स्यान्मादृशां स्थितिः ॥ १०९ ॥

प्रसीद देवि पद्मे त्वं पद्महस्ते शुचिस्मिते ।
पद्मासने पद्मयोनेर्जननयित्रि हरिप्रिये ॥ ११० ॥

पद्मप्रिये नमस्तुभ्यं विष्णोर्वक्षःस्थलालये ।
स्तुत्यन्तमित्थमाराध्य देव्यस्सर्वाः श्रियादयः ॥ १११ ॥

अर्हणं चोपवीतं च वर्जयित्वोपचर्यया ।
ध्यात्वा यथोक्तमात्रेण यद्वा धूमध्वजार्चनम् ॥ ११२ ॥

उत्सवं च श्रिया देव्या सार्धं तद्व[4]न्मधुद्विषः ।
यावज्जीवं श्रियं देवीमर्चयन् सम्पदं पराम् ॥ ११३ ॥

इहानुभूय भूयोऽपि परत्र श्रियमश्नुते ।
[5]यद्यत्कामयमानेन पुरुषेणार्चनं श्रियः ॥ ११४ ॥

---

1. ॰वान् T, P_1, P_2 2. यस्य T, P_1, P_2 3. ॰अप्येष T, P_1, P_2
4. तस्मिन् T, P_1, P_2 5. यद्वा कामयमानेन T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लभते तत्तदेवेह फलभेदैः किमीरितैः ।
आरोग्यकामस्त्वावित्रे मण्डले रक्तपङ्कजे ॥ ११५ ॥

आसीनं विष्टरे पीतकौशेयवसनं हरिम् ।
निष्टप्ततपनीयाभं चतुर्भुजमधोक्षजम् ॥ ११६ ॥

प्रसादसुमुखं [1]सेव्यं दिव्याभरणभूषितम् ।
देवीसहायं कल्याणं केवलं वा चतुर्मुख ॥ ११७ ॥

पूर्वाद्यष्टदलासीनं[2] शक्त्यष्टसमुपासितम् ।
एवं ध्यात्वार्चयेन्नित्यमारोग्यं परमश्नुते ॥ ११८ ॥

अनन्यलभ्यमारोग्यं सर्वं [3]लब्ध्वा ततः परम् ।
दिनानि पञ्च शस्तानि वैष्णवानि चतुर्मुख ॥ ११९ ॥

तेषु व्रतमनुष्ठेयं सर्वाभिप्रेतसाधनम् ।
पक्षद्वयेऽपि[4] द्वादश्यौ सिनीवाली कुहूस्तथा ॥ १२० ॥

श्रवणर्क्षं दिनानि स्युर्मासेषु द्वादशस्वपि ।
चैत्रादिषु द्वादशसु मासेषु द्वादशाधिपाः ॥ १२१ ॥

अर्चनीयाः क्रमाद्विष्णुस्तथैव मधुसूदनः ।
त्रिविक्रमो वामनश्च श्रीधरस्तदनन्तरम् ॥ १२२ ॥

हृषीकेशः पद्मनाभो दामोदरसमाह्वयः ।
केशवो नामधेयेन तथा नारायणः स्मृतः ॥ १२३ ॥

माधवोऽन्यश्च गोविन्दो द्वादशैते प्रकीर्तिताः ।
मासे चैत्रे [5]समारम्भो मार्गशीर्षेऽथवा भवेत् ॥ १२४ ॥

---

1. सर्वं॰ T, P_1, P_2 2. ॰आसीन॰ P_1, P_2 3. लभ्यमितः परम् M_2; लभ्येत्ततः परम् T, P^1, P_2 4. च P_1, P_2 5. व्रतारम्भे M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अश्नन् हविष्यं पूर्वेद्युरनश्नन्नपरेऽहनि ।
श्रवणे मध्यमे भागे शुचिर्दक्षस्समाहितः ॥ १२५ ॥

चक्राब्जमण्डले यद्वा बिम्बे कुम्भेऽथवा हरिम् ।
आराध्य मूर्ति मासेशमुपचारैर्यथोदितैः ॥ १२६ ॥

[1]आदावन्ते च वित्तानि दत्त्वा शक्त्यनुसारतः ।
ब्राह्मणेभ्यस्तथा दत्त्वा गुरवे दक्षिणादिकम् ॥ १२७ ॥

अपरेद्युस्तथा [2]देवीमर्चयित्वा यथाविधि ।
पारणं ब्राह्मणैस्सार्धं कुर्यान्नियतमानसः ॥ १२८ ॥

एवं चतुर्षु चान्येषु दिनेष्वाराधनक्रमः[3] ।
मासि मासि च यष्टव्या[4] मासेशो मूर्तिरब्जज ॥ १२९ ॥

दिनेषु पञ्चसूक्तेषु सर्वाभिप्रेतसिद्धये ।
त्रिषु संवत्सरेष्वेवं कृत्वा मासेषु च त्रिषु ॥ १३० ॥

व्रते समाप्ते स्नपनं कुर्यात्पूर्वोक्तवर्त्मना ।
याचयेत व्रतफलं धान्यराशौ [5]स्थितो द्विजः ॥ १३१ ॥

भोजयित्वा द्विजवरान् दत्त्वा तेभ्यश्च दक्षिणाम् ।
दक्षिणाभिस्तथाचार्यं तोषयेत्काञ्चनादिभिः ॥ १३२ ॥

पौर्णमास्यामपि ह्येष क्रमो मासाधिपार्चने ।
विशेषतस्त्रियामायां चन्द्रमस्युदितेऽ[6]र्हणाम् ॥ १३३ ॥

कुह्वामपि तिथौ प्राग्वदर्चयेद् व्रतमास्थितः ।
आराधनं दिनेष्वेषु चतुर्वर्गफलप्रदम् ॥ १३४ ॥

---

1. आराधनान्ते वित्तानि T, P_1, P_2 2. देवम्° T, P_1, P_2 3. °क्रमम् T 4. यष्टव्यो M_1 5. स्थितं द्विजम् M_2 6. अर्हणा T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वस्मिन्मासनक्षत्रे प्रादुर्भावदिनेषु च ।
अर्चयित्वाङ्कुरान् पूजा कार्या स्नपनपूर्विका ॥ १३५ ॥

[1]होमावसानिका विप्रान् तर्पयेच्च यथावसु ।
इति श्रीपञ्चरात्रे महोपनषदि पाद्मे तन्त्रे चर्यापादे
व्रतानुष्ठानक्रमो नाम पञ्चदशोऽध्यायः ॥

षोडशोऽध्यायः ॥

संमार्जनादिफल-देवस्वापहारदोषकीर्तनम् ॥

ब्रह्मोवाच :—

भगवन् भाविनां कर्मफलानामशुभात्मनाम् ।
सूचनेषु निमित्तेषु सञ्जातेष्वशुभात्मसु ॥ १ ॥

ग्रहदोषादिषु नृणामधिपस्य च भूपतेः ।
तेषामकस्माज्जातानां कर्म यच्छमनं परम् ॥ २ ॥

तत्समाख्यायतां कीदृक् किं कथं [2]वेति चाच्युत ।
रहस्यमपि तद्वाच्यं दयया परया मयि ॥ ३ ॥

श्रीभगवान् :—

जन्मर्क्षाद्यशुभ[3]स्थानं गतेष्वङ्गारकादिषु ।
क्रूरेषु दुर्निमित्तेषु [4]दुःस्वप्नसमयेषु च ॥ ४ ॥

[5]गृहक्षेत्रादिकेष्वेवं वल्मीकजनने तथा ।
रक्तवृष्टिषु[6] जातास्वग्निदाहे च वेश्मनाम् ॥ ५ ॥

---

1. अयं श्लोकार्धः A,T,P_1 कोशेषु P_2 ग्रन्थे चैवोपलभ्यते । 2. चेति P_1,P_2
3. ०स्थान० T, P_1, T_2 4. दुःस्वप्नेष्वामयेषु च T, P_1, P_2 5. गृहक्षेत्रादिषु स्वेषु वल्मीकाक्रन्दनेषु च M_2 6. रक्तस्त्रीषु P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वस्त्रादिमूषिकादंशे दग्धेषु शयनादिषु ।
सङ्कटेष्वपि चान्येषु पुत्रादिकलहात्मसु । ६ ॥

नृपकोपे तथा चित्तदुःखे निगलबन्धने ।
पीडायामरिपक्षेण पिशाचाद्यैर्भयानकैः ॥ ७ ॥

व्रतध्वंसे प्रागभावे पुत्रा[1]णामर्थहानिषु ।
[2]अनिष्टसूचने पुत्रजन्मन्युत्पातसम्भवे ॥ ८ ॥

एवमादिषु चान्येषु दोषेष्वाराधनं मम ।
शान्तये कल्पते ब्रह्मन् प्रकारस्तस्य कथ्यते ॥ ९ ॥

[3]स्नानपूर्वाणि कर्माणि कृत्वा विधिवदादृतः ।
शुचौ भूमितले कुम्भं [4]सौवर्णं राजतं तु वा ॥ १० ॥

ताम्रं वापि यथावित्तं वारिपूर्णं सकूर्चकम् ।
तन्तुभिर्वेष्टितं न्यस्तवारिबीजं समल्लकम्[5] ॥ ११ ॥

आचार्यं वरयेत् पश्चान्मदाराधनतत्परम् ।
शमादिगुणसंयुक्तं पञ्चकालपरायणम् ॥ १२ ॥

धान्यराशिषु संस्थाप्य न्यस्तरत्नसुवर्णकम् ।
शान्तिद्रव्यसनाथं च अश्वत्थदलमङ्गलम् ॥ १३ ॥

वेष्टितं नववस्त्रेण रक्तेनाक्षतसंयुतम् ।
प्राच्यां दिशि च देवे[6]शमावाह्य घटिकासने ॥ १४ ।

---

1. पुराणामर्थ० P_1, (fn.) P_2 (fn.) 2. अरिष्ट० P_1, P_2 3. सार्धमयं श्लोकः A, T कोशयोः, P_2 ग्रन्थे चैव दृश्यते । 4. वारिपूर्णं सकूर्चकम् M_1, P_1
5. सपल्लवम् T, P_1, P_2 6. सार्धः श्लोकोऽयं P_1, P_2 ग्रन्थयोरेवोपलभ्यते ।
याम्ये सङ्कर्षणं तथा ।
प्रद्युम्नं पश्चिमे भागेऽनिरुद्धं तथोत्तरे ॥
एवं क्रमेण देवेशमावाह्य घटिकासने । इति पाठः P_2 ग्रन्थे एव दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुशकूर्चैः पश्चिमाशासंमुखेऽष्टाक्षरेण तु ।
यजेतार्घ्यादिना यद्वा रिक्तं[1] तस्य [2]तदर्चनम् ॥ १५ ॥

कुम्भे चावाह्य यजनं [3]जुहुयाद्गव्यसर्पिषा ।
[4]मन्त्रेणाष्टाक्षरेणैव लक्षवारानथायुतम् ॥ १६ ॥

सहस्रमपि वा कुण्डे शतं वाष्टोत्तरं गुरुः ।
ध्यात्वा हरिं सर्वशान्तिकरं सर्वसमृद्धिदम् ॥ १७ ॥

गौरवं लाघवं चापि समवेक्ष्य यथोचितम् ।
दोषाणां यत्नमातिष्ठेदर्चनादिषु सर्वतः ॥ १८ ॥

अन्ते प्रणवमठिलङ्गैर्यजमानं गुरुस्स्वयम् ।
मन्त्रैः कुम्भस्थतोयेन प्रोक्षयेन्मूलविद्यया ॥ १९ ॥

सहस्रकृत्वः कूर्चेन स्नापयेच्छेषवारिभिः ।
आचार्याय यथावित्तं दद्यात्स्वर्णादि दक्षिणाम् ॥ २० ॥

ब्राह्मणान् भोजयेत्तेभ्यो दक्षिणामल्पिकामपि ।
प्रभूणामपि सर्वेषां सर्वोपद्रवशान्तये ॥ २१ ॥

सर्वाभिप्रेतलाभाय विशेषयजनं हरेः ।
कुर्यात् स्नपनपूर्वं तदह्नि नित्यार्चने कृते ॥ २२ ॥

तदन्ते शान्तिकं कर्म अपराह्णेऽथ[5] पौष्टिकम् ।
पूर्वाह्णे नित्यकर्मोक्तं वस्तुभिर्द्विगुणैरिह ॥ २३ ॥

---

1. रुक्मं न्यस्य T, P_1, P_2 2. तदर्धकम् M_2 3. जपेन्मन्त्रमनुत्तमम् P_2
4. मूलमन्त्रेण लक्षं वा तदर्धं वा तदर्धकम् । ततः पुंसूक्तमन्वाकं नारायणानुवाककौ ॥ ततः श्रीसूक्तभूसूक्ते जपेदाचार्य ऋत्विजाम् । मूलेनाग्निं प्रतिष्ठाप्य जुहुयाद्गव्यसर्पिषा । अग्निप्रतिष्ठां कृत्वाथ वैष्णवीकरणं तथा ॥ 5. तु T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूजाद्रव्यैरेकबेरे मूलबेरे समर्चनम् ।
बहुबेरे तु बिम्बे स्यादौत्सवे कमलासन ॥ २४ ॥

आचार्य एव पूजायां वैशेषिक्यां समर्चयेत् ।
होमकुण्डं भवेत् पद्मतुल्याकारं सुशोभनम् ॥ २५ ॥

पौष्टिके शान्तिके वृत्तं प्रत्यहं समिदादिभिः ।
प्रत्येकं तिलहोमस्स्यादयुतं वा शतावरम् ॥ २६ ॥

प्रत्यहं भोजयेद्विप्रान् यथाशक्ति च दक्षिणा ।
नृत्तं गेयं च वाद्यं च तथाध्ययनमन्वहम् ॥ २७ ॥

कर्मावसानदिवसं यावदग्नेश्च धारणम् ।
सप्ताहं द्विगुणं वा स्यात् त्रिगुणं वा चतुर्गुणम् ॥ २८ ॥

स्नपनं प्रत्यहं कार्यं दानहोमादयस्तथा ।
शान्तिके कर्मणि ध्येयो हरिः स्फटिकसन्निभः ॥ २९ ॥

पौष्टिके तु सुवर्णाभः श्रियासीन[1]स्सहासने ।
चक्राब्जमण्डले कुम्भे [2]यत्र प्रथममर्चनम् ॥ ३० ॥

तत्रैवान्येद्युराराध्यो न तु निर्माल्यता तयोः ।
आचार्यदक्षिणा चापि यथाविभवविस्तरम् ॥ ३१ ॥

कर्मण्यविकृतानां च कर्मगौरवलाघवम् ।
अवेक्ष्य तोषणं वित्तै ऋत्विजां चोपकुर्वताम् ॥ ३२ ॥

[3]दिनेषु चानुकूलेषु प्रारभ्या पौष्टिकी क्रिया ।
शान्तिकी प्रतिकूलेषु यजमानस्य पद्मज ॥ ३३ ॥

---

1. महासने M_2 2. यत्र यत्र समर्चनम् P_2 3. दिनादिष्वनुकूलेषु T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मोवाच :—

भगवन् मार्जनादीनि मन्दिरे कुर्वतां नृणाम् ।
विष्णोः क्षेत्रादिदातॄणां पूजोपकरणानि च ॥ ३४ ॥

भूषणानि च वस्त्राणि फलमभ्युदयात्मकम् ।
कीदृक् कीदृक् च तान्येव [1]दत्तान्याहरतामपि ॥ ३५ ॥

अनर्थकरमेतन्मे संशयानस्य कथ्यताम् ।
मार्जनं मन्दिरे विष्णोः कुर्वन् संमार्ष्टि देहजम् ॥ ३६ ॥

श्रीभगवान् :—

मलं पापात्मकं सर्वं परत्रेह च सम्भृतम् ।
प्रत्यहं मार्जनं कुर्वन् प्रत्यहं हन्ति किल्बिषम् ॥ ३७ ॥

गोचर्ममात्रमालिप्य गोमयेन च भूतलम् ।
आलये लभते सद्यो गोप्रदानफलं नरः ॥ ३८ ॥

मार्जनालेपने कुर्वन् विष्णोरायतने नरः ।
उषित्वा [2]स चिरं स्वर्गे कर्मशेषेण भूतले ॥ ३९ ॥

भूयोऽपि जायते भूपः कुले महति पूजिते ।
स्रजं बद्ध्वा सुमनसां यः प्रयच्छति विष्णवे ॥ ४० ॥

स भुक्त्वा विपुलान् भोगान्नाकपृष्ठे विराजते ।
दीपानारोपयेद्विष्णोर्मन्दिराभ्यन्तरे बहिः ॥ ४१ ॥

दिवि देववदास्थित्वा[3] जायते परमार्थवित् ।
नित्यान्नैमित्तिकान्वापि दीपानारोपयेन्नरः ॥ ४२ ॥

---

1. दत्तानां हरतामपि T, P, M_2
2. सुचिरं T, P_1, P_2
3. व्आासित्वा T, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बहुदुःखसमाकीर्णं नरकं [1]न स पश्यति ।
अहोरात्रं त्वनिर्वाणं[2] दीपमारोपयेन्नरः ॥ ४३ ॥

सर्वपापविशुद्धात्मा विष्णुलोके महीयते ।
उदकाभ्युक्षणं विष्णोरालये विदधाति यः ॥ ४४ ॥

लोकं स वारुणं प्राप्य रमते वत्सरान् बहून् ।
[3]संमृज्यालिप्य च हरेर्धाम पुष्पाणि भूतले ॥ ४५ ॥

विकिरेन्मनुजस्सर्वकामानाप्नोति पुष्कलान् ।
[4]विष्णुसात्कुरुते भूमिं [5]बहुसस्यफलप्रदाम् ॥ ४६ ॥

यस्य लोकानवाप्नोति सर्वानेव न संशयः ।
पुष्पोद्यानप्रदानेन तपोलोके महीयते ॥ ४७ ॥

फलवृक्षसमोपेतां प्राग्भूमिं(तु) [6]जलान्विताम् ।
यो ददाति महर्लोके स चिरं वसति ध्रुवम् ॥ ४८ ॥

उत्पादयति यः क्षेत्रे वैष्णवे फलिनस्तरून् ।
नालिकेरादिकान् याति स स्वर्गं प्रेत्य दुर्लभम् ॥ ४९ ॥

आराधनाय तुलसीं उत्पादयति यत्नवान् ।
सुरभीणि च पुष्पाणि दिवि देवैः स पूज्यते ॥ ५० ॥

वापीकूपतटाकानि विष्णोर्मन्दिरभूमिषु ।
उत्पादयति हस्ते स्युस्तस्य[7] सर्वसमृद्धयः ॥ ५१ ॥

न तं बध्नन्ति पापानि बहुजन्मार्जितान्यपि ।
यः कुर्याद्वैष्णवं धाम भक्ति[8]श्रद्धोभयोचितम् ॥ ५२ ॥

---

1. नैव T, P_1, P_2 2. अहोरात्रमनिर्वाणं P_1, P_2 3. सम्मार्ज्य° T, P_1, P_2 4. विष्णोर्यः कुरुते M_1 5. सर्व° T, P_1, P_2 6. समन्विताम् A 7. हस्तस्थास्तस्य T, P_1, P_2 8. °श्रद्धाभियोजितम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खण्डिते स्फुटिते धाम्नि दूषिते च सुधादिभिः ।
समादध्यात्पुनर्धाम स लोकं याति वैष्णवम् ॥ ५३ ॥

स्नान[1]पानाम्भसोर्विष्णोः प्रदानात्तत्सलोकभाक् ।
स्नानीयद्रव्यदानेन नीरोगः प्रेत्य मोदते[2] ॥ ५४ ॥

क्षौमादिदानादाप्नोति परलोके महत् सुखम् ।
आलेपनद्रव्यदानात् कामानाप्नोति शाश्वतान् ॥ ५५ ॥

एलाकर्पूरताम्बूलीतैलादिस्पर्शनात् सुखी ।
परत्रेह च लोके स्याद्दीर्घकालं [3]न संशयः ॥ ५६ ॥

चामरव्यजनच्छत्रदानात् स्वाराज्यमश्नुते ।
दानादाभरणादीनां तेजस्वी दिवि मोदते ॥ ५७ ॥

दानाच्च नवरत्नानां देवसालोक्यमश्नुते ।
आदर्शनप्रदानेन दृश्यस्सर्वैर्भविष्यति[4] ॥ ५८ ॥

धूपद्रव्यप्रदानेन स्वस्थानं स्वर्गिणां भवेत् ।
उपानहौ पादुके च वाहनं यानमेव च ॥ ५९ ॥

ददाति यो मण्डयित्वा मणिकाञ्चनचित्रितम् ।
स विमानं सुदुष्प्रापं प्राप्नोत्येव न संशयः ॥ ६० ॥

अलङ्कृतं भद्रपीठं प्रयच्छन् सर्वकामभाक् ।
विनतानन्दनस्थानं ध्वजमुत्पाद्य दर्शयन् ॥ ६१ ॥

सामीप्यं सहसा विष्णोर्याति सद्यश्चतुर्मुख ।
ध्वजं च वाद्यमुत्पाद्य विष्णुसात्कुरुते च[5] यः ॥ ६२ ॥

---

1. °पानाम्भसां T, P_1, P_2 2. प्रतिमोदते M_1 3. असंशयः T, P_1, P_2
4. अयं श्लोकः P_2 ग्रन्थे नोपलभ्यते । 5. तु P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स दिव्यदुन्दुभिप्रायं स्थानं प्राप्य विराजते ।
दासीदासं तदात्मीयमात्मानं च प्रयच्छति ॥ ६३ ॥

वासुदेवाय दास्येन मुक्तिः करतले स्थिता ।
नृत्तभेदैर्गीतभेदैस्तथा वाद्यैरनेकधा ॥ ६४ ॥

श्रोतव्यैरपि [1]दिव्यैश्चाप्येवं देवस्य सन्निधौ ।
[2]आसनाद्युपचारैस्तैर्ये समाराधयन्ति ते ॥ ६५ ॥

प्रेत्य दिव्येषु [3]कालेषु पूज्यन्ते तैर्न संशयः ।
प्रदक्षिणनमस्कारैस्स्तुतिप्रायोपचर्यया ॥ ६६ ॥

आराधयन्ति ये देवं देवानामधिदैवतम् ।
ते देवै[4]रुपवर्ण्यन्ते परत्र भगवान् यथा ॥ ६७ ॥

स्थितं शयानमासीनं देवं [5]देवेश्वरेश्वरम् ।
यदृच्छयापि पश्यन्तः प्राप्नुवन्ति परं पदम् ॥ ६८ ॥

किं पुनर्भक्ति[6]पूर्वा ये वीक्षन्ते क्षण[7]मप्यथ ।
[8]निर्धूतदुष्कृतास्सर्वे यान्ति लोकान् यथेप्सितान् ॥ ६९ ॥

अष्टाङ्गप्रणिपातेन ये नमस्यन्ति मानवाः ।
तपस्स्वाध्यायशीलानां फलमश्नुवतेऽचिरात् ॥ ७० ॥

इयदेतदिति स्मर्तुं फलं वक्तुं च कः क्षमः ।
सकृत्प्रणमतां देवं फलं यन्मधुविद्विषम् ॥ ७१ ॥

---

1. दृश्यैश्च एवं देवेश° T,P_1,P_2 2. आसीनमुपचारैः T,P_1,P_2 3. लोकेषु T,P_1,P_2 4. °उपचर्यन्ते T,P_1, $_2$ 5. सर्वेश्वरेश्वरम् T,P_1,P_2 6. °पूर्वं ये पश्यन्ति T,P_2 7. °अच्युतम् T,P_2; °अप्यमुम् M_2 8. निर्धूय दुष्कृतं सर्वं T,P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शिरसा श्रवणाभ्यां च[1] मनसा वा करेण वा ।
बाहुभ्यां वाथ पद्भ्यां वा जानुभ्यां वापि वक्षसा[2] ॥ ७२ ॥

एकैकेनाङ्गजातेन प्रणमन्मधुविद्विषम् ।
कामानाप्नोति विपुलाननन्तानन्यदुर्लभान् ॥ ७३ ॥

किं पुनर्येऽष्टभिस्सर्वैरङ्गैः प्रणिपतन्ति ते[3] ।
वासुदेवाश्रयकथा व्याचक्षाणा दिने दिने ॥ ७४ ॥

वासुदेवालये यान्ति वाचस्पत्यमसंशयम् ।
गवां च कपिलादीनां प्रदानादश्नुते जनः ॥ ७५ ॥

ब्रह्मलोकादिलोकेषु वासं विन्दति शाश्वतम् ।
हविषां पायसादीनां हरये च निवेदनात् ॥ ७६ ॥

सुखैकरसपूर्णात्मा राजते विष्णुसन्निधौ ।
भक्ष्यपानीयभोज्यानामन्येषामपि दानतः ॥ ७७ ॥

श्वेतद्वीपे तत्समीपे वसन्ति सुखिनः सदा ।
बहुनात्र किमुक्तेन वासुदेवार्थमादरात् ॥ ७८ ॥

ददाति वस्तुजातं यः स्थानं प्राप्नोति चेप्सितम् ।
कर्मणां मार्जनादीनां फलभोगादनन्तरम् ॥ ७९ ॥

कर्मशेषैः पुनर्जन्म कर्मानुगुणयोनिषु ।
उत्कृष्टास्वेव भोक्तारो लभन्ते सुखिनः सदा ॥ ८० ॥

प्रासादमण्डपादीनां [4]भोक्तारः कैटभद्विषः ।
ये मूढमतयः प्रेत्य निरयेषु निरत्ययाः ॥ ८१ ॥

---

1. वा T, P_1, P_2 2. द्भ्यां वा वक्षसापि वा T, P_1, P_2
3. च T, P_1, P_2 4. भेत्तारः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वसन्ति भूयो नीचासु जायन्ते योनिषु ध्रुवम् ।
भूषणच्छत्रवस्त्रादि[1]हर्ता यो दुर्मतिर्नरः ॥ ८२ ॥

गले निगलितः पाशैः कृष्यते निरयेषु सः ।
वाहनानि च यानानि वैष्णवानि हरन्ति ये ॥ ८३ ॥

मोहाद्वसन्ति ते दीर्घमज्ञार[2]नरकोदरे ।
प्रेत्य भूयोऽपि जायन्ते गर्दभोष्ट्रादियोनिषु ॥ ८४ ॥

चन्दनादीनि वस्तूनि पुष्पाणि सुरभीण्यपि ।
हरन्ति स्वानि विष्णोस्ते व्रजन्ते याम्ययातनाम् ॥ ८५ ॥

अनुभूय पुनर्ब्रह्मन् जायन्ते गन्धमूषिकाः ।
उपानत्पादुकापीठव्यजनानि हरन्ति ये ॥ ८६ ॥

उषित्वा निरयेष्वेते जायन्ते फणिनां कुले ।
गोभूहिरण्यवस्त्रादिधनं विष्णोः परिग्रहम् ॥ ८७ ॥

आहृत्य ये तु भुञ्जन्ते नरकेषु निरत्ययाः ।
उषित्वा प्रेत्य भूयोऽपि जायन्तेऽ[3]श्वादियोनिषु ॥ ८८ ॥

सर्वेषु नरकेष्वेवं देवब्रह्मस्वहारिणः ।
वसन्ति मूढमतयो याम्यदुःखानि भूयसा ॥ ८९ ॥

व्यायामोद्वर्तनाभ्यङ्गस्नानपानाशनादिकम् ।
कुर्वन्ति मन्दिरे विष्णोर्ये ते निरयगामिनः ॥ ९० ॥

पच्यन्ते तत्र भूयोऽपि जायन्ते नीचयोनिषु ।
वासुदेवप्रतिकृतेः भेदनच्छेदनादिषु ॥ ९१ ॥

---

1. यो हर्ता P_2 2. निरये नराः M. 3 नीच° A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]विक्रुतादीनि चान्येषु यतन्ते पापचेतसः ।
एते यान्ति क्रमात्सर्वान्नरकान् भृशदारुणान् ॥ ९२ ॥

अन्येष्वप्यपचारेषु स्थूलसूक्ष्मेषु मानवाः ।
कृतिनः प्रेत्य नरके पच्यन्ते दुःखभागिनः ॥ ९३ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे संमार्जनफल-देवस्वापहारदोषकीर्तनं नाम षोडशोऽध्यायः ॥

—: * :—

सप्तदशोऽध्यायः ॥

जीर्णोद्धारसंप्रोक्षणविधिः ॥

ब्रह्मा :—

प्रतिमानां तथा धाम्नां जीर्णानां भगवन्नहम् ।
उद्धारं श्रोतुमिच्छामि तन्मे ब्रूहि यथायथम् ॥ १ ॥

श्रीभगवान् :—

स्वायम्भुवार्षदिव्येषु मानुषेषु चतुर्ष्वपि ।
अङ्गहानौ रत्नजेषु तप्तजाम्बूनदैः पुनः ॥ २ ॥

समाधातव्यमेवाङ्गं न त्याज्यं शैलजेष्वपि ।
तद्वदेव समाधानं दारुजादिषु पञ्चसु ॥ ३ ॥

[2]हीनाङ्गानि तु बिम्बानि हित्वा तानि पुनः सृजेत् ।
अङ्गमात्रसमाधाने सृष्टौ सर्वात्मनापि च ॥ ४ ॥

---

1. विक्रीतादीनि T,P_1,P_2
2. हीनाङ्गेषु तु T,P_1,P_2; हीनेऽवङ्गेषु M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुम्भे शक्तिं समावाह्य निर्माय च यथापुरम् ।
अधिवासादिकं सर्वं प्रतिष्ठायामिवाचरेत् ॥ ५ ॥

स्थितवत् [1]स्वेषु बिम्बेषु समाधिर्यदि शक्यते ।
न त्यागो युज्यते तेषां सर्वेषामेव पद्मज ॥ ६ ॥

त्यक्तं च लोहजं बिम्बं द्रावयित्वा पुनः सृजेत् ।
देवे जीर्णे पुनःसृष्टौ देव्यः प्राच्यो यथास्थिताः ॥ ७ ॥

ताभिरेव पुनर्योज्यो देवो[2] नान्याः सृजेत्पुनः ।
नोद्वाहश्च पुनः कार्यः सन्ततौ तासु पूजने ॥ ८ ॥

प्रभापद्मासनादीनां वैकल्ये चलनेऽपि वा ।
[3]आयुधेऽपि च चक्रादौ यष्टव्यो [4]नासमाहितः ॥ ९ ॥

उद्वास्य प्रतिमाशक्तिं मूलबेरे घटेऽपि वा ।
चक्रादेश्च समाधानं कार्यं तस्मिन् समाहिते ॥ १० ॥

सम्प्रोक्ष्य पूजयेच्छक्तिमावाह्य प्रतिमासु ताम् ।
[5]बिम्बे[6] पुरातने जीर्णे [7]नवबिम्बं कृतं यदि ॥ ११ ॥

तं पीठे स्थापयेद्देवं न दोषः पद्मसम्भव ।
[8]पीठेऽप्यनूतने जीर्णे [9]नवं कृत्वा यथापुरम् ॥ १२ ॥

[10]तद्बिम्बं स्थापयेत्पीठे प्रतिष्ठाकर्मभिः सदा ।
न दोषस्तत्र विज्ञेयः प्रभादीनां चतुर्मुख ॥ १३ ॥

---

1. तेषु सर्वेषु M_2 2. देवो योज्यो P_1, P_2 3. ''आयुधेऽपौ''त्यारब्धानि ''प्रतिमासु ता''मित्यन्तानि वाक्यानि P_1, P_2 ग्रन्थयोः दृश्यन्ते । 4. नासमाहिते T, P_1, P_2 5. बिम्बे इत्यारभ्य चतुर्मुखेतिपर्यन्तं श्लोकाः P_1, P_2 ग्रन्थयोर्नोपलभ्यन्ते । 6. बेरे A 7. न पीठं विकृतं A 8. पीठे पुरातने A 9. नवबिम्बं A 10. कर्तव्यमिति तत्रैव न दोषः पद्मसंभव । A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बालालयं कल्पयित्वा तत्र शैलादिवस्तुषु ।
बिम्बे तु शक्तिमावाह्य जीर्णेभ्यः पूजनं हरेः ॥ १४ ॥

त्यक्तं च बिम्बं निखनेत् क्षितौ वाम्भसि निक्षिपेत् ।
प्रासादे चापि शिथिले पूजयेद्बालवेश्मनि ॥ १५ ॥

उपेतं परिवारैः स्वैर्देवं मूले यथा तथा ।
अजीर्णे ध्रुवबिम्बे तु जीर्णे धामनि [1]च स्थितान् ॥ १६ ॥

देवान् देवपरीवारान् मूलबेरे निवेशयेत् ।
अजीर्णधामनिष्ठानां जीर्णे तु ध्रुवकौतुके ॥ १७ ॥

नोद्वासोऽन्यत्र कर्तव्यो देवादीनां चतुर्मुख ।
[2]अजीर्णे चाङ्गहीने च धामादौ नैव कल्पयेत् ॥ १८ ॥

भूयस्तरोऽपि मर्त्येन[3] व्यामोहाद्यदि कल्पयेत् ।
आत्महानिर्ध्रुवा तस्य यजमानस्य [4]सान्वया ॥ १९ ॥

यदि प्रमाणरहितं प्रमादात् कल्पितं पुरा ।
प्रासादादि [5]तदाप्यूर्ध्वं कल्पयेल्लक्षणान्वितम् ॥ २० ॥

बहुबेरैकबेरेषु कल्पनं स्याद्यथापुरम् ।
बहुबेरे नैकबेरं नैकबेरे तथापरम् ॥ २१ ॥

देवीविरहितं पूर्वं बहुबेरं कृतं यदि ।
[6]पुनः प्रकल्पने तस्य देवीभ्यां सह वा विना ॥ २२ ॥

अमानुषं च बिम्बादि पूर्वं लक्षणवर्जितम् ।
जीर्णोद्धारेऽपि कर्तव्यं तथैव न तदन्यथा ॥ २३ ॥

---

1. तत्स्थितान् T, P_1, P_2 2. अजीर्णे नाङ्गहानौ च T, P_1, P_2; अजीर्णे नाङ्गहीने च M_2; अजीर्णेऽप्यङ्गहानिश्चेद्धामादौ नैव कल्पयेत् । 3. भूयस्तरो भवेन्मर्त्यो M 4. सान्वयम् T 5. पुनस्सृष्टौ T, P_1, P_2 6. भूयः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शयनं वासनं स्थानं यानं वा तद्यथापुरम् ।
बिम्बस्य पुनरुद्धारस्तथैव स्यादमानुषे ॥ २४ ॥

मानुषेषु[1] स्थितादीनां बिम्बानामिच्छया भवेत् ।
पुनःसृष्टिर्न दोषाय तथा सति चतुर्मुख ॥ २५ ॥

दिव्यं विमानं यद्वस्तु यन्मानं यादृशं पुरा ।
तादृगेव पुनः[2]सृष्टौ नान्यथा तत् प्रकल्पयेत् ॥ २६ ॥

अन्यथाकल्पने दोषो राज्ञो राष्ट्रस्य च ध्रुवम् ।
मानुषं सदनं चार्षं चैष्टकं वाथ मृन्मयम् ॥ २७ ॥

जीर्णं पुनः समुद्धारे शैलेनेष्टकयापि वा ।
उपपीठादिकं [3]सर्वं रक्षार्थं [4]बन्धयेद्बहिः ॥ २८ ॥

परिवारांश्च तत्रस्थानुपपीठे च वर्धिते ।
स्थापयेन्मूलबेरस्य रक्षार्थत्वान्न दूषणम् ॥ २९ ॥

सालगोपुर[5]पीठादिवलने जीर्ण एव वा ।
दृढं शिलादिभिः कुर्याद्विस्तीर्णमथवान्यथा[6] ॥ ३० ॥

नद्यादिजलवेगेन चलिते नष्ट एव वा ।
प्रासादादौ पुनःस्थाने निर्बाधेऽन्यत्र कल्पयेत् ॥ ३१ ॥

या मूर्तिर्येन [7]तन्त्रेण यादृशेनाधिकारिणा ।
प्रथमे [8]कल्पने सैव द्वितीये [9]कल्पने भवेत् ॥ ३२ ॥

---

1. मानुषे तु P_1, P_2 2. सृष्टा M_2 3. कलशं T, P_1, P_2 4. वर्धयेद्बहिः T,P_1,P_2 5. पीठादौ चलिते T,P_1,P_2 6. न्यसेत् M_2 7. मन्त्रेण T,P_1,P_2 8. कल्पिता T,P_2 9. कल्पिता T,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मूर्ति[1]स्तदेव तन्त्रं च स एव स्थापकः पुनः ।
अपूर्वकल्पने जीर्णे[2] समुद्धारे द्वयोरपि ॥ ३३ ॥

तुल्यं फलं [3]कल्पनानां धामादेर्नास्ति संशयः ।
तन्त्राधिकारिमूर्तीनां व्यत्यये [4]कल्पिते पुनः ॥ ३४ ॥

नृणां नरपतेश्चापि राष्ट्रस्य च भवेत् क्षयः ।
बहुबेरप्रतिष्ठायां जीर्णोद्धारे यथापुरम् ॥ ३५ ॥

कर्मार्चां स्थापयेद्देव्यां शाययेच्चापि मण्टपे ।
[5]नाधिवासो जले कार्यो [6]न नेत्रोन्मीलनं तथा ॥ ३६ ॥

न तत्त्वसंहारोत्पादौ सर्वं [7]कर्मान्यथाचरेत् ।
मूलबिम्बं समासाद्य प्राग्वत्सर्वं समाचरेत् ॥ ३७ ॥

बालकौतुकमभ्यर्च्य यात्रामन्यत्र[8] तद्गताम् ।
शक्तिं कुम्भे समावाह्य कुम्भं धान्यस्थितं पुनः ॥ ३८ ॥

अभ्यर्च्य समये प्राप्ते मूलबेरे गुरुः स्वयम् ।
शक्तिं निवेशयेच्छास्त्रदृष्टेन विधिना हरौ ॥ ३९ ॥

कुम्भतोयावशेषेण परिवारप्रकल्पनम् ।
उत्सवं कारयेदन्ते सर्वशान्तिकरो हि सः ॥ ४० ॥

ब्रह्मा :—

सम्प्रोक्षणनिमित्तं किं प्रकारो वास्य कीदृशः ।
कथ्यतां भगवन् मह्यं जिज्ञासा मेऽनुवर्तते ॥ ४१ ॥

---

1. तेनैव मन्त्रेण तादृशेनाधिकारिणा A ; मूर्तिस्सैव च P_1,P_2 2. जीर्णसमुद्धारे P_1,P_2 3. कल्पनायां P_1,P_2 4. कल्पने T,P_1,P_2 5. नाधिवासं जले कुर्यात् T,P_1,P_2 6. नयनोन्मीलनं तथा P_1,P_2 7. पूर्ववदाचरेत् T,P_2; सर्वकर्म सदाचरेत् P_1 8. यात्रामूर्तिञ्च M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीभगवान् :—

प्रासादे चाङ्गभङ्गादिसन्धाने नूतने कृते ।
प्रतिमायां च पीठे च प्रभायां चायुधेऽपि च ॥ ४२ ॥

आराधने च विच्छिन्ने मासादौ कमलासन ।
स्पर्शने प्रतिलोमाद्यैर्निरयाशौचविगर्हितैः ॥ ४३ ॥

[1]उदक्यादिभिरन्यैश्च शिल्पिभिः स्पर्शदूषिते ।
विण्मूत्ररुधिरापेयस्पर्शदोषे च मन्दिरे ॥ ४४ ॥

जनने मरणे चैव श्वसृगालशवादिभिः[2] ।
स्पृष्टे च बिम्बे तन्त्राणां सङ्करे समुपस्थिते ॥ ४५ ॥

एवमादिषु चान्येषु सम्प्रोक्षणविधिर्भवेत् ।
धामादिकमसम्प्रोक्ष्य प्रतिमादिकमप्यथ ॥ ४६ ॥

अर्चने राष्ट्रमधिपः प्रजाश्च सदनं हरेः ।
शून्यं स्यादिरिणप्रायमुपद्रवसमाकुलम् ॥ ४७ ॥

दुर्भिक्षव्याधिकलहमृतिप्रायाः स्युरीतयः ।
तस्मात्सम्प्रोक्षणं कार्यं धामादीनां यथाविधि ॥ ४८ ॥

विष्णोर्नुकमिति स्वच्छैर्जलैः प्रोक्षणमिष्यते ।
अब्लिङ्गैरितरैर्मन्त्रैराचार्यो ब्राह्मणैः सह ॥ ४९ ॥

ध्रुवबेरादिबिम्बानां शोधने क्षालने कृते ।
इदं विष्णुरितिप्रायैर्मन्त्रैः परमपावनैः ॥ ५० ॥

---

1. प्रतिलोमानुलोमैश्च सूतैश्च रथकारकैः ।
वैखानसैश्च संस्पृष्टे भार्गवागमपूजकैः ॥
शैवादिभिश्च पाषण्डैर्ब्रह्महत्यादिदूषितैः ।
क्षयापस्मारिकुष्ठाद्यैः कृच्छ्रभिर्मूलरोगिभिः ॥ एतौ द्वौ श्लोकौ T, P_1, P_2 ग्रन्थेष्वधिकतया दृश्येते । 2. खरादिभिः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्नपनं च यथाशक्ति कुर्यात् [1]पुण्याहपूर्वकम् ।
द्वारतोरण[2]कुम्भादीन् पूजयेत्समनन्तरम् ॥ ५१ ॥

धान्यपीठे मण्टपस्य मध्यभागे सुशोभिते ।
स्थापयित्वा महाकुम्भं सूत्रवस्त्रादिवेष्टितम् ॥ ५२ ॥

पूर्वोक्तवर्त्मना तस्मिन् परमात्मानमर्चयेत् ।
कुण्डे वा स्थण्डिले वापि जुहुयात्समिधादिभिः ॥ ५३ ॥

प्रत्येकमष्टोत्तरशतं शान्तिहोमो यथापुरम् ।
बध्नीयात्कौतुकं बिम्बे प्रोक्षयेदपरेऽहनि ॥ ५४ ॥

प्रभातसमये प्राप्ते शोभने देशिकोत्तमः ।
स्थापितं कुम्भमादाय प्रादक्षिण्येन मन्दिरम् ॥ ५५ ॥

नीत्वा देवस्य पुरतो धान्यपीठे निवेश्य च ।
कूर्चेन तोयमादाय कुम्भस्थं मूलविद्यया ॥ ५६ ॥

पञ्चोपनिषदैर्मन्त्रैरङ्गैरितरैस्तथा ।
शान्तिमन्त्राणि समये पठेयुर्विप्रसत्तमाः ॥ ५७ ॥

ब्राह्मणान् भोजयेच्चापि यथाशक्ति च दक्षिणा ।
आचार्यदक्षिणा चापि दशनिष्कावरा तथा ॥ ५८ ॥
सद्यो वा सकलं कुर्यान्निशि वा दिवसेऽपि वा ।[3]

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे जीर्णोद्धार-
संप्रोक्षणविधिर्नाम सप्तदशोऽध्यायः ॥

---

1. स्नपनपूर्वकम् T, P_1, P_2 2. ०कुम्भादियजनं तदनन्तरम् T, P_1, P_2

3. न तिथिर्न च नक्षत्रं कालवेला न विद्यते। सद्य एव तु कर्तव्यमिति शास्त्रस्य निश्चयः। एष श्लोकः T, P_1, A ग्रन्थेष्वधिकतया दृश्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टादशोऽध्यायः ॥

नित्याराधनप्रायश्चित्तविधिः ॥

ब्रह्मा :—

नैमित्तिकानां नित्यानां कर्मणां भगवन् हरे ।
आराधनानां वैकल्यं लोपो वा प्रायसंज्ञितम् ॥ १ ॥

तस्य चित्तं समाधानमिति निर्वचनक्रिया ।
तस्य किं वा समाधानं कः प्रकारोऽस्य कथ्यताम् ॥ २ ॥

श्रीभगवान् :—

अस्नातोऽनुपवीतो वा[1] [2]न कृत्वा तिलकं तथा ।
अर्चयेद्देवदेवेशं प्रायश्चित्तीयते नरः ॥ ३ ॥

समाधानं मूलमन्त्रशतं [3]च स्यात्तदर्चनम् ।
अकृत्वा पादयोश्शौचमनाचम्यापि वार्चने ॥ ४ ॥

पञ्चोपनिषदां जापः प्रायश्चित्तं तदर्चनम् ।
नग्नो वा मुक्तकेशो वा स्विन्नाङ्गो वा हसन् श्वसन् । ५ ।

कुप्यन् वा प्रलपन् वापि पूजायां तु शतं जपेत् ।
शतकृत्वोऽस्त्रमन्त्रस्य समाराधनमन्वतः । ६ ॥

केशास्थिलोमलोष्टादिस्पर्शने नैव निष्क्रिया ।
वसानो नीलमलिनक्लिष्टवासोऽपवित्रकः । ७ ॥

अर्चयेन्मूलमन्त्रस्य जपस्तस्य प्रतिक्रिया ।
गत्वा स्त्रियमनाप्लुत्य [4]पूजयेत् स्नापयेद्धरिम् ॥ ८ ॥

---

1. अनुपनीतो वा A 2. अधृत्वा T, P_1, P_2 3. जप्त्वा तदर्चनम् T, P_1, P_2
4. पूजने T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चगव्यैस्ततः पञ्चमहोपनिषदां जपः ।
विण्मूत्ररेतोरुधिरबालादिस्पर्शने सति ॥ ९ ॥

अस्नानपूजने देवं स्नापयेत्कुशवारिभिः ।
मूलमन्त्रजपश्चोक्तो निष्क्रिया तस्य कर्मणः ॥ १० ॥

वस्त्रं रजस्वलायाश्च स्पृष्ट्वा देवार्चने कृते ।
पञ्चगव्यैः स्नापयित्वा पञ्चोपनिषदां जपः ॥ ११ ॥

श्वानं रजस्वलां यूपं चण्डालं वेदविक्रयम् ।
चितिं च [1]नीचचैत्यस्थं वृक्षं स्पृष्ट्वा तदर्चने ॥ १२ ॥

पञ्चवारुणमन्त्रैश्च स्नापयेत्कुशवारिणा ।
काकपाषण्डपतितप्रतिलोमखरादिकान् ॥ १३ ॥

अस्पृश्यमन्यदप्येवं स्पृष्ट्वा प्राग्वत्प्रतिक्रिया ।
[2]केशादिदोषदुष्टेन पुष्पेणाराधने कृते ॥ १४ ॥

क्षीरेण स्नपनं कृत्वा शान्तिहोमः प्रतिक्रिया ।
पुरीषादिकमाक्रम्य यद्यनाप्लुत्य पूजयेत् ॥ १५ ॥

स्नपनं कुशपाथोभिर्जपः प्राग्वत्प्रतिक्रिया ।
स्त्रियो वानुपनीतो वा स्पृशेद्बिम्बं प्रतिक्रिया ॥ १६ ॥

उक्षणं कुशतोयेन मन्त्रेण परमेष्ठिना ।
आराधने सम्प्रवृत्ते निष्ठीवादिकमन्तरा ॥ १७ ॥

[3]आदावन्ते चाचमनं स्पृशेद्वा दक्षिणं श्रवः ।
प्रलयादिकमादेहमसंशोध्य समाधिना ॥ १८ ॥

---

1. चैत्यभूमिस्थं T, P_1, P_2 2. मूत्रादि॰ A, M_2 3. यद्यापते-दाचमनं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रन्यासमकृत्वा च पूजने पूर्ववज्जपः ।
अर्चनं च पुनस्सर्वं कृत्वा देवस्य निष्कृतिः ॥ १९ ॥

चण्डालाद्यैरसंस्पृश्यैर्हविः स्पृष्टं निवेदयेत् ।
यदि प्रमादात्, स्नपनं गोघृतेन प्रतिक्रिया ॥ २० ॥

शान्तिहोमश्च कर्तव्यस्तदन्ते कमलासन ।
दृष्टं च स्पृष्टवत् तद्वत्सृगालाद्यैश्च दूषितम् ॥ २१ ॥

आचाररहितैरन्यैस्तथा वा[1]शुचिवस्तुभिः ।
अयाज्ञीयैः कोद्रवाद्यैर्हविर्भिश्च निवेदने ॥ २२ ॥

पूर्ववच्च समाधानं मूलमन्त्रायुतं जपेत् ।
शाकमूलफलैर्लेह्यपेयाद्यैश्च विवर्जितैः ॥ २३ ॥

स्नपनं शान्तिहोमश्च मूलविद्याजपस्तथा ।
अत्युष्णस्यातिशीतस्य हविषश्च निवेदने । २४ ॥

निवृत्तिमन्त्रजापश्च विश्वमन्त्रजपः क्रमात् ।
[2]शवादिदूषिते गेहे पक्वस्य हविषस्तथा ॥ २५ ॥

निवेदनं चेत् स्नपनं शान्तिहोमस्तथैव च ।
कृमिकेशादिदुष्टस्य हविषश्च निवेदने ॥ २६ ॥

पौरुषेणैव सूक्तेन कुर्याच्छुद्धाभिषेचनम् ।
मुखवात[3]हताघ्रातं रजस्तुषकणान्वितम् ॥ २७ ॥

मृत्पाषाणशकृत्प्राय[4]दूषितस्य निवेदने ।
[5]मूलमन्त्रजपं कुर्याच्चद्वत्पर्युषितं यदि ॥ २८ ॥

---

1. तथैव॰ P_1, P_2 2. सत्त्वादि॰ M_2 3. ॰वायु॰ T, P_1, P_2
4. ॰हविर्यदि निवेदयेत् M_2; ॰दूषितश्च निवेदयेत् A 5. मूलमन्त्रायुतजपः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निवेदितस्य हविषो भूयो यदि निवेदनम् ।
[1]स्नानपूर्वार्चनं मूलमन्त्रस्य च जपस्तथा[2] ॥ २९ ॥

निवेदयेच्च निर्माल्यमुच्छिष्टं वा प्रतिक्रिया ।
कुम्भैर्द्वादशभिः स्नानं शान्तिहोमो जपस्तथा ॥ ३० ॥

गुर्वादीन्मनसा वाचा कर्मणानुमतः[3] करे ।
स्थितानि हविरादीनि पुष्पादीनि चतुर्मुख ॥ ३१ ॥

पूजावस्तून्ययोग्यानि समाराधनकर्मणि ।
तैरर्चने पञ्चकुम्भैः स्नपनं पूर्ववज्जपः ॥ ३२ ॥

वासुदेवं प्रणमतः पूजावस्तूनि हस्तयोः ।
स्थितानि नार्चनार्हाणि सेनान्ये तानि निक्षिपेत् ॥ ३३ ॥

तैरर्चनं चेत्स्नपनं कलशैः सप्तभिर्भवेत् ।
शान्तिहोमश्च कर्तव्यो मूलमन्त्रजपस्तथा ॥ ३४ ॥

मण्डूकमूषिकासर्पबिडालाद्यैश्च जन्तुभिः ।
कृमिकीटपतङ्गाद्यैः पक्षिभिर्वायसादिभिः ॥ ३५ ॥

[4]स्पृष्टं दष्टं हविर्नैव [5]देयं यदि निवेदने ।
स्नपनं कलशैरेव त्रिभिर्होमान्त[6]मर्चनम् ॥ ३६ ॥

मक्षिकाद्यैश्च संस्पृष्टं प्रोक्ष्य देवाय कल्पयेत् ।
[7]भुक्तशेषं प्रमादाच्च लोभाद्वा देवमर्चयेत् ॥ ३७ ॥

मूलमन्त्रायुतजपः शान्तये तस्य कल्पते ।
[8]भुक्तशेषप्रदानेन तद्वदेव च निष्कृतिः ॥ ३८ ॥

---

1. स्नपनं पूर्ववन्मूल० M_2 2. इष्यते T, P_1, P_2 3. नमतः ०T, P_1, P_2
4. दृष्टं M_1 5. देवार्हं तन्निवेदने T, P_1, P_2 6. ०अर्चयेत् T, P_1, P_2
7. भुक्तशेषैः प्रमादाद्वा T, P_1, P_2 8. दत्त० T, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्नाने पर्युषिताम्भोभिः पुनरेवमथाम्बुभिः ।
अब्लिङ्गैः पावनैर्मन्त्रैः [1]प्रायश्चित्तिर्निरुच्यते ॥ ३९ ॥

पुण्यतीर्थे सरित्तोये न पर्युषितदूषणम् ।
समुद्रतोयं दशमात्परं पर्युषितं दिनात् ॥ ४० ॥

तिर्यग्योनिभिरस्पृश्यैर्मानुषैरतिलङ्घितम् ।
स्पृष्टं च वारि न स्नानयोग्यं स्नाने च वारुणैः ॥ ४१ ॥

स्नानं पुनर्विधातव्यं शान्त्यर्थं तस्य कर्मणः ।
अजाश्वमुखसंस्पर्शो न दोषाय कदाचन ॥ ४२ ॥

गोमुखेनैव संस्पृष्टं वर्जनीयं समर्चने ।
प्रायश्चित्तं पुनः स्नानं मूलमन्त्रजपस्तथा ॥ ४३ ॥

विण्मूत्ररुधिरापेययुक्तैः तोयादिवस्तुभिः ।
नार्चयेदर्चने स्नानं कलशैरधमाधमैः ॥ ४४ ॥

शिवनिर्माल्यदुष्टेन तोयप्रभृतिवस्तुना ।
पूजने कलशैः स्नानमधमैर्मध्यमैर्भवेत् ॥ ४५ ॥

शवादिदूषिते कूपे जलमुद्धृत्य पूर्ववत् ।
सर्वं तदन्ते पुण्याहं वाचयेज्जलशुद्धये ॥ ४६ ॥

पश्वादिमरणे कूपे चण्डालस्नानपानयोः ।
तथा रजस्वलाद्यैश्च प्रतिलोमैर्विगर्हितैः ॥ ४७ ॥

कूपस्थं तज्जलं सर्वमुद्धरेत् कमलासन ।
चुचुन्दर्यादिमरणे जलस्यार्धं समुद्धरेत् ॥ ४८ ॥

---

1. प्रायश्चित्तं तदुच्यते T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिवा समुद्धरेत्तोयं रात्रौ चेदग्निसन्निधौ ।
उद्धरेदन्यथा तोयैरुपयोगे च[1] वारुणैः ॥ ४९ ॥

पञ्चभिर्जुहुयादग्नौ ब्राह्मणानपि भोजयेत् ।
पूजाकाले तु दीपस्य निर्वाणे द्विगुणार्चनम् ॥ ५० ॥

दीपमुद्दीप्य जप्तव्यो विश्वमन्त्रः शतावरः ।
अकस्मादेव निर्वाणे शान्तिर्नैव त्वहैतुके ॥ ५१ ॥

अनिर्वाणस्य निर्वाणे दीपस्य स्नपनं हरेः ।
क्षीरेण मूलमन्त्रस्य जपश्चाष्टोत्तरं शतम् ॥ ५२ ॥

सर्पिषा तिलतैलेन दीपारोपणमाचरेत् ।
नान्यैरेरण्डतैलाद्यैर्नाजाविमहिषादिजैः ॥ ५३ ॥

स्नेहैरारोपणं [2]कुर्यान्न च प्राण्यङ्गसम्भवैः ।
प्रमादात्फलजैस्तैलैः स्नपने दीपने हविः ॥ ५४ ॥

निवेदने च होमे च स्नेहैरन्यैश्च निन्दितैः ।
अनुष्ठाने कृते कुम्भैः स्नापयेन्मध्यमोत्तमैः ॥ ५५ ॥

शान्तिहोमस्तथा दानं द्विजेभ्यो भोजनं तथा ।
हविःप्रभृतिदध्याद्यैः स्नानादौ विहिते सति ॥ ५६ ॥

प्रायश्चित्तं यथापूर्वमाचरेत्कमलासन ।
पूर्वोपचारक्लृप्तौ तु न्यूनायां क्लृप्तवस्तुभिः ॥ ५७ ॥

वस्तुभिर्द्विगुणैर्भूयस्समाराध्य मधुद्विषम् ।
सर्पिषाष्टोत्तरशतं जुहुयान्मूलविद्यया ॥ ५८ ॥

---

1. अथ T, P_1, P_2 2. कार्यं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रहानौ[1] क्रियाहानौ मुद्राहानौ तथैव च ।
जपहानौ[2] ध्यानहानौ हीनेष्वन्येषु केषुचित् ॥ ५९ ॥

मूलमन्त्रजपस्तस्य यथाशक्ति प्रतिक्रिया ।
गेयवादित्रनृत्येषु पूर्वक्लृप्तेषु पूजने ॥ ६० ॥

हीने कस्मिंश्चिदाराध्यो हरिः स्नपनवर्त्मना ।
वाद्यहानौ तु पयसा नृत्तहानौ घृतेन तु ॥ ६१ ॥

[3]गानहानौ तु मधुना जुहुयात्पूर्वसंख्यया ।
पूर्वक्लृप्तोपदंशादिहानौ द्विगुणवस्तुभिः ॥ ६२ ॥

निवेदयेत्स्नानपूर्वं कालाति[4]क्रमणेऽपि च ।
भोगद्रव्यैर्द्विगुणितैराराध्यः क्षम्यतामिति ॥ ६३ ॥

उच्चारयेत्तथा सन्ध्यातिक्रान्तौ द्वादशस्वपि[5] ।
कालेषु क्लृप्तसंख्येषु हानौ कालस्य कस्यचित् ॥ ६४ ॥

द्विगुणैर्वस्तुभिः पूज्यः कालेषु च यथोत्तरम् ।
कालं प्रथममारभ्य द्विगुणैस्त्रिगुणैस्तथा ॥ ६५ ॥

चतुर्गुणैः पञ्चगुणैरेवमाद्यैस्तु वस्तुभिः ।
पूजयेज्जपहोमाद्यै[6]स्तद्वदेव यथायथम् ॥ ६६ ॥

अतिक्रान्ते दिनविधौ विधिरेष प्रकीर्तितः ।
द्विदिनादौ तु पक्षान्ते पूजाहीने घटैस्तथा ॥ ६७ ॥

अधमोत्तममार्गेण स्नापयेत्तस्य शान्तये ।
मासे च पूजाविकले मध्यमोत्तमवर्त्मना ॥ ६८ ॥

---

1. °हीने क्रियाहीने मुद्राहीने A, M_2 2. जपहीने ध्यानहीने A, M_2
3. गेय° T, P_1, P_2 4. °क्रमणेन M_2 5. द्वादशेष्वपि T, P_1P_2 6. °होमान्तं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिलाज्यचरुभिश्चैव जुहुयान्मूलविद्यया ।
संवत्सरत्रयादर्वाङ् मासादूर्ध्वमनर्चिते ॥ ६९ ॥

सम्प्रोक्षणं भवेदूर्ध्वं प्रतिष्ठाविधिरुच्यते ।
भूगुप्तामपि चैकाहमुद्धृत्य प्रतिमां पुनः ॥ ७० ॥

सम्प्रोक्षयेद् गृहार्चायामाराधनविलोपने ।
स्नपनं पञ्चगव्येन सूक्तेन पुरुषात्मना ॥ ७१ ॥

शान्तये जुहुयादग्नौ ब्राह्मणानपि तर्पयेत् ।
मासादूर्ध्वं तु षण्मासं पूजाहीने चतुर्मुख ॥ ७२ ॥

कुम्भैष्षोडशभिः स्नानं सूक्तेन पुरुषात्मना ।
भोजयेद् ब्राह्मणानग्नौ जुहुयाच्छान्तये पुनः ॥ ७३ ॥

ऊर्ध्वं सम्प्रोक्षणं कार्यं यावत्संवत्सरावधि ।
प्रतिष्ठाविधिरूर्ध्वं तु वत्सरादुक्तवर्त्मना ॥ ७४ ॥

त्रिदशादिप्रतिष्ठायां पूजालोपो[1] न दूषणम् ।
प्रायश्चित्तं तु [2]मध्यानां प्रतिष्ठायामुदीरितम् ॥ ७५ ॥

सालग्रामशिलादीनां पूजालोपो न दूषणम् ।
तथैवाशुचिसंस्पर्शे क्षालयित्वार्चयेत्पुनः ॥ ७६ ॥

सर्वथा लोपने शान्ति[3]श्चोक्तकाले यथा भवेत् ।
अज्ञानादथवा ज्ञानाद्द्विजतर्पणवर्जने[4] ॥ ७७ ॥

पञ्चोपनिषदैर्मन्त्रैः सर्पिषा जुहुयात् शतम् ।
एकादिकालातिक्रान्तौ द्विगुणादि यथापुरम् ॥ ७८ ॥

---

1. ०लोपे T, P_1, P_2 2. मत्यीनां T, P_1, P_2 3. नोक्तकालाश्रया० T, P_1, P_2; नोक्तकालो यथा० A 4. ०सर्जने M_2; ०वर्जिते T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बहुभिः कलशैर्देवं स्नापयेद्दिवसात्परम् ।
मासावधि तदूर्ध्वं तु कलशैर्वत्सरावधि ॥ ७९ ॥

अष्टोत्तरशतैः कुर्यात्स्नपनं जुहुयात्पुनः ।
अष्टोत्तरसहस्रेण तिलाज्यचरुभिः [1]क्रमात् ॥ ८० ॥

द्वादशाक्षरमन्त्रेण शान्तिहोमस्तथा भवेत् ।
वत्सरादुपरिष्टात्तु स्नपनं मध्यमोत्तमम् ॥ ८१ ॥

कुण्डे चाग्निं स्थापयित्वा तिलव्रीहियवैरपि ।
लाजैश्च कालपुष्पैश्च समिच्चरुघृतैरपि ॥ ८२ ॥

अष्टोत्तरसहस्रेण जुहुयान्मूलविद्यया ।
शान्तिहोमस्ततो[2] दानं विप्राणां चापि भोजनम्[3] ॥ ८३ ॥

सत्यग्नावप्यहोमे तु प्रायश्चित्तमितीरितम् ।
अग्नौ शान्ते मथित्वाग्निं शान्तिहोमं समाचरेत् ॥ ८४ ॥

पञ्चोपनिषदैर्मन्त्रैर्व्याहृतिप्रमुखैरपि ।
सुपरिस्तीर्य च कुशैर्होमः प्रणवविद्यया ॥ ८५ ॥

अष्टोत्तर[4]शतेनाज्यैः मूलमन्त्रजपस्तथा ।
अयथोक्तक्रमे तद्वत्प्रायश्चित्तं विधीयते ॥ ८६ ॥

काम्ये परिधयो नेष्टा नित्यकर्मणि वा न वा ।
अलाभे समिधामाज्यैश्चरुभिर्वाहुतिर्भवेत् ॥ ८७ ॥

तयोरलाभे [5]बीजैर्वा समिद्भिर्वा यथोदितैः ।
अग्नौ केशादिभिर्दुष्टे[6]ऽस्पृश्यस्पर्शने तथा ॥ ८८ ॥

---

1. पृथक् M_1 2. तथा T, P_1, P_2 3. तर्पणम् B_1 4. ०शतैर्नाम्नां M_1 5. लाजैर्वा M_2 6. स्पृष्टे T, P_1, P_2 ; जुष्टे M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होमो व्याहृतिभिः कार्यो वारानष्टोत्तरं शतम् ।
अयुतं पुष्पवत्यादिस्पर्शे मथनजेऽनले ॥ ८९ ॥

पाकस्थाने [1]चुल्लीस्पर्शे नरैः पूर्वोदितैस्तथा ।
श्वादिभिः स्थानमालिप्य गोमयेन महानसम् ॥ ९० ॥

आनीयाग्न्यन्तरं चुल्ल्यां पुण्याहं वाचयेद्द्विजैः ।
विण्मूत्राद्यैस्तथा स्पर्शे पूर्ववच्छुद्धिरिष्यते ॥ ९१ ॥

[2]पक्केन चुल्ल्यां दुष्टायां हविषा च निवेदने ।
स्नापयेन्नवभिः कुम्भैर्देवं वाथ घटैस्त्रिभिः ॥ ९२ ॥

परिवारार्चने [3]च्छिन्ने तत्तन्नामान्यु[4]दीरयन् ।
सर्पिषा जुहुयादग्नौ प्रत्येकं त्वष्टसंख्यया ॥ ९३ ॥

द्विगुणाद्यैर्द्विकालादौ बल्यर्थं च हविर्यदि ।
दूषितं केशकीटाद्यैरस्पृश्यैर्मनुजैस्तथा ॥ ९४ ॥

काकादिभिश्च तत्त्यक्त्वा हविषान्येन कर्म तत् ।
यदि दुष्टेन हविषा बलिं दद्यात्प्रमादतः ॥ ९५ ॥

शान्तिहोमस्तदा कार्यश्शास्त्रदृष्टेन वर्त्मना ।
तण्डुले चोदने पुष्पे बल्यर्थे पात्रसम्भृते ॥ ९६ ॥

[5]देवे चावाहिते तस्मिन् पूर्ववद्दूषणं यदि ।
पतिते वा बलिद्रव्ये [6]मूलबेरेऽथवात्मनि ॥ ९७ ॥

उद्वास्य देवमानीय द्रव्यान्तरमदूषितम् ।
तस्मिन्नावाह्य देवेशं यथापूर्वं पुनर्नयेत् ॥ ९८ ॥

---

1. चुल्लि° T, P_1, P_2 2. पक्वस्य M_2 3. भिन्ने M_1 4. °उदीरयेत् T
5. देवतावाह्य ते M_2 6. बलिबेरेऽथ A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्दोषशान्तये पश्चाद्दध्ना क्षीरेण वा हरिम् ।
स्नापयेज्जुहुयाच्छान्तिं मूलमन्त्रजपस्तथा ॥ ९९ ॥

बलि[1]बिम्बे निपतिते [2]यानादेरुत्सवे बहिः ।
स्थापयित्वा यथापूर्वं [3]बलिशेषं नयेत्पुनः ॥ १०० ॥

शान्तये नवभिः कुम्भैः स्नापयेत् पतिते भुवि ।
अधमाधममार्गेण शान्तिहोमो जपस्तथा ॥ १०१ ॥

नृत्तगेयरता नार्यो गणिकाश्चाथवेतराः ।
देवदास्यो दूषयेयू रजोभिः पृथिवीतलम् ॥ १०२ ॥

रजस्वलारजोदुष्टं भूतलं जानुमात्रकम् ।
खात्वा च मृद्भिरन्याभिः पूरयित्वा महीतलम् ॥ १०३ ॥

आलिप्य गोमयाम्भोभिः पुण्याहं वाचयेत्ततः ।
प्रोक्षणं पञ्चभिर्गव्यैस्सन्निकृष्टं च कौतुकम् ॥ १०४ ॥

अधमोत्तममार्गेण कलशैः स्नापयेद्धरिम्[4] ।
तिलाज्यचरुभिर्होमः प्रत्येकं मूलविद्यया ॥ १०५ ॥

सहस्रकृत्वात्तदनु शान्तिहोमो जपस्तथा ।
कवाटादिकमप्यन्वत् स्पृष्टं प्रक्षाल्यमम्भसा ॥ १०६ ॥

तासां च मार्गा संशोध्याः गोमयाम्भोभिरुक्षणम्[5] ।
चोरभूतैर्ब्राह्मणाद्यैः स्पृष्टे बेरेऽप्यचोदितैः ॥ १०७ ॥

चोरस्पर्शनिमित्तं तु स्नपनं कलशैर्हरेः ।
वर्णानामानुपूर्व्येण त्वधमाधमपद्धतिम् ॥ १०८ ॥

---

1. ०बेरे T, P_1, P_2 2. यानादावुत्सवे T, P_1, P_2 3. बिम्बं शेषं T
4. ०गुरुः T, P_1, P_2 5. °उक्षणैः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आरभ्य गणितैः कुर्यात्संस्कारैरपि[1] तद्भवेत् ।
बीजप्रयुक्तकलशैः स्नपनं शान्तये भवेत् ॥ १०९ ॥

शान्तिहोमो ब्राह्मणानां[2] भोजनं दानमेव च ।
अज्ञातजातिसंस्पर्शे स्नापयेदुत्तमोत्तमैः ॥ ११० ॥

[3]त्रिवस्तुकं मृन्मयं च लेपबिम्बं च भित्तिजम् ।
चित्रं नीचैर्यदि स्पृष्टं चण्डालाद्यैस्तथापरैः[4] ॥ १११ ॥

नवीकरणमास्थेयं सम्प्रोक्षणविधिस्तथा ।
प्रतिष्ठा वा यथावित्तं दोषभूयस्तयाथवा[5] ॥ ११२ ॥

पटस्पर्शे क्षालयित्वा यथापूर्वं पुनः सृजेत् ।
दीक्षितैरन्यशास्त्रेषु स्पृष्टे स्नपनमाचरेत् ॥ ११३ ॥

दीक्षितैरितरैर्वापि[6] शूद्रैस्तद्वत्समाचरेत् ।
महा[7]पातकिसंस्पर्शे स्नपनं चोत्तमोत्तमम् ॥ ११४ ॥

उपपातकिसंस्पृष्टे स्नपनं चाधमोत्तमम् ।
परस्त्रीगमनासक्तैस्तथा नियत[8]वृत्तिभिः ॥ ११५ ॥

स्पर्शे च नवभिः कुम्भैः स्नपनं कौतुके भवेत् ।
अस्पृश्यैरितरैर्वापि कुण्डादिस्पर्शने सति ॥ ११६ ॥

स्नपनं पूर्ववत्कार्यं स्त्रीभिर्दुष्टाभिरेव च ।
अनुलोमाः स्त्रियश्शूद्रा व्रजेयुर्गर्भमन्दिरम् ॥ ११७ ॥

---

1. सङ्करैरपि T, P_1, P_2 2. द्विजेन्द्राणां P_1 3. त्रिवस्तुकेत्यस्य पूर्वतः शान्तिहोमो द्विजेन्द्राणां तोषणं दानमेव च । इति श्लोकार्धः M_1 कोशे प्रमादात्पुनर्लिखित इति भाति । 4. विगर्हितैः T, P_1, P_2 5. ०भवेत् A, M_2 6. चापि T, P_1, P_2 7. °पतित° A 8. तथा अनियत इति च्छेदः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूतलं पञ्चगव्येन सिञ्चेद्वा गोमयाम्बुभिः ।
चण्डालैः पुल्कसैर्वापि पतितैर्म्लेच्छैस्तथा ॥ ११८ ॥

श्वपचैर्मन्दिराभ्यन्तः प्रवेशे मृन्मयांस्त्यजेत् ।
[1]तत्र स्थानं क्षालयित्वान्तः कवाटादिमहीतलम् ॥ ११९ ॥

आलिप्य गोमयाम्भोभिः [2]पुण्याहं वाचयेद् द्विजैः ।
प्रतिमाश्चापि तत्रस्थाः स्नापयेत्कलशैर्गुरुः ॥ १२० ॥

शान्तिहोमो जपश्चैव द्विजानां दानभोजने ।
आशौचवत्प्रवेशे च पूर्ववद्विधिरिष्यते ॥ १२१ ॥

चण्डालः श्वपचो वापि तादृशाः पुल्कसादयः ।
अज्ञानाद्गर्भगेहे तु कर्मस्वधिकृता यदि ॥ १२२ ॥

वसेयुश्चैव तैस्सार्धं भोज्यं वा वस्तु तादृशम् ।
स्पृष्ट[3]माराधनं चेत् स्पृष्टं वा कौतुकं यदि ॥ १२३ ॥

क्रियासमभिहारेण प्रायश्चित्तमिहोच्यते ।
शोधयेन्मन्दिरं पूर्वं गोमयालेपनादिभिः ॥ १२४ ॥

पुण्याहं वाचयित्वाथ ब्राह्मणांस्तत्र भोजयेत् ।
स्वाध्यायं परिकुर्वीरन् ब्राह्मणा वेदपारगाः ॥ १२५ ॥

इतिहासपुराणानि पठेयुर्वा[4] दिवानिशम् ।
कपिलाश्च प्रदेशेषु तत्र तत्राधिवासयेत् ॥ १२६ ॥

एवं मासादिकालेषु दोषगौरवलाघवम् ।
अवेक्ष्य शोधिते धाम्नि ब्राह्मणांस्तोषयेद्धनैः ॥ १२७ ॥

---

1. तत्रस्थान् T, P_1, P_2 2. पुण्याहमपि वाचयेत् T, P_1, P_2
3. °आराधनाङ्गं चेत् T, P_1, P_2 4. च P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिमानां यथायोग[1]मुत्थानं वा नवीकृतम् ।
कुर्यात्ततो यथापूर्वं निमित्ते वा नवीकृते ॥ १२८ ॥

प्रतिष्ठाप्य यथाशास्त्रं स्थापयेत्कलशैरपि[2] ।
सहस्रेण पुरावृत्तदोषाणामपनुत्तये ॥ १२९ ॥

अन्यो महोत्सवः कार्यो न चेद्राष्ट्रनृपक्षयः ।
बिम्बं न चालयेच्छैलं न नवीकरणं तथा ॥ १३० ॥

तथैव दिव्यमार्षं च स्वयंव्यक्तं च कौतुकम् ।
तथान्यैर्मार्गबाह्यैश्च प्रतिलोमैश्च गर्हितैः ॥ १३१ ॥

सहस्रकलशैर्देवं स्नापयेत्तस्य शान्तये ।
श्वापदैश्च सृगालाद्यैश्चण्डालाद्यैश्च गर्हितैः ॥ १३२ ॥

प्रथमादि प्रविष्टं चेद्धामावरणभूतलम् ।
प्रोक्षयेत्पञ्चगव्येन पुण्याहमपि वाचयेत् ॥ १३३ ॥

धामस्पर्शे तथान्यस्य बलिपीठादिकस्य च ।
स्पर्शे कृत्वा यथापूर्वं शान्तिहोमं समाचरेत् ॥ १३४ ॥

आगन्तुकैः कुक्कुटाद्यैः स्पृष्टं चेद्धाम सर्वतः ।
प्रोक्षयेन्मन्त्रपूतेन वारिणा शान्तिमाचरेत् ॥ १३५ ॥

देवान् संस्नापये[3]द्देवं प्रथमा[4]वरणादिषु ।
सर्पिश्चरुतिलैर्होमो मूलेनाष्टोत्तरं शतम् ॥ १३६ ॥

खद्योतस्पर्शने देवं स्नापयेन्नवभिर्घटैः ।
पूजाकाले कवाटस्य बन्धनं चेदसङ्कुले ॥ १३७ ॥

---

1. °उद्धारे वा नवीकृते T, P_1, P_2 2. अधि P_2 3. °चैव T, P_1, P_2
4. °आवरणादिगान् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टोत्तरशतं मूलमन्त्रस्य जप इष्यते ।
सङ्कुले [1]बन्धनं नैव दोषाय भवति क्वचित् ॥ १३८ ॥

प्रभापीठास्त्रसंस्पर्शे बिम्बस्पर्शवदिष्यते ।
आचार्याः पूजकाश्चान्ये तथैव परिचारकाः ॥ १३९ ॥

आसनेष्वासिकां [2]भक्त्या [3]शयनं च यथातथम् ।
कुर्युः कर्मण्यधिकृता दोषो नैव [4]तदा भवेत् ॥ १४० ॥

अन्ये चेत्कुर्युरवनिं प्रोक्षयेद्गोमयाम्बुभिः ।
प्राकारे मण्डपे धाम्नि गोपुरे पाकवेश्मनि ॥ १४१ ॥

दग्धेऽग्निना समाधाय पूर्ववन्मण्डपादिकम् ।
प्रतिष्ठाप्य [5]यथाप्रोक्तं शान्तिकर्म समाचरेत् ॥ १४२ ॥

अधमोत्तममार्गेण स्नपनं शान्तिदं भवेत् ।
शान्तिहोमस्तु कर्तव्यो द्विजानां दानभोजने ॥ १४३ ॥

प्रतिमादहने चापि समाधाय यथापुरम् ।
स्नानं सहस्रकलशैः प्रतिष्ठाप्य यथाविधि ॥ १४४ ॥

वस्त्रादिदहने तस्याः प्रभादिदहने तथा ।
नवभिः कलशैः स्नानं होमादि तदनन्तरम् ॥ १४५ ॥

सुदर्शनेऽग्निना दग्धे स्नानं नवघटैर्भवेत् ।
ध्वजे विताने छत्रे च दग्धे चास्तरणादिके ॥ १४६ ॥

पुनरुत्पाद्य तत्सर्वं शान्तिहोमादिकं भवेत् ।
प्रासादाद्यवकाशानां वृद्धिश्चेत्सर्वतो भवेत् ॥ १४७ ॥

---

1. बन्धने A 2. भुक्तिं T, P_1, P_2 3. शयाने च M_2 4. तथा T
5. यथापूर्वं ततश्शान्तिं समाचरेत् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यद्वा प्राच्यामुदीच्यां वा वृद्धिर्नान्यत्र शोभना ।
दक्षिणापरवृद्धिश्चेत् स्नपनं चोत्तमोत्तमम् ॥ १४८ ॥

शान्तिहोमो द्विजेन्द्राणां तर्पणं भोजनादिभिः ।
शोभना सर्वतो वृद्धिरुपपीठस्य चेष्यते ॥ १४९ ॥

प्रथमावरणं यावद्दोषस्स्याद्देवनिर्मिते ।
वर्धितं यदि पूर्वोक्तं स्नपनं शान्तिदं भवेत् ॥ १५० ॥

न ह्रासयेत्पुराक्लृप्तं धामादि न च चालयेत् ।
पौराणिकं शिरःपीठं धाम चिह्नञ्च वैष्णवम् ॥ १५१ ॥

नोद्धृत्यं पूरयित्वा वा न वृद्धिर्गोपुरादिषु ।
अल्पीयः प्राग्विमानादि दिव्यवर्गं धनैः पुनः ॥ १५२ ॥
वर्धयेच्छ्रद्धया मुख्यैर्द्रव्यैरर्चान्नयेद्गुरुः ।

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे नित्याराधन-
प्रायश्चित्तविधिर्नामाष्टादशोऽध्यायः ॥

एकोनविंशोऽध्यायः ॥

उत्सवप्रायश्चित्तनारायणबलिः ॥

श्रीभगवान् :—

नित्यं नैमित्तिकं [1]कार्य्यं निपतेद्युगपद्यदि ।
[2]कृत्वा नैमित्तिकं नित्यमाचार्यस्तदनन्तरम् ॥ १ ॥

गृहार्चास्नपने प्राप्ते विस्तारे सति वेश्मनि ।
तत्रैव स्नपनं कार्यं सङ्कटे तु[3] बहिर्भवेत् ॥ २ ॥

---

1. कर्म M_1 2. नित्यं कृत्वा तथा कुर्यान्नैमित्तिकमनन्तरम् A 3. सङ्कटेषु M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पर्वतादौ शुचौ देशे प्रपानिर्माणपूर्वकम् ।
स्नपनं देवदेवस्य कार्यं भागवतेन तत् ॥ ३ ॥

आलये [1]स्थापितं बिम्बं न कदाचिच्चतुर्मुख ।
निर्गमय्य बहिः स्नाप्यमन्तरेण तु सर्वदा ॥ ४ ॥

तीर्थावभृथवेलायां नद्यादीनां तटे भवेत् ।
अन्यथा चेच्छान्तिहोमं कुर्यात्सर्वसमृद्धिदम् ॥ ५ ॥

अङ्कुरार्पणहीने च स्नपने [2]कौतुकान्विते ।
अधिवासविहीने च कलशैः स्नपने सति ॥ ६ ॥

शान्तिहोमो विधातव्यः सर्वदोषापनुत्तये ।
सङ्कल्पितस्नानहानौ [3]स्नपनं द्विगुणं भवेत् ॥ ७ ॥

अकृते राजराष्ट्रस्य भवेद्विभवसंक्षयः ।
यजमानस्य धाम्नश्च प्रजानां च धनक्षयः ॥ ८ ॥

अकाले तु कृते स्नाने विषुवादौ यथोदिते ।
शान्तिः [4]कार्यायने चैव दक्षिणे प्रागुपक्रमे[5] ॥ ९ ॥

उत्तरे चैव पाश्चात्ये [6]उत्तमं नैव दूषणम् ।
चैत्रे च विषुवे तद्वत् क्रमादाश्वयुजेऽपि वा[7] ॥ १० ॥

स्थापितानां च कुम्भानां भेदने [8]पतने तथा ।
कालादिदोषदुष्टे च कृमिकेशादिदूषिते ॥ ११ ॥

[9]लङ्घितेऽशुचिसंस्पृष्टे वायसाद्यैश्च दूषिते ।
गर्हितैः श्वापदाद्यैश्च स्पृष्टे चाशुचिभिस्तथा ॥ १२ ॥

---

1. स्थापयेत् M, A 2. कौतुकोज्झिते T 3. द्विगुणं स्नपनं P_1, P_2
4. "कार्या अयने" इति पदच्छेदः । 5. °क्रमः T, P_1, P_2 6. उपक्रमं A
7. च P_1, P_2 8. च्छेदने M_2 9. एषोऽर्धश्लोकः T कोशे न दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पाषण्डैः प्रतिलोमैश्च तथोदक्यादिदूषिते ।
[1]कलशं तं तमुद्धृत्य स्थापयित्वापरान् पुनः ॥ १३ ॥

तद्दैवत्यान् जपेन्मन्त्रानष्टोत्तरशतावरम् ।
स्नपनं यदि तैः कुर्याच्छान्तिहोमं समाचरेत् ॥ १४ ॥

अक्रमेण समुद्धृत्य स्नपने विहिते सति ।
जपः पञ्चोपनिषदां कर्तव्यश्च यथापुरम्[2] ॥ १५ ॥

देवतामन्त्रभूभागद्रव्याणां व्यत्यये सति ।
पूर्ववन्मन्त्रजापः स्यात्प्रतिद्रव्यमनर्चिते ॥ १६ ॥

अर्घ्यादिभिर्जपस्तद्वन्महिषाजोष्ट्रसम्भवैः ।
क्षीरादिभिस्तथा द्रव्यैः स्नपने स्नापयेत्पुनः ॥ १७ ॥

समिद्भिर्मूलमन्त्रेण जुहुयात् कमलासन ।
अद्भिः पर्युषिताभिश्चेत् स्नपनं स्नापयेत्पुनः ॥ १८ ॥

[3]शान्तिहोमो मूलविद्या जपश्चाष्टोत्तरं शतम् ।
आराधनाङ्गवैकल्ये नृत्तवाद्यादिभिस्सह ॥ १९ ॥

शान्तिहोमो भवेद्वेद्यां स्नपने चलने तथा ।
प्रतिमाचलने तद्वत्प्रायश्चित्तं चतुर्मुख ॥ २० ॥

स्नपने वर्तमाने तु चलने पतनेऽपि वा ।
यथापूर्वमवस्थाप्य स्नापयित्वा यथाविधि ॥ २१ ॥

शान्तिहोमश्च कर्तव्यः पीठादीनां च भञ्जने ।
सहजानां तथा हस्तपादादीनां चतुर्मुख ॥ २२ ॥

---

1. कलशांस्तान् समुद्धृत्य T
2. कर्तव्यस्ततसमाचरेत् P_1, P_2
3. अयं श्लोकः P_1, P_2 ग्रन्थयोः, T कोशे चोपलभ्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भङ्गे तु[1] तेषामावाह्य कूर्चादौ तद्गतं हरिम् ।
क्रियां समापयेद्भग्ने प्रभापीठादिकं पुनः ॥ २३ ॥

समाधाय यथापूर्वं सम्प्रोक्षणविधिर्भवेत् ।
वस्तुषु स्नपनाङ्गेष्व विक्रयं [वा] हानिरेव वा ॥ २४ ॥

यदि स्यान्मूलमन्त्रस्य जपश्चाष्टोत्तरं शतम्[2] ।
मोक्षमाणः सदा कुर्यात् स्नपनं निशि वाहनि ॥ २५ ॥

रिपुक्षयार्थी दिवसे धर्मार्थी दिनमध्यमे ।
दिनान्ते सर्वभोगार्थी प्रायश्चित्ताय[3] सर्वदा ॥ २६ ॥

बद्धप्रतिसरे बिम्बे स्नपनार्थं तु मन्त्रिणा ।
स्नपनान्तरसम्प्राप्तौ न च प्रतिसरान्तरम् ॥ २७ ॥

मण्डूकमूषिकासर्पचुचुन्दर्यादिजन्तुभिः ।
स्पृष्टे विलङ्घिते नष्टे स्थापिते कलशे तथा ॥ २८ ॥

त्यक्त्वान्यं तु तथा कृत्वा मूलमन्त्रं जपेद्गुरुः ।
स्थापितं कलशं [4]यत्तु पाषण्डैः प्रतिलोमजैः ॥ २९ ॥

आशौचवद्भिरपरैः कलशस्पर्शने सति ।
सद्रव्यं कलशं [5]हित्वा तथान्यं तत्र निक्षिपेत् ॥ ३० ॥

वाचयित्वाथ पुण्याहं शान्तिहोमं समाचरेत् ।
कर्मणि स्नपनादौ तु प्रवृत्ते देशिकोत्तमः ॥ ३१ ॥

[6]सौतकं मरणाशौचं शृणुयान्न शुचिर्भवेत् ।
उत्सवे च[7] यथाशास्त्रचोदिते स्खलनेऽपि च[8] ॥ ३२ ॥

---

1. भङ्गेषु M_1 2. °अष्टोत्तरावरः P_1, P_2 3. प्रायश्चित्तन्तु M_2
4. तद्वत् T, P_1, P_2 5. त्यक्त्वा T, P_1, P_2 6. सूतकं T, P_1, P_2
7. तु T, P_1, P_2 8. सति T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शान्तिस्तदोच्यते [1]ब्रह्मंस्तदेतदवधार्यताम् ।
विमानस्थापनाहीने न कुर्यादुत्सवं हरेः ॥ ३३ ॥

कुर्याद्वा ध्वजमुद्धृत्योत्सवं च क्रमेण वा ।
वायवीये याम्यकोणे विधिना शान्तिमाचरेत् ॥ ३४ ॥

संवत्सरान्तं तत्रैव ध्वजयष्टेः स्थितिर्भवेत् ।
हीननित्योत्सवे धाम्नि ध्वजारोहणपूर्वकम् ॥ ३५ ॥

नोत्सवं कारयेत्काम्यं कारिते शान्तिमाचरेत् ।
प्रमाणहीने पक्षीन्द्रे ध्वजे स्तम्भादिकेऽपि वा ॥ ३६ ॥

[2]शान्तिः कार्या तथा हीने मूषिकाद्यैश्च दूषिते ।
अशुचिद्रव्यसंस्पर्शे त्यक्त्वारोप्य ध्वजान्तरम् ॥ ३७ ॥

शान्तिहोमश्च कर्तव्यो ब्राह्मणानां च भोजनम् ।
ध्वजारोहणकर्माङ्गं ध्वजं वा स्तम्भमेव वा ॥ ३८ ॥

सकृन्नियुक्तं त्यक्तव्यं ध्वजयष्टिं परित्यजेत् ।
सकृन्नियुक्ते स्तम्भादौ भूयोऽपि विनियोजिते ॥ ३९ ॥

प्रायश्चित्तं न तत्र स्यात्स्नपनं चोत्तमोत्तमम् ।
शान्तिहोमश्च कर्तव्यो ब्राह्मणानां च भोजनम् ॥ ४० ॥

स्थापिते विहगेशाने ध्वजे [3]वातातपादिभिः ।
वर्णहानौ [4]न दोषः स्यात्समाराधनमिष्यते ॥ ४१ ॥

पतिते वातवेगेन हेतुना येन केनचित् ।
उद्धृत्य बद्ध्वा भूयोऽपि स्नपनं मध्यमाधमम्[5] ॥ ४२ ॥

---

1. ब्रह्म न्नदानीमवधार्यताम् T, P_1, P_2 2. शान्तिहोमं तथा कुर्यात् M_2
3. वातादिपातिते A, M_2 4. च M_2 5. मध्यमोत्तमम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वर्णहानौ तथा [1]हीने ध्वजे च्छिन्नेऽपि वा क्वचित् ।
ध्वजान्तरं समुत्पाद्य त्यक्त्वा निपतितं ध्वजम् ॥ ४३ ॥

यष्टिं वा कल्पयेवान्यत्र तु कालप्रतीक्षणम् ।
विपरीतं ध्वजपटं प्रमादाद्यदि बन्धयेत् ॥ ४४ ॥

तन्मोचयित्वा यद्वान्यं बद्ध्वा स्नपनमाचरेत् ।
ध्वजस्तम्भे तु पतिते[2] भग्ने वा सुषिरेऽपि वा ॥ ४५ ॥

स्तम्भान्तरं [3]स्थापयित्वा शान्तिः स्नपनपूर्विका ।
पतने[4] भ्रमणे वापि पतिते वा यदृच्छया ॥ ४६ ॥

शान्तिहोमो भवेत्प्राग्वत् मूलमन्त्रजपस्तथा ।
पक्षीशाधिष्ठिते कुम्भे भिन्ने नष्टेऽपि वा तथा[5] ॥ ४७ ॥

अस्पृश्यैः पाणिभिः स्पृष्टे स्थाप्यं कुम्भान्तरं पुनः ।
आवाह्य तत्र विहगं कर्मशेषं [6]समापयेत् ॥ ४८ ॥

ध्वजस्तम्भे च संस्पृष्टे चण्डालाद्यैर्विगर्हितैः ।
स्तम्भान्तरमवस्थाप्य शान्तिहोमं समाचरेत् ॥ ४९ ॥

सूतकैः प्रेतकैश्चैव प्रतिलोमैस्तथाविधैः ।
स्पृष्टे प्रोक्ष्य ध्वजस्तम्भं पुण्याहोक्तिपुरस्सरम् ॥ ५० ॥

सकृन्नियोजितं त्यक्त्वा मृन्मयं पालिकादिकम् ।
अङ्कुरानर्पयेन्नो चेच्छान्तिहोमादिकं चरेत् ॥ ५१ ॥

अङ्कुरेष्वपि रक्तेषु श्यामवर्णयुतेषु वा ।
अप्ररूढेषु सर्वेषु तथा तिर्यग्गतेषु च ॥ ५२ ॥

---

1. भिन्ने T, P_1, P_2 2 तथा भिन्ने T, P_1, P_2 3. अवस्थाप्य T, P_1, P_2
4. कम्पने A, M_2 5. अथवा तथा T, P_1, P_2 6. समाचरेत् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अस्पृश्यस्पर्शने तेषां भिन्नच्छिन्नेषु वा पुनः ।
पालिकादिषु नष्टेषु पतितेषु यथा तथा ॥ ५३ ॥

वल्मीकादिप्ररोहे च मूषिकाद्यैश्च भक्षिते ।
शान्तिहोमश्च कर्तव्यो ब्राह्मणानां च भोजनम् ॥ ५४ ॥

प्रारब्धकर्ममध्ये चेत् कर्म नैमित्तिकं पुनः ।
आपतेदर्पयेद्भूयस्तदर्थांश्चाङ्कुरान् गुरुः ॥ ५५ ॥

अर्पितेष्वङ्कुरेषु स्य दैवाद्वा यदि मानुषात् ।
कर्मलोपस्तदा त्यक्त्वा कल्पितानङ्कुरानपि ॥ ५६ ॥

शान्त्यर्थं जुहुयादग्नौ मूलमन्त्रजपस्तथा ।
बद्धप्रतिसरे बिंबे कर्मार्थमपरं यदि ॥ ५७ ॥

अन्तरा कर्म निपतेद्बध्नीयात्कौतुकं पुनः ।
अन्तरा पतिते स्नाने समाप्ते स्नपनं पुनः ॥ ५८ ॥

पूर्वारब्धमनुष्ठेयं यथाशास्त्रं चतुर्मुख ।
ग्रामादिषु स्याच्छून्येषु न बलिर्वीथिकोत्सवः ॥ ५९ ॥

धामन्येव भवेत्कामं यदि स्यात् वीथिकोत्सवः ।
सहस्रकलशैः स्नानं प्रायश्चित्तं तदिष्यते ॥ ६० ॥

उत्सवे वर्तमाने स्यान्महावातादिना यदि ।
ग्रामादौ शिथिले कृत्वा प्रायश्चित्तं पुनर्महः ॥ ६१ ॥

[1]कार्यो न लोप्यो लोपे तु कुम्भैरष्टोत्तरैश्शतैः[2] ।
स्नपनं कारयेद्धोमो जपश्च यैर्द्विजार्चनम् ॥ ६२ ॥

1. कार्यं यथोक्तविधिना M_2 2. हरेः T, P_1, P_2

मुहूर्तादिक्रमे शान्तिः सर्वेषां कर्मणामपि ।
कार्या होमादिभिः पश्चात्कर्मारम्भो यथोदितः ॥ ६३ ॥

कर्मण्यधिकृते पूर्वं देशिको मूर्तिपेषु वा ।
[1]हेतोर्देवान्मनुष्याद्वा विहितेष्वधिकारिषु ॥ ६४ ॥

[2]प्रारब्धं कर्म कर्तव्यं [3]तादृशैरपरैर्द्विजैः ।
उत्सवे विघ्निते दैवान्मानुषाद्वा यथोदिते ॥ ६५ ॥

बलिमेव क्षिपेद्वह्नि ग्रामादौ वीथिकास्वपि ।
[4]बलिप्रदाने प्रकृते कश्चिन्नश्चिद्दिवसे पुनः ॥ ६६ ॥

कुर्वन् बलिमतिक्रान्तं कृत्वैवं बलिमाचरेत् ।
उत्सवाङ्गेषु हीनेषु कल्पितेषु यथापुरम् ॥ ६७ ॥

उद्यानयानमृगयाजलद्रोण्यादिकर्मसु[5] ।
शान्तिः कार्या भोजनं च ब्राह्मणानां जपस्तथा ॥ ६८ ॥

हीनायां तीर्थयात्रायां पुनरुत्सवमाचरेत् ।
उत्तमोत्तममार्गेण कृत्वा स्नपनमादितः ॥ ६९ ॥

मासे यथोक्तेऽतिक्रान्ते नक्षत्रादौ यथोदिते ।
उत्सवानन्तरे [6]चापि यद्यर्वाग्वत्सराद्भवेत् ॥ ७० ॥

ऊर्ध्वं संवत्सरात्कुर्वन् शान्तिं कृत्वा समाचरेत् ।
सहस्रकलशैः स्नानं शान्तिहोमं जपादिकम् ॥ ७१ ॥

---

1. दैवाद्वा मानुषाद्वापि विघ्नेष्वधिकारिषु T 2. मुहूर्तातिक्रमे शान्तिः सर्वत्रापि भवेत्तदा। A, M_2 कोशयोरयमर्धश्लोकोऽधिकतया दृश्यते। 3. तादृग्भिरपरैः T, P_1, P_2 4. बलिप्रदानेऽप्यकृते T, P_1, P_2 5. °आदिकासु च M_2 6. मासि T, P_1, P_2

Digitized by Madhuban Trust, Delhi

लुप्ते पर्वोत्सवे शान्तिः स्नपनं शक्त्यपेक्षया ।
अन्येषु विष्णोर्लुप्तेषु श्रवणाद्युत्सवेषु च ॥ ७२ ॥

उत्तमोत्तममार्गेण स्नपनं तस्य निष्कृतिः ।
व्यत्यासे बलिवस्तूनां जुहुयात्सर्पिषा शतम् ॥ ७३ ॥

[1]वातातपादिसंस्पर्शे बिम्बे स्नपनमुत्तमम् ।
आचरेद्यागशालायां [2]प्रपादिषु महोत्सवे ॥ ७४ ॥

अग्निदग्धेषु तत्सर्वं समाधाय यथापुरम् ।
शान्तिहोमो द्विजेन्द्राणां भोजनं दानमेव च ॥ ७५ ॥

कुर्यात् सुदर्शनप्लोषे कुम्भैर्नवभिराप्लवः ।
कार्यो बिम्बादिदाहेऽपि तथा स्नपनमाचरेत् ॥ ७६ ॥

श्वसृगालादिभिर्यागमण्डपादौ प्रवेशने ।
संस्पर्शे पूर्वक्लृप्तानि त्यक्त्वान्यानि निधाय च ॥ ७७ ॥

शान्तिहोमो द्विजेन्द्राणां भोजनादि यथापुरम् ।
चण्डालादिप्रवेशादौ त्यक्त्वा तद्वस्तु दूषितम् ॥ ७८ ॥

उत्सवार्थानि वस्तूनि शान्तिहोमं समाचरेत् ।
उत्सवाग्नौ स्वयं शान्ते शान्तिं कुर्याद्यथाक्रमम् ॥ ७९ ॥

विषुवे चायने चैव तीर्थयात्रा न दोषकृत् ।
रात्रावपि ततोऽन्यत्र कर्तव्या चैव सा भवेत्[4] ॥ ८० ॥

प्रमादाद्यदि यात्रा स्यात् स्नपनं चोत्तमोत्तमम् ।
उत्सवे होमविच्छेदे द्विगुणं होममाचरेत् ॥ ८१ ॥

---

1. वाताद्युत्पातसंस्पृष्टे T, P_1, P_2 2. पर्वादिषु M_2, T 3. ०दग्धे तु T
4. ०द्वैव सा भवेत् T, P_1, P_2 ; अन्तेन सा भवेत् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिम्बे चोरादिभिर्नष्टे वर्तमाने महोत्सवे ।
कर्मार्चादिषु बिम्बेषु बिम्बं चोत्पाद्य पूर्ववत् ॥ ८२ ॥

आराधयेन्निपतिते बिम्बे यानान्महोत्सवे ।
आरोप्य पूर्ववद्यानं रथ्यासु परितो[1] नयेत् ॥ ८३ ॥

एकाधिकाशीति[2]घटैः स्नापयेच्छान्तये पुनः ।
अङ्गहानौ कौतुकस्य बिम्बमन्यन्नयेत्तथा ॥ ८४ ॥

[3]हीनाङ्गं चेत्समाधाय सद्यः सम्प्रोक्षणं चरेत् ।
स्नपनं शान्तये कुर्याद्ब्राह्मणानां च तोषणम् ॥ ८५ ॥

यानभङ्गे नयेद्देवं यानेनान्येन वीथिकाम् ।
शान्तिश्च कार्या पतनभ्रमणादौ तु सारथेः ॥ ८६ ॥

पुण्याहवाचनादीनि कार्याणि कमलासन ।
अस्पृश्या यदि यानानि वहेयुर्बिम्बमेव वा ॥ ८७ ॥

क्षालयित्वा तु यानानि[4] बिम्बं च स्नापयेद् घटैः ।
पुष्पयागो निशि भवेच्छान्तये [5]मुक्तयेऽपिवा ॥ ८८ ॥

अभावे पुष्पयागस्य स्नपनं चोत्तमोत्तमम् ।
आरभ्य तीर्थदिवसादूर्ध्वं पञ्चदिनावधि ॥ ८९ ॥

ध्वजावरोहणं कार्यं पश्चाच्चेदवरोहणम् ।
दोषः स्याद्दोषशमनं स्नपनं मध्यमोत्तमम् ॥ ९० ॥

अवरोप्य ध्वजपटं स्नपनानन्तरं पुनः ।
उद्वास्य देवतास्सर्वाः शकटाद्बलिकर्मणा ॥ ९१ ॥

---

1. पतितं T, P_1, P_2 2. ०कुम्भैः T, P_1, P_2 3. भिन्नाङ्गं M_2
4. रथादीनि M_2 5. मुक्तयेऽपिवा A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

महोत्सवान्तःपतितं कर्म वैशेषिकाह्वयम् ।
कार्यमेव न लोप्यं तल्लोपे स्नपनमाचरेत् ॥ ९२ ॥

पवित्रा[1]रोहणे प्रायश्चित्तमन्यत् [2]प्रदृश्यते ।
हीनमाने पवित्रे वा कुण्डे वा [3]मण्डलादिके ॥ ९३ ॥

अस्त्रमन्त्रं शतं जप्त्वा पूजयेदस्त्र[4]वर्धनम् ।
त्यक्त्वा पवित्रं केशादिदूषितं पुनरेव तत् ॥ ९४ ॥

कृत्वा पूर्ववदारोप्य ततश्शान्तिं समाचरेत् ।
अस्पृश्यस्पर्शने कुम्भे भिन्ने नष्टेऽपि वा पुनः ॥ ९५ ॥

कुम्भान्तरे समावाह्य मूलमन्त्रं जपेत्पुनः ।
अस्थाने स्थापितं शूलमन्यत्र प्रतिमादिकम्[5] ॥ ९६ ॥

स्थापयित्वा यथास्थानं स्नपनादि [6]समाचरेत् ।
माने न्यूनेऽधिके वापि वेद्यादीनां प्रकल्पिते ॥ ९७ ॥

शान्तिराज्याहुतिः कार्या पञ्चोपनिषदा शतम् ।
तेषामभावे च तथा शान्तिर्नयनमोक्षणम् ॥ ९८ ॥

अकृत्वा स्थापने शान्तिं कृत्वा नयनमोक्षणम् ।
तोयाधिवासाकरणे [7]प्रतिष्ठा चेन्मधुद्विषः ॥ ९९ ॥

स्नपनं शान्तिहोमश्च तद्वदेवाङ्गहानिषु ।
अनाचार्यप्रतिष्ठायां पुनःस्थापनमाचरेत् ॥ १०० ॥

आचार्यपदमारूढो [8]वैधुर्याद्यल्पदोषवान् ।
अधिकार्येव विज्ञानपारं यातो यदि स्वयम् ॥ १०१ ॥

---

1. °आरोपणे T, P_1, P_2 2. प्रदर्श्यते A, T, P_2 3. मण्डलेऽपि वा T, P_1, P_2
4. °वर्धनीम् T, P_1, P_2 5. °अन्यद्वा स्थापनादिकम् A 6. यथापुरम् M_2
7. प्रतिष्ठायां मधुद्विषः T, P_1, P_2 8. वैमुख्याद्यल्प° M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]ज्ञानाधिकेन देवेशे स्थापिते ज्ञानरूपिणि ।
न दोषो ज्ञानदहनः सर्वदोषान् दहेत् खलु ॥ १०२ ॥

यावत्कालं स्थितिर्बालमन्दिरे [2]प्रार्थिता पुरा ।
तावत्यतीते समये स्नपनं मधुविद्विषः ॥ १०३ ॥

कार्यं पुनश्च तत्रैव स्थितिकालं [3]प्रकल्पयेत् ।
अन्यत्र वा बालगेहे यद्वा मूलालये भवेत् ॥ १०४ ॥

कर्मार्थपीठिकायां तत् स्थापयित्वा [4]समाचरेत् ।
गोपुरे बालये यद्वा प्राकारे मण्टपेऽथवा ॥ १०५ ॥

शिथिलीसरघातुम्बीवल्मीकादिसमुद्भवे ।
उद्धृत्य तत्तत्संशोध्य देशं कृत्वा यथापुरम् ॥ १०६ ॥

स्नपनं देवदेवस्य कुर्यादुत्तममध्यमम् ।
शान्तिहोमो द्विजेन्द्राणां भोजनं दानमेव च ॥ १०७ ॥

सिद्धान्तसङ्करे जाते प्रमादात्तत्र सङ्करे ।
[5]कर्षणादिषु दोषः स्याद्राजराष्ट्रक्षयावहः ॥ १०८ ॥

ब्रह्मोवाच :—

[6]सिद्धान्तो नाम कः को वा भेदस्तस्य जनार्दन ।
श्रोतुमिच्छामि तत्सर्वं न रहस्यमिदं यदि ॥ १०९ ॥

श्रीभगवान् :—

महोपनिषदं नाम सिद्धान्तपद[7]शब्दितम् ।
मीमांसादिषु शास्त्रेषु ये सिद्धार्था मनीषिणः ॥ ११० ॥

---

1. ज्ञानाधिक्ये नवे देशे A 2. कल्पिता M_2 3. परीक्षयेत् T, P_1, P_2
4. समर्चयेत् T, P_1 P_2 5. 'कृत्वा सम्प्रोक्षणं पूर्वं सहस्रकलशाप्लवः' इत्यर्धश्लोकः P_1, P_2 ग्रन्थयोः T कोशे च दृश्यते । 6. सिद्धान्तं नाम किं T, P_1, P_2
7. ०संज्ञितम् A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेषामन्तेऽधिकारोऽस्मिन्निति सिद्धान्त[1]संज्ञितम् ।
तच्चतुर्धा स्थितं [2]शास्त्रमृगादिवदनेकधा ॥ १११ ॥

एकैकं भिद्यते तन्त्रं शाखाभेदेन भूयसा ।
प्रथमं मन्त्रसिद्धान्तं द्वितीयं चागमाह्वयम् ॥ ११२ ॥

तृतीयं तन्त्रसिद्धान्तं तुर्यं तन्त्रान्तरं भवेत् ।
एकैव मूर्तिराराध्या प्राधान्येनेतराः पुनः ॥ ११३ ॥

देव्यः श्रियादयश्चापि सम्पूज्याः परिवारवत् ।
आयुधैश्शङ्खचक्राद्यैः श्रीवत्साद्यैश्च भूषणैः ॥ ११४ ॥

मूर्तिभिः परिवृता केवला वाम्बुजासन ।
कथ्यते यत्र तत्प्रोक्तं मन्त्रसिद्धान्तमग्रिमम् ॥ ११५ ॥

वासुदेवादयो व्यूहाश्चत्वारः साधकैरपि ।
क्रमागतैस्तुल्यकक्ष्याः पूज्यास्तत्प्रभवाव्यये ॥ ११६ ॥

कर्मणामपि संन्यासः कथ्यते यत्र चागमे ।
[3]तत्र चागमसिद्धान्तं तदुक्तं कमलासन ॥ ११७ ॥

नवानामपि मूर्तीनां प्राधान्यं यत्र कथ्यते ।
मूर्तयो द्वादशाङ्गानि तेषामेव तथापरे ॥ ११८ ॥

प्रादुर्भाव[4]गणाश्चान्ये मूर्त्यन्तरगुणा अपि ।
प्रादुर्भावान्तरयुताः [5]सदिग्देवैः सहायुधैः ॥ ११९ ॥

मूर्तिमद्भिश्च देवीभिर्लक्ष्म्यादिभिरपि स्फुटम् ।
तत्तन्त्रसिद्धान्ताह्वानं [6]चतुर्थं परमं पुनः ॥ १२० ॥

---

1. °शब्दितम् T, P_1, P_2 2. सर्वं M_2 3. तन्त्रमागम° T, P_1, P_2
4. °गुणा° T, P_1, P_2 5. सदिग्देवास्सहायुधाः M_2 6. द्वितीयं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौम्यसिंहादिभूयिष्ठ वक्त्रभेदैश्चतुर्मुख ।
[1]द्वित्रादिमुखभेदा वा मूर्तिरेकैव पूज्यते ॥ १२१ ॥

परिवारैः संवृता वा विना वा सर्वकामदा ।
[2]यत्तन्त्रान्तरसंज्ञं स्याच्चतुर्थं चतुरानन ॥ १२२ ॥

येन सिद्धान्तमार्गेण कर्षणादिक्रिया कृता ।
आदौ तेनैव सकलं नान्यसिद्धान्तवर्त्मना ॥ १२३ ॥

तन्त्रेणापि तथा येन कर्षणादिक्रिया कृता ।
तेनैव सकलं कार्यं न तन्त्रान्तरवर्त्मना ॥ १२४ ॥

तन्त्रान्तरेऽपि कथितमनुक्तं ग्राह्यमेव हि ।
सिद्धान्त[3]सङ्करो न स्यात्तन्त्रसङ्कर एव च ॥ १२५ ॥

दोषाय कल्पते राजराष्ट्रग्रामक्षयात्मने ।
सिद्धान्तसङ्करे जाते प्रमादात्तस्य शान्तये ॥ १२६ ॥

कृत्वा सम्प्रोक्षणं पूर्वं सहस्रकलशाप्लवः ।
कर्तव्यः, स्नपनं कुर्यात्तन्त्रसङ्करसम्भवे ॥ १२७ ॥

अन्ते महोत्सवं कुर्याद्ध्वजारोहणपूर्वकम् ।
स्थापिते पञ्चरात्रेण देवे षड्भिरथाध्वभिः ॥ १२८ ॥

प्रतिष्ठादौ कृते[4] द्रोहा[5]द्दोषः सर्वक्षयात्मकः ।
शान्तिश्च तस्य भूयोऽपि पञ्चरात्रोक्तवर्त्मना ॥ १२९ ॥

प्रतिष्ठापि[6] सहस्रेण कलशैः स्नपनं हरेः ।
महोत्सवश्च कर्तव्यो ध्वजारोहण[7]पूर्वकः ॥ १३० ॥

---

1. चित्रादि° M_2 2. यत्र तन्त्रान्तरं तत् स्यात् T, P_1, P_2 3. °सङ्करस्तत् स्यात् A, M_2; सङ्करस्तस्मात् T, P_2; सङ्करं तस्मात् P_1 4. प्रतिष्ठानेऽकृते P_2 5. मोहाद्° T, P_1, P_2 6. प्रतिष्ठाप्य T, P_1, P_2 7. ध्वजारोपण° M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकत्र दीक्षितस्तन्त्रे सिद्धान्ते वा द्विजोत्तमः ।
क्रियां न कुर्यादन्यत्र कर्षणादि चतुर्मुख ॥ १३१ ॥

[1]आचार्यत्वमथार्त्विज्यं पूजायां मधुविद्विषः ।
तन्त्रभेदे च [2]सिद्धान्तभेदे चापि न युज्यते ॥ १३२ ॥

ब्रह्महत्यादिपापानां निष्कृतिः स्मृतिचोदिता ।
मृतानां विषशस्त्राग्निप्रायैरुग्रैश्च कर्मभिः ॥ १३३ ॥

नारायणबलिर्नाम समाराधनमुत्तमम् ।
गतिहेतुर्विना तेन गतिरन्या न विद्यते ॥ १३४ ॥

पुनर्दहनमारभ्य कर्म स्मार्तमशेषतः ।
कृत्वा सपिण्डीकरणपर्यन्तं तदनन्तरम् ॥ १३५ ॥

देवदेवं समाराध्य वक्ष्यमाणेन वर्त्मना ।
विष्ण्वालये नदीतीरे पर्वते वा वनेऽपि वा[3] ॥ १३६ ॥

अन्यत्र वा पुण्यदेशे कर्तुर्वा भवने शुभे ।
यष्टव्यं कृष्णपक्षस्य द्वादश्यामयनद्वये ॥ १३७ ॥

उपोषितः सन् पूर्वेद्युः कर्ता नियतमानसः ।
ब्राह्मणान् भगवद्भक्तान् व्रतस्वाध्यायशालिनः ॥ १३८ ॥

आमन्त्र्य मन्त्रविद् बुद्ध्वा केशवादि यथा स्वयम् ।
[4]शोधयेद्धोमयाम्भोभिः भूतले कुशविष्टरे ॥ १३९ ॥

उपवेश्य [5]वृतानेव प्राङ्मुखान् कमलासन ।
अर्घ्यादिभिः समभ्यर्च्य नामभिः केशवादिभिः ॥ १४० ॥

---

1. आचार्यः क्रमशः पूज्यः पूजायां मधुविद्विषः M_2 2. सिद्धान्ते तदेवापि न युज्यते M_2 3. विपिनेऽपि वा M_2 4. शोधिते T, P_1, P_2 5. प्रातरेव A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नमोऽन्तैर्नागवल्ल्यादि दत्त्वा चाभ्यञ्जयेद् द्विजान् ।
स्नातानां सन्निधौ तेषां होमं चौपासनेऽनले ॥ १४१ ॥

कृत्वाग्निमुखमग्नेश्च प्राग्भागे चक्रपङ्कजे ।
स्थण्डिले कुशकूर्चे वा देवमावाहयेद्यदि ॥ १४२ ॥

पुष्पाञ्जलिः समुत्थाय नृसूक्ताद्या ऋचो जपन् ।
ओंपूर्वाभिर्व्याहृतिभिराराध्य[1] पुरुषोत्तमम् ॥ १४३ ॥

मूर्तिभेदान् केशवादीन् नामभिः स्वैरनन्तरम् ।
आवाह्याघ्यादिभिः षड्भिरुपचर्य पृथक् पृथक् ॥ १४४ ॥

तर्पयित्वा तिलाम्भोभिः केशवादीन् स्वनामभिः ।
उपचर्य च दीपान्तं पुरुषं पुरुषात्मना ॥ १४५ ॥

सूक्तेन केशवादींस्तु नामभिः स्वैर्यथाक्रमम् ।
अग्नौ पद्मासनासीनं ध्यात्वा परमपूरुषम् ॥ १४६ ॥

[2]आरभ्य पायसं विष्णोर्नुकमित्यृचमब्जज ।
पश्चात्परो मात्रयेति याज्यया जुहुयाद्धविः ॥ १४७ ॥

केशवाद्यैर्नामधेयैः सर्पिषा जुहुयात्ततः ।
चतुर्थ्यन्तैर्द्वादशभिर्नमोऽन्तै[3]र्ध्यानमास्थितः । १४८ ॥

क्षीराज्यगुडमिश्रान्नं तेभ्य एव निवेदयेत् ।
देवस्य त्वा सवितुरिति महाविष्णोर्निवेदनम् ॥ १४९ ॥

सप्तव्याहृतिभिर्भूयो जुहुयात्सर्पिषानले ।
दर्भासनेषु भूदेवानाहृतानु[4]पवेश्य तान् ॥ १५० ॥

---

1. °आवाह्य T, P_1, P_2 2. आश्राव्य M_2 3. नामभिः T, P_1, P_2
4. °रुपवेशितान् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वस्त्रा[1]ङ्गुलीयकैश्छत्रकुण्डलोपानहादिभिः ।
यथाशक्ति समभ्यर्च्य मन्त्रेणाष्टाक्षरेण तान् ॥ १५१ ॥

तिलाज्यमिश्र[2]हव्येन तदनुज्ञानपूर्वकम् ।
जुहुयादनले हव्यं विद्यया वक्ष्यमाणया ॥ १५२ ॥

पितृभ्यस्तत्पितृभ्यश्च तत्पितृभ्यः पुनस्तथा ।
[3]मातृभ्यः पितृमातृभ्य[4]स्तत्पितृभ्यः पुनस्तथा ॥ १५३ ॥

मातामहेभ्य[5]स्तेषां ये पितरस्तेभ्य एव च ।
मातामहीभ्यो मातुश्च [6]पितृमातृभ्य एव च ॥ १५४ ॥

पितुः पितामहीभ्यश्च तथाचार्येभ्य एव च ।
[7]तत्पत्नीभ्यो गुरुभ्यश्च गुरुपत्नीभ्य एव च ॥ १५५ ॥

सखिभ्यस्तत्पुरन्ध्रीभ्यो ज्ञातिभ्यो याश्च ताः स्त्रियः ।
ताभ्योऽमात्येभ्यस्तत्स्त्रीभ्यः सर्वाभ्यः तत्स्त्रियश्च याः ॥ १५६ ॥

ताभ्यश्चेति समुच्चार्य स्वधा नम इति ब्रुवन् ।
नारायणाय स्वाहेति प्रत्येकं [8]पृथगाहुतिः ॥ १५७ ॥

अग्निशब्दं चतुर्थ्यन्तं कव्यवाहनमित्यथ ।
तदन्ते स्विष्टकृच्छब्दमनुषङ्गश्च पूर्ववत् ॥ १५८ ॥

हुत्वैवं सर्पिषा पश्चाद्द्वादशाक्षरविद्यया ।
प्रत्येकं शतमष्टौ च तथाष्टाक्षर[9]विद्यया ॥ १५९ ॥

विष्णुगायत्रिया तद्वद्ब्राह्मणान् षड्रसान्वितम् ।
भोजयेद्दक्षिणां दद्यात्तान् प्रणम्य प्रदक्षिणम् ॥ १६० ॥

---

1. °अङ्गुलीयकच्छत्र° T, P_1, P_2 2. °हस्तेन T, P_1. P_2 3. पितृभ्यः M_2
4. °तन्मातृभ्यः M_2 5. °सर्वेभ्यः M_2 6. मातुर्मातृभ्यः M_2 7. तत्पितृभ्यो M_1
8. प्रथमाहुतीः M ; परमाहुतिः A 9. द्वादशाक्षर° T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ताननुज्ञाप्य शिष्टान्नं यथेष्टं क्रियतामिति ।
दक्षिणेनानलं दर्भान् प्रागग्रान् शोधिते स्थले ।। १६१ ।।

संस्तीर्य तेषु दर्भेषु बलिं दद्यात्समाहितः ।
विश्वेभ्यश्चैव देवेभ्यः साध्येभ्यस्तदनन्तरम् ।। १६२ ।।

सर्वेभ्यश्चैव देवेभ्यो विष्णुर्नारायणस्तथा ।
सहस्रशिरसे चैव यज्ञात्मपदमेव च ।। १६३ ।।

पुरुषं यज्ञपूर्वं च सर्वेश्वरपदं तथा ।
चतुर्थ्यन्तं समुच्चार्य नमः स्वाहेत्यनन्तरम् ।। १६४ ।।

सर्वत्रैवानुषङ्गं च स्विष्टकृद्यजनादिकम् ।
आधेनुवरदानान्तं कृत्वा [1]प्रेतं निवेदयेत् ।। १६५ ।।

मूर्तिषु द्वादशस्वेनं यज्ञशर्माणमाख्यया ।
निवेदयामि देवाय केशवायेत्यनुक्रमात् ।। १६६ ।।

द्वादशभ्यो निवेद्यैवं परमान्नं निवेदयेत् ।
नारायणबलिर्ह्येष द्विजानां [2]समुदीरितः ।। १६७ ।।

एवं यस्य कृतो दत्तो बलिर्देवार्चनात्मकः[3] ।
स याति निखिलं पापं निर्धूय ब्रह्म शाश्वतम् ।। १६८ ।।

[4]पापानामितरेषां च बलिः पुण्यकृतामपि ।
परमात्मपदप्राप्त्यै[5] कल्पते नात्र संशयः ।। १६९ ।।

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे उत्सवप्रायश्चित्त-नारायणबलिर्नाम एकोनविंशोऽध्यायः ।।

---

1. प्रीतं M_1 2. समुदाहृतः A 3. देवार्चनादिकम् A 4. पापिनामितरेषां A 5. °प्राप्तेः A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विंशोऽध्यायः ॥

हिरण्यगर्भादिविधिः ॥

ब्रह्मा :—

राजानस्तदमात्यो वा ये राज्यधुरि निष्ठिताः ।
भगवन् रक्षणव्यग्राः प्रजानां सततोद्यताः ॥ १ ॥

ब्रह्महत्यादिभिः पापैरभिभूता विगर्हितैः ।
कायक्लेशात्मके शास्त्रचोदिते घोरकर्मणि ॥ २ ॥

पापनिर्हरणोपाये प्रवर्तितुमनीश्वराः ।
ते कथं तानि पापानि [1]विधूय सकलान्यपि ॥ ३ ॥

कर्माधिकारिणो भूयस्सतां संसदि संमताः ।
कल्पन्ते भगवद्ध्याने तदर्चनविधावपि ॥ ४ ॥

[2]योग्याः प्रकारं तं देव ब्रूहि मह्यं यथातथम् ।
ब्रह्महत्यादिपापानामपनोदनमुत्तमम् ॥ ५ ॥

श्रीभगवान् :—

कायक्लेशात्मके कर्मण्यक्षमाणां महीभृताम् ।
विहितं सुकरं तेषां प्रायश्चित्तं चतुर्मुख ॥ ६ ॥

हिरण्यगर्भनामैकं कर्म प्रोक्तं तथापरम्[3] ।
तुलाभारसमाख्यं[4] तद् द्वाभ्यां निर्धूतकल्मषाः[5] ॥ ७ ॥

भगवद्ध्यानपूजादिविधौ भूयोऽधिकारिणः ।
भवन्ति कर्म द्वितयं तदशेषेण कथ्यते ॥ ८ ॥

---

1. निर्धूय T, P_1, P_2 2. अयमर्धः P_1 ग्रन्थे संख्यया न परिगणितः ; ब्रह्महत्यादिपापानामित्युत्तरार्धस्तु समनन्तरश्लोकस्य पूर्वार्धत्वेन परिगणितः । 3. यथापरम् P_1, P_2 4. °समाख्यातं A 5. निर्धूतकल्मषम् P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कर्तुं व्यवसितं कर्म वरयेद्गुरुमादितः ।
सर्वशास्त्रार्थतत्त्वज्ञं मन्त्राणां पारगं परम् ॥ ९ ॥

दयालुं सर्वभूतानामक्रोधनमलोलुपम् ।
कर्म[1]द्वयविधानज्ञमृजुं भागवतं द्विजम् ॥ १० ॥

परीक्ष्यैवंविधं यत्नादुपसङ्गम्य पार्थिवः ।
अर्थयित्वा यथान्यायमुपचर्य द्विजोत्तमम् ॥ ११ ॥

[2]कर्मारभेत पुण्येषु देशकालेषु यन्त्रितः ।
षट्सु तैष्यादिमासेषु श्रवणे त्वाष्ट्र एव वा ॥ १२ ॥

मैत्रे वाश्वयुजि ब्रह्मन् रोहिण्यां वासवेऽपि वा ।
[3].... .... ॥ १३ ॥

पुष्ये वा सौम्यनक्षत्रे चोत्तरत्रितयेऽपि वा ।
देशे तीरे च सरितां समुद्रतटभूषु वा ॥ १४ ॥

यद्वा सर्वगुणोपेते देशे भगवदालये ।
नैमित्तिकं चेत्कर्मैतन्न कालादिपरीक्षणम् ॥ १५ ॥

मण्डपं प्रथमं कुर्यात्प्रतिष्ठा यदि वालये[4] ।
अन्यत्र वा यथोद्दिष्टे देशे शास्त्रोक्तवर्त्मना ॥ १६ ॥

सर्वालङ्कारसंयुक्तमन्तःकल्पितवेदिकम् ।
अङ्कुरानर्पयेत्पूर्वमुक्तेष्वन्यतमे दिने ॥ १७ ॥

सम्भारांस्तत्र सम्भार्य यथावसु यथाविधि[5] ।
एकाङ्गुलघने तुल्ये कपाले द्वे हिरण्मये ॥ १८ ॥

---

1. °त्रय° A   2. कर्मारम्भेषु M_2 3. अस्यार्धस्य लुप्तत्वेन चिह्नितत्वाभावात्, पुष्य इत्यर्धः १३ श्लोकस्य उत्तरार्ध एव दृश्यते P_1 ग्रन्थे। इतः प्रभृति P_1 ग्रन्थे श्लोकाः एकेनोना भवन्ति ।   4. प्रतिष्ठायामिवालये T, P_1, P_2 5. यथाविधि यथावसु P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अधरं चोत्तरं चापि कार्ये द्वाभ्यां चतुर्मुख ।
सङ्गताभ्यां प्रविश्यान्तरास्ते गर्भाशये यथा ॥ १९ ॥

कर्ता सुखं तन्निर्माय द्वयमण्डसमाकृतिम् ।
हिरण्यगर्भसंज्ञं[1] तद्यत्रायं जायते पुनः[2] ॥ २० ॥

होमपात्राणि सर्वाणि रैमयान्येव कारयेत् ।
सम्भारेषु समस्तेषु सम्भृतेषु महीपतिः ॥ २१ ॥

पूर्वेद्युर्नियतश्चोप्त[3]रोमश्मश्रुनखश्शुचिः ।
शुद्धदच्छुद्धवसनः श्वेतमाल्यानुलेपनः ॥ २२ ॥

उपोषितो घृतं प्राश्य रात्रिं नियमतत्परः ।
नीत्वा परेद्युः प्रत्यूषे स्नातो नियतमानसः ॥ २३ ॥

ऋत्विग्भिः कारयेत्कर्म गुरुणा चोदितः स्वयम् ।
वेदिमध्ये शालिभारैर्नवभिः कृतविष्टरे ॥ २४ ॥

प्रागग्रेषु च दर्भेषु स्तीर्णेष्वारोप्य रैमयम् ।
[4]कपालमधरं चोर्ध्वं तोरणादिसमर्चने ॥ २५ ॥

यथापुरं कृते नृत्तगेयवादित्रमङ्गले ।
हिरण्यगर्भमभितश्चतुर्दिक्षु भृतोदकान् ॥ २६ ॥

संस्थाप्य चतुरः कुम्भान् धान्यपीठेषु तेष्वपि ।
कुम्भेषु न्यस्तरत्नेषु वेष्टितेषु नवाम्बरैः ॥ २७ ॥

चतस्रो देवतास्स्वीयैर्नामधेयैरनुक्रमात् ।
आवाह्यः पुरुषः सत्यः प्राचीदक्षिणयोस्तथा ॥ २८ ॥

1. ०नामैतत् M_2 2. यथा संजायते पुनः A; यतोऽयं जायते पुनः M_2

3. नियतं कृत्त० M_2 4. कपालं मधरं द्वारतोरणादि० T, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वारुण्यामथ कौबेर्यामच्युतोऽनन्त एव च ।
समुदीर्यार्घ्यपाद्याद्यैर्धूपदीपावसानकैः ॥ २९ ॥

अन्नं चतुर्विधं चापि कुम्भे कुम्भे निवेदयेत् ।
पूर्वादिदिक्षु कुण्डेषु प्रतिष्ठायामिव क्रमात् ॥ ३० ॥

कलशेषु जुहुयादग्नौ समिधाज्येन च क्रमात् ।
प्रत्येकं मूलमन्त्रेण शतमष्टोत्तरं गुरुः ॥ ३१ ॥

चतुर्विधेन चान्नेन प्रत्येकं षोडशाहुतीः ।
कुर्यात्पुरुषसूक्तेन ध्यात्वा यष्टव्यदेवताम्[1] ॥ ३२ ॥

प्राप्ते मुहूर्ते भूदेव ननुज्ञाप्य गुरुः स्वयम् ।
पाणिना भूमिपं हस्ते गृहीत्वा प्रलयक्रमात् ॥ ३३ ॥

देहं संहृत्य भूपालं [2]देहमात्रावशेषितम् ।
ध्यात्वा प्रवेशयेद्गर्भं रैमयं कमलासन ॥ ३४ ॥

अपरे रैमये भागे सुखासीनं च भूमिपम् ।
छादयेदुपरिष्ठेन भागेनैतत्प्रवेशनम् ॥ ३५ ॥

घृतमिश्रैस्तिलैस्तत्त्वसंहाराहुतिमाचरेत् ।
तत्त्वोत्पादेन[3] मार्गेण चिन्तयित्वा गुरुः पुनः ॥ ३६ ॥

स्पृष्ट्वा[4] शरीरं भूपस्य सृष्टिहोमं यथापुरम् ।
कुर्यात्कुण्डेषु सर्वत्र चतुर्षु चतुरानन ॥ ३७ ॥

आनीय मन्त्रवज्जातं [5]कुण्डात्तस्मान्महीनृपम् ।
वैयाघ्रचर्मण्यारोप्य कलशैरभिषेचयेत् ॥ ३८ ॥

---

1. °देवताः P_1, P_2 2. जीव° A, M_2 3. तत्त्वोत्पादन° T, P_1, P_2
4. सृष्ट A, T, P_1, P_2; सृष्ट्वा M_2 5. अण्डात्तस्माद्बहिर्नृपम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तमाधममार्गेण [1]देववन्मन्त्रवित्तमः ।
तदेव मन्त्र[2]स्नपनं द्रव्यजातं च तादृशम् ।। ३९ ।।

कर्मणानेन निर्धूतकल्मषः पुण्यकृत्तमः ।
जातो गुरुप्रसादेन गुरुमग्रे सभाजयेत् ।। ४० ।।

सहस्रनिष्कमानेन तपनीयेन भूमिपः ।
ऋत्विजां [3]चैव सर्वेषां तावती दक्षिणा मता ।। ४१ ।।

कर्मोपकरणं सर्वं कुर्यादाचार्यसान्नृपः ।
हैरण्यमण्डं विद्वद्भ्यो ब्राह्मणेभ्यः प्रदापयेत् ।। ४२ ।।

एवं कृतव्रतस्तस्य विष्णोराराधनादिषु ।
सम्पद्यतेऽधिकारित्वं [4]द्विरेवं कर्म कुर्वतः ।। ४३ ।।

फलं च विष्णोः सारूप्यं सायुज्यं त्रिगुणं भवेत् ।
तुलाभाराह्वयं कर्म द्वितीयं कथ्यतेऽधुना ।। ४४ ।।

निर्माय मण्टपं प्राग्वत्तन्मध्ये यज्ञदारुजौ ।
स्तम्भौ दृढौ[5] सारवन्तौ हस्तैष्षड्भिः [6]समुच्छ्रितौ ।। ४५ ।।

द्विहस्तपरिणाहौ द्वौ सुवृत्तौ शिल्पिकल्पितौ ।
द्विहस्तमानान्तरालौ स्थापितौ भूतले दृढम् ।। ४६ ।।

कृत्वा तयोरुपर्येकं दारु सारवदुत्तरम्[7] ।
विस्तीर्णं हस्तमानेन तावन्मानं घनं दृढम् ।। ४७ ।।

त्रिहस्तमायतं चैव तुलादण्डमयोमयम् ।
आयसेनैव पाशेन योजयेदुत्तरेण तु ।। ४८ ।।

---

1. वेदवित्तन्त्र° T, P_1, P_2 2. तथैव मन्त्रात् T, P_1, P_2 3. चापि T, P_1, P_2 4. त्रिरेवं M_2 5. ऋजू M_2 6. च सम्मितौ M_2; संभृतौ P_2 7. °उत्तमम् A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधायेत्थं तुलामन्यत् संभारादि यथापुरम् ।
कल्पयित्वा यथापूर्वं कर्म चोपरि [1]शास्त्रिकम् ॥ ४९ ॥

होमान्तं सकलं कुर्याद्यथायोगमलोपयन् ।
स्नातो नरपतिः क्षौमवसनाभरणान्वितः ॥ ५० ॥

शुचिर्ध्यायन्वासुदेवं चर्मखड्गधरं तथा ।
परिक्रम्य नमस्कृत्य देवांस्तान् पुरुषादिकान् ॥ ५१ ॥

तुलामपि तथा कृत्वा भागे तस्याश्च पश्चिमे ।
स्थित्वा प्रागाननो भूत्वा आरोहेत्पश्चिमं घटम् ॥ ५२ ॥

स्वस्तिदा[2] इत्यृचं सूक्तमधीयानं च मङ्गलम् ।
प्राच्ये घटे नृपसमं निक्षिपेद्धाटकोत्तमम् ॥ ५३ ॥

चतुर्दिक्षु प्रवृत्तासु नृत्तवादित्रगीतिषु ।
अधीयानेषु विप्रेषु वेदांश्च चतुरस्तथा ॥ ५४ ॥

शान्तिहोमे च कुण्डेषु प्रवृत्ते पार्थिवः स्वयम् ।
कञ्चित्कालं घटभुवि ध्यायन् रुक्ममयं हरिम् ॥ ५५ ॥

आसित्वा गुर्वनुज्ञातः पूर्वं घटभुवस्ततः[3] ।
अवरोहेत्सुवर्णं च भूषणानि च भूपतिः ॥ ५६ ॥

भूसुरेभ्यो यथायोगं विभज्य वितरेत्ततः ।
आचार्याय शतं निष्कं मूर्तिपेभ्यश्च तत्समम् ॥ ५७ ॥

सर्वेभ्यो ये च तत्कर्मसहकारे नियोजिताः ।
तेभ्योऽपि [4]दद्यादीक्षित्वा तेषां कर्म यथायथम् ॥ ५८ ॥

---

1. शास्त्रतः M_2 2. स्वस्ति न T, P_1, P_2 3. स्वयम् A
4. दद्यादुद्वीक्ष्य A, T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तुलाभाराह्वयं कर्म कुर्वन्नित्थं महीपतिः ।
अन्यो वा धनवान् कश्चित् सर्वपापैः प्रमुच्यते ॥ ५९ ॥

प्रेत्य चाभिमतान् भोगानश्नुते दिवि देववत् ।
असकृत्कर्म कुर्वाणो ब्रह्मलोके महीयते ॥ ६० ॥

पापापनोदनं कर्म परलोके सुखावहम् ।
आयुर्वृद्धिकरं सर्वरोगशान्तिकरं परम् ॥ ६१ ॥

सम्पत्करं यशोवृद्धिकारणं सर्वकामदम् ।
चतुरानन कर्मान्यत् स्वर्ण[1]गर्भसमन्वितम् ॥ ६२ ॥

पुष्याभिषेचनं नाम शृणु गुह्यं सनातनम् ।
विहितं पृथिवीशानामिन्द्राद्यैरप्यनुष्ठितम् ॥ ६३ ॥

मासि तैष्ये प्रोष्ठपदे मासे चाश्वयुजे शुभे ।
श्रवणे चैव नक्षत्रे जन्मर्क्षे कर्तुरेव वा ॥ ६४ ॥

महाभिषेचनं कर्म प्रारभेत गुरुस्ततः[2] ।
पूर्वोक्तेष्वेव देशेषु कस्मिंश्चिदभिपूजिते[3] ॥ ६५ ॥

पञ्चदण्डायतां भूमिं कृत्वा वै वर्तुलाकृतिम्[4] ।
तस्यामन्तःस्थलं सम्यक् कृत्वा [5]किष्कुसमुच्छ्रितम् ॥ ६६ ॥

तोरणादि चतुर्दिक्षु स्थापयित्वा चतुर्मुख ।
अलङ्कृत्य यथापूर्वं वितानध्वजमालया ॥ ६७ ॥

तन्मध्ये कल्पयेन्मेरुं मृदङ्गसदृशाकृतिम् ।
श्लक्ष्णादि च मृदा कार्यं [6]तस्योच्छ्रायस्त्रिहस्तकः ॥ ६८ ॥

---

1. °गर्भादिसंयुतम् T, P_1, P_2 2. स्वयम् M_2 3. °भूषिते M_2
4. चैव तुलाकृतिम् M_1 5. निष्कसमुच्छ्रितम् P_1,P_2 6. तस्योर्ध्वं च M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मूले चाग्रे च विष्कम्भो हस्तमानस्तथा भवेत् ।
चतुर्दिक्षु च[1] चत्वारो भागास्तस्य यथाक्रमम् ॥ ६९ ॥

श्वेतोऽरुणस्तथा पीतः कृष्णः कल्प्यश्च सर्वतः ।
रत्नैः स्वर्णैर्भूषणीयाः[2] षट् तथा कुलपर्वताः ॥ ७० ॥

पूर्वापरायताः कल्प्याः हिमवांस्तदनन्तरम् ।
हेमकूटश्च निषधो नीलश्श्वेतश्च पर्वतः ॥ ७१ ॥

शतशृङ्गश्च विष्कम्भस्तेषां स्यात् षोडशाङ्गुलः ।
श्वेतश्च पिङ्गलो रक्तो नीलश्चन्द्रसमप्रभः ॥ ७२ ॥

हेमवर्णः क्रमाद्वर्णैश्चित्रयेद्धातुपांसुभिः ।
जम्बूद्वीपं लिखित्वैवं लवणोदधिवेष्टितम् ॥ ७३ ॥

प्लक्षद्वीपं लिखेद्दिक्षु समुद्रपरिवेष्टितम् ।
शाल्मल्या [3]लक्षितं द्वीपं परीतं मधुराम्बुभिः ॥ ७४ ॥

कुशं परीतमाधारैः क्रौञ्चं दधिसमृद्धिदम्[4] ।
शाकं दुग्धोदधिक्षिप्तं पुष्करं स्वच्छतोयधिम् ॥ ७५ ॥

क्रमाल्लिखित्वा सर्वेषां लोकालोकमहाचलम् ।
वप्रवत्कल्पयेत्प्राच्यां तस्यान्तरमरावतीम् ॥ ७६ ॥

पुरीमिन्द्रस्य याम्यायां नाम्ना संयमनीमपि ।
यमस्य वरुणस्यापि प्रतीच्यां नगरीं तथा ॥ ७७ ॥

विभावरीमुदीच्यान्तु पुरीं सोमस्य कल्पयेत् ।
इन्द्रादिलोकपालानां स्थाने स्थाने प्रकल्पयेत् ॥ ७८ ॥

---

1. चतुर्द्वारो A 2. पूरणीयाः T, P_1, P_2 3. रञ्जितं T
4. °समुद्रितम् T ; °समन्वितम् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सैकते स्थण्डिले तत्र तानावाह्य समर्चयेत् ।
महामेरुं च तन्मूर्ध्नि वाराहीं मूर्तिमर्चयेत् ॥ ७९ ॥

मेरोरुत्तरपार्श्वे तु श्वभ्रं कृत्वा प्रमाणतः ।
अधः कपालं सौवर्णं न्यस्य तत्र समर्चयेत् ॥ ८० ॥

पुनरूर्ध्वकपालं च न्यस्य तस्योपरि क्रमात् ।
पूर्वोक्तेन विधानेन पुरोधा नियतः स्वयम् ॥ ८१ ॥

कुम्भान् षोडश सौवर्णान् षोडशप्रस्थपूरणान् ।
परितोऽण्डकपालस्य सूत्रवस्त्रादिवेष्टितान् ॥ ८२ ॥

स्थापयित्वा धान्यराशौ सापिधानानलङ्कृतान् ।
दिशमैन्द्रीं समारभ्य प्रादक्षिण्येन पूरयेत् ॥ ८३ ॥

पञ्चगव्यादिभिर्द्रव्यैः प्रणवेन प्रपूरयेत् ।
पञ्चगव्यं च पीयूषं दधि सर्पिस्तथा मधु ॥ ८४ ॥

हरिचन्दनतोयं च वारि चाक्षतसंयुतम् ।
कौङ्कुमं च तथा तोयं कर्पूरागरुवारि च ॥ ८५ ॥

कुशोदकं च रत्नाम्भः सर्वपुष्पोदकं[1] तथा ।
फलोदकं च धान्याम्भः सर्वतीर्थोदकं तथा ॥ ८६ ॥

सर्वगन्धोदकं चापि द्रव्याणां क्रम ईरितः ।
मेरोश्च [2]पश्चिमे भागे [3]कुण्डमग्नेः प्रकल्पयेत् ॥ ८७ ॥

आज्येन जुहुयादग्नौ शतमष्टोत्तरं पृथक् ।
वराहमूर्तिप्रभृतीरुपक्षिप्त्वा च देवताः ॥ ८८ ॥

---

1. सर्वमुष्णोदकं M_2 2. दक्षिणे T, P_1, P_2 3. कुण्डे चाग्निं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्याश्च देवताश्शैलान् समुद्रान्विष्टपानि च ।
भूरादीनि तथा द्वीपभेदांश्चोद्दिश्य नामभिः ॥ ८९ ॥

तेषामाहूय तत्कार्यं गुरुणा सपुरोधसा ।
भूर्भुवः स्वरिति ब्रह्मन्नन्ते च जुहुयाद् घृतैः ॥ ९० ॥

अग्निं विसृज्य वितरेद्दक्षिणाश्च यथावसु ।
तदन्ते यजमानस्तु सर्वालङ्कारसंयुतः ॥ ९१ ॥

शुचिः समाहितो भूत्वा कृतकौतुकबन्धनः ।
प्रविश्य तत्र तद्धेममण्डं च प्राङ्मुखः स्वयम् ॥ ९२ ॥

प्रविश्यासीत देवेशं ध्यायन्नेव [1]सुधाकरम् ।
यज्ञमूर्तिं धरां देवीं बिभ्राणं [2]निजदंष्ट्रया ॥ ९३ ॥

एवं [3]ध्यायन्तमासीनं नृपं सोपस्क्रियं स्वयम् ।
आचार्यानुमतः कुम्भैः स्थापितैरभिषेचयेत् ॥ ९४ ॥

पञ्चगव्यादिभिर्द्रव्यैर्मन्त्रानुच्चार्य मन्त्रवित् ।
वसोः पवित्रमन्त्रेण पञ्चगव्याभिषेचनम् ॥ ९५ ॥

शं नो देवीरिति पयःस्नानं दध्नाभिषेचनम् ।
इषे त्वेति घृतेनाग्न आयाहीति तथा पुनः ॥ ९६ ॥

[4]अग्निमीळेति मधुना, मानस्तोक इति ब्रुवन् ।
हरिचन्दनतोयेन, तथैवाक्षतवारिणा ॥ ९७ ॥

इदं विष्णुरिति प्रोच्य कुङ्कुमक्षोदवारिणा ।
अहार्षं चेति मन्त्रेण तथा कर्पूरवारिणा ॥ ९८ ॥

---

1. सुखाकरम् M_2 2. दंष्ट्रया स्वया M_2 3. ध्यायंस्तमासीनं T
4. मधुना चाग्निमीळेति P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गायत्र्या स्नापयेदुर्वीपतिं रत्नाम्भसा ततः ।
चत्वारि श्रृङ्गेत्युच्चार्य तथा सर्वफलोदकैः ॥ ९९ ॥

सर्वं राजानमित्यादिमन्त्रमुच्चार्य मन्त्रवित् ।
सर्वधान्योदकेनैव शतमन्विति विद्यया ॥ १०० ॥

सर्वतीर्थाम्भसा स्नानमापोहिष्ठेति[1] विद्यया ।
[2]तरत्समन्दीत्युच्चार्य सर्वगन्धाभिषेचनम् ॥ १०१ ॥

निष्क्रान्तो नृपतिर्गर्भात् प्रोक्षितो मङ्गलाम्भसा ।
[3]शुद्धाम्बरधरश्शुद्धश्चाचान्तो दत्तदक्षिणः ॥ १०२ ॥

आचार्याय यथावित्तं विस्तारं रैमयं ततः ।
अण्डं विभज्य वितरेद्ब्राह्मणेभ्यश्चतुर्मुख ॥ १०३ ॥

दद्याद्वा विष्णवे सर्वमर्धं वा पादमेव वा ।
पौनःपुन्येऽभिषेकस्य मुक्तिः करतले स्थिता ॥ १०४ ॥

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
हिरण्यगर्भादिविधिर्नाम विंशोऽध्यायः ॥

एकविंशोऽध्यायः ॥

सिद्धान्तभेदपञ्चरात्राधिकारिव्यवस्थाविधिः ॥

ब्रह्मा :—

सिद्धान्तानां श्रुतो भेदश्चतुर्णा भगवन्मुखात् ।
[4]साम्प्रतं श्रोतुमिच्छामि व्यवस्थामधिकारिणाम् ॥ १ ॥

---

1. आपोहिष्ठादि° T, P_1, P_2 2. उक्त्वा तरत्समन्दीयं T, P_1, P_2
3. शुक्लाम्बर° M_2 4. इदानीं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीभगवान् :—

अहं ते नियमं तेषां [1]कथयिष्यामि शाश्वतः ।
[2]जातेषु सर्वविप्रेषु मन्मुखात् कमलासन ॥ २ ॥

नानाचरणगोत्रेषु नानाकर्मपरेषु च ।
तेषां मध्ये महाभागा ऋषयोऽष्टसहस्रिणः ॥ ३ ॥

औपगायनपूर्वास्ते नानागोत्रा मुमुक्षवः ।
अधीयानाः कण्वशाखां तथा माध्यन्दिनाह्वयम् ॥ ४ ॥

तेषां बुद्धिः समुत्पन्ना मोक्षैकफलदायिनी ।
ते सर्वे सह सङ्गम्य ब्रह्माणं प्रोचुरव्ययम् ॥ ५ ॥

मोक्ष्यमाणा वयं ब्रह्मन् मोक्षोपाय[3]विवित्सया ।
शरणं त्वामिह प्राप्ता जन्ममृत्युजिगीषवः ॥ ६ ॥

औपगायन[4]मुख्यांस्तानुपासन्नांश्चतुर्मुख ।
इति ब्रुवाणानाहूय तदनुग्रहकाम्यया ॥ ७ ॥

पञ्चरात्रोक्तमार्गेषु मन्त्रसिद्धान्तवर्त्मना[5] ।
दीक्षयित्वा यथान्यायं चक्रवारिजमण्डले ॥ ८ ॥

आहूतान् दीक्षितान् ब्रह्मा कर्तव्यमिदमादिशत् ।
काण्वीं माध्यन्दिनीं शाखां शाखान्तर्हिते उभे ॥ ९ ॥

अधीध्वं मूलशाखे ते निषेकाद्याश्च संस्कृतीः ।
ताभ्यामेव त्वनुष्ठध्वं सोमयागादिकर्म च ॥ १० ॥

भगवद्ध्यानसहितं तत्समाराधनात्मकम् ।
कर्तव्यत्वेन वेदोक्तं इत्येवं फलवर्जितम् ॥ ११ ॥

---

1. कथयामि T 2. विप्रजातेषु सर्वेषु M_2 3. ०विधित्सया T
4. ०मुख्यानां तापसानां M_2 5. ०मार्गतः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]कर्तव्यमिति कुर्वाणैः कर्म निश्श्रेयसं परम् ।
प्राप्यतेऽनेन युष्माभिर्मन्त्रसिद्धान्तवर्त्मना ॥ १२ ॥

पञ्चकालं यथाशास्त्रं गृहे वा मन्दिरेऽपि वा ।
भगवत्पूजनं कार्यमद्यप्रभृति नान्यथा ॥ १३ ॥

यूयं भागवतास्तेन जाता भगवदर्चनात् ।
[2]भगवद्भक्तिकरणाद्वंशजाताश्चतुर्मुख ॥ १४ ॥

[3]नाम्ना भागवताः सन्तो दीक्षयित्वा यथाविधि ।
यथोक्तं कर्म कुर्वाणाः प्राप्नुवन्ति परं पदम् ॥ १५ ॥

शाखान्तरेषु ये मन्त्राः पावनाः परमर्षयः ।
तानप्यधीध्वं तैर्मन्त्रैरर्चयध्वमधोक्षजम् ॥ १६ ॥

आत्मार्थयजनं विष्णोः कल्पतेऽभ्युदयावहम्[4] ।
तथा परार्थयजनं ग्रामे वा पत्तने पुरे ॥ १७ ॥

स्वगृहे वा स्वतन्त्रे वा कार्यं भागवतैर्नरैः ।
आत्मनश्च परेषां च तन्निश्श्रेयसकृद् भवेत् ॥ १८ ॥

अभागवतवंशैस्तु दीक्षितैरपि मानवैः[5] ।
आत्मार्थमेव यजनं न परार्थं कदाचन ॥ १९ ॥

परार्थयजनं तेषां गर्हितं विप्रसत्तमाः ।
अभागवतवंश्योऽपि दीक्षितश्शास्त्रवर्त्मना ॥ २० ॥

---

1. कोशेषु ग्रन्थेषु चोपलभ्यमानः कृषिध्वमिति पाठोऽसाधुः ।
2. कारणाद्वंशजाश्च नो वंशजानां महात्मनाम् M_2 । 3. ते च भागवतास्सर्वे दीक्षयित्वा यथाविधि । M_2 4. ०अभ्युदयाय हि M_1 5. शास्त्रवर्त्मना M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परार्थयजनं कुर्यादपि भागवताज्ञया ।
भगवानेव गोविन्दः साक्षाद्भागवतः स्मृतः ॥ २१ ॥

तं दृष्ट्वा विद्यया हीनमपि दुष्कृतकारिणम् ।
निर्गुणं गुणिनं वापि प्रत्युत्तिष्ठेत् कृताञ्जलिः ॥ २२ ॥

तानयाचत विश्वात्मा महर्षीनमितौजसः ।
युष्माभिः क्षिति[1]लोकेऽस्मिन् कार्यं भगवदर्चनम् ॥ २३ ॥

स्वार्थं परार्थमथवा कर्तव्यं मम शासनात् ।
इति ब्रुवाणस्तान् ब्रह्मा तत्रैवान्तरधीयत ॥ २४ ॥

ध्येयं [2]यत्तत् प्रवक्ष्यामि मन्त्रसिद्धान्तिनां नृणाम् ।
द्विभुजं चेद्वासुदेवं रेखाभिस्तलयोः करे ॥ २५ ॥

लाञ्छितं शंखचक्राद्यैः ध्यायेत्तद्द्विगुणैः पुनः ।
द्वाभ्यां कराभ्यां बिभ्राणं शंखचक्रे गदाम्बुजे ॥ २६ ॥

मुख्याभ्यामथवाभीतिदानं [3]कट्यवलंबनम् ।
इतोऽधिके भुजगणे बह्वायुधधरं हरिम् ॥ २७ ॥

वर्णेन श्याममुभगमथवा धवलद्युतिम् ।
शैलादिवस्तुभिः कृतं बेरं चादिपदे स्थितम् ॥ २८ ॥

आसीनं वा शयानं वा गरुडारूढमेव वा ।
ध्यायेयुरर्चयेयुश्च त्रयीमन्त्रैस्त्रयीविदः ॥ २९ ॥

[4]ध्यायेत्त्वागमसिद्धान्ते स्थितं लम्बभुजद्वयम् ।
वासुदेवादयस्सर्वे निराकल्पा निरायुधाः ॥ ३० ॥

---

1. ०लोकेषु P_1 2. वस्तु T, P_1, P_2 3. वा कमलासन M_1
4. ध्येयस्त्वागम० M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सितासितास्बरधराश्चत्वारः समदिङ्मुखाः ।
एकविष्टरनिष्ठास्ते शयनासनवर्जिताः ॥ ३१ ॥

देवीभ्यां परिवारैश्च हीना योगासनेन च ।
समप्रधानषाड्गुण्यभाजो मन्त्रैर्बलादिभिः ॥ ३२ ॥

[1]प्रतिष्ठाप्य क्रमात्पूज्या नित्यं कमलसम्भव ।
बलिप्रदानरहिता नित्योत्सवविवर्जिताः ॥ ३३ ॥

पवित्रारोपणस्वापशयनोत्थानवर्जिताः ।
कर्तव्यत्वेन भुवने प्रासादे वा चतुर्मुख ॥ ३४ ॥

[2]काले मध्यन्दिनेऽछिद्रपञ्चकालपरायणैः ।
निराशैः कर्मसंन्यासकारिभिर्देवपूजनम् ॥ ३५ ॥

बलादिमन्त्रैरच्छिद्रपञ्चकालपरायणैः ।
एकाध्वना निषेकादिसंस्कारैश्च बलादिभिः ॥ ३६ ॥

चतुर्णां ब्राह्मणादीनां विहितं नयकर्म च ।
[3]द्वादशाक्षरविद्यैव तेषां विद्या न च त्रयी ॥ ३७ ॥

न सावित्री न मन्त्रोऽन्यः स्वाध्यायजपकर्मणोः[4] ।
बीजशक्त्यङ्गरहितमृषिच्छन्दोविवर्जितम् ॥ ३८ ॥

स्वरूपमेव मन्त्रस्य जपस्वाध्यायकर्मणोः ।
चतुर्णामपि वर्णानां संज्ञास्तेषां क्रमोदिताः ॥ ३९ ॥

[5]भगो हि द्विजमुख्यस्य संज्ञा वा विप्रवन्नृपे ।
वैश्यस्य वर्धनी संज्ञा मौद्गली वृषलस्य च ॥ ४० ॥

---

1. प्रभवाख्य॰ T, P_1, P_2 2. काल्ये T, P_1, P_2 3. द्वादशाक्षरमेतेषां विज्ञानं च त्रयी न च M_2 4. ॰कर्मणि M_2 5. विशेषो M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वे समानाश्चत्वारो गोत्रप्रवरवर्जिताः ।
उत्कर्षो नापकर्षश्च जातितस्तेषु संमता ॥ ४१ ॥

फलेषु निःस्पृहाः सर्वे द्वादशाक्षरचिन्तकाः ।
[1]मोक्षेषु [2]निश्चयार्थाश्च सूतकाशौचवर्जिताः ॥ ४२ ॥

नाधिकारोऽस्ति सर्वत्र कर्षणादिषु कर्मसु ।
मोहात्तानि प्रयुञ्जानाः पतन्त्यकृतबुद्धयः ॥ ४३ ॥

राजराष्ट्रमनुष्याणां यजमानस्य सद्मनः ।
क्षयो भवति तेनैते न कुर्युः कर्षणादिकम् ॥ ४४ ॥

याचेत मन्त्रसिद्धान्ते दीक्षितं विप्रसत्तमम् ।
पूजार्थमात्मनो बिम्बप्रतिष्ठाकरणादिषु[3] ॥ ४५ ॥

सोऽपि बीजादिरहितं द्वादशाक्षरविद्यया ।
कुर्यात्प्रतिष्ठामाचार्यः पूजार्थं मन्त्रवित्तमः ॥ ४६ ॥

[4]एकायनश्चतुर्मूर्तिं प्रतिगृह्य समर्चयेत् ।
[5]अर्चनं च चतुःस्थाने वारिस्रग्बिम्बवह्निषु ॥ ४७ ॥

नाधिकारोऽस्ति मन्त्रेषु बीजपिण्डपदादिषु ।
चतुर्णां मौद्गलादीनां विदुषां द्वादशाक्षरम् ॥ ४८ ॥

प्राणानामपि निर्याणे न स्पृशेन्न दहेच्छवम् ।
पुत्रपौत्रादिरहितं संत्यजेत्तं काष्ठवद्बहिः ॥ ४९ ॥

मूर्त्यन्तरार्चनं तेषां प्रत्यवायाय कल्पते ।
सिद्धान्तान्तरमार्गेण स्थापितं बिम्बमालये ॥ ५० ॥

---

1. मोक्षैक° T, P_1, P_2 2. निश्चिताः सर्वे निश्चयारशाव° M_2, P_2 3. °कर्षणादि वा M_1 4. एकायनस्तु तां मूर्तिं T, P_1, P_2 5. अभ्यर्चनं चतुःस्थाने M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अज्ञानादथवा मोहादेकायनविधानतः ।
अर्चय[1]न्नापदः सर्वा आप्नोतीह परत्र च ॥ ५१ ॥

प्रदक्षिणप्रणामादि राद्धान्तेऽन्यत्र केवलम् ।
विहितं नार्चनं कार्यं राजराष्ट्रक्षयावहम् ॥ ५२ ॥

न दीक्षा नैव देहस्य दहनादिविशोधनम् ।
नाङ्गन्यासादि सकलं नेष्टमेकायनाध्वनि ॥ ५३ ॥

एकायने प्रविष्टानां त्रैविद्यानामयं क्रमः ।
तन्त्रसिद्धान्त[2]मार्गेण सम्प्रत्याचार उच्यते ॥ ५४ ॥

चतुर्णामपि वर्णानामितरेषां च तद्भुवाम् ।
दीक्षा समैव सर्वेषामाचारस्तन्त्रवर्त्मना ॥ ५५ ॥

निषेकादिश्च संस्कारस्तेषां तन्त्रोक्तवर्त्मना ।
त्यक्त्वा त्रयीं तन्त्रमेव प्रपद्य शरणं स्थिताः ॥ ५६ ॥

सान्तरालमनुष्ठानं पञ्चकालोदितं तथा ।
यतस्तन्त्रान्तर [3]इव नृणां कमलसम्भव ॥ ५७ ॥

तत्त्वसंहारजनने न्यासश्च करदेहयोः ।
योगविष्टरक्लृप्तिश्च नव[4]पद्मप्रकल्पनम् ॥ ५८ ॥

मूर्तयोर्नवपद्मेषु तास्वधिष्ठानमध्यमे ।
[5]ता वीक्षन्ते दिशो वापि मूर्तयोऽष्टौ यथायथम् ॥ ५९ ॥

[6]यादृशी मध्यमा मूर्तिरीक्षते सेश्वरी मता ।
यां च वालोक्य पुरुषस्समाराधनकर्मणि ॥ ६० ॥

---

1. आपदं सर्वां T, P_1, P_2 2. °मार्गे तु T, P_1, P_2 3. °भुवां T, P_1, P_2
4. सित° M_1 5. तामीक्षन्ते T, P_1, P_2 6. यां दिशं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आस्तेऽसौ पौरुषी ज्ञेया प्राजापत्या च वासवी ।
योगविष्टरपादानां धर्मादीनां प्रकल्पने ॥ ६१ ॥

[1]आलयान्तः परिवाराणां सुपर्णीतनयस्य च ।
बलिप्रदानपीठस्य गोपुरस्य चतुर्मुख ॥ ६२ ॥

बाह्यानामपि चैतेषां प्राची स्यादैश्वरी हरित् ।
बाह्यानां परिवाराणामन्येषां परिकल्पने ॥ ६३ ॥

प्राजापत्यैव दिक् प्राची दिक्संमोहे[2] तु पौरुषी ।
प्राच्यादिकां समाहृत्य[3] परिवारप्रकल्पनम् ॥ ६४ ॥

द्विषट्काक्षरपूर्वाणां बीजशक्त्यङ्गसंयुतम् ।
ऋषिच्छन्दोविहीनश्च मन्त्राणां जप इष्यते ॥ ६५ ॥

वर्णानामितरेषां च सममाराधनक्रमः ।
नवानामपि मूर्तीनां मूर्त्यन्तरगणस्य च ॥ ६६ ॥

प्रादुर्भावगणस्यापि वर्णाः स्त्र्यव्यक्तयो मताः ।
न ध्वजारोहणं नापि मासाद्युत्सवसम्भवः ॥ ६७ ॥

केवलं शयनोत्थाने बलिहोमादिवर्जितः ।
प्रादक्षिण्येन गमनं ग्रामादेः कौतुकोत्सवः ॥ ६८ ॥

नैमित्तिकं चतुःस्थाने स्वातन्त्र्येणार्चनं हरेः ।
चक्राब्जमण्डले कुम्भे प्रतिमायां च पावके ॥ ६९ ॥

तन्त्रान्तरे च सिद्धान्ते सम्प्रत्याचार उच्यते ।
त्रिवक्त्रं वा चतुर्वक्त्रमधिकाननमेव वा ॥ ७० ॥

---

1. अथान्तः T, P_1, P_2 2. ०समूहे तु पौरुषी P_1, P_2 3. समाश्रित्य P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योगपीठे स्थितं देवं परिवारैश्च सेवितम् ।
पिण्डमन्त्रैः कलामन्त्रैर्बीजशक्त्यङ्गसंयुतैः ॥ ७१ ॥

ऋषिच्छन्दोविहीनैश्च चत्वारो ब्राह्मणादयः ।
समर्चयेयुस्सर्वेषां निषेकाद्यखिलक्रियाः ॥ ७२ ॥

तन्त्रान्तरोक्तमार्गेण कार्याः [1]त्र्यय्यात्मनापि च ।
सिद्धान्तानां चतुर्णां तु साङ्कर्यं व्यसनावहम् ॥ ७३ ॥

सिद्धान्तेषु चतुर्ष्वेकं पूर्वैर्नृभिरनुष्ठितम् ।
त्यक्त्वा समाश्रयेदन्यं नरो भवति किल्बिषी ॥ ७४ ॥

तस्माज्जन्म[2]प्रभृत्येकराद्धान्तनियतो भवेत् ।
अन्यथा कुलमात्मानं सर्वं नाशयति ध्रुवम्[3] ॥ ७५ ॥

मन्त्रमण्डलकुण्डादिक्रियामुद्रोपचारकैः ।
योगं नयति यो मोहात् स्वसिद्धान्तोक्तवर्त्मना ॥ ७६ ॥

सोऽपि स्वकुलजान् [4]धर्मान् परमात्मान[5]मञ्जसा ।
नयेन्निरयमत्युग्रं पुरुषान् पुरुषाधमः ॥ ७७ ॥

निष्फला च क्रिया तस्य प्रत्युतानर्थकारणम् ।
[6]कुप्येच्च देवस्तत्कोपो राजराष्ट्रक्षयावहः ॥ ७८ ॥

कर्ता कारयिता चोभौ [7]सान्वयौ द्वौ विनश्यतः ।
न सन्निधानं च हरेर्धाम्नि हानिश्च सम्पदाम् ॥ ७९ ॥

तस्मान्न सङ्करः कार्यो राद्धान्तोदितकर्मणः ।
मन्त्रसिद्धान्तमुख्येषु चतुर्ष्वपि यथापुरम् ॥ ८० ॥

---

1. त्र्य्युक्तवर्त्मना A ; त्र्ययन्तवर्त्मना M_2 2. ॰प्रभृत्येव कालान्त॰ A 3. स्वयम् A 4. सर्वान् M_1,P_1,P_2 5. ॰अब्जज M_2 6. अकर्मणोऽस्य तत्कोपो A 7. सान्वयं विनशिष्यतः M_2; सान्ववायौ विनश्यतः T,P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनुतिष्ठन्ति ये कर्म समाराधन[1]मच्युतम् ।
असङ्करेण [2]ते ह्येवं सम्बन्धार्हा नरोत्तमाः ॥ ८१ ॥

येऽनभिज्ञास्तु देवेशं शङ्खचक्रगदाधरम् ।
तत्त्वेन येऽपि पुरुषा महोपनिषदीरितम् ॥ ८२ ॥

अर्थं न जानन्त्यधमास्तैः सम्बन्धं [3]विवर्जयेत् ।
तस्मात्सर्वप्रयत्नेन पञ्चरात्रोदिताः क्रियाः ।
येऽनुतिष्ठन्ति तैरेव सम्बन्धोऽभ्युदयावहः ॥ ८३ ॥

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
सिद्धान्तभेदपञ्चरात्राधिकारिव्यवस्थाविधिर्नाम एकविंशोऽध्यायः ॥

—:*:—

द्वाविंशोऽध्यायः ॥

मुद्रालक्षणविधिः ॥

ब्रह्मा :—

कीदृशी भगवन् मुद्रा तद्भेदा[4]श्चैव कीदृशाः ।
प्रयोजनं वा किं तस्याः कथ्यतां तदशेषतः ॥ १ ॥

श्रीभगवान् :—

अङ्गुलीरचना[5]भेदो मुद्रा यस्मात्प्रदर्शिता[6] ।
[7]हिंसकानामशेषाणां मुदं द्रावयति क्षणात् ॥ २ ॥

1. °उत्तमम् T, P_1, P_2 2. तेऽन्योन्यं T, P_1, P_2 ; तद्योगं M_2
3. विसर्जयेत् M_2 4. °चापि T, P_1, P_2 5. भेदाः° M_2 6. प्रदर्शितात् T, P_1 ; प्रदर्शिताः M_2 7. साङ्गुलीनामशेषाणां मुद्रा वारयति क्षणात् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततो [1]मुद्रा निरसनं तेषां [2]तस्याः प्रयोजनम् ।
प्रीणनं चापि देवानां कर्मणा सापि दर्शिता ॥ ३ ॥

प्रयोक्तव्याश्च रहसि न बहिर्जनसंसदि ।
मन्त्रमण्डलमुद्राणां गुप्तिरेषा सनातनी ॥ ४ ॥

गन्धलिप्तौ करौ कृत्वा मुद्रादर्शनमाचरेत् ।
अनामिकामध्यमयोः प्रवेश्याङ्गुष्ठमायतम् ॥ ५ ॥

विधाय मुष्टिं हृदये न्यसेद्धृदयमुद्रिकाम्[3] ।
सैषा मुष्टिमधो बध्द्वा स्थापयित्वा च मूर्धनि ॥ ६ ॥

अङ्गुष्ठाग्रेण हननं तर्जन्या शीर्षमुद्रिका ।
ऊर्ध्वाङ्गुष्ठं दृढं मुष्टिं बद्ध्वा न्यस्येच्छिखापदे ॥ ७ ॥

शिखामुद्रेयमुदिता, वर्ममुद्रा तु कथ्यते ।
प्रवेश्याभ्यन्तराङ्गुष्ठं बद्ध्वा मुष्टिप्रवेशनम् ॥ ८ ॥

उन्नम्य किञ्चिदग्रे च विततास्तेन मुष्टिना ।
भावयेद्वर्मणो [4]बद्धं सैषा कवचमुद्रिका ॥ ९ ॥

तर्जन्याङ्गुष्ठशिरसि स्फोटयेच्चक्रवत् [5]स्मरन् ।
दिक्षु सर्वासु शेषाभिर्मुष्टिं बद्ध्वा चतुर्मुख ॥ १० ॥

सैषास्त्रमुद्रा विज्ञेया, शिखामुद्रामधोमुखीम् ।
[6]विन्यसेत्तां भ्रुवोर्मध्ये नेत्रमुद्रेयमीरिता ॥ ११ ॥

षडङ्गमुद्रास्वेतासु हस्तस्सर्वत्र दक्षिणः ।
कनिष्ठादित्रिभिर्बद्ध्वा मुष्टिं साङ्गुष्ठमुन्नताम् ॥ १२ ॥

---

1. मुदा निरसनं A, T, P_1 2. सर्व° A 3. °मुद्रिका T, P_1, P_2
4. बन्धं T 5. क्रमात् M_2, P_2 6. विन्यस्यैनां M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधाय तर्जनीं तेन भ्रामयेदाशु चक्रवत् ।
अग्निप्राकारमुद्रेयं तयैवात्माभिरक्षणम् ॥ १३ ॥

नाभेरधस्ताद्विन्यस्य सव्यं करतलं पुनः ।
उत्तानमितरं तस्य विन्यसेदुपरीदृशी[1] ॥ १४ ॥

योगमुद्रा, करतलं सव्यं नाभेरधस्ततः ।
अवाङ्मुखं तदुपरि सव्येतरतलं पुनः ॥ १५ ॥

समाङ्गुष्ठं विरचयेद्योगसम्पुटमुद्रिका ।
योगाभ्यासेन[2] तत्त्वानां संहारोत्पतनेऽपि च ॥ १६ ॥

मुद्राद्वयमिदं ब्रह्मन् कथितं योगिनां हितम् ।
योगसम्पुट[3]मुद्रेयं मुद्रिता चटवत् कृता ॥ १७ ॥

ऊर्ध्वं स्यात्कुम्भमुद्रैषा तया स्नानं समाचरेत् ।
तर्जन्यानामिकाग्रं तु वेष्टयित्वा क्रमेण तत् ॥ १८ ॥

तथाङ्गुष्ठ[4]कनिष्ठे तु ज्ञेया संहारमुद्रिका ।
तत्त्वानां संहृतौ चैव देवतोद्वासने तथा ॥ १९ ॥

एषा मुद्रा प्रयोक्तव्या सर्वकर्मसु सर्वदा ।
संहताभिश्च तिसृभिरङ्गुलीभिश्च संहृतिः ॥ २० ॥

विमुक्ततर्जनी भूयः सृष्टिमुद्रेति कीर्तिता ।
आवाहने [5]तत्त्वसृष्टौ मुद्रैषा परिकीर्तिता ॥ २१ ॥

अङ्गुष्ठतर्जनीभ्यां तु संयोगस्तत्त्वमुद्रिका ।
तत्त्वन्यसनकाले च मुद्रैषा [6]परिकीर्तिता ॥ २२ ॥

---

1. °ईदृशम् M_2 2. योगाभ्यासे च T, P_1, P_2 3. °मुद्रैव च्छिद्रिता M_2
4. °कनिष्ठौ P_1, P_2 5. च सृष्टौ च A 6 समुदाहृता A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञानमुद्रापि सैवैषा स्यादज्ञानतमोपहा ।
[1]उभयोः करयोर्मध्यं मध्यमाभ्यां तु संस्पृशेत् ।। २३ ।।

उत्तानितौ करौ कृत्वा न्यास[2]मुद्रेति कीर्तिता ।
देवात्मदेहयोर्मन्त्र न्यासमुद्रेयमीरिता ।। २४ ।।

अङ्गुष्ठाभ्यां तु करयोस्तर्जन्योरुभयोरपि ।
मध्यमाभ्यां स्पृशेदन्यां विस्तृतानि यथा तथा ।। २५ ।।

जपमुद्रेति विज्ञेया जपकाले प्रदर्शयेत् ।
अङ्गुलीभिस्समस्ताभिर्दक्षिणेतरहस्तयोः ।। २६ ।।

सम्पुटीकरणं ब्रह्ममुद्रा संशब्दिता बुधैः ।
अङ्गुष्ठे द्वे कनिष्ठे द्वे तथा स्यात् तर्जनी द्वयोः ।। २७ ।।

सह[3]युक्ताग्रताश्लिष्टा[4] विष्णुमुद्रेति कीर्तिता ।
सा चैव श्लेषिताङ्गुष्ठा[5] समस्तेन परस्परम् ।। २८ ।।

उभयाङ्गुष्ठमुद्रा सा रुद्रस्य कथिता तव[6] ।
श्रोत्रे पिधाय पाणिभ्यां दण्डवद्दक्षिणं करम् ।। २९ ।।

प्रसारयेद् गुरूणां त्वभिवादनकर्मणि ।
सव्यहस्ताङ्गुलीस्सव्याः[7] कर्णे न्यस्य तथेतरम् ।। ३० ।।

---

1. कोशेषु ग्रन्थेषु च ऊर्ध्वयोरिति पाठः। अत्र उभयोरिति पाठः सनत्कुमारसंहितायां (ऋषिरात्रे २.१८) दृष्टः साधुः। 2. ०मुद्रा निगद्यते T, P_1, P_2; ०मुद्रेति कथ्यते M_2 3. ०युक्ताग्रगौ तच्छिष्टौ T, P_1, P_2; सङ्गयुक्ताग्रगाः शिष्टाः M_2 4. कोशेषु ग्रन्थेषु च शिष्टेति पाठः । सनत्कुमारसंहितानुसारेण (ऋषिरात्र २. ३४) श्लिष्टा इति पाठेन भाव्यम् । 5. कोशेषु ग्रन्थेषु च शेषिता इति पाठः दृश्यते । सनत्कुमारसंहितानुसारतः (ऋषिरात्र 2. 35) श्लेषिता इति पाठेन भाव्यम् । 6. तथा T 7. सर्वाः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रसरेद्विघ्नराजस्य मुद्रा विघ्नविनाशिनी ।
अन्तस्तु तर्जनीयुग्मं संहताङ्गुष्ठकद्वयम् ॥ ३१ ॥

मुद्रा भागवती सा, स्यात्करयुग्मं तु सम्पुटे ।
कृते, वराहमुद्रा सा सर्वसिद्धिकरी शुभा ॥ ३२ ॥

गुरुपङ्क्तिक्रमे ब्रह्मन् सैषा मुद्रा प्रदर्शिता ।
अपसव्ये करतले संस्मरेद्रक्तपङ्कजम् ॥ ३३ ॥

तन्मध्ये चिन्तयेदग्निं त्रिकोणं तेजसां निधिम् ।
अवाङ्मुखं करतलं कृत्वा द्रव्योपरि न्यसेत् ॥ ३४ ॥

ज्ञेया दहनमुद्रैषा द्रव्यशुद्धिप्रदा सदा[1] ।
सव्ये करतले श्वेतपङ्कजं षोडशच्छदम् ॥ ३५ ॥

कलाषोडशसंयुक्तं[2] शशिनं पङ्कजासन ।
तन्मध्ये चिन्तयित्वा तु स्रावितं चामृतं स्मरेत् ॥ ३६ ॥

तेनामृतेन तद्भस्म क्षालितं तूत्थितं स्मरेत् ।
आप्यायनस्य मुद्रैषा कथिता कमलासन ॥ ३७ ॥

अङ्गुष्ठे द्वे कनिष्ठे द्वे तथा स्यात्तर्जनी द्वयोः ।
शिष्टं प्रसारयेद्ब्रह्मन्नङ्गुलानि करद्वये ॥ ३८ ॥

मध्यमां दक्षिणकरेऽनामिकां च तथेतरे ।
[2]संहृत्य प्रसरेच्छेषं करयोरुभयोरपि ॥ ३९ ॥

ज्ञेया सुरभिमुद्रा सा[3] यागद्रव्यविशोधनी ।
हस्ताभ्यामञ्जलिं कृत्वा ईषद्विकसितं स्फुटम् ॥ ४० ॥

---

1. °प्रदायिनी M_2 2. °सम्पूर्णं M_1 3. स्यात् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आवाहनस्य मुद्रैषा दर्शनात्सन्निधिं भजेत्[1] ।
हृदये शिरसि द्वेऽपि(?) सम्पुटाञ्जलिरूर्ध्वगा ॥ ४१ ॥

प्रणाममुद्रा सा ज्ञेया क्षिप्रं देवप्रसादिनी ।
सा ज्ञेया वासुदेवादिमूर्तीनां कमलासन ॥ ४२ ॥

चतुर्विंशतिमूर्तीनां मीनादीनां तथैव च ।
मुद्रैषा चान्यमूर्तीनां कथिता कमलासन ॥ ४३ ॥

प्रसार्य करजान् सर्वान् मणिबन्धौ समेत्य तौ[2] ।
अन्तःप्रविश्य चाङ्गुष्ठौ तयोः पृष्ठमनुस्पृशेत् ॥ ४४ ॥

प्रसारयेत्पद्ममुद्रामासने सम्प्रदर्शयेत् ।
श्रियादीनां च सर्वासां देवीनां चतुरानन ॥ ४५ ॥

प्रोक्ता कमलमुद्रा [3]सा सर्वकामफलप्रदा ।
निबध्य दक्षिणाङ्गुष्ठं वामहस्तस्य मुष्टिगम् ॥ ४६ ॥

कृत्वा चाङ्गुष्ठतर्जन्यौ संयुक्ते प्रसृते समे ।
तिस्रस्तु [4]दक्षिणस्यान्या बध्नीयान्मुष्टिमूर्ध्वगाः ॥ ४७ ॥

शङ्खमुद्रेयमुदिता ज्ञानदा मोक्षदाचिरात् ।
मणिबन्धसमौ हस्तौ तिर्यक् सम्भ्राम्य च[5] क्रमात् ॥ ४८ ॥

पर्यायेण प्रयोक्तव्या चक्रमुद्रा महोदया ।
मुष्टिं कृत्वा तु हस्ताभ्यामङ्गुष्ठौ [6]विततावुभौ ॥ ४९ ॥

मध्यमाङ्गुलियुग्मं तु [7]ऋजुमूर्ध्वं प्रसारयेत् ।
शेषाभिरङ्गुलीभिस्तु बन्धयेयुः परस्परम् ॥ ५० ॥

---

1. सन्निधिर्भवेत् M_2 2. तु T 3. स्यात् M_2 4. दक्षिणस्यान्यां M_2 दक्षिणन्यासा T, P_1 5. चक्रवत् M_1 6. विनतौ M_2 7. दीर्घीकृत्य M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संश्लिष्टौ कूर्परौ द्वौ तु गदामुद्रेयमीरिता ।
तर्जन्यग्रं मध्यमया संस्पृशेच्चापमुद्रिकाम्[1] ॥ ५१ ॥

मुष्टिं कृत्वा वामहस्तमङ्गुष्ठमृजुमूर्ध्वतः ।
अपसव्यकरेणैव तदङ्गुष्ठं तु बन्धयेत् ॥ ५२ ॥

प्रसार्य दक्षिणाङ्गुष्ठं ज्ञेया मुसलमुद्रिका ।
कनिष्ठाङ्गुलिपूर्वं तु संहृत्याङ्गुष्ठकेन तु ॥ ५३ ॥

निबध्य तर्जनीं भूयस्तदग्रं नतमेव च ।
खड्गमुद्रा तु सा ज्ञेया सर्वदुष्टभयङ्करी ॥ ५४ ॥

हस्ताभ्यां लम्बयेद्वक्षस्त्वङ्गुल्यग्रैः परस्परम् ।
बन्धयेद्वनमाला [2]सा अङ्गुष्ठौ द्वौ तु संहरेत् ॥ ५५ ॥

आखण्डलादिदेवानां मुद्रा चाञ्जलिसंज्ञिता ।
उभौ करतले पृष्ठौ संश्लिष्टौ तु कनिष्ठकौ ॥ ५६ ॥

बन्धयेत्तर्जनीयुग्मं प्रसरेत्तुण्डवत् क्रमात् ।
अङ्गुष्ठौ द्वौ पादयुग्ममधस्ताल्लम्बयेत् क्रमात् ॥ ५७ ॥

मध्यमानामिकाभ्यां तु करयोरुभयोरपि ।
पक्षवच्चालनं कुर्याज्ज्ञेया गरुडमुद्रिका ॥ ५८ ॥

कनिष्ठादित्रयं ब्रह्मन् संहृत्याङ्गुष्ठकेन च ।
निबध्य तर्जनीं भूयो विष्वक्सेनस्य मुद्रिका ॥ ५९ ॥

प्रसार्य करजान् सर्वान् विरलानूर्ध्वगामिनः ।
कृत्वा हस्तस्य चायामं तदग्रान् कुञ्चयेत्क्रमात् ॥ ६० ॥

---

1. धनुमुद्रिकाम् M_1 2. स्यात् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फणिफणाग्रसदृशा ज्ञेयानन्तस्य मुद्रिका ।
चण्डादीनां भवेन्मुष्टिमुद्रैषा बलिमुद्रिका ॥ ६१ ॥

अङ्गुष्ठानामिकाभ्यां तु तथा स्याद्गन्धमुद्रिका ।
मुष्टिमुद्रा तु मुष्टिस्स्यादङ्गुष्ठेन तु वेष्टिता ॥ ६२ ॥

ज्ञानमुद्रेति विज्ञेया सैव मुक्तकनिष्ठिका ।
गन्धमुद्रेति विज्ञेया विमुक्तानामिका च सा ॥ ६३ ॥

पुष्पमुद्रेति विज्ञेया विमुक्ता मध्यमा तथा ।
मध्यमाङ्गुष्ठशिरसि सङ्गतिर्ह्यग्रपर्वणा ॥ ६४ ॥

यज्ञोपवीतमुद्रा स्यादङ्गुष्ठेन कनिष्ठिका ।
आकल्पमुद्रिका ज्ञेया विष्णोः प्रीतिकरी शुभा ॥ ६५ ॥

संहताङ्गुलीनां तु कृत्वा व्यतिकराङ्गुलीः ।
सहैवोर्ध्वीकृताङ्गुष्ठौ कराभ्यां धूपमुद्रिका ॥ ६६ ॥

ऊर्ध्वं तु मध्यमां कृत्वा संहृत्याङ्गुष्ठमेव च ।
तर्जन्यनामिकाभ्यां तु संहृत्य तु कनिष्ठिकाम् ॥ ६७ ॥

तेनैव वामहस्तेन दक्षिणेन कृता [1]तु या ।
दीपमुद्रेति सा प्रोक्ता देवदेवप्रियावहा ॥ ६८ ॥

अन्येषामुपचाराणां मुद्रा [2]स्यात्सा कृताञ्जलिः ।
या चाप्यूर्ध्वकृताङ्गुष्ठा शेषाभिर्मुष्टिभिः कृता ॥ ६९ ॥

सा ज्ञेया प्रतिमामुद्रा, देवदेवप्रियावहा[3] ।
उत्तानीकृत्य हस्तं च वक्रिताग्राङ्गुलिभिः क्रमात् ॥ ७० ॥

---

1. तथा M_2 2. सा स्यात् P_1, P_2 3. सा चैषा यानमुद्रिका M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अङ्गुष्ठं च पृथक्कृत्वा ज्ञेया स्वागतमुद्रिका ।
सा चैव प्रार्थनामुद्रा सा चैषा दानमुद्रिका ॥ ७१ ॥

पञ्चाङ्गुलीनामग्रं तु संयोज्य कमलासन ।
अन्वारब्धेन वामेन पाणिना दक्षिणेन च ॥ ७२ ॥

निवेद्य परमान्नादिमुद्रा सा ग्राससंज्ञिता ।
मध्यमानामिकाभ्यां त्वङ्गुष्ठाग्रेण सङ्गतिः ॥ ७३ ॥

कनिष्ठातर्जनीयुग्मं [1]दीर्घं कृत्वा यथातथा ।
तिलव्रीहियवादीनां होमकर्मणि शस्यते ॥ ७४ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे
चर्यापादे मुद्रालक्षणविधिर्नाम द्वाविंशोऽध्याय ॥

त्रयोविंशोऽध्यायः ॥

मातृकाद्यर्थवर्णनम् ॥

ब्रह्मा :—

संज्ञाभेदस्तु वर्णानां मन्त्रोद्धारश्च कीदृशः ।
प्रयोजनं च किं तस्य कथ्यतां तदशेषतः ॥ १ ॥

भगवान् : —

[2]अहं ते कथयिष्यामि श्रृणु [3]सर्वं यथातथम् ।
ह्रस्वदीर्घविभागेन भिन्नाः पद्मज मन्मुखात् ॥ २ ॥

अकाराद्याः स्वरा जाताः क्रमादन्येऽर्धमातृकाः ।
ककाराद्याश्च चक्रे ते न्यस्य पूज्याः परिष्कृते ॥ ३ ॥

---

1. दीर्घीकृत्य यथातथम् T, P_1, P_2 2. हन्त ते M_1 3. गुह्यं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रशस्ते निर्जने [1]गुप्ते भूभागे [1]शोभने समे ।
हस्तद्वयेन विस्तीर्णं स्थण्डिलं चतुरश्रकम् ॥ ४ ॥

दर्पणोदरसङ्काशमुन्नतं चतुरङ्गुलैः ।
मृद्भिः [3]पिधाय सुषिरं[4] गोमयेनोपलिप्य च ॥ ५ ॥

प्रोक्ष्य चक्रं विधातव्यं षोडशारपरिष्कृतम् ।
नाभिनेमिसमायुक्तं चन्दनक्षोदरेखया ॥ ६ ॥

तन्मध्ये छन्दसामादिररभूषु स्वरास्तथा ।
स्पर्शाक्षरं नाभिमध्ये नेमिमध्ये च यादयः ॥ ७ ॥

एवं न्यस्तेषु वर्णेषु द्वादशाक्षरविद्यया ।
अर्घ्याद्यैः सकलैर्भोगैर्वर्णात्मानं समर्चयेत् ॥ ८ ॥

चक्रसंस्थितवर्णानां नामभेदः प्रदर्श्यते ।
उद्गीथश्छन्दसामादिः प्रणवस्तारकस्तथा ॥ ९ ॥

ब्रह्मा च ब्रह्मकोशश्च व्यापी चोङ्कार इत्यपि ।
नामानि प्रथितान्यष्टावकारो विष्णुरुच्यते ॥ १० ॥

ओङ्कारादिश्चाप्रमेय आकारो मधुसूदनः ।
आदिदेवो गोपनश्च स्यादिकारस्त्रिविक्रमः ॥ ११ ॥

माया बन्धुश्च रामश्च कथ्यते तदनन्तरम् ।
पञ्चबिन्दुर्महामाया वामनः स्मर्यते तथा ॥ १२ ॥

उकारो भुवनाह्वानः श्रीधरश्चोदयस्तथा ।
ऊकारश्चोर्ध्वलोकेशो हृषीकेशो [5]गुहालयः ॥ १३ ॥

---

1. शुद्धे M_1 2. शोधिते A 3. विधाय M_2, P_2; विहाय A, P^1
4. सुसमं M_2 5. गुहाशयः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋकार ऋतधामा च पद्मनाभस्तथोच्यते ।
ॠकारः पीठनामा स्याद्योगी दामोदरस्तथा ॥ १४ ॥

ऌकारः केशवो गोप्ता [1]प्रज्ञाधारो महेश्वरः ।
ॡकारो दीर्घघोणश्च[2] नारायणसमाह्वयः ॥ १५ ॥

सम्प्रसारणनामा स्यादेकारो माधवाह्वयः ।
देवदत्तो मृगेशः स्यादैकारो [3]गोघनः स्मृतः ॥ १६ ॥

गोविन्दो वीरसेनश्च स्यादोकारश्चतुर्मुख ।
ओतदेहो वासुदेवो ब्रह्मसाधन इत्यपि ॥ १७ ॥

औकार औषधाह्वान और्वः सङ्कर्षणो मनुः ।
अंकारः कपिलाक्षश्च प्रद्युम्नो देवता स्मृतः ॥ १८ ॥

अःकारश्चानिरुद्धाह्वः कलान्त[4]स्सर्गिसंज्ञितः ।
ककारः कमलो ब्रह्मा करालश्शङ्खिनः स्मृतः ॥ १९ ॥

खकारः [5]खर्वदेहश्च चक्री गरुडवाहनः ।
गदध्वंसी गकारश्च गदी पञ्चात्मकः स्मृतः ॥ २० ॥

पद्मपाणिर्घकारस्तु पञ्चात्मा गजवाहनः ।
ङकारश्शार्ङ्गपाणिश्च एकदंष्ट्रः कपिध्वजः ॥ २१ ॥

वक्रतुण्डः खड्गधरश्चकारः प्रेतनायकः ।
छकारश्छलविध्वंसी स्वच्छन्दः कुण्डली स्मृतः ॥ २२ ॥

मुसली जन्महन्ताच जकारः ककुभः स्मृतः ।
झकारः सामवेदात्मा [6]झषाशी च सुवर्णभाः ॥ २३ ॥

---

1. प्रजाधरो M_2 2. °घोषश्च M_2 3. घनदः M_2 4. सर्गिसंज्ञिकः T, P_1, P_2; स्वर्गसंज्ञिकः M_2 5. सर्व° M_2 6. सुवर्णो झषसंज्ञिकः A; झषांशी वसुवर्णभाः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ञकारश्चन्द्रधवलः पाशपाणिर्भृगुः स्मृतः ।
टकारो हृदयाह्लादी खेटकी पर्वतः स्मृतः ॥ २४ ॥

ठकारः कौस्तुभो मेघी तोमरो दुस्सहः स्मृतः ।
डकारः पुण्डरीकाक्षो [1]झषो भूमिर्वनालयः ॥ २५ ॥

ढकारः पुष्पभद्रश्च दृढकर्मा प्रतर्दनः ।
णकारो वनमाली [2]स्यात्प्रचण्डस्सुमुखः स्मृतः ॥ २६ ॥

एकनेत्रस्तकारः स्याद्वैराजो [3]विजयः स्मृतः ।
थकारस्सर्वरोधश्च रसात्मा सुप्रतिष्ठितः ॥ २७ ॥

दकारो वैधरो दृष्टिरत्रिस्सत्रिपुरान्तकः ।
धकारो धनदः पुण्यः सुभगो मोहनाशनः ॥ २८ ॥

नकारो भद्रपाणिः स्याद्विभ्रेशो मानुषेश्वरः ।
पकारः पापहननः पवित्रः पश्चिमाननः ॥ २९ ॥

फकारः फुल्लनयनः शिखण्डी स्याद्विक्रमणः ।
बकारो जृम्भलो ह्रस्वो मतिमान् कालनेमिजित् ॥ ३० ॥

भल्लायुधो भकारश्च सुभद्रः सूक्ष्मलोचनः ।
मकारो मन्दरो दक्षो माधवीपाटलप्रियः ॥ ३१ ॥

यकारः पुरुषात्मा स्याद्वायुश्शङ्खश्चतुर्गतिः ।
रेफोऽनलो महाज्वालो विश्वात्मा सर्वदाहकः ॥ ३२ ॥

लकारः पीतवर्णाभो महेन्द्रः पुलहः स्मृतः ।
वकारो वरुणः कुम्भः पीयूषात्मा सुधाकरः[4] ॥ ३३ ॥

---

1. मौसलोऽखण्डविक्रमः A 2. च शास्ता वैकुण्ठपालकः A 3. स्रग्धरः स्मृतः A 4. कोशेषु ग्रन्थेषु चोपलभ्यमानः सुधारस इति पाठो यद्यपि बोधमावहति, अथापि सुधाकर इति प्रसिद्धपदत्वेन पाठेन समीचीनेन भाव्यमित्यूह्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शकारः शुभदो लक्ष्मीः श्रीवत्सो वित्तवर्धनः ।
षकारः क्रोधरूपी स्यादुग्रात्मा शत्रुसूदनः ॥ ३४ ॥

पूर्णचन्द्रः कलात्मा स्यात् सकारश्शुक्लसंज्ञितः ।
द्वादशात्मा हकारः स्याद्दीप्तिमान् भास्करः स्मृतः ॥ ३५ ॥

ळकारो डुण्डुभो [1]भर्गो विष्कम्भो [2]विषमध्वनिः ।
क्षकारो गरुडोऽनन्तः कूटो नरहरिः स्मृतः ॥ ३६ ॥

अनुस्वारो ध्रुवो बिन्दुर्यष्टिश्चन्द्रार्ध उच्यते ।
स्वाहाकारो हुतान्नश्च टेठेति[3] परिकीर्तितः ॥ ३७ ॥

नमस्कारो नतिर्वर्णसंज्ञा इत्यादयः स्मृताः ।
चक्रसंस्थितवर्णानां देवता कथ्यते क्रमात् ॥ ३८ ॥

सर्वेषामपि वर्णानामकारः कारणं यतः ।
सर्वकारणरूपत्वाद्विष्णुस्तस्याधिदेवता ॥ ३९ ॥

आकारस्य मधुद्वेषी स्यादिकारस्त्रिविक्रमः ।
ईकारो वामनो देवस्तथोकारः श्रियः पतिः ॥ ४० ॥

ऊकारस्य हृषीकेशो वर्णस्य स्यादनन्तरम् ।
पद्मनाभ ऋकारस्य देवो दामोदरो भवेत् ॥ ४१ ॥

[4]ॠकारः केशवो देवो ऌकारस्य च देवता ।
नारायणोऽधिदेवः स्यात् ॡकारस्य चतुर्मुख ॥ ४२ ॥

माधवोऽनन्तरार्णस्य ह्रस्य गोविन्दो देवता भवेत् ।
ऐकारस्य तथार्णस्य स्यादोकारस्य देवता ॥ ४३ ॥

---

1. गर्भो M_2; वर्गो A 2. वृषभ° M_2 3. छन्देति M_2 4. ऋकारस्य स्थितः शम्भुः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वासुदेवस्तथार्णस्य स्यादौकारस्य देवता ।
सङ्कर्षणस्तथाङ्कारो भवेत्प्रद्युम्नदैवतः ॥ ४४ ॥

अःकारस्थोऽनिरुद्धः स्याद्देवा इत्थं क्रमादचाम् ।
देवताः कथिता ब्रह्मन् हलां सम्प्रति कथ्यते ॥ ४५ ॥

ककारस्य विधिर्देवः खकारस्य सुदर्शनः ।
गकारस्य घकारस्य [1]वाणी शार्ङ्गश्च देवता ॥ ४६ ॥

ङकारस्य चकारस्य देवो नन्दक इष्यते ।
छकारस्य यमो देवो जकारस्य च देवता ॥ ४७ ॥

मुसली स्यात् [2]झकारस्तु भवेदङ्कुशदैवतः ।
ञकारस्य भृगुर्देवः टकारस्य महीधरः ॥ ४८ ॥

मेरुः कौस्तुभदैवत्यः ठकारो डस्तु पार्थिवः ।
ढकारो मातृदैवत्यो णकारो वनमालिकः ॥ ४९ ॥

तकारस्य तथा दृष्टिस्थकारो रसदैवतः ।
अत्रिर्दकारस्य भवेद्धकारस्य धनेश्वरः ॥ ५० ॥

लम्बोदरो नकारस्य पकारस्य पवित्रकः ।
शिखण्डवान् फकारस्य बकारस्य तु देवता ॥ ५१ ॥

जृम्भलो[3] भाक्षरस्य स्यात्सुभद्रो देवता तथा ।
दक्षो मकारस्य भवेद्यकारो वायुदैवतः ॥ ५२ ॥

धूमध्वजः स्याद्रेफस्य लकारस्य दिवस्पतिः ।
वकारो वरुणेशानः शकारो माधिदैवतः ॥ ५३ ॥

---

1. वाणीशार्ङ्गाधिदेवते M_2 2. झकारस्य M_2 3. जृम्भलस्तु भकारस्य M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रोधाकारः षकारः स्यात् सकारश्चन्द्रदैवतः ।
सहस्रांशुर्हकारस्य ळकारो [1]भर्गदैवतः ॥ ५४ ॥

नरसिंहः क्षकारस्य कथिताः कादिदेवताः ।
वर्णानां चक्रनिष्ठानां नामान्यपि च देवताः ॥ ५५ ॥

यो वेत्ति तस्य फलदा मन्त्रिणश्चतुरानन ।
यावतो यस्य वर्णस्य यन्नक्षत्रं विदुर्बुधाः ॥ ५६ ॥

स च [2]तावांस्तत्र वर्णाः क्रमादिह निगद्यते ।
आद्यं विना स्वरं वर्णा वाद्यावाश्वयुजौ स्मृतौ ॥ ५७ ॥

इकारस्यापि भरणी कृत्तिकात्रयमुत्तरम् ।
चतुष्टयमृकारादि रोहिण्येकम[3]थेडका ॥ ५८ ॥

रौद्रमप्येकवर्णः[4] स्यात्पुनर्वस्वोर्द्विसंमितम्[5] ।
द्वयमेव तथा [6]पौष्णमाद्यन्तं वा मतान्तरे ॥ ५९ ॥

कादिषु प्रथमं पुष्यं द्वयं सार्पं द्वयं मघा ।
एकमर्यमणं युग्मं भर्गदैवतमुच्यते ॥ ६० ॥

युग्ममेव तु सावित्रं द्वयमिन्द्राधिदैवतम् ।
एकं निष्ट्या विशाखे द्वे त्रयं मैत्रमनन्तरम् ॥ ६१ ॥

ऐन्द्रमेकं त्रयं मूलं पूर्वमाषाढमेककम् ।
आषाढमुत्तरं चैकमेकमेवाभिजिन्मतम् ॥ ६२ ॥

द्वयं वैष्णवमेकन्तु श्रविष्ठा शततारकम् ।
एकमेव त्रियंशादिवर्णस्स्यादज एकपात् ॥ ६३ ॥

---

1. भगदैवतः M_2 2. तासां M_2 3. अथेलवली M_2; अथेडका P_2
4. अप्येकमेव T, P_1, P_2 5. द्वयं मतम् T, P_1, P_2 6. पूर्णिमाद्यन्तं T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहिर्बुध्न्यस्त्रयो वर्णा इति वर्णेषु तारकाः ।
आदौ चतुष्टयं मेषो वर्णानामृषभस्त्रिकम् ॥ ६४ ॥

तथैव मिथुनं युग्मं कुलीरं मृगराट् तथा ।
शिष्टद्वयंशादयस्तु कन्या कुः प्रथमं तुला ॥ ६५ ॥

चवर्गो वृश्चिकश्चापः टवर्गः सद्भिरुच्यते ।
तवर्गो मकरः [1]कुम्भः पवर्गोऽन्त्यस्य यादयः ॥ ६६ ॥

नक्षत्रं यत्साधकस्य मन्त्रस्याद्यक्षरस्य यत् ।
नरनार्यादिव तयोर्योगायोगौ परीक्षयेत् ॥ ६७ ॥

चतुष्पदं लिखित्वोर्व्यां तत्राकारादि निक्षिपेत् ।
यस्मिन् पदे साधकस्य नामाद्यर्णलिपिस्तथा ॥ ६८ ॥

तत्रैव चेद्भवेन्म[2]न्त्रस्याद्यं वर्णमवस्थितम् ।
तत्सिद्धं स्याद्द्वितीये तु साध्यं विद्यादनन्तरे ॥ ६९ ॥

पदे [3]सुसिद्धं तुर्ये तु वैपरीत्याय कल्पते ।
सिद्धे सिद्धं जपाद्यैस्तु साध्ये साध्यं सुसिद्धके ॥ ७० ॥

अधीतमात्रे महते फलाय भवति ध्रुवम् ।
पदे तु वैरिणः स्याच्चेल्लिपिरध्येतृनाशनम् ॥ ७१ ॥

आनुगुण्यं परीक्षेत निमित्तानि परीक्ष्य च ।
साधकस्साधयेन्मन्त्रं देवस्य कुटिला गतिः ॥ ७२ ॥

चतुर्षु मूलमन्त्रेषु नानुगुण्यं परीक्षयेत् ।
तारमष्टाक्षरं चैव द्वादशाक्षरमेव च ॥ ७३ ॥

---

1. कुम्भे T 2. वर्णमन्त्रस्याद्यमवस्थितम् A 3. सिद्धं तुरीये तु T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्णुगायत्र्यपि तथा चत्वारः प्रथमे मताः ।
द्वात्रिंशदक्षराधिक्ये मूलमन्त्रं दशाधिके ॥ ७४ ॥

बीजमन्त्रास्समस्तेषु पूर्वे वार्धकशोभनाः ।
इतरे यौवने तद्वत् सर्वे बाल्येऽपि शोभनाः ॥ ७५ ॥

स्त्रीपुन्नपुमिति त्रैधं भजन्ते मन्त्रजातयः ।
संस्त्यानमन्त्राः स्वाहान्ता नमोऽन्तास्तु नपुंसकाः ॥ ७६ ॥

शेषाः पुरुषमन्त्राः स्युरिति त्रिविधमीरितम् ।
उच्चाटने च वश्ये च विद्वेषे क्षुद्रकर्मसु ॥ ७७ ॥

स्त्रियः प्रशस्ता अलिङ्गाः कर्मस्वन्यत्र पूजिताः ।
पुंलिङ्गेषु तु [1]मन्त्रेषु दिङ्मात्रं किञ्चिदुच्यते ॥ ७८ ॥

फडन्ताः मरणाद्यर्थे शस्ता भूताद्युपद्रवे ।
हुङ्कारान्ताः प्रशस्यन्ते वौषडन्तास्तु ते पुनः ॥ ७९ ॥

आप्यायने नियुज्यन्ते धर्मकामार्थमुक्तिषु[2] ।
चतुर्थ्यन्ताः प्रशस्यन्ते ओमन्ताः सर्वसिद्धिदाः ॥ ८० ॥

सर्वमन्त्राः सर्वफला गुरुवक्त्राद्यधिश्रुताः ।
यदृच्छया श्रुतो मन्त्र[3]श्छन्नेनाथ च्छलेन वा ॥ ८१ ॥

पत्रे क्षितौ वा व्यर्थः स्यात्प्रत्युतानर्थकः स्मृतः ।
एकस्सुसाधितो मन्त्रो जपहोमादितर्पणैः ॥ ८२ ॥

स साधकस्य सर्वार्थं प्रसूते नात्र संशयः ।
सम्यक्सिद्धैकमन्त्रस्य नासाध्यमिह किंचन ॥ ८३ ॥

1. सर्वेषु M_2 2. °मूर्तिषु T, P_1, P_2 3. छन्देन° M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किं पुनर्बहवो यस्य का कथा हरिरेव सः ।
कुशेषु [1]कृष्णकृत्तौ तु [2]वृस्यामेकान्तभूमिषु ॥ ८४ ॥

प्रागादिदिङ्मुखो भूत्वा न तु याम्यमुखः क्वचित् ।
उपविष्टो जपेन्मन्त्रं सपवित्रकरश्शुचिः ॥ ८५ ॥

धृतोर्ध्वपुण्ड्ररचनो नान्यां वाचमुदीरयन् ।
गुरुं प्रणम्य प्रथमं प्रणवप्रमुखं जपेत् ॥ ८६ ॥

देवतायतने नद्यां शैले सागररोधसि ।
वने वा तीर्थदेशे वा न्यग्रोधाश्वत्थयोरधः ॥ ८७ ॥

अन्यत्र वा शुचौ देशे कुटीं कृत्वारभेत सः ।
अनश्नन् वायुभक्षो वा यद्वाऽभक्षो जलाप्लुतः ॥ ८८ ॥

जीर्णपर्णाशनश्शाकभोजनो वा फलानि वा ।
पक्वानि मूलान्यथवा भुञ्जानो लवणं विना ॥ ८९ ॥

यवोष्णिकालाजदुग्धभिक्षाहारो जितेन्द्रियः ।
पूर्वं पूर्वं प्रशस्तं स्यादशनीयं[3] विशोधनन् ॥ ९० ॥

[4]मन्त्रस्य देवता तारतिथिवारेषु साधकैः ।
द्वादश्यां[5] पौर्णमास्यां वा ग्रहणे कर्म शस्यते ॥ ९१ ॥

विशेषयजनं कुर्वन् चक्राब्जे जपमाचरेत् ।
शिखी वा जटिलो वापि वल्कलाजिनकर्पटः ॥ ९२ ॥

त्रिसन्ध्यं स्नाननियतस्तैलाभ्यङ्गविवर्जितः ।
यावदुक्तं कृतयुगे मन्त्राभ्यसनमिष्यते ॥ ९३ ॥

---

1. कृष्णत्वचि वा T, P_1, P_2 2. तस्यामेकान्त° M_2 3. °दर्शनीयं T
4. मन्त्राधिदेवता P_1 5. एकादश्यां A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रेतादिषु त्रिषु प्रोक्तं द्विगुणं त्रिगुणं क्रमात् ।
चतुर्गुणं परं वापि ततो मन्त्रफलेच्छया ॥ ९४ ॥

सर्वसिद्धिकरो मन्त्रः सिद्धिः सिद्ध्येत् क्रियावशात् ।
क्रियाधिगम्यते शास्त्राच्छास्त्रं देशिकपूरुषात् ॥ ९५ ॥

मननं [1]सर्वसत्त्वानां त्राणं [2]संसारसागरात् ।
मननत्राणसंयोगान्मन्त्र इत्युच्यते बुधैः ॥ ९६ ॥

अथवा गोपनीयत्वाद्धेतोर्मन्त्रयते परम् ।
त्रप्रत्ययान्तः पुंलिङ्गस्तथायं [3]लोकवेदयोः ॥ ९७ ॥

मन्त्रेण स्थाप्यते देवो मन्त्रेणैव विसृज्यते ।
ज्ञानानां तत्परं ज्ञानं मन्त्रज्ञानं विदुर्बुधाः ॥ ९८ ॥

ऐहिकामुष्मिकं सर्वं मन्त्रेणैव प्रसिद्ध्यति ।
छन्दो[4]मन्त्राक्षरे यत्तद्दर्शनादृषिरुच्यते ॥ ९९ ॥

दर्शनं च फलस्याहुर्न पुनर्मन्त्रदर्शनात् ।
देवता मन्त्रफलदा मन्त्रेण प्रतिपादिताः ॥ १०० ॥

ब्रुवन्ति निलयं क्षेत्रं तत्त्वं [5]तत्त्वविदो विदुः ।
मन्त्राक्षराणां शुक्लादि[6]मन्त्रभेदः प्रकीर्तितः ॥ १०१ ॥

मूलमन्त्रादिमन्त्राणां साधनं शृणु साम्प्रतम् ।
विधाय [7]यागयोग्यानि पुष्पमूलफलानि च ॥ १०२ ॥

शाकादीनि तु पर्णानि वर्जयेदितराणि तु ।
गृह्णीयाद्यानि वर्ज्यानि तानि वक्ष्यामि पद्मज ॥ १०३ ॥

---

1. शिष्ट॰ M_1 2. तु भवसागरात् M_2 3. वेदलोकयोः M_2
4. ॰मात्राक्षरो M_2 5. तत्वविभेदयोः A 6. ॰वर्ण॰ T; ॰वर्णभेदाः प्रदर्शिताः A
7. योग॰ M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उग्रगन्धान्यगन्धानि दुर्गन्धानि परित्यजेत् ।
वस्त्रार्कपर्णस्पृष्टानि पुष्पाण्याराधने हरेः ॥ १०४ ॥

उन्मत्तशाल्मलीबीजपूरधत्तूरिकाजपाः ।
बन्धूकासितकोरण्डद्रोणकन्यापराजिताः ॥ १०५ ॥

बृहत्यगस्त्यकूष्माण्डपटोल्यारग्वधैस्समाः ।
निर्गुण्डी दमयन्ती च किंशुकं पारिभद्रकम् ॥ १०६ ॥

कोशातकी प्रियालश्च तपस्वी गिरिमल्लिका ।
निम्बव्याघ्रीकरञ्जश्चीषण्डपाण्डुरपट्टिका ॥ १०७ ॥

[1]विभीतकिङ्किणीकोललाङ्गली शङ्खपुष्पिणी ।
नारङ्गनन्दिकावर्तवल्लिका[2]क्षीरिकादिषु ॥ १०८ ॥

पुष्पाणि वर्जनीयानि ; शाकान्यपि तथा श्रृणु ।
श्रृङ्गाटं गृञ्जनं शिग्रु नालिका सुनिषण्णकम् ॥ १०९ ॥

सौभाञ्जनं रक्तबाष्पं ग्रामबाष्पं त्रिकण्टकम् ।
[3]द्रोणपत्रं लिलिङ्गां च तण्डुलीयं तपस्विनी ॥ ११० ॥

कोशातकी च वर्ज्यानि ; मूलेषु त्याज्यमुच्यते ।
छत्राकं लशुनं तालं फलमूले पटोलिका ॥ १११ ॥

[4]बिम्बकूष्माण्डनारङ्गमूलानि परिवर्जयेत् ।
बिल्वोदुम्बरबोध्यर्कवटपत्रेषु भोजनम् ॥ ११२ ॥

वर्जयेत्साधको यत्नादालस्यं दीर्घचिन्तनम् ।
विवादनिद्रानिर्वेदनिग्रहानुग्रहांस्त्यजेत् ॥ ११३ ॥

---

1. विभति किङ्गिण्यङ्कोल° T, P 2. °मल्लिका° T, M_2 3. द्रोणं पाटली निम्बक M_2; द्रोणी पटोली निम्बं च तण्डुली च तपस्विनी A 4. बीजकूष्माण्ड° A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पद्माक्षमालां ग्रीवायां लम्बयेत्साधकश्शुचिः ।
धारयेद्धैमयं चक्रं सर्वविघ्नोपशान्तये ॥ ११४ ॥

जपकालेऽथवा चक्रशङ्खाकृतिर्यथा तथा ।
शार्ङ्गखड्गगदाकारं लाञ्छनं लाञ्छयेत्सुधीः ॥ ११५ ॥

शरीरावयवे बाह्वोर्वक्षोभुवि चतुर्मुख ।
चक्रादिपञ्चभिर्ज्ञानलक्षिताङ्गपरिष्कृतम् ॥ ११६ ॥

पुरुषं दूरतो दृष्ट्वा भूताद्या भयविह्वलाः ।
विद्रवन्ति तथा घोराः [1]पापा वीक्षणमात्रतः ॥ ११७ ॥

विनश्यन्ति, तथा पुण्यपुञ्जानि प्रविशन्ति च ।
प्रणमन्ति तथा देवा देवर्षिप्रवरास्तथा ॥ ११८ ॥

अकृत्यमपि कुर्वाणो भुञ्जानो वा यतस्ततः ।
पापैर्न लिप्यते देही चक्राद्यायुधलाञ्छितः ॥ ११९ ॥

हव्यं कव्यं च दातव्यं तस्मै [2]तद्दानमक्षयम् ।
अविधाय शिखाबन्धमकृत्वा तिलकं मृदा ॥ १२० ॥

अधारयंस्ततो दर्भान् सूत्रैरनुपवीतयन् ।
कुर्वन् कर्माणि न फलं प्राप्नुयात्पुरुषाधमः ॥ १२१ ॥

नग्नो मुक्तशिखाबन्धो वाससा चावकुण्ठितः ।
गच्छन् शयानः प्रलपन् न जपात् फलमश्नुते ॥ १२२ ॥

जपेन्मौनं समास्थाय सह सम्भाषणादिकम् ।
प्रतिलोमादिभिर्नीचैर्न कुर्यान्मन्त्रवित्तमः ॥ १२३ ॥

---

1. पापिष्ठाः क्षणमात्रतः T, P_1, P_2; तत्प्रद्वीक्षणमात्रतः A 2. तद्दत्तम्° M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्याहरेदपि कार्यार्थं नित्यं तद्गतमानसः ।
द्वादशाक्षरमन्यं वा जपेदक्षरलक्षकम् ॥ १२४ ॥

तदर्धं जुहुयादग्नौ होमशालां प्रकल्पयेत् ।
धूमनिर्गमनोपेतां चतुरश्रां [1]मनोरमाम् ॥ १२५ ॥

तन्मध्ये कल्पयेत्कुण्डमाहुत्यनुगुणं शुभम् ।
वृत्तं वा चतुरश्रं वा मेखलात्रयसंयुतम् ॥ २२६ ॥

योनिमन्मृत्स्नया ब्रह्मन् मानं कुण्डस्य कथ्यते ।
अयुताहुतिपर्यन्ते होमे हस्तप्रमाणकम् ॥ २२७ ॥

द्विहस्तं नियुते कुण्डं त्रिहस्तं प्रयुते तथा ।
शङ्खहोमे चतुर्हस्तं महाशङ्खे तु षट्करम् ॥ २२८ ॥

बृन्दाहुतौ सप्तहस्तं महाबृन्देऽष्टहस्तकम् ।
अर्बुदे नवहस्तं स्यान्न्यर्बुदे दशहस्तकम् ॥ १२९ ॥

एकादशकरं खर्वे परार्धे द्वादशायतम् ।
त्रयोदशकरं मध्येऽन्तिके तु चतुर्दश ॥ १३० ॥

पद्मे कराः पञ्चदश महापद्मे तु षोडश ।
समुद्रे विंशति[2]करं [3]महौघे द्वाविंशतिः स्मृता ॥ १३१ ॥

इतोऽधिकाहुतिविधौ चतुर्विंशतिहस्तकम् ।
प्रसङ्गादुच्यते संख्या तां क्रमेणावधारय ॥ १३२ ॥

एकं दशशतं संख्या सहस्रमयुतं तथा ।
नियुतं प्रयुतं शङ्खो महाशङ्खस्ततः परम् ॥ १३३ ॥

---

1. मनोहराम् A 2. ०करा: T 3. ममौघे M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बृन्दं तथा महाबृन्दमर्बुदं न्यर्बुदं तथा ।
खर्वं परार्धं मध्यान्ते पद्मं तन्महदादिकम् ॥ १३४ ॥

पद्मोत्तरं समुद्रं स्यान्महौघं [1]चोत्तमं भवेत् ।
एकमारभ्य गणयेत् प्रयुतान्तं यथाक्रमम् ॥ १३५ ॥

स्थानात् स्थानं दशगुणं वर्धयेत्प्रयुतावधि ।
लक्षस्य नियुतं [2]संज्ञा कोटिः प्रयुत[3]मुच्यते ॥ १३६ ॥

शङ्खमारभ्य गणयेन्महौघान्तं क्रमाद्यथा ।
शतं कोटिसहस्राणां शङ्ख[4]संज्ञा निगद्यते ॥ १३७ ॥

तथैव स्यान्महाशङ्ख एवं बृन्दं प्रकीर्तितम् ।
तद्वदेव महाबृन्दमेवमेवार्बुदं स्मृतम् ॥ १३८ ॥

इत्थं न्यर्बुदमाख्यातमेवं खर्वमुदाहृतम् ।
[5]एवमेव परार्धं स्यान्मध्यमित्थं चतुर्मुख ॥ १३९ ॥

[6]एवमन्तं तथा पद्मं महापद्मं तथैव च ।
सागरप्रलयावेवं संख्या नास्ति ततः परम् ॥ १४० ॥

यत्र काष्ठं तु तच्छ्रोत्रं यत्र धूमस्तु नासिका ।
यत्राल्पज्वलनं नेत्रं यत्र भस्म तु तच्छिरः ॥ १४१ ॥

यत्र सम्यक्स्थिता दर्भास्तत्र केशाः प्रकीर्तिताः ।
यत्र प्रज्वलितो वह्निर्जिह्वा तत्रैव कीर्तिता ॥ १४२ ॥

अग्निकर्णे हुतौ रोगो नासिकायां मनोऽव्यथा ।
चक्षुषोर्निधनं कुर्यात्केशे दारिद्र्यदं भवेत् ॥ १४३ ॥

---

1. चोत्तरं भवेत् M_2 2. संख्या कोटिं T, P_1 3. °मिष्यते T, P_1, P_2
4. °संख्या P_1, P_2 5. एवमेवं P_2 6. एवमेवं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हुतं शिरसि पापं स्यात्तस्माज्जिह्वासु होमयेत् ।
समिद्भिर्याज्ञियैर्बीजैः घृतैर्गव्यैस्तथा दलैः ॥ १४४ ॥

सुमनोभिस्समिद्धेऽग्नौ जुहुयादग्निमावहेत् ।
आरण्यं मणिजं लौहं कुण्डमध्ये परिष्कृते ॥ १४५ ॥

योगासनं चाग्निमध्ये कल्पयित्वा हरिं पुनः ।
आवाहयेत्तत्र देवं होमान्तं तत्र सन्निधिम् ॥ १४६ ॥

प्रार्थयेत समाराध्य होमं कुर्याद्दिने दिने ।
आहोमकालमर्यादं रक्षेदग्निमतन्द्रितः ॥ १४७ ॥

न दहेत्परिधीन् दर्भानुपस्तीर्णानुपक्रमे ।
एवमुक्तेन मार्गेण जपतो मन्त्रमुत्तमम् ॥ १४८ ॥

साधकस्य पुनः स्वप्नाः सम्भवन्त्यविचारिताः ।
मन्त्रसिद्धिमसिद्धिं च सूचयन्तः[1] शुभाशुभम् ॥ १४९ ॥

आचार्यं प्रतिमां देवीं पूजोपकरणानि च ।
विप्रं भागवतं भूपं छत्रचामरदन्तिनः ॥ १५० ॥

सिंहासनमपां कुम्भं पूर्णं कन्यां वधूजनम् ।
दीपं शङ्खं तथा यानं श्रीवत्सं पादुकां तथा ॥ १५१ ॥

श्वेतं वस्त्रं च माल्यं च चन्दनं भूषणानि च ।
रत्नानि काहलादीनि पायसं दधि पालिकाः ॥ १५२ ॥

ताम्बूलं पुस्तकं घण्टां तण्डुलानवगाहनम् ।
समुद्रतरणं शैलारोहणं द्रुमरोहणम् ॥ १५३ ॥

1. सूचयन्ति M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूमिलाभं मृदां लाभं तटकूपादिदर्शनम् ।
प्राङ्मुखोदङ्मुखो वापि यात्रां कुर्वन् स्वयं यदि ॥ १५४ ॥

विमानदर्शनं विष्णोर्दीप्तौ च शशिभास्करौ ।
[1]दीप्तमग्निं वेदघोषं सिद्धविद्याधरादिकम् ॥ १५५ ॥

देवतासमितिं चैव पश्यन् मूलफलानि च ।
अपूपादीनि भक्ष्याणि कुशयष्टिं कमण्डलुम् ॥ १५६ ॥

यज्ञोपवीतं पात्राणि स्रुक्स्रुवादीनि लोकयन् ।
अक्षमालामेवमाद्यैश्शुभैः स्वप्नैर्विनिर्दिशेत् ॥ १५७ ॥

मन्त्रसिद्धिं बहुमुखां दुःस्वप्नाश्चाप्यशोभनाः ।
कथ्यन्ते मुण्डितैस्साधं सम्भाषा सहवर्तनम् ॥ १५८ ॥

स्वयं मुण्डश्च बिभ्राणो जीर्णं नीलं तथाम्बरम् ।
कन्यां रक्तां तथा नीलां पुष्पमालां च मूर्धनि ॥ १५९ ॥

गर्दभारोहणं भग्नयानाधिष्ठानमञ्जज ।
छिन्नच्छत्रधरो वापि महिषारोहणं तथा ॥ १६० ॥

दक्षिणाभिमुखो गच्छन्नुष्ट्रवाहाधिरोहणम् ।
दष्टश्च कपिभिर्देहे सृगालैर्वा वृकैस्तथा ॥ १६१ ॥

कर्णपादशिरश्छेदो दन्तानां पतनं तथा ।
नववस्त्रधरः पीडा भटैः पाशेन बन्धनम् ॥ १६२ ॥

[2]विधवालिङ्गनं नीचैः पाषण्डैः प्रतिलोमजैः ।
वर्तनं गोपुरादीनां पतनं शाखिनामपि ॥ १६३ ॥

---

1. नक्षत्राणि ग्रहादीनि ज्योत्स्नां च ध्रुवमण्डलम् । एष अर्धश्लोकः T, P_2, A ग्रन्थेष्वधिकतया दृश्यते । 2. विधायालिङ्गनं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तुरगारोहणं [1]भुक्तिर्बौद्धाद्यालयसेवनम् ।
मदिरापायिभिः पापरोगिभिः कितवैः सह ॥ १६४ ॥

वर्तनं दीपनिर्वापं देवानामुत्सवं तथा ।
ग्रामादिदाहोऽभक्ष्याणां फलादीनां च भक्षणम् ॥ १६५ ॥

मधूच्छिष्टं प्रतिच्छाया यात्रायुद्धोमं भटैः ।
अभ्यङ्गं तैललाभश्च मरीचं लवणं तथा ॥ १६६ ॥

लोकयन्नेवमादीनि स्वप्ने शान्तिं समाचरेत् ।
जपहोमादिभि[2]श्चित्तैकाग्रतः प्रत्ययात्तथा ॥ १६७ ॥

वक्ष्यामि साधकस्याग्रे जातानभ्युदयावहान् ।
व्योम्नि देवगणान्नेमिघोषं दुन्दुभिनिस्वनम् ॥ १६८ ॥

सिद्धैस्सम्भाषणं चापि विमानानां च दर्शनम् ।
भूतप्रेतपिशाचादिदर्शनं भूतले तथा ॥ १६९ ॥

होमकाले च सप्तार्चिस्त्रिशिखः परिदृश्यते ।
शुद्धस्फटिकसङ्काशो दक्षिणावर्तशोभितः ॥ १७० ॥

दिव्यगन्धोपलम्भश्च च्छत्रबिम्बध्वजादिकम् ।
शङ्खदुन्दुभिवीणादि वेदघोषश्रुतिं पुनः ॥ १७१ ॥

पूर्णाहुतिविधौ सिद्धिलिङ्गान्येतानि लोकयेत् ।
[3]साधकस्तानि लिङ्गानि कथयेन्न गुरुं विना ॥ १७२ ॥

होमान्ते भोजयेद्विद्वान् वैष्णवान् द्वादशापरान् ।
यावच्च मन्त्रसिद्धिः स्यात्तावदाराधयेद्धरिम् ॥ १७३ ॥

---

1. भुक्तं M_2 2. विद्वान् जाग्रतः प्रत्ययांस्तथा T, P_1, P_2 3. साधकानि हि M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कामनानुगुणाकारं दार्वाद्यैः परिकल्पितम् ।
दिने दिने जपेन्मन्त्रं जुह्वन्नग्नौ यथापुरम् ॥ १७४ ॥

प्रणवस्य शृणु ब्रह्मन् पुरश्चरणमुत्तमम् ।
बीजं साङ्गं समुद्धारं यथावदवधारय ॥ १७५ ॥

अप्रमेयादिमुदयं मध्ये मन्दरपश्चिमम् ।
समाहृत्य त्र्यवयवं त्रीन् वर्णान् वाचकं हरेः ॥ १७६ ॥

प्लुतोदात्तस्वरं ब्रह्मन् चक्रमध्ये प्रतिष्ठितम् ।
उद्धरेद्बीजमस्याद्यं प्रतीकं दण्डशेखरम् ॥ १७७ ॥

वैष्णवं दण्डयेत्त्वेषा[1] शक्तिः सर्वत्र कीर्तिता ।
बीजशक्त्यङ्गहीना ये मन्त्राः स्युस्ते निरर्थकाः ॥ १७८ ॥

तस्मात्साङ्गं बीजयुक्तं शक्तियुक्तं फलप्रदम् ।
बीजं शक्तिश्च कथिता श्रूयतामङ्ग जातयः ॥ १७९ ॥

ऋषिर्ब्रह्मास्य च्छन्दस्तु देवी गायत्रमुच्यते ।
प्रतिपाद्यः परो देवः परमात्मा स देवता ॥ १८० ॥

बुद्धिस्तत्त्वं परं व्योम क्षेत्रं वर्णस्सितच्छविः ।
ज्ञानं बलं तथा वीर्यमैश्वर्यं तेजसा सह ॥ १८१ ॥

शक्तिरेते चतुर्थ्यन्ता नमः स्वाहा वषट् तथा ।
हुं फट् वौषट् क्रमादेतदवसानाश्शुभावहाः ॥ १८२ ॥

अङ्गानि हृदयाद्येषु षट्सु स्थानेषु मन्त्रिणा ।
प्रयोज्यानि [2]प्रयुक्तेषु मन्त्रः साङ्गः कृतो भवेत् ॥ १८३ ॥

---

1. ॰वैषा T, P_1, P_2 2. प्रवृत्तेषु M_1 ; प्रयोगेषु M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देहे करतले चैव स्थानेषु द्वादशस्वपि ।
द्वादशाक्षरविन्यासः प्रणवः स्फटिकप्रभः ॥ १८४ ॥

न्यासे नमोऽन्तः स्वाहान्तो जपपूजाहुतिष्वपि ।
वश्ये चाकर्षणविधौ उच्चाटे हुङ्कृतिर्भवेत् ॥ १८५ ॥

मारणे फट्कृतिर्ज्ञेया स्तम्भविद्वेषमोहने ।
नतिं विनाङ्गमन्यः स्यात् धर्मादौ नतिरेव सा ॥ १८६ ॥

शाकयावकभैक्षाशी[1] जपेल्लक्षत्रयं शुचिः ।
तदर्धं तर्पणे सङ्ख्या तदर्धं होमकर्मणि ॥ १८७ ॥

होमान्ते सिद्धयस्तस्य जायन्ते [2]यावदीप्सितम् ।
ऐहिकामुष्मिकं सर्वं प्रणवाल्लभ्यते [3]फलम् ॥ १८८ ॥

प्रणवान्न परो मन्त्रः कश्चिदस्ति चतुर्मुख ।
शान्तिपुष्ट्यभिचारेषु किमन्यैः सिद्धिवर्णनैः ॥ १८९ ॥

अन्त्यकाले च मां ध्यात्वा व्याहरन् प्रणवाक्षरम् ।
[4]योगाभ्यासोक्तविधिना जीवमारोहयेद्धृदि ॥ १९० ॥

भ्रुवोर्मध्ये ततो जीवं ततो ब्रह्मबिलं ततः ।
उच्चरन् प्रणवं [5]भित्त्वा बिलं ब्रह्मणि लीयते ॥ १९१ ॥

यावत्प्राणविनिर्मोकमभ्यसेत्[6] प्रणवाक्षरम् ।
सर्वपापविनिर्मुक्तो याति ब्रह्म सनातनम् ॥ १९२ ॥

प्रोक्तः प्रणवकल्पस्ते समासेन चतुर्मुख ।

इति श्री पञ्चरात्रे महोपनिषदि पाद्मे
तन्त्रे चर्यापादे मातृकाद्यर्थवर्णनं नाम त्रयोविंशोऽध्यायः ॥

---

1. ०भैक्ष्याशी T
2. यावदीप्सिताः A, T, P_1, P_2; यद्यदीप्सिताः M_2
3. अखिलम् T, P_1, P_2
4. योगाभ्यासेन T, P_1
5. हित्वा बिम्बं M_2
6. ०अभ्यस्येत् P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्विंशोऽध्यायः ॥

द्वादशाक्षरकल्पः ।

श्रीभगवान्—

द्वादशाक्षरमन्त्रस्य शृणु कल्पं चतुर्मुख ।
मातृकाचक्रमभ्यर्च्य द्वादशार्णं समुद्धरेत् ॥ १ ॥

[1]प्रणवं परमात्मानं भद्रपाणिमनन्तरम् ।
विष्णुं दक्षं चोतदेहं सुभद्रं गदिनं सुधाम् ॥ २ ॥

विष्णुशीर्षं त्रयं पश्चाद्विजयं सम्प्रसारणम् ।
वरुणं चादिदेवान्तं शुक्लं भुवनशीर्षकम् ॥ ३ ॥

अत्रिं माधवनामान्तं पीयूषं मधुसूदनम् ।
वायुं तथाऽप्रमेयान्तमेवमुद्धारण क्रमः[2] ॥ ४ ॥

बीजमस्य द्वादशात्मा दण्डशीर्ष उदाहृतः ।
क्रुद्धो महांश्च वीरश्च द्युस्सहस्रं च तेजसा ॥ ५ ॥

उल्कान्ताष्षडिमे शब्दाश्चतुर्थ्यन्ता स्स्वधान्तकाः[3] ।
अङ्गानि हृदयादौ स्युः स्थाने बीजाक्षराणि च[4] ॥ ६ ॥

परस्य वासुदेवस्य बीजाङ्गं समुदाहृतम् ।
दीप्तिमानूर्ध्वलोकान्तो बीजं दण्डशिरस्ततः[5] ॥ ७ ॥

[6]दीप्तिमान् कुम्भसंयोगो मधुसूदनमस्तकः ।
स एव वामनशिरा हृषीकेशशिरस्तथा ॥ ८ ॥

[7]वीरसेनशिराश्चापि कल्क्यस्तोयमनन्तरः ।
षष्ठमौर्वशिरः प्रोक्तमङ्गानि क्रमशः पुनः ॥ ९ ॥

---

1. प्रणम्य M_1 2. °तुद्धारणे विद्धि:M_1 3. षडन्तकाः M_2 4. वा P_1,P_2
5. स्मृतम् T,P_1,P_2 6. दीप्तिमत्कुम्भ° M_2 7. देवदत्त° M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]नत्यन्तं दण्डशिरसः सर्वे विभवपूर्वकाः[2] ।
वासुदेवे प्रयोक्तव्या हृदयादिषु षट्स्वपि ॥ १० ॥

व्यूहपूर्वे तु [3]बीजं स्याद्विष्णुः कुण्डादि पूर्ववत् ।
अङ्गं यद्वा द्वादशार्णाः [4]पूर्वेषां हृदयादयः ॥ ११ ॥

षण्णामर्णाः षडपरे तुन्दगुह्यभुजोरवः ।
[5]जानु पादमिति स्थानेष्वेते योज्याः क्रमाद्बुधैः ॥ १२ ॥

ऋषिश्च देवता चोभे वासुदेवः स्मृतस्त्रिषु ।
छन्दश्च देवी गायत्री वर्णः श्वेतश्चतुर्मुख ॥ १३ ॥

तत्त्वं बुद्धिः परं व्योम क्षेत्रं मन्त्रस्य शब्दितम् ।
प्रत्यक्षरमृषिश्छन्दो देवता वर्णविस्तरः ॥ १४ ॥

तत्त्वं क्षेत्रं क्रमात्सर्वमुच्यते द्वादशस्वपि ।
परमेष्ठी सनन्दश्च सनकश्च प्रजापतिः ॥ १५ ॥

भृगुः सनत्कुमारश्च पुलस्त्यः पुलहः क्रतुः ।
मरीचिरत्र्यङ्गिरसौ कथिता ऋषयः क्रमात् ॥ १६ ॥

छन्दांसि दैवी गायत्री [6]मस्तकं तु प्रजापतिः ।
त्रिष्टुप् पङ्क्तिश्च बृहती विराट् बष्टश्रिवृत्सकः ॥ १७ ॥

उष्णिक् च श्रीरिति ब्रह्मन् वर्णेषु द्वादशस्वपि ।
विष्णवाद्या मासपा देवास्तत्त्वानि कथयामि ते ॥ १८ ॥

चिज्जीवः प्रकृतिर्बुद्धिर्मनः सत्त्वादयो गुणाः ।
व्योमाग्निमरुतश्चापि वर्णानां तत्त्वमीरितम् ॥ १९ ॥

---

1. सत्यन्तं P_1, P_2 2. °पूर्वके T, P_1 3. बिम्बं T, P_1, P_2 4. पूर्वे षट् T, P_1, P_2 5. जङ्घा T, P_1, P_2 6. बस्तः क्षेत्रं P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षेत्राणि परमव्योम वायुरग्निर्जलं तथा ।
सत्यं तपो जनश्चैव महः स्वर्गो[1] भुवस्तथा ॥ २० ॥

भूमिः पातालमेतानि क्रमेण कथितानि ते ।
आम्नादिधामा श्रेयांसं [2]गोपनान्तं सदण्डकम् ॥ २१ ॥

नत्यन्तं पापहननं विष्ण्वन्तं [3]वह्निमत्परम् ।
शङ्खमाद्यक्षरं परं कमलं मधुसूदनम् ॥ २२ ॥

पुलहं चापरं विघ्ननायकं पीतसूदनौ ।
एकनेत्रं मन्दरं च विष्ण्वन्तं भद्रहस्तकम् ॥ २३ ॥

सम्प्रसारणमूर्धानमुद्धरेन्मन्त्रवित्तमः ।
अग्निप्राकारमन्त्रोऽयं कथितः कमलासन ॥ २४ ॥

दुर्गागणपतिस्तार्क्ष्यः क्षेत्रपालपदानि तु ।
चतुर्थ्यन्तानि नत्यन्तप्रणवादीनि मन्त्रिणा ॥ २५ ॥

कोणदिक्षु प्रयुञ्ज्येरन्नारभ्याग्नेर्दिशं क्रमात् ।
भाष्यं च द्वादशार्णस्य प्रवक्ष्यामि यथातथम् ॥ २६ ॥

ओमित्युक्तं परं ब्रह्म सुखरूपं ध्रुवं स्थिरम् ।
व्यापित्वात्तस्य वाच्यस्य वाचकं सर्वगं स्मृतम् ॥ २७ ॥

पुरुषार्थ[4]परैस्सर्वैः सुरासुरमहर्षिभिः ।
नम्यते देव एवैकः स एवैकः परायणम् ॥ २८ ॥

आदौ सृजति भूतानि भूतानुग्रहकाम्यया ।
परिपालनमप्येष करोति बहुमूर्तिभिः ॥ २९ ॥

---

1. तत्वं M_2 2. साङ्गोपाङ्गं M_1 3. भानुमान् परम् T, P_1, P_2
4. °फलैः T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्रमार्थं च भूतानां संहरत्यखिलं जगत् ।
गतिर्गतिमतामन्या वासुदेवान्न विद्यते ॥ ३० ॥

संहरत्यात्मभूतानि पुनः सृजति मायया ।
देवे जाग्रति जागर्ति सुप्ते स्वपिति चाखिलम् ॥ ३१ ॥

चराचरमिदं [1]कृत्स्नं भूतग्रामं चतुर्विधम् ।
द्वादशाक्षर[2]वाच्योऽसौ तस्य माहात्म्यमाश्रितः ॥ ३२ ॥

ब्रह्मभूयं गतो ब्रह्मा देवभूयं च देवताः ।
ऋषयश्च मरीच्याद्या मुनयस्सनकादयः ॥ ३३ ॥

मन्त्रमाहात्म्यमाश्रित्य जग्मुः पदमनुत्तमम् ।
गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः ॥ ३४ ॥

न कदापि निवर्तन्ते द्वादशाक्षरचिन्तकाः ।
किं तस्य यज्ञैः किं तीर्थैः किं विश्राणनकर्मभिः ॥ ३५ ॥

किं व्रतैर्यस्य मन्त्रोऽसौ द्वादशाक्षरलक्षणः ।
सर्वयत्नेन पुरुषस्तन्मन्त्रनिरतो[3] भवेत् ॥ ३६ ॥

संसारभयभीरूणां मोक्षैकफलकामिनाम् ।
मुक्तये परमोपायो मन्त्रोऽयं द्वादशाक्षरः ॥ ३७ ॥

देवदानवगन्धर्वयक्षविद्याधरादयः ।
प्रणमन्ति महात्मानं द्वादशाक्षरचिन्तकम् ॥ ३८ ॥

यस्य राष्ट्रे महीपस्य [4]मन्त्रिणः सन्ति निर्भयाः ।
तद्राष्ट्रे धनधान्यादि समृद्धं वर्धतेऽधिकम् ॥ ३९ ॥

---

1. ब्रह्मन् A   2. ०वाच्योऽयं A   3. ०नियतो A
4. मन्त्री वसति निर्भयः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूतानि च पलायन्ते ग्रहाश्च न भयङ्कराः ।
राष्ट्राद्राजपुराद्राज्ञः सकाशाच्च निपीडिताः ॥ ४० ॥

न फलं शक्यते वक्तुं कार्त्स्न्येन कमलासन ।
चतुर्मुखमुखैस्सर्वैर्दिव्यैर्वर्षशतैरपि ॥ ४१ ॥

शरीरशुद्धये पूर्वं पुरश्चरणमाचरेत् ।
शरीरमन्त्रसंस्कारः पुरश्चरणमिष्यते ॥ ४२ ॥

ब्राह्मणांस्तन्मयान् पूर्वमाहूय द्वादशावरान् ।
भोजयित्वा ततश्चक्रमण्डले देवमर्चयेत् ॥ ४३ ॥

विज्ञाप्य देशिकः पूर्वमनुज्ञातः सहायवान् ।
आश्रमे यत्र मुनिभिः पूर्वमाचरितं [1]तपः ॥ ४४ ॥

सिद्धमन्त्रफले तत्र वासुदेवनिकेतने ।
पश्चिमद्वारि वान्यत्र पूर्वोक्तस्थानभूमिषु ॥ ४५ ॥

स्थानेऽभिरुचिते पुष्पसमित्कुशफलोदकैः ।
समुपेते यथोक्तानां सम्पन्नाभिमताशनः ॥ ४६ ॥

भिक्षान्नभोक्ता भक्तानां तन्मयानां गृहेषु वा ।
ब्रह्मचारी गृहस्थो वा साधयेत् द्वादशाक्षरम् ॥ ४७ ॥

वैखानसो वा नियतस्तपस्यभिरतश्शुचिः ।
भिक्षान्नभुग्ब्रह्मचारी शाककन्दफलाशनः ॥ ४८ ॥

गृहस्थश्चेत् स्वयं [2]पक्वं पुत्रैर्वा भार्ययापि वा ।
शिष्येण वा पाचितान्नं निवेद्य हरयेऽग्रतः ॥ ४९ ॥

---

1. तथा M_2; ततः A 2. पाकं A, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैश्वदेवादिकर्मान्ते भोजयित्वाऽतिथीनपि ।
शिष्यं भार्यां तथा पुत्रं तोषयित्वा यथातथम् ॥ ५० ॥

स्वयं भुञ्जीत विधिवत्पश्चादन्नमकुत्सयन् ।
पुत्रदारसमायुक्तो जपेद्वैखानसश्शुचिः ॥ ५१ ॥

वियुक्तः पुत्रदाराद्यैरथवा नियतस्थितः ।
[1]अञ्जसैव स्वयं पक्वमन्नमद्यान्मिताशनः ॥ ५२ ॥

सर्वेषां कायशुध्यर्थमादौ चान्द्रायणं चरेत् ।
पादोदकं पञ्चगव्यं ब्रह्मकूर्चजलं तथा ॥ ५३ ॥

पीत्वा कायविशुध्यर्थं पुरश्चरणमाचरेत् ।
आरम्भः कर्मणां मासि मार्गशीर्षेऽथ[2] शोभने ॥ ५४ ॥

चैत्रे मासि सिते पक्षे ब्रह्मन्नेकादशीतिथौ ।
उपोष्य पूर्वं चक्राब्जे प्रतिमायामथापि वा ॥ ५५ ॥

कूर्चे वा स्थण्डिले वापि यथाभिरुचिते पदे ।
द्वादश्यां होमपर्यन्तमर्चयित्वा जनार्दनम् ॥ ५६ ॥

पुष्पैः पत्रैर्ब्रह्मचर्यनिरतो देशकालवित् ।
सङ्कल्प्य कालनियमं व्रतादिनियमं तथा ॥ ५७ ॥

नित्यं त्रिषवणस्नानमधश्शयनमेव च ।
शयनं वा कुशे पर्णे मृगचर्मणि वाऽब्जज ॥ ५८ ॥

सङ्कल्प्य माषं तैलं च क्षारं च [3]लवणं तथा ।
[4]तिलान्नभोजनं कांस्ये दिवा स्वापादि वर्जयेत् ॥ ५९ ॥

---

1. अन्तः स्वैरम् M_2 2. °अद्वि M_2 3. लवणमेव च T, P_1, P_2
4. कीलालं T,P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देहशुद्धिं पुरा कृत्वा मन्त्रजापोऽक्षमालया ।
आद्यन्तयोर्बीज[1]युक्तं तथैव प्रणवान्वितम् ॥ ६० ॥

जपकाले जपेन्मन्त्रं न द्रुतं न विलम्बितम् ।
लक्ष्यीकृत्याच्युतं ध्यायेत्तद[2]धीनमनोगतिः ॥ ६१ ॥

ध्यानं वक्ष्यामि सर्वाघनाशनं कमलासन ।
चतुर्भुजमुदाराङ्गं सर्वलक्षणलक्षितम् ॥ ६२ ॥

शुद्धस्फटिक[3]सङ्काशमयुतेन्दुसमप्रभम् ।
चारुहासं सुताम्रोष्ठं कर्णान्तायतलोचनम् ॥ ६३ ॥

निर्धूतपद्मरागाभं दन्तच्छविसुशोभितम् ।
महोरस्कं महाबाहुं प्रसन्नेन्दुनिभाननम् ॥ ६४ ॥

सुभ्रूललाटं सुमुखं घनकुञ्चितमूर्धजम् ।
तटिच्छतसहस्राभं पीतनिर्मलवाससम् ॥ ६५ ॥

पाणिपादतलाम्भोजं पुण्डरीकायतेक्षणम् ।
श्रीवत्साङ्कं किरीटादिसर्वाभरणभूषितम् ॥ ६६ ॥

पद्मचक्रगदाशङ्खधारिणं कौस्तुभोरसम् ।
दिव्यगन्धविलिप्ताङ्गं दिव्यमालाविभूषितम् ॥ ६७ ॥

शेषाहिभोगे विपुले सुखासीनं चतुर्मुख ।
श्रीभूमिसहितं देवं ललाटे श्वेतमृत्स्नया ॥ ६८ ॥

धृतोर्ध्वपुण्ड्रतिलकं मण्डितं चण्डभानुभिः ।
नियुतैरयुतैश्चन्द्रैः विद्युत्कालाग्निकोटिभिः ॥ ६९ ॥

---

1. °युतं T, P_1, P_2 2. तद्ध्यान° A 3. °वर्णाभम्° T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समवेतैरिवैकत्र तेजःपुञ्जैर्विसर्पिभिः ।
भ्राजमानं दुरालोकं देहमण्डलनिर्गतैः ॥ ७० ॥

भासयन्तं जगत्सर्वं ध्यायेत् प्रक्षीणकल्मषः ।
आराध्य देवं सन्ध्यायामपरस्यां यथाविधि ॥ ७१ ॥

विसृज्य पुनरुत्थाय धौतपादकरश्शुचिः ।
आचम्य वाग्यतो मन्त्रं जपेत् सम्यक् समाहितः ॥ ७२ ॥

यावद्ब्राह्ममुहूर्तस्य प्रादुर्भावस्ततः परम् ।
स्नात्वा यथोक्तं सन्ध्यायामनुष्ठाय [1]विधिं क्रमात् ॥ ७३ ॥

आराध्य देवमर्घ्याद्यैरुपचारैर्यथोदितैः ।
जपेन्मन्त्रं शरीरस्य स्थितियुक्तैः फलादिभिः ॥ ७४ ॥

द्वादशार्णं [2]जपेदेवं विशुद्धेनान्तरात्मना ।
लक्षं द्वादश तस्यार्धं तर्पणं वारिभिः स्मृतम् ॥ ७५ ॥

तदर्धं जुहुयादग्नौ साधकस्समिदादिभिः ।
चतुर्विंशतिलक्षेण मन्त्रजापेन किङ्कराः ॥ ७६ ॥

सिद्धविद्याधराः सर्वे पाताले दिवि वा भुवि ।
यथाभिरुचिते देशे दुष्प्रापे साधकं द्विजम् ॥ ७७ ॥

नयन्तः तत्र नियतं सेवन्ते परिचारिणः ।
षट्त्रिंशल्लक्षजापेन देवभूयं समश्नुते ॥ ७८ ॥

अशीतिलक्षजापेन होमैस्तावन्मितैर्वसेत् ।
महर्लोके सुखं शश्वत्तत्रत्यैरभिपूजितः[3] ॥ ७९ ॥

---

1. यथाविधि T, P_1, P_2 2. जपेन्मन्त्रं M_2 3. स्यात्सुरपूजितः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कोटिलक्षेण जापेन प्राप्नुयादणिमादिकान् ।
गुणान् जनाह्वये लोके वसेत्तत्स्थैः सुपूजितः ॥ ८० ॥

[1]महार्बुदशतेनैव जपहोमैस्तथा वसेत् ।
तपोलोके महापद्मजपहोमेन तावता ॥ ८१ ॥

सत्ये वसति देवेशं श्रीभूमिसहितं हरिम् ।
दृष्ट्वा निरामयस्तत्र वसेत्तल्लोकवासिभिः[2] ॥ ८२ ॥

[3]महौघैश्शतजापेन तावदाहुतिसंख्यया ।
साक्षात्कुर्वन् वासुदेवं तन्मयो [4]भवति ध्रुवम् ॥ ८३ ॥

किमेभिर्बहुभिः प्रोक्तैः पदं यद्यदभीप्सितम् ।
तत्तदाप्नोति पुरुषः समाराधनकर्मभिः ॥ ८४ ॥

वश्याकर्षणमुख्यानि जपहोमादिकर्मभिः ।
फलानि चित्ररूपाणि दर्शयेत्साधकः स्वयम् ॥ ८५ ॥

पाताले दिवि वा भूमौ ये भोगा भुवि दुर्लभाः ।
तानवाप्नोति पुरुषः पुरुषोत्तमपूजया[5] ॥ ८६ ॥

कामोपभोगवैमुख्यं मन्त्रिणः कार्यमुच्यते ।
मोक्षैकफलदं धाम दक्षिणद्वारमुत्तमम् ॥ ८७ ॥

सिद्धायतनमासाद्य तत्र दैवं चतुर्विधम् ।
मनुष्यनिर्मितं चार्षं दैवं रूपं मधुद्विषः ॥ ८८ ॥

स्वयंव्यक्तं समाराध्य मोक्षकामः समाहितः ।
सालोक्यादिचतुर्भेदां मुक्तिमाप्नोत्यसंशयम् ॥ ८९ ॥

---

1. महाबृन्द॰ T, P_1, P_2; ब्रह्मा बृन्दशतेनैव M_2 2. ॰भाक् शुचिः M_1
3. महाहोमैश्च A 4. वसति M_1 5. ॰विद्यया T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सालोक्यं मानुषादार्षात् सामीप्यं देवनिर्मितात् ।
सारूप्यं [1]तुल्यमाप्नोति स्वयंव्यक्तादनुक्रमात् ॥ ९० ॥

प्रासाद[2]द्वारि चाध्माते शङ्खे तस्य महाध्वनिः ।
श्रूयते यत्र तं देशं वैष्णवं मानुषालये ॥ ९१ ॥

ततो द्विगुणमार्षे तु त्रिगुणं देवनिर्मिते ।
चतुर्गुणं स्वयंव्यक्ते देशे ऋद्धिरनुक्रमात् ॥ ९२ ॥

ब्रह्मचर्यपरो भूत्वा कुशशायी जितेन्द्रियः ।
मुमुक्षमाणस्तन्मन्त्रं लक्षजापेन सिद्ध्यति ॥ ९३ ॥

युञ्जीत[3] योगविधिना हृदयाम्बुरुहासने ।
कर्णिकायां सुखासीनं शुद्धस्फटिकवर्चसम् ॥ ९४ ॥

चतुर्भुजमुदाराङ्गं ज्योतिर्मण्डलमध्यगम् ।
अङ्गुष्ठमात्रं पुरुषं ध्यात्वा भोगैर्यथाक्रमम् ॥ ९५ ॥

अभ्यर्चयेन्निर्मलेन मनसा सुसमाहितः ।
योगाभ्यासबलेनैव गुणोत्कर्षः प्रजायते ॥ ९६ ॥

चन्द्रार्काग्निमयं बीजं रविमण्डलसन्निभम् ।
ततः[4] सूक्ष्मतरं बिम्बं राजमुद्गसमप्रभम् ॥ ९७ ॥

तं सर्वमन्त्रानाक्रम्य स्थितं विद्याद्विचक्षणः ।
ततस्तु राजिकाबीजप्रमाणं चिन्तयेत् क्रमात् ॥ ९८ ॥

उत्पादकमथान्याभिर्यस्यान्ते नाद आश्रितः ।
तं विलीय समुत्पन्नमश्ववालप्रमाणकम् ॥ ९९ ॥

---

1. दिव्य° A 2. °द्वारपार्श्वे तु A 3. योगं विधिवत् M_2 4. ततत् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यस्य गच्छति तद्व्योम्नि व्योम चागच्छते हृदि ।
ततो विचिन्तयेत्सूक्ष्ममश्ववालप्रमाणकम् ॥ १०० ॥

ब्रह्मनाडीमनेनाशु[1] पश्यति ध्यानसेवनात् ।
ततोऽङ्गरोममात्रं तु बीजजालं समन्ततः ॥ १०१ ॥

ध्यायेन्नियममास्थाय ब्रह्मनाडीप्रकाशकम् ।
एवं ध्यायन्निमं पिण्डं परिपक्वं परित्यजेत् ॥ १०२ ॥

परिज्ञाय पुरा पिण्डं पाकलक्षणमुत्तमम् ।
निरुद्धसन्धिमात्रं च कृत्वा देहसमीरणम् ॥ १०३ ॥

मुक्त्वा तद्ब्रह्मरन्ध्रेण उत्क्रान्तिकरणेन च ।
ध्यात्वा परित्यजेद्देहं नित्याभ्यासरतो यदि ॥ १०४ ॥

स ब्रह्म परमभ्येति वासुदेवाख्यमव्ययम् ।
तिले तैलं घृते सर्पिः क्षीरे क्षीरं जले जलम् ॥ १०५ ॥

तद्वन्न भेदो गृह्येत जीवात्मपरमात्मनोः ।
तप्तलोहे यथा तोयं [2]लीनं नैव प्रजायते ॥ १०६ ॥

अग्निदग्धानि बीजानि न रोहन्ति यथा पुनः ।
तद्वन्न जायते भूयो जीवात्मा कमलासन ॥ १०७ ॥

सारूप्यं भगवद्रूपप्राप्तिः सद्भिरुदाहृता[3] ।
सामीप्यं सन्निधौ सेवा देवस्य परिचर्यया ॥ १०८ ॥

सालोक्यं च तदाख्यातं लोके वैकुण्ठसंज्ञिते[4] ।
तदीये नित्यवासोऽयं पुनरावृत्तिवर्जिते ॥ १०९ ॥

---

1. °अनेनापि M_1 2. क्षीणं M_2 3. °उदीरिता M_2 4. °संज्ञिके M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मा :—

श्रोतुमिच्छामि भगवन् देहपातस्य लक्षणम् ।
संक्षेपतस्तु भगवन् वायोर्गतिनिरोधनम् ॥ ११० ॥

श्रीभगवान् :—

युक्ताहारविहारस्य क्रियासक्तस्य पद्मज ।
युक्तस्वप्नावबोधस्य योगयुक्तस्य सर्वदा ॥ १११ ॥

निवर्तते सदा शब्दो हृद्गतो दुन्दुभिस्वनः ।
स्पर्शं न शीतं नात्युष्णं विजानाति त्वगिन्द्रियम् ॥ ११२ ॥

भ्रवोर्मध्ये यदा ज्योतिर्द्वादशान्ते व्यवस्थितम् ।
प्रत्यस्तमेति वै शीघ्रं न चोदयति वै पुनः ॥ ११३ ॥

न जानाति समाधिस्थो हार्दमब्जं यदन्तरे ।
परिशुष्यति गात्रस्थं शोणितं श्लेष्मलक्षणम् ॥ ११४ ॥

न वेत्ति[1] पार्थिवं गन्धं न[2] बाह्याभ्यन्तरे तथा ।
पिण्डस्तदा[3] प्रबोद्धव्यः कालेनैव चिरेण तु ॥ ११५ ॥

पृथिव्यां संस्थितं चैव धारणायां समाहितः ।
न वेत्ति शब्दं प्रागुक्तं पञ्चमात् पञ्चमे क्षणे ॥ ११६ ॥

स्थितस्समेधा बाह्ये तु शीतोष्णे न च विन्दति ।
पतेद्दिनचतुष्केण पिण्डं तत्कलितेक्षणः ॥ ११७ ॥

रूपध्यानं[4] समासाद्य पूर्वोक्तविधिना यदि ।
न भाति हृदयाकाशे बहिर्वा ज्योतिषां पतिः ॥ ११८ ॥

पिण्डपातो ह्यवश्यं स्यात ज्ञात्वारिष्टैः पुरोदितैः ।
तृतीयेऽह्नि चतुर्वक्त्र सर्वमेतत्तदा क्षणे ॥ ११९ ॥

---

1. व्योम्नि M_1 2. स M_1 3. तथा M_1 4. ०स्थानं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समाधौ यदि वायव्ये योगी सम्यक् प्रवर्तते ।
स वेत्ति परमाह्लादं तृषितः परिकम्पते ॥ १२० ॥

दिनद्वयेन पिण्डस्य पातोऽस्य द्वितयक्षणे ।
स्थितो गगनभागे तु प्रागुक्तविधिना [1]यदि ॥ १२१ ॥

न वेत्ति विधिना गन्धं [2]न बाह्ये च[3] शुभाशुभम् ।
तत्रैवैकदिने वाथ लक्षणे प्रथमे क्षणे ॥ १२२ ॥

ध्यात्वैवं[4] विधिना सम्यग्योगी ध्यानैकमानसः[5] ।
मयि [6]संस्थापितमना व्याहरन् द्वादशाक्षरम् ॥ १२३ ॥

स्वयमुत्क्रमते पिण्डाद्यायाद्योगनिकेतनम् ।
शेषासने सुखासीनं वैकुण्ठे मणिमण्डपे ॥ १२४ ॥

अष्टबाहुं विशालाक्षमष्टायुधधरं हरिम् ।
श्रीभूमिसहितं देवं सर्वाभरणभूषितम् ॥ १२५ ॥

चतुर्भुजं वा वामेन हस्तेनालिङ्ग्य पङ्क(ङ्ग ?)जाम् ।
अष्टौ वारस्त्रियस्तस्य वालव्यजनपाणयः ॥ १२६ ॥

तिष्ठन्ति परितः पश्चाच्छङ्खाद्यायुधधारिणः ।
सेवन्ते पुरुषास्तस्माद्बहिस्तिष्ठन्ति मूर्तयः ॥ १२७ ॥

[7]चतुर्विंशतिसंख्याकास्ततो मीनादिमूर्तयः ।
पक्षीन्द्रविष्वक्सेनाभ्यां कुमुदादिगणैस्तथा ॥ १२८ ॥

महाभागवतास्तत्र द्वादशाक्षरचिन्तकाः ।
सेवन्ते मण्डपे नित्यं पुनरावृत्तिवर्जिताः ॥ १२९ ॥

---

1. यतः M_1 2. तद्बाह्ये P_1 3. तु P_1,P_2 4. ०एव P_1,P_2
5. ०आस्थितः T 6. सन्नार्पितमना P_1, P_2; सन्नार्पितमना व्याहर्षं M_2
7. अयमर्धः P_1, P_2 ग्रन्थयोर्नोपलभ्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इह यत्कर्म कुर्वाणा विष्णोराराधनात्मकम् ।
मुच्यन्ते योगमास्थाय पुरुषाः परमं पदम् ॥ १३० ॥

प्राप्यापि तत्तत्कुर्वाणाः सेवन्ते पुरुषोत्तमम् ।
अथवा पिण्डपतनं विज्ञाय प्रागुदीरितैः ॥ १३१ ॥

निमित्तैरैहिकैर्भोगैस्स्तृजन्तः पृथिवीक्षितः ।
पिण्डान्तरमुपायेन विशन्ति कमलासन ॥ १३२ ॥

येन तं कथयाम्यद्य श्रूयतां सादरं वचः ।
परपिण्डं नवं शुद्धं मध्यमे वयसि स्थितम् ॥ १३३ ॥

सर्वलक्षणसंयुक्तं[1] पापरोगबहिष्कृतम् ।
ब्राह्मणस्य शरीरं वा बाहुजस्याथवा तनुम् ॥ १३४ ॥

ऊर्ध्ववक्त्रं दीर्घपादमेकान्ते शाययेच्छवम् ।
तत्पादपार्श्वे शयीत बद्ध्वा योगासनं ततः ॥ १३५ ॥

अभ्यस्येद्योगमेकाग्रो यथापूर्वं चतुर्मुख ।
सजीवं नाभिचक्रस्थं भ्रमन्तं भास्करप्रभम् ॥ १३६ ॥

हंसाकारं वलक्षाभमिडया पिङ्गलेन वा ।
हंसरूपं समास्थाय निर्गतं नासिकापुटात् ॥ १३७ ॥

खगवद्याति गगनं सार्धं प्राणसमीरणैः ।
तालं हस्तावधिं दण्डं क्रोशं योजनमेव च ॥ १३८ ॥

गत्वा गत्वा निवर्तन्ते योजनानि चतुर्मुख ।
नासिकापुटरन्ध्रेण नाभिचक्रं प्रवेशयेत् ॥ १३९ ॥

---

1. °सम्पन्नं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभ्यस्य नित्यमनिशं योगी योगमतन्द्रितः ।
निर्गमय्य स्वकाद्देहात् नासिकारन्ध्रवर्त्मना ॥ १४० ॥

आत्मानं परकीयेन नासिकाबिलवर्त्मना ।
परपिण्डं स्वदेहस्य विनिपाते प्रवेशयेत् ॥ १४१ ॥

नाभिचक्रं प्रविश्याथ नाडीषु विचरेत्सुखम् ।
सर्वत्र योगी तत्रस्थो युञ्जानः पूर्ववत्सदा ॥ १४२ ॥

द्रढिम्नि तत्र वपुषः तत्र स्थित्वा चिरं सुखम् ।
[1]तस्यापि पातमालोच्य पिण्डेऽन्यत्र [2]निवेशयेत् ॥ १४३ ॥

इत्येतत्कथितं ब्रह्मन् परपिण्डप्रवेशनम् ।
सिद्धये मूलमन्त्रस्य समासात् कथितन्तव ॥ १४४ ॥

मूलमन्त्र इति प्रोक्तः साक्षाद्देवस्य वाचकः ।
प्रसूऽयंतेमन्त्रलतां[3] प्रसूतिमणिमादिकाम् ॥ १४५ ॥

किं पुनर्धर्मकामार्थी सिद्धिं कमलसम्भव !
नासाध्यमस्ति मन्त्रेण द्वादशाक्षररूपिणा ॥ १४६ ॥

सर्वलोकेषु सर्वत्र सत्यमेतद्ब्रवीमि ते ।
नास्मात्परतरो मन्त्रो विद्यते सर्वकामदः ॥ १४७ ॥

रहस्यमेतत्कथितं मन्त्रमाहात्म्यमक्षयम् ।
अयमेवाष्टमूर्तीनामधिकश्चतुरक्षरैः ॥ १४८ ॥

अमुना षोडशार्णेन चतुर्विंशतिमूर्तयः ।
आराधनीया भोगश्चेल्लभ्यते दुर्लभो महान् ॥ १४९ ॥

---

1. तत्रापि M_2 2. नियोजयेत् M_2 3. ०रतां T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रं तन्त्रे यथापूर्वमुद्धृत्य द्वादशाक्षरम् ।
अक्षराणि च चत्वारि वर्णचक्रात्समुद्धरेत् ॥ १५० ॥

[1]गुहालये परिक्रान्तं भास्करं दण्डशेखरम् ।
द्विषट्काक्षरवच्चाङ्गमस्यापि चतुरानन ॥ १५१ ॥

मूर्तिष्वष्टासु यो [2]ध्याता ऋषिर्मन्त्रस्य निश्चितः ।
छन्दश्च देवी गायत्रं वासुदेवोऽधिदैवतम् ॥ १५२ ॥

अधिकार्णसमष्टेः स्याद्वर्णः स्फटिकसन्निभः ।
क्षेत्रं च परमव्योम तत्त्वधीः पूर्वमीरिता ॥ १५३ ॥

शिष्टार्णकानां [3]द्युमणिर्वासुदेवो नृकेसरी ।
मनोभवश्चतुर्णां स्यादधिदैवतकल्पना ॥ १५४ ॥

जपेन्नमोऽन्तं पूजायामुभयोर्होमकर्मणि ।
स्वाहायां विरमेद्वौषडन्तमाप्यायने तथा ॥ १५५ ॥

मारणे तु फडन्तं स्यादेवमन्यत्र योजयेत् ।
न्यासो मूर्ध्नि ललाटे च दृशोः श्रवसि च क्रमात् ॥ १५६ ॥

नासिकापुटयोर्वक्त्रे[4] गलकूपे तथा हृदि ।
नाभिदेशे रहस्ये च तथोर्वोर्जङ्घयोरपि ॥ १५७ ॥

कार्यानुरूपं सृष्ट्यादिन्यसनं सर्वकर्मसु ।
आराधनं सर्वसिद्धिकारणं तच्च कथ्यते ॥ १५८ ॥

तेजसां निधिमष्टारं सुदर्शनमनुत्तमम् ।
चिन्तयित्वा चतुर्वक्त्रं पूर्वस्यां दिशि वेधसम् ॥ १५९ ॥

---

1. एवं क्रमेण विन्यस्य M_2 2. ध्यायेत् A 3. व्यूहस्य M_1
4. मध्ये M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सङ्कर्षणं दक्षिणस्यां प्रद्युम्नं दिशि चाप्पतेः ।
अनिरुद्धमुदीचीने कोणदिक्षु श्रियादयः ॥ १६० ॥

देव्यश्चतस्रो मध्ये च वासुदेवं जगद्गुरुम् ।
अर्घ्यादिभिस्समाराध्य मन्त्रं षोडशलक्षकम् ॥ १६१ ॥

जपन् हुत्वाग्निमुदकैस्तर्पयित्वा यथाविधि ।
एवं प्रसाधितो मन्त्रः पुरुषार्थांश्चतुर्विधान् ॥ १६२ ॥

साधयेत्पुरुषार्थेषु यो येनावाप्तुमिष्यते ।
[1]स सर्वोऽवाप्यते ब्रह्मन् किमन्यैरतिविस्तरैः ॥ १६३ ॥

यदि ब्रह्मपदे ब्रह्मन्नभिलाषः प्रवर्तते ।
ब्राह्मीं मूर्तिं यजेतासौ ध्यात्वानन्यमनोगतिः ॥ १६४ ॥

ग्रीष्मे मासि स्थितो भूम्यां पादाङ्गुष्ठेन पङ्कज ।
पादमन्यं समुद्धृत्य बाहू चोत्क्षिप्य निश्चलः ॥ १६५ ॥

वर्षासु पर्णशालायां बहिश्शरदि शैशिरे ।
हेमन्ते त्रिषु चैतेषु वसन्तेऽग्निषु पञ्चसु ॥ १६६ ॥

मध्यस्थो मन्त्रजापः स्यादित्थं स्यात्प्रतिहायनम् ।
उपांशुप्रवरोऽव्यक्तान्मानसः प्रवरस्ततः ॥ १६७ ॥

[2]विघ्नन्ति देवतास्तस्य तपःकर्म सुदुश्चरम् ।
पदहानिं समाशङ्क्य गन्धर्वप्रमुखैस्तथा[3] ॥ १६८ ॥

अप्सरोभिर्विलोभ्यैनं नृत्तवादित्रगीतिभिः ।
तस्मात् स्थिरमतिर्भूत्वा जपन् सिद्धिमवाप्नुयात् ॥ १६९ ॥

---

1. स सर्वः प्राप्यते M_2 2. निघ्नन्ति M_1 3. तदा P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रत्यक्षं याति भगवान् त्रिविष्टपपतिः स्वयम् ।
ब्रह्मत्वं वा [1]ततोऽन्यद्वा प्रयच्छति महत्[2] फलम् ॥ १७० ॥

मूर्तीनामितरासां च पदं यद्यभिलष्यते ।
मूर्तिं तां तामभिध्यायन् जपेन्मन्त्रं च पूर्ववत् ॥ १७१ ॥

लभते तत्प्रसादेन स्वं स्वं पदमनुत्तमम् ।
मन्त्रेणानेन मुख्येन साधकः साधयेत्फलम् ॥ १७२ ॥

ऐहिकामुष्मिकं तत्तन्नात्र कार्या विचारणा ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वा जपमाचरेत् ॥ १७३ ॥
जपेऽधिकारो नान्यस्य मन्त्रराट् [3]स्वयमुत्तमः ॥

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
द्वादशाक्षरकल्पो नाम चतुर्विंशोऽध्यायः ॥

—:*:—

पञ्चविंशोऽध्यायः ॥

श्रीमदष्टाक्षरमन्त्रवैभवः ॥

ब्रह्मा :—

अष्टाक्षरस्य मन्त्रस्य महिमानमनुत्तमम् ।
शुश्रूषितमथ च्छन्दोविशेषं सर्षिदैवतम् ॥ १ ॥

फलं [4]तन्मन्त्रजापस्य रूपं वा कीदृशं मतम् ।
देवता साधनं चापि मदनुग्रहकाम्यया ॥ २ ॥

---

1. तदन्यद्वा T, P_1, P_2 2 फलं महत् P_1, P_2 3. अयमुत्तमः M_2
4. किं T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भगवान् :—

ब्रूहि सर्वमशेषेण मह्यं शुश्रूषवेऽच्युत ।
अष्टाक्षरस्य मन्त्रस्य फलानि न हि शक्यते ॥ ३ ॥

वक्तुं वर्षशतेनापि तेषां दिङ्मात्रमुच्यते ।
धर्मार्थकाममोक्षाणामेकान्तफलदं शुभम् ॥ ४ ॥

सिद्धयो बहुधा जप्तुर्मन्त्रं चोदितसंख्यया ।
अचिन्तनीयो महिमा देवस्येव मधुद्विषः ॥ ५ ॥

शुचौ विविक्ते विजने सर्वदोषविवर्जिते ।
वर्णचक्रं समालिख्य भूमावर्घ्यादिसाधनैः ॥ ६ ॥

अभ्यर्च्य च यथान्यायं ततो वर्णान् समुद्धरेत् ।
[1]उद्गीथमादौ विघ्नेशः प्रयोज्यस्तदनन्तरम् ॥ ७ ॥

ब्रह्मसाधनसंयुक्तो मन्दरः स्यादनन्तरम् ।
आदिदेवो व्रतो भद्रबाहुः पश्चादुदीरितः ॥ ८ ॥

वह्निर्गोपनसंवीतः श्वसनो विष्णुशीर्षकः ।
वनमाली ततो योज्यो मधुसूदनसंयुतः ॥ ९ ॥

प्रणवादिशिरो वायुरिति वर्णाः [2]क्रमोदिताः ।
बीजं विष्णुरनुस्वारः सामर्थ्यं कथितं पुनः ॥ १० ॥

अङ्गानि षट् द्विषटकस्य मन्त्रस्येव विदुर्बुधाः ।
छन्दश्च देवी गायत्री[3] अन्तर्यामी मुनिः स्मृतः ॥ ११ ॥

---

1. गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तिरेव च ।
त्रिष्टुप्च जगती चेति विराडिति तथैव च । अयं श्लोकः A, M_2 कोशयोरधिको दृश्यते । 2. वर्णक्रमोदितः P_1, P_2 3. गायत्रमन्तर्यामी P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवो नारायणः साक्षाद्दैवतं क्षेत्रमीरितम् ।
[1]परमं व्योम बुद्धिः स्यात्तत्त्वं वर्णस्सितस्तथा ॥ १२ ॥

प्रत्यक्षरमृषिर्ब्रह्मन् गौतमः प्रथमः स्मृतः ।
भरद्वाजो विश्वामित्रो जमदग्निरनन्तरम् ॥ १३ ॥

वसिष्ठः काश्यपः पश्चादत्रिः [2]कुम्भसमुद्भवः ।
छन्दांसि गायत्र्यादीनि विराडवसितानि च ॥ १४ ॥

धरो ध्रुवश्च सोमश्च आपश्चाग्निर्जलाधिपः ।
प्रत्यूषश्च प्रभातश्च देवाः प्रत्यक्षरं तथा ॥ १५ ॥

आकाशं परमं क्षेत्रमक्षरस्यावसानतः ।
सत्यादिलोकाः सप्त स्युः प्रातिलोम्येन भूमयः ॥ १६ ॥

अक्षराणां पृथिव्यन्ताः सप्तानां सप्त पद्मज ।
अग्निर्भूर्वायुराकाशः[3] सूर्यो द्यौरथ चन्द्रमाः ॥ १७

नक्षत्राणि तथा राशिरेते तत्त्वान्यनुक्रमात् ।
निरुक्तमस्य मन्त्रस्य कथयामि यथातथम् ॥ १८ ॥

[4]आपः क्लीबन्तो व्याप्त्यर्थः स्मर्यते कर्तृसाधनः ।
[5]ओकारवर्णव्यत्यासः स्यादुकारस्तु[6] पद्मज ॥ १९ ॥

[7]मकारवर्णव्यत्यासो [8]वकारस्याप्ययन्त्विदम् ।
अन्तर्बहिश्च तत्सर्वं व्याप्नोति तदुदीर्यते ॥ २० ॥

---

1. परमव्योम T, P_1, P_2 2. स्यात् कुम्भसंभवः T, P_1, P_2 3. आकाशं T, P_1, P_2 4. आपः क्लीबश्च तौ व्याप्तौ A; अविः क्लीबन्तो व्याह्यर्थः T, P_1, P_2 5. ओङ्कार° P_2 6. °उकारस्य T, P_2 7. मकारमस्मिन् व्यत्यासः A
8. रकारस्य° A; पकारस्य° M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथवा तन्तुसन्तानवृत्तेर्वाथ भविष्यति ।
टेश्च लोपो वकारस्य प्रसारणमतः परम् ॥ २१ ॥

पूर्वत्वं चोपसर्गेण स्यादन्तश्चाद्गुणः कृतः ।
यस्मिन्नोतमिदं सर्वं तदेवमभिधीयते ॥ २२ ॥

अवते रक्षणार्थत्वादटिल्लोपे च वर्तते ।
वकारस्योपधायाश्च द्वयोरूठागमः स्मृतः ॥ २३ ॥

गुणे च रूपं यत्सर्वं त्रायते तत्परं पदम् ।
अभिधेयमिति प्रोक्ता निरुक्तिः प्रणवस्य सा ॥ २४ ॥

नम्यते [1]देव एवैकस्तेषामेकं परायणम् ।
नरो देवः परस्स्रष्टा सर्गादौ पाथसामथ ॥ २५ ॥

तस्मान्नाराणि पाथांसि तान्येवायनमुच्यते ।
देवस्य हेतोश्चामुष्मान्नारायणसमाह्वयः ॥ २६ ॥

नारा वायनमावासः पुरुषस्य मधुद्विषः ।
अण्प्रत्ययः प्रकृत्यर्थे ततो वाससमाह्वयः ॥ २७ ॥

एवं मन्त्रमिमं लब्ध्वा सम्यग्गुरुमुखात्ततः ।
गुरुशुश्रूषणपरः सर्वमन्त्राणि साधयेत् ॥ २८ ॥

ब्रह्मचर्ये स्थितो मौनी मेध्याहाराशनो व्रती ।
अशनीयानि मेध्यानि वक्ष्यामि शृणु तान्यपि ॥ २९ ॥

पयोयावकशाकाम्बुफलमूलानि सक्तवः ।
आद्यं कुशोदकं मेध्यं दधि भिक्षान्नमेव च ॥ ३० ॥

1. देवता वैकः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

साधने मन्त्रजापस्य श्रृणु कालं यथोदितम्[1] ।
मार्गशीर्षे शुभे मासि द्वादश्यां चन्द्रवर्धने ॥ ३१ ॥

आराध्य परया भक्त्या नारायणमनन्यधीः ।
चक्राब्जमण्डले देवं ध्यायेदेवं समाहितः ॥ ३२ ॥

चतुर्बाहुमुदाराङ्गं चक्राद्यायुधसेवितम् ।
कालमेघप्रतीकाशं पद्मपत्रायतेक्षणम् ॥ ३३ ॥

पीताम्बरधरं सौम्यं प्रसन्नेन्दुनिभाननम् ।
चारुहासं सुताम्रोष्ठं रत्नोज्ज्वलितकुण्डलम् ॥ ३४ ॥

सुभ्रूललाटसुमुखं सर्वाभरणभूषितम् ।
ललाटे तिलकं सौम्यं दीपवत् श्वेतमृत्स्नया[2] ॥ ३५ ॥

स्फुरत्कटककेयूरहारकौस्तुभभूषितम् ।
स्फुरद्भास्करवर्णाभं शोभितं वनमालया ॥ ३६ ॥

प्रद्योतनसहस्राभभूषणैरपि [3]मण्डितम् ।
दिव्य[4]चन्दनलिप्ताङ्गं दिव्यमालाविभूषितम् ॥ ३७ ॥

श्रीभूमिस्थां [5]सुखासीनं स्वर्णसिंहासने शुभे ।
ध्यात्वैवं देवदेवेशं मन्त्रजापपरो भवेत् ॥ ३८ ॥

सुखासीनो यथाकालं शुचिर्भूत्वा समाहितः ।
मन्त्रं जपेज्जगन्नाथं समाराध्य दिने दिने ॥ ३९ ॥

जपेल्लक्षाष्टकं प्रोक्तं तदर्धं [6]जलतर्पणम् ।
तदर्धं जुहुयादग्नौ ततस्सिद्ध्यति मन्त्रराट् ॥ ४० ॥

---

1. यथोचितम् M_2 2. धृतोर्ध्वपुण्ड्रतिलकं मण्डितं चण्डभानुना । अयमर्धः P_1, P_2 ग्रन्थयोरुपलभ्यते । 3. भूषितम् T, P_1, P_2 4. ०गन्धानुलिप्ताङ्गं M_2
5. सहासीनं T 6. तिलतर्पणम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ संसाधिते मन्त्रे स्वप्ने जागरणे तथा ।
सिद्धिलिङ्गानि मन्त्रस्य मन्त्री पश्यति सन्ततम् ॥ ४१ ॥

ततस्सिद्धेन मन्त्रेण साधयेद्धर्ममुत्तमम् ।
अथ मन्त्रवरात्[1] धर्मसाधनं योऽभिवाञ्छति ॥ ४२ ॥

यः पितॄणां च सर्वेषां तर्पणं मन्त्रवित्तमः ।
ऋणत्रयाद्विनिर्मुक्तिं सर्वस्मादभिवाञ्छति ॥ ४३ ॥

उपोष्य स शुचिर्भूत्वा [2]कुम्भे चक्राब्जमण्डले ।
आवाह्य देवमाराध्य सम्यगर्घ्यादिसाधनैः ॥ ४४ ॥

गोहिरण्यादिभिर्द्रव्यैस्तिलैश्चैव कुशोदकैः ।
दत्तैर्मन्त्रजपैर्युक्तः प्रापयेल्लोकमक्षयम् ॥ ४५ ॥

पितॄन् मन्त्रप्रसादेन नरकस्थानपि क्षणात् ।
अतोऽन्यल्लुप्तपिण्डानां पितॄणां तृप्तिकारणम् ॥ ४६ ॥

विधिं वक्ष्यामि कल्याणं चतुर्वक्त्र यथातथम् ।
उपोष्य मन्त्रवित्पूर्वं पूर्वेद्युः सुसमाहितः ॥ ४७ ॥

पञ्चम्यां माघमासस्य मण्डलं चक्रपङ्कजम् ।
अर्चयित्वा ततस्तस्य मध्ये देवं जगद्गुरुम् ॥ ४८ ॥

यजेत कृसरान्नेन होमं तेनैव कल्पयेत् ।
समिदाज्यतिलैश्चापि[3] मन्त्रेणाष्टोत्तरं शतम् ॥ ४९ ॥

पित्रादिनाम सङ्कीर्त्य तारयेति पदान्वितम् ।
प्राचीनावीतिको भूत्वा होमान्ते दक्षिणामुखः ॥ ५० ॥

---

1. इहामुत्र परं M_1 2. कुर्यात् M_2 3. ०तिलेनापि P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणाग्रान् कुशान् भूमावास्तीर्य ध्यानमास्थितः ।
ध्यात्वा नारयणं देवं तर्पयेच्च तिलोदकैः ॥ ५१ ॥

तदक्षयं जलं दत्तं पितॄणां तृप्तिमावहेत् ।
तर्पयित्वा सदाचारान् ब्राह्मणान् भगवन्मयान् ॥ ५२ ॥

भोजयेत् षड्रसोपेतं भोजनं द्वादशावरान् ।
दद्यात्तेभ्यस्तिलान्वस्त्रान् गोहिरण्यादिकं ततः ॥ ५३ ॥

ततस्सव्ये भुजे न्यस्य ब्रह्मसूत्रं समाहितः ।
अग्रे भगवतो दर्भान् दक्षिणाग्रान् धरातले ॥ ५४ ॥

आस्तीर्य साग्रान् सुसमानासीनो दक्षिणामुखः ।
पात्रस्थमन्नं दधि च तिलांश्च बदरीफलम् ॥ ५५ ॥

कबलीकृत्य तान् पिण्डान् समान् मन्त्रमुदीरयन्[1] ।
मधुवातेति तिसृभिर्ऋग्भिर्बर्हिषि निक्षिपेत् । ५६ ॥

[2]गोत्रनाम समुच्चार्य पितॄणां सेचनं जलैः ।
पिण्डान् पितृभ्यो मातृभ्यो भ्रातृभ्यो गुरवे तथा ॥ ५७ ॥

आचार्याय तथान्येभ्यो बन्धुभ्यो ध्यानमास्थितः ।
अवसेचनपूर्वं तु मन्त्रेणानेन मन्त्रवित् ॥ ५८ ॥

पिण्डान् दद्यादभिध्यायन् देवं नारायणं हरिम् ।
[3]अवनेजनं प्रकुर्वीत पुनरेव विचक्षणः ॥ ५९ ॥

एवं विधाय विधिवदृणान्मुक्तश्च तत्क्षणात् ।
विमानं दिव्यमारुह्य याति ब्रह्म सनातनम् ॥ ६० ॥

---

1. उदीरयेत् P_1, P_2 2. M_1 कोशेऽयमर्धो नोपलभ्यते 3. आसेचनं T, P_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपवासान् बहुविधानक्षमः कर्तुमञ्जसा ।
देवं चक्राब्जमध्यस्थं यजेतार्घ्यादिसाधनैः ॥ ६१ ॥

सिद्धेनानेन [1]मनुना नैवेद्यैश्च चतुर्विधैः ।
हुत्वा घृतेन ज्वलने समिधाष्टोत्तरं शतम् ॥ ६२ ॥

तन्मयान् भोजयेद्विप्रान् दद्याच्च विभवोचितम् ।
इष्ट्वैवं देवदेवेशं व्रतस्थो नियतेन्द्रियः ॥ ६३ ॥

चान्द्रायणं पराकञ्च कृच्छ्रं सान्तपनं तथा ।
संवत्सरोपवासं च तथैकादश्युपोषितम् ॥ ६४ ॥

कृष्णाष्टम्यां श्रावणे च जयन्त्यादिव्रतेष्वपि ।
[2]एकैकस्योपवासस्य यदुक्तं फलमुत्तमम् ॥ ६५ ॥

तत्तच्छतगुणं[3] विद्यात्फलं पूजाविधेरपि ।
यज्ञकर्मफलाकाङ्क्षी तत्तत्फलमवाप्नुयात् ॥ ६६ ॥

तीर्थाभिगमनस्यापि फलं सप्ताहपूजनात् ।
पवित्रारोहणेनापि[4] व्रतादिपरिपूरणे ॥ ६७ ॥

स्नपने चोत्सवे पञ्चकालाभिगमने तथा ।
गोपुरालय[5]सालादिनिर्माणे प्रतिमासु च ॥ ६८ ॥

क्षेत्रारामतटाकादिप्रदाने च मधुद्विषः ।
घृतदीपप्रदाने च यत् फलं तत्सहस्रधा ॥ ६९ ॥

फलत्याराधनाद्विष्णोर्नात्र कार्या विचारणा ।
संक्रान्तौ मण्डले कुम्भे ज्वलने च मधुद्विषम् ॥ ७० ॥

---

1. मन्त्रेण T, P_1, P_2 2. एकादश्युपवासस्य A, P_2 3. ततश्चतु॰णं M_2
4. ॰आरोपणे वापि A 5. ॰शालादि॰ A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आवाह्य पूजयेद्देवं परमान्नैश्चतुर्विधैः ।
जुहुयान्मनुनानेन ज्वलनेऽष्टोत्तरं शतम् ॥ ७१ ॥

तन्मयान् भोजयेत्प्रीत्या[1] दद्याच्चैव यथावसु ।
यस्य यस्य च धर्मस्य फलं यद्यदुदीरितम् ॥ ७२ ॥

तस्य तस्य फलं तत्तन्मन्त्राच्छतगुणं भवेत् ।
अयने चोत्तरे कुम्भे वह्नौ चक्राब्जमण्डले ॥ ७३ ॥

सोपवासश्शुचिर्भूत्वा समावाह्य जगद्गुरुम् ।
यजेत [2]पूर्ववत्पश्चाद्धोमं पूर्ववदाचरेत ॥ ७४ ॥

अथार्थसाधनं मन्त्रमभिवाञ्छति चेन्नरः ।
भद्रकं मण्डलं कृत्वा तस्मिन्नाराध्य मन्त्रवित् ॥ ७५ ॥

तिलैर्बिल्वैस्तथा[3]चेध्मैर्निम्बपुष्पैश्च तण्डुलैः ।
चम्पकैर्मल्लिकाभिश्च मालत्या करवीरजैः ॥ ७६ ॥

नन्द्यावर्तैर्यूथिकाभिः प्रत्येकं शतसंख्यया ।
[4]जुह्वीत विद्यया विद्वान् सप्ताहं चतुरानन ॥ ७७ ॥

धनमक्षयमाप्नोति मन्त्रस्यास्य प्रभावतः ।
चन्दनं कुङ्कुमं कोष्ठं रोचनालक्तकं तथा ॥ ७८ ॥

घनसारं मृगमदं पिष्ट्वा तत्क्षोदवारिणा ।
धनदं विलिखेद्भूमौ सप्तरात्रमनन्यधीः[5] ॥ ७९ ॥

यजेत गन्धप्रमुखैर्निवेद्य च गुलौदनम् ।
पादेनाक्रम्य हृदयं धनदस्य जपेत्ततः ॥ ८० ॥

---

1. शक्त्या T; भक्त्या A, P_1 2. पूर्ववद्देवं M_2 3. पद्मैः T, P_1, P_2
4. जुहुयात् T, P_1, P_2 5. जितेन्द्रियः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयुतं नियुतं वापि मन्त्रराजं जितेन्द्रियः ।
ध्यात्वा नारायणं देवं तदन्ते मन्त्रवित्तमः ॥ ८१ ॥

साक्षात्करोति धनदं [1]तस्मै च धनमक्षयम् ।
प्रयच्छति धनाध्यक्षैरानीतं [2]स्वाश्रयात् क्षणात् ॥ ८२ ॥

माणिभद्रादिभिर्मन्त्रैः प्रभावेन चतुर्मुख ।
सप्ताहमथवा [3]ध्यानं कृत्वा भद्रकमण्डले ॥ ८३ ॥

हुत्वाहुतिं[4] तदन्ते च कुर्याद्ब्राह्मणतर्पणम् ।
ध्यात्वा नारायणं देवमात्मानं साधकोत्तमः ॥ ८४ ॥

पश्यन् महीतलं शुद्धमग्रहाराद्बहिः स्थितः ।
भवन्ति [5]चास्य निधयः प्रत्यक्षा बहवस्तथा ॥ ८५ ॥

अञ्जनाञ्जितचक्षुर्वा मन्त्रेणानेन मन्त्रवित् ।
निधीन् पश्यति दुष्प्रापानभीष्टांस्तत्क्षणादसौ ॥ ८६ ॥

भद्रके मण्डले पूर्वमिष्ट्वा देवं जनार्दनम् ।
यज्ञदारुं वृषस्कन्धे बध्द्वा तस्मिन् हलं पुनः ॥ ८७ ॥

कर्षयेद्भूतलं शुद्धं सितासु मणिकाञ्चनम् ।
महदाप्नोत्यभिप्रेतमथवा कमलासन ॥ ८८ ॥

वल्मीकस्य तथाभ्यर्णे कृत्वा भद्रकमण्डलम् ।
यजेत पूर्ववद्देवमन्ते वल्मीकभूमिषु ॥ ८९ ॥

नालिकेरजलैस्सार्धं पिष्टं नागबलिं क्षिपेत् ।
खात्वा वल्मीकधिष्ण्यन्तं तत्र पश्येन्महद्धनम् ॥ ९० ॥

---

1. तथैव T, P_1, P_2 2. स्वेच्छया M_2 3. यागं T, P_1, P_2
4. हुतीः T, P_1, P_2 5. चान्य A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खनित्रं क्षालयित्वा तु निशायामधिवासयेत् ।
मण्डले स्वस्तिके देवमिष्ट्वा हुत्वा तथाहुतीः ॥ ९१ ॥

अष्टोत्तरशतं भूयः [1]प्रातर्निक्षिप्य भूतले ।
शुचौ खनेत् खनित्रेण लभते सुमहद्धनम् ॥ ९२ ॥

[2]साधितं पारदं कृत्वा हस्ते जप्त्वा मनुं पुनः ।
नियुतं प्रयुतं वापि यथाशक्ति समाहितः ॥ ९३ ॥

तद्द्रवस्पर्शमात्रेण सर्वं काञ्चनतामियात् ।
पाषाणमथवा लोष्टमग्नितप्तं न संशयः ॥ ९४ ॥

औषधानि च सर्वाणि रसयुक्तानि पद्मज ।
लोहसंस्पर्शयुक्तानि सुवते कनकं महत् ॥ ९५ ॥

इत्थं धनवतां कामसमुद्रान्तः कः प्रवर्तते ।
तत्प्राप्तये विधायाब्जमण्डलं तत्र संस्मरेत् ॥ ९६ ॥

मन्त्रेशमर्चयित्वाग्रे यथापूर्वमनन्यधीः ।
जुहुयाच्च यथोक्तेन मार्गेण दिनसप्तकम् ॥ ९७ ॥

पद्मरागरुचं देवं स्मृत्वा मन्त्रं जपेत्सुधीः ।
पूर्वोक्तसंख्यया स्त्रीणां भोगं [3]चेच्छति दुर्लभम् ॥ ९८ ॥

चिन्तयित्वा फलं होमकर्मण्यवसिते ततः ।
अभीष्टसाधकं सर्वाः प्रार्थयन्ते वरस्त्रियः ॥ ९९ ॥

यावज्जीवं न त्यजन्ति कामार्ता मन्त्रवित्तमम् ।
कन्याकामः फलैः पक्वैः पुष्पैर्लाजै र्दिने दिने ॥ १०० ॥

---

1. घृतं निक्षिप्य M_2 2. पारदं परशुं M_1 3. चेतसि A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सहस्रं जुहुयाद्देवमाराध्य गरुडध्वजम् ।
लभते कन्यकामिष्टां तदन्ते न विचारणा ॥ १०१ ॥

यन्त्रं वश्यकरं वक्ष्ये श्रूयतां तद्यथातथम् ।
[1]भूर्जपत्रे लिखेच्चक्रमष्टारं रोचनादिकैः ॥ १०२ ॥

चन्दनद्वयकाश्मीरशशिकस्तूरिकान्वितैः ।
हेमसूच्या लिखेदेतैर्गन्धद्रव्यैस्तथापरैः ॥ १०३ ॥

[2]नाभिनेमियुतं चक्रमष्टारं ज्वालयान्वितम् ।
अष्टस्वरेषु विलिखेदक्षराण्यष्ट पद्मज ॥ १०४ ॥

प्रादक्षिण्येन विस्पष्टं ह्रीङ्कारं मध्यमे पदे ।
साध्यनामापि तत्रैव सोङ्कारं तदनन्तरम् ॥ १०५ ॥

हुङ्कारं नाभिवलये दिक्ष्वष्टासु समर्पयेत् ।
[3]ह्रीङ्कारं [4]नेमिवलये वशीकरणमक्षरम् ॥ १०६ ॥

तथैवाशासु सर्वासु वशं कुरु पदान्वितम् ।
तस्मिन्नावाह्य देवेशमिष्ट्वा मन्त्रं जपे[5]त्ततः ॥ १०७ ॥

अष्टोत्तरसहस्रं तु जुहुया[6]त्तावदाहुतीः ।
गुलिकां बिभ्रतस्तस्य वश्यं सर्वमनन्तरम् ॥ १०८ ॥

अथवा पादयोः पांसून् रक्तचन्दनमिश्रितान् ।
आदाय पुरुषाकारं स्त्रीरूपं वा यथेप्सितम् ॥ १०९ ॥

कृत्वा प्रतिकृतिं तस्मि[7]न्नात्मानं संस्मरेद्धरिम् ।
ताडयेन्मूलमनुना रक्तैस्तु हयमारजैः ॥ ११० ॥

---

1. अयमर्धः T, P कोशे ग्रन्थे चोपलभ्यते । 2. नेमिं शुभं M_1 3. श्रीङ्कारं M_1 4. नाभिवलये M_1 5. बुधः T, P_1, P_2 6. यादहुतीस्ततः T, P_1, P_2 7. न्यस्यात्मानं स्मरेद्धरिम् T, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रत्यहं मन्त्र[1]जापः स्यादष्टोत्तरसहस्रकम् ।
वश्या नारी [2]पुमान्वापि सप्ताहान्ते जपाद्भवेत् ॥ १११ ॥

यावज्जीवं धनैर्दत्तैरात्मना वा यथेप्सितम् ।
तिलतण्डुलदूर्वाणामयुताहुतिभिः क्रमात् ॥ ११२ ॥

ब्राह्मणक्षत्रियविशो वश्या मन्त्रप्रभावतः ।
अपामार्गसमिद्भिर्वा होमाद्वै[3]श्यान्वशं नयेत् ॥ ११३ ॥

औदुम्बरसमिद्भिर्वा पलाशसमिधापि वा ।
होमेन ब्राह्मणा [4]वश्याः पुर्वोक्ताहुतिसंख्यया ॥ ११४ ॥

त्रिभिर्मधुरसैः सिक्तैरपामार्गसमिच्छतैः ।
दशभिर्जुहुयादग्नौ राजा वश्यः क्षणाद्भवेत् ॥ ११५ ॥

अश्वत्थैः खादिरैर्वापि वशीकरणमीरितम् ।
वटवृक्षसमित्सङ्घैर्वैश्यास्सर्वे वशीकृताः ॥ ११६ ॥

शूद्रस्तु प्लक्षसमिधामाहुत्या स्ववशः क्षणात् ।
गन्धद्रव्यसमायुक्तमृत्स्नया तिलकं दधत् ॥ ११७ ॥

दृष्टमात्रेण जनतां वशं नयति मन्त्रवित् ।
ध्यात्वा करतले चन्द्रं तन्मध्ये विष्ठितं हरिम् ॥ ११८ ॥

सुखासीनं पुण्डरीककर्णिकायां सितप्रभम् ।
ध्यायन् करतलस्पर्शैः सर्वं वश्यं क्षणाद्भवेत् ॥ ११९ ॥

भक्ष्यं भोज्यं तथा पेयं फलं वा पुष्पमेव वा ।
स्पृष्ट्वा सहस्रजापेन [5]दत्तं [6]सर्वं वशं नयेत् ॥ १२० ॥

---

1. मन्त्रजापः प्रत्यहं M_1 2. क्रमाद्वापि M_1 3. द्वर्णान्वशं T, P_1, P_2
4. वैश्याः T, P_1, P_2 5. दत्त्वा A 6. सर्वान् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आकर्षणविधिं वक्ष्ये तं ब्रह्मन्नवधारय ।
भूर्जपत्रे लिखेच्चक्रमष्टारं पूर्ववर्त्मना ॥ १२१ ॥

गन्धद्रव्यैर्लिखेन्मन्त्रं हेमसूच्या विचक्षणः ।
वेष्टये[1]द्रुक्मसूत्रेण तद्यन्त्रमभिमन्त्रितम् ॥ १२२ ॥

शिखिपिञ्छपुटे न्यस्तं भावयित्वा जपेत्ततः ।
तन्नामसंयुतं मन्त्रं क्रुद्धयन्नाकर्षयेति च ॥ १२३ ॥

युक्तं सहस्रं सप्ताहं जपेत्प्रतिदिनं सुधीः ।
आत्मानं गरुडारूढं सायुधाष्टभुजं हरिम् ॥ १२४ ॥

बन्धूकपुष्पसदृशं भावयित्वा जितेन्द्रियः ।
वामोत्सङ्गे हरेर्देवीं निषण्णां कामविह्वलाम् ॥ १२५ ॥

पाशाङ्कुशधरां लक्ष्मीं ध्यात्वा च तदनन्तरम् ।
नृपं बध्द्वा गले पाशैः ताडयित्वाङ्कुशादिभिः ॥ १२६ ॥

आयुधैः पृष्ठतो मन्त्रमाकर्षयपदान्वितम् ।
जप्त्वायुतं सप्तदिनं योजनानां शते स्थितम् ॥ १२७ ॥

अपि भूपं नयत्याशु साधको मन्त्रतेजसा ।
धनेन महता युक्ताः स्वयमेवागता नृपाः ॥ १२८ ॥

वश्या भवन्ति कृत्वैवं विप्रादीनपि चानयेत् ।
योषिदाकर्षणे [3]चापि कृत्वैवं कर्म मन्त्रवित् ॥ १२९ ॥

पञ्चबाणेषुभिर्विद्धां सर्वाङ्गेषु स्त्रियं स्मरेत् ।
पाशबद्धां तथैवान्यैरायुधैस्ताडितां भृशम् ॥ १३० ॥

---

1. द्रुक्त T, P_1, P_2 2. कृद्धं आकर्षयेति च A 3. वापि M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]क्षिप्रमेकां नयेन्नारीं सप्ताहाच्छरवेगवत् ।
दूरस्थितामपि तथा राज्ञो वा महिषीमपि ॥ १३१ ॥

सा सन्निधत्ते कामार्ता मदविह्वललोचना ।
समृद्धार्थात्मना वापि धनैर्वापि यथेप्सितैः ॥ १३२ ॥

साधकं तोषयत्येषा मन्त्रजापाद्यथोदितात् ।
मृतनारीकपाले वा रोचनाद्येन वस्तुना ॥ १३३ ॥

पूर्ववच्चक्रमालिख्य तन्मध्येऽभीष्टयोषितः ।
लिखित्वा नामधेयं तत्कपाले ज्वलने पुनः ॥ १३४ ॥

तापयित्वा जपेन्मन्त्रं सप्ताहं पूर्वसख्यया ।
ततस्सिध्यति नारी सा दूरस्थापि यथेप्सिता ॥ १३५ ॥

यक्षाणा[2]मथ यक्षीणां साधनं शृणु कथ्यते ।
[3]वटवृक्षे कुटीं कृत्वा तत्र चक्राब्जमण्डले ॥ १३६ ॥

आराध्य देवं जुहुयाद्वटवृक्षसमिच्छतैः ।
दशभिः प्रत्यहं मन्त्री सप्ताहे परिनिष्ठिते ॥ १३७ ॥

पूर्वमेव वटे यक्षं यक्षीं वा कुङ्कुमादिभिः ।
लिखित्वा कर्म तत्सर्वं कुर्यादभिमुखे स्वयम् ॥ १३८ ॥

सप्तमेऽह्नि वटे रात्रौ कम्पितेऽभीतवत् स्थितः ।
गुग्गुलुं घृतमिश्रं च धूपयेन्मन्त्रवित्तमः ॥ १३९ ॥

वटाभिमुखमुत्थाय यक्षीं वा यक्षमेववा ।
साक्षात्करोति तां तं वा याचेताभीष्टमुत्तमम् ॥ १४० ॥

---

1. मेवानयेन्नारीं T, P_1, P_2 2. मपि T, P_1, P_2 3. बिल्व A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मातृत्वं वा स्वसृत्वं वा भ्रातृत्वं वा यथातथम् ।
पितृत्वं वाथ भार्यात्वमीप्सितं सर्वमाप्नुयात् ।। १४१ ।।

प्रयच्छति यथायोगं यक्षी यक्षश्च मन्त्रिणे ।
माता चेन्मातृवद्रक्षेत्पिता चेत् पितृवत्तथा ।। १४२ ।।

एवं भ्रात्रादयोऽप्यन्ये यथास्वत्राणतत्पराः ।
विद्याधरवशीकारे विधानमपरं शृणु ।। १४३ ।।

अशोकवृक्षमूलोर्व्यां कुर्यात्[1]पूजादि पूर्ववत् ।
विद्याधरेण यच्छक्यं कर्तुमस्यापि तद्भवेत् ।। १४४ ।।

अन्येषां देवयोनीनामेवं कुर्याद्यथाविधि ।
ते ते सर्वं प्रयच्छन्ति मन्त्रतुष्टा यथातथम् ।। १४५ ।।

पातालसाधनं चापि शृणु गुह्यं यथातथम् ।
होमावसानं पूजादि कर्म कृत्वा यथोदितम् ।। १४६ ।।

बिलद्वारसमीपे तु लक्षमष्टाक्षरं जपेत् ।
क्षीरवृक्षशमीदूर्वातिलाद्यानामनन्यधीः ।। १४७ ।।

प्रत्येकमयुतं होमं कुर्याद्वै साधकोत्तमः ।
निर्गच्छति बिलात्तस्मात्कामार्ता कन्यका स्वयम् ।। १४८ ।।

सहस्रपरिवारेण सार्धमायतलोचना ।
गृहीत्वा मन्त्रिणं स्वेषु मन्दिरेषु यथासुखम् ।। १४९ ।।

रमते दिव्यभोगैस्सा विचित्रैरतिमानुषैः ।
पातालद्वारपार्श्वे तु कारयेद्यागमण्डपम् ।। १५० ।।

---

1. पूजां तु M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्वजतोरणसंयुक्तं द्वारकुम्भोपशोभितम् ।
चक्राब्जं वर्तयेत्तत्र ध्यात्वा नारायणं प्रभुम् ॥ १५१ ॥

यजेत पूर्ववद्धोमं कृत्वा पूर्वोक्तसंख्यया ।
अष्टलक्षं मिताहारो जितेन्द्रियो अनन्यधीः ॥ १५२ ॥

तत्क्षणादेव नागेन्द्रकन्यका मन्त्रिणः पुरः ।
स्थिता मनोभववशा सहस्रैः [1]परिवारिताः ॥ १५३ ॥

आत्मतुल्याभिरन्याभिः कन्यकाभिर्वशीकृताः ।
गृहीत्वा मन्त्रिणं ताश्च नागालयपुरोत्तमे ॥ १५४ ॥

प्रविश्य विविधैर्भोगैर्वशीकुर्वन्ति मन्त्रिणम् ।
पीत्वा रसायनं चापि यावदाभूतसंप्लवम् ॥ १५५ ॥

रमते भीरुभिस्सार्धं दिवि देवपतिर्यथा ।
खड्गसाधनमाश्चर्यं [2]वक्ष्यते तद्यथातथम् ॥ १५६ ॥

देहजं लोहितं मन्त्री श्मशानाङ्गारमिश्रितम् ।
पेषयित्वा [3]लिपेत्खड्गं चतुस्तालायतं शुभम् ॥ १५७ ॥

श्मशानदेशे तन्मूलं स्पृष्ट्वा मन्त्रं जपेत्सुधीः ।
निशीथे निर्जने तावद्यावज्ज्वालां विमुञ्चति ॥ १५४ ॥

ज्वालाभिरस्य शोभन्ते दिशो दश चतुर्मुख ।
नानाविधानि भूतानि भवन्ति भयहेतवः ॥ १५९ ॥

अभीतो निश्चलो मन्त्रं जपेदेवं समाहितः ।
स्फुरन्तं पाणिना खड्गं गृहीत्वा दृढमुष्टिना ॥ १६० ॥

---

1. परिवारकैः M_1 2. शृणु वक्ष्यामि तद्यथा T, P_1, P_2
3. लिखेत् P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रं जपन्नभो याति यत्र विद्याधरादयः ।
विद्यामहिम्ना तेषां स राजा भवति मन्त्रवित् ॥ १६१ ॥

यक्षराक्षसदैत्यानां जेता मर्त्येषु किं पुनः ।
खड्गहस्तः सदा मन्त्रं जपन् याति त्रिविष्टपम् ॥ १६२ ॥

तत्रापि भोगमतुलं लभते चाप्सरोगणैः ।
खड्गं [1]वाथ समादाय पर्णैः पिप्पलसम्भवैः ॥ १६३ ॥

अन्तर्हितं विधायाशु नियुतं जपमाचरेत् ।
समिदाज्यैस्तथा बीजैर्जुहुयादयुतावरम् ॥ १६४ ॥

नररक्तं गजमदं पित्तमार्क्षं विमिश्रितम् ।
राजावर्तेन तैः खड्गं विलिप्याराधयेद्धरिम् ॥ १६५ ॥

तस्मिन् पूर्वोक्तमार्गेण खड्गं स्पृष्ट्वा जपः स्मृतः ।
अष्टोत्तरसहस्रेण पश्चात्तापादिसम्भवः ॥ १६६ ॥

तापे स्यादधमा सिद्धिर्मध्यमा धूमजन्मनि ।
उत्तमा ज्वलने दृष्टे पश्चात् खड्गधरः स्वयम् ॥ १६७ ॥

चरेदभीप्सितान् लोकान् भोगांश्चाप्नोति पुष्कलान् ।
शङ्खशुक्त्युदरे मन्त्रं लिखेद् गोरोचनाम्बुभिः ॥ १६८ ॥

जपेन्मन्त्रवरं स्पृष्ट्वा यावज्ज्वालावलोकनम् ।
समुत्थिता च तन्मध्ये कन्या सर्ववरप्रदा ॥ १६९ ॥

तिलकं चाक्षमालां च गुलिकाञ्जनपादुकाः ।
दिव्यौषधं रसेन्द्रञ्च कपालस्थं रसाञ्जनम् ॥ १७० ॥

---

1. वाऽऽयसमादाय T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ददाति सर्वं सा कन्या मन्त्रिणे मन्त्रवैभवात् ।
तिलकं बिभ्रतस्तस्य नरनारीमृगादिकम् ॥ १७१ ॥

स्मृतिमात्रेण पुरतो दृष्टं भवति तद् ध्रुवम् ।
तयाक्षमालया जप्तः पुरश्चरणवर्जितः ॥ १७२ ॥

मन्त्रो यथेप्सितान् कामान् तस्मै शीघ्रं प्रयच्छति ।
निधाय गुलिकामास्ये निर्भयः सर्वविष्टपे ॥ १७३ ॥

चरत्येष यथाकामं दीर्घमायुश्च विन्दति ।
अञ्जनेनाक्तनयनः स्याददृश्यः सुरासुरैः ॥ १७४ ॥

पादुकास्पर्शमात्रेण चारयत्यनले जले ।
दूरं वा गमयेच्छीघ्रं यं यं देशमभीप्सति ॥ १७५ ॥

दिव्यौषधेन भुक्तेन दुर्व्याधिर्नश्यति क्षणात् ।
[1]अचिकित्स्योऽपि कुष्ठादिर्नात्र कार्या विचारणा ॥ १७६ ॥

पाषाणादि रसेन्द्रेण स्पृष्टमग्नौ प्रतापितम् ।
हिरण्यं भवति ब्रह्मन् पीत्वा चापि रसायनम् ॥ १७७ ॥

बलवानपि तेजस्वी बलीपलितवर्जितः ।
[2]कपालाग्नौ च निक्षिप्य शत्रुमूर्धनि निक्षिपेत् ॥ १७८ ॥

[3]उच्छ्वासितो वा म्रियते सान्वबायस्सुहृज्जनः ।
दर्शयन्निन्द्रजालं चेन्मायां देवीं लिखेद्भुवि ॥ १७९ ॥

कृष्णां चतुर्भुजां सौम्यां सर्वाभरणभूषिताम् ।
सर्वाङ्गसुन्दरीं मन्त्री पूजयित्वा जपेत्ततः ॥ १८० ॥

---

1. अचिकित्सो विकुष्ठादि T
2. कपाले चाश्मा कपाले वाश्मा P_1, P_2
3. उद्वासितो वा T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयुतं नियुतं वापि मन्त्रमष्टाक्षराह्वयम्[1] ।
[2]सिद्धिः करस्था सा देवी चतुरङ्गबलं महत् ॥ १८१ ॥

भूमौ व्योम्नि बलं सर्वमुद्यतादायुधमद्भुतम् ।
दर्शयित्वाशु मन्त्रेण मन्त्रिणे मन्त्रसिद्धिदा ॥ १८२ ॥

त्रैलोक्यमपि सर्वं सा प्रदर्शयति तोषिता ।
गुलिका कथ्यते ब्रह्मन्निर्माणमधुनोच्यते[3] ॥ १८३ ॥

मनश्शिला तथा कुष्ठं हरितालं च कुङ्कुमम् ।
गोरोचनाश्च चक्राङ्गं[4] सर्वं पिष्ट्वा मधुत्रिकैः ॥ १८४ ॥

कृत्वा च गुलिकां चक्रपद्ममध्ये निवेशयेत् ।
एकादशीनिशायां वा यजेत हरिमव्ययम् ॥ १८५ ॥

द्वादश्यामर्चयित्वा च[5] जपेन्मन्त्रं यथापुरम् ।
होममग्नौ प्रकुर्वीत सहस्रं सर्पिषा ततः ॥ १८६ ॥

सिद्धेयं गुलिका [6]सर्वं साधयेत् साधकस्य हि ।
वेतालसाधनं [7]ब्रह्मन् कथयामि यथातथम् ॥ १८७ ॥

ब्राह्मणं क्षत्रियं वापि युवानं निर्व्रणं मृतम् ।
तत्क्षणादेव सङ्गृह्य शून्यागारे निवेशयेत् ॥ १८८ ॥

क्षालयित्वा मलं सर्वं चक्रपद्मे निवेश्य तम् ।
हृदयं तस्य चाक्रम्य पादेन ध्यानमास्थितः ॥ १८९ ॥

जपेन्मन्त्रं दिवारात्रं निशीथे कम्पते शवः ।
निर्भयस्ताडयेद्देहं सिद्धार्थैरभिमन्त्रितैः ॥ १९० ॥

---

1. मष्टाक्षरान्वितम् T, P_1, P_2 2. सिद्धा पदं ते देवी T; सिद्धा तदन्ते सा देवी P_1, P_2 3. तन्निर्माणं मयोच्यते M_2 4. सर्वाङ्गं M_2 5. सः M_2; तु T, P_1, P_2 6. सद्यस्साधयेत्सर्वमीप्सितम् M_2 7. चापि M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कम्पमानं शरीरं तदुत्थायाग्रेऽवतिष्ठते ।
किं करोमीति च ततो मन्त्रिणं सम्पुटाञ्जलिः ॥ १९१ ॥

ब्रुवाणो मन्त्रिणे तस्मै प्रयच्छति यथेप्सितम् ।
[1]खड्गमिष्टं तथा दिव्यमौषधं च रसायनम् ॥ १९२ ॥

गुलिकां पादुके [2]सिद्धं रसं वेणुपुटे स्थितम् ।
पादलेपं चाक्षसूत्रमन्यद्वा दुर्लभं नृभिः ॥ १९३ ॥

पादलेपेन गमनमाकाशेषु[3] सुमन्त्रिणः ।
खड्गेन शत्रुसैन्यानां वधः केसरिणामपि ॥ १९४ ॥

दिव्यौषधानां सर्वेषां फलं पूर्वमुदीरितम् ।
आमयानामपस्मारमुखानां शान्तये विधिः ॥ १९५ ॥

भूभागे शल्यरहिते कृत्वा मण्टपमादितः ।
निर्व्रणान् लक्षणोपेतान् कलशान् पञ्चविंशतिम् ॥ १९६ ॥

पूरितान् द्रोणमात्रेण सर्पिराद्येन वस्तुना ।
ससूत्रान् सकुशांश्चैव सापिधानान् सवस्त्रकान् ॥ १९७ ॥

द्वारकुम्भांश्चतुर्दिक्षु तोरणानि च कल्पयेत् ।
प्रत्येकं कलशान् [4]सर्वान् मन्त्रेणैवाभिमन्त्रयेत् ॥ १९८ ॥

अष्टाक्षरेण प्रत्येकमष्टोत्तरशतावरम् ।
निशाम्बुना चन्दनेन श्वेतदूर्वाङ्कुरेण च ॥ १९९ ॥

भूर्जपत्रोदरे पद्ममष्टपत्रं सकर्णिकम् ।
नाभिनेमियुतं चक्रमष्टारं कमलाद्बहिः ॥ २०० ॥

---

1. खड्गमुष्टिं T, P_1, P_2 2. सिद्धिं M_2 T.   3. °माकाशादिषु मन्त्रिणः T, P_1, P_2 4. तत्तन्मन्त्रेणैवा° M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणवं कर्णिकादेशे साध्यनाम च मध्यतः ।
अष्टाक्षराण्यष्टदले नाभौ स्पर्शाक्षरं लिखेत् ॥ २०१ ॥

[1]नेमिक्षेत्रे यकारादीनष्टारेषु स्वरान् पुनः ।
महामायाग्निसंयुक्तं भास्करं दण्डशेखरम् ॥ २०२ ॥

नेमिभागे क्रमाद्दिक्षु विदिक्षु चतुरानन ।
कृत्वैवं सितसूत्रेण परिवेष्ट्य निरन्तरम् ॥ २०३ ॥

गुलिकां तण्डुलद्रोणमध्यस्थे कलशे क्षिपेत्[2] ।
आवाह्य हृदयात्तस्मिन् [3]मन्त्रेशं चक्रपङ्कजे ॥ २०४ ॥

चन्दनाद्यैस्सितैर्वस्त्रैः पुष्पैरन्यैश्चतादृशैः ।
शाल्योदनेन च हरिं यजेत सुसमाहितः ॥ २०५ ॥

पूर्णेन्दुमण्डलान्तःस्थमुद्गिरन्तं सुधारसम् ।
शशाङ्कशतसङ्काशं ध्यात्वा नारायणं हरिम् ॥ २०६ ॥

शान्तिं प्रयच्छ महतीमित्यन्ते समुदीरयेत् ।
शशिनो दिशि वृत्तेऽथ कुण्डे श्रीराज्यतण्डुलैः ॥ २०७ ॥

[4]गुग्गुलं क्षौद्रबीजांश्च सप्ताहं होममाचरेत् ।
पूर्वोक्तसंख्यया कुम्भैः [5]स्थापितैरामयाविनम् ॥ २०८ ॥

स्नापयेन्मूलमन्त्रेण ध्यायेच्चैव जनार्दनम् ।
पूर्णेन्दुशतसङ्काशं स्यन्दमानं सुधारसम् ॥ २०९ ॥

तदीयपादकमलात् सर्वतो व्याधिपीडितम् ।
प्रविश्य ब्रह्मरन्ध्रेण प्लावयन्तमनन्यधीः ॥ २१० ॥

---

1. नाभि T, P_1, P_2 2. न्यसेत् M_1 3. मध्ये चक्रं च पङ्कजम् M_2
4. कुङ्कुमक्षौदनिम्बैश्च A 5. स्थापितैरामयान्वितम् M, T ; स्थापितं चामयाविनम् P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्यात्वा जपेन्मूलविद्यां मन्त्रविद् व्याधिपीडितम्[1] ।
उत्थापयति तन्मूर्ध्नि न्यस्य तां गुलिकामध:[2] ॥ २११ ॥

अपस्मारादयस्सर्वे शाम्यन्ति मनुतेजसा ।
अथादाय च मृत्पात्रं पैत्तलं वाथ काष्ठजम् ॥ २१२ ॥

तस्मिन्निक्षिप्य पीयूषं दधिसर्पिस्समन्वितम् ।
ओदनं चैत्यवृक्षादिमूले भूतबलिं [3]क्षिपेत् ॥ २१३ ॥

भोजयेद्ब्राह्मणानन्ते दद्यात्तेभ्यो यथावसु ।
[4]पौष्टिं वक्ष्यामि ते कर्म मण्डपादि यथापुरम् ॥ २१४ ॥

भूर्जपत्रे लिखेद्यन्त्रं प्राग्वत्पद्मादिसंयुतम् ।
श्रीभूमिमन्त्रं च लिखेत्केसरेषु दलेषु च ॥ २१५ ॥

गुलिकां वेष्टितां रक्तसूत्रैर्मधुघटे क्षिपेत् ।
विद्रुमाभं च मन्त्रेशं समावाह्य च [5]सर्वगम् ॥ २१६ ॥

सौम्याशायां पद्मकुण्डं कलशान् रक्तवाससः ।
वस्तु सर्वं यथोक्तं तद्युक्तं स्यात् सति सम्भवे ॥ २१७ ॥

बलिकर्म च कर्तव्यं कर्मान्ते कमलासन ।
महती [6]वृष्टिरेव स्यात् कृते कर्मणि शान्तिके ॥ २१८ ॥

आयुष्कामस्तु दूर्वाभिर्घृताक्ताभिर्यथोदितम्[7] ।
जुहुयान्मण्डपादीनां विधानं पूर्ववर्त्मना ॥ २१९ ॥

कर्मान्ते कलशैः स्नानं साध्यस्य कमलासन ।
एवं कृते यथाशास्त्रं आयुर्विन्दति पुष्कलम् ॥ २२० ॥

---

1. आधिपीडितम् T 2, मथ T, P_1, P_2 3. हरेत् M_1 4. पौष्टिकं वक्ष्यते कर्म M_2 5. सर्वदा M_2 6. पुष्टि T, P_1, P_2 7. यथोदितामिति पाठेऽर्थबोधो न जायते। अतो यथोदितमिति पाठेन भाव्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आरोग्यकामस्सावित्रे मण्डले हरिमर्चयेत् ।
रुक्माभं विद्ययाऽर्घ्यादिसाधनैरुक्तवर्त्मना ॥ २२१ ॥

पूर्ववज्जपहोमादि होमो गुग्गुलुवस्तुभिः ।
जपान्ते प्रणमेन्नित्यमङ्गैरष्टाभिरात्मवान् ॥ २२२ ॥

यावदायुष्यमारोग्यं लभते मन्त्रवैभवात् ।
[1]ज्वरितस्य भवेच्छान्तिरमृताचूतपल्लवैः ॥ २२३ ॥

पूर्वोक्तेन विधानेन सर्वमन्यद्यथोदितम् ।
ज्वरशान्तिर्भवेदन्ते विद्यावीर्यप्रभावतः ॥ २२४ ॥

चन्दनादिद्रुमैर्लोहैर्यद्वा प्रतिकृतिः कृता ।
पूजिता पूर्ववत्सर्वान् कामानाशु प्रयच्छति ॥ २२५ ॥

होमश्च कर्मानुगुणैर्द्रव्यैः स्यात्कमलासन ।
अश्वत्थं मन्दवारेषु स्पृष्ट्वा दक्षिणपाणिना ॥ २२६ ॥

जपतो नापमृत्युः स्यात्पूर्वमीरितसंख्यया ।
घृतमिश्रं वचाचूर्णं यद्वा ब्राह्मीं घृताप्लुताम् ॥ २२७ ॥

ज्योतिष्मतीरसं वापि स्पृष्ट्वा लक्षं जपन् पिबेत् ।
मुहूर्ते शोभने प्राप्ते वाक्सिद्धिस्तस्य निश्चिता ॥ २२८ ॥

औदुम्बरेऽथवा [2]पात्रे कपिलाज्यं चतुष्पलम् ।
मिश्रं श्वेतवचाचूर्णं यद्वा चन्द्रेमघायुते ॥ २२९ ॥

पुण्ये[3] सारस्वते योगे श्वेतवर्णं चतुर्भुजम् ।
श्वेतपद्मे सुखासीनं चन्द्रमण्डलमध्यगम् ॥ २३० ॥

---

1. ज्वलितस्य T   2. पत्रे T   3. पूर्णे M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इष्ट्वा देवं गोघृतेन जुहुयाच्च यथाविधि ।
स्पृशन् स्रुचं स्रुवं पश्चाल्लभते वाचमुत्तमाम् ॥ २३१ ॥

अष्टबाहुं चन्द्रनिभमात्मानं शेषविष्टरे ।
सुखासीनं भावयित्वा [1]कौपीनं प्रतिवादिनम् ॥ २३२ ।

पिधाय जिह्वां हृदयं मुसलेन शिरोऽङ्कुशैः ।
ताडयेद्गदया पृष्ठं पाशैर्बद्ध्वा कलेबरम् ॥ २३३ ॥

तस्यैव जिह्वामध्ये च माहेन्द्रं दण्डशेखरम् ।
विन्यस्य स्तम्भयेद्वाचमेवं ध्यायन्विचक्षणः ॥ २३४ ॥

आत्मनो वादिनश्चैव मध्ये यवनिका भवेत् ।
मन्त्रं शतगुणं जप्त्वा वादी वाचं समुत्सृजेत् ॥ २३५ ॥

सद्यः परस्यापजयो विजयश्चात्मनो भवेत् ।
स्तम्भने नैव दोषः स्याद्ब्राह्मश्चेत्प्रतिवादिनः ॥ २३६ ॥

ब्रह्मवर्चसकामश्चेत् [2]समिधो ब्रह्मवृक्षजाः ।
श्वेतपङ्कजहोमो वा राज्यकामस्य मन्त्रिणः ॥ २३७ ॥

समिधो [3]रक्तवर्णाः स्युर्बिल्वपुष्पाणि पद्मज ।
[4]लक्ष्मीं सुमनसो वापि यद्वा बोधिसमुद्भवाम् ॥ २३८ ॥

चन्द्रमण्डलमध्यस्थं श्वेतपङ्कजविष्टरे ।
स्थितं द्विहस्तं सुभगं बालभूषणभूषितम् ॥ २३९ ॥

बालावस्थं प्रसन्नेन्दुवर्चसं नीलकुन्तलम् ।
राजतं पात्रमन्नेन पायसेन प्रपूरितम् ॥ २४० ॥

---

1. कोपिनं T. P. 2. समिद्भिर्ब्रह्मवृक्षजैः M_1 3. -पद्माः स्युः A
4. लक्ष्मीमिति पाठःसाधीयान् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिभ्राणं वामहस्तेन दध्यन्नकबलं पुनः ।
[1]दधानमितरेणापि ध्यात्वा देवं समाहितः ॥ २४१ ॥

अन्नेन जुहुयादग्नौ बह्वन्नं[2] समवाप्नुयात् ।
गोकामो गोमयैः क्षीरैस्तदीयैर्होममाचरेत् ॥ २४२ ॥

लभते धेनुकं सद्यो मन्त्रविन्मन्त्रवैभवात् ।
भूमिकामो मृदा होमं दुर्लभां लभते भुवम् ॥ २४३ ॥

फलैर्बिल्वसमुद्भूतैर्होमाद्राष्ट्रसमुद्भवः ।
वस्त्रकामस्सुमनसां कालजानां चतुर्मुख ॥ २४४ ॥

सितासितादिवर्णानां होमान्नियुतसंख्यया ।
नानाविधानि वस्त्राणि लभते नात्र संशयः ॥ २४५ ॥

यद्यत्कामयते मन्त्री धान्यजातमनेकधा ।
तत्तद्धोमेन तत्सर्वं लभते मन्त्रवैभवात् ॥ २४६ ॥

[1]मन्त्राक्षरैर्मन्त्रितं बीजमुप्तं बहुफलं भवेत् ।
पुत्रकामो हविष्याशी समाराध्य जगद्गुरुम् ॥ २४७ ॥

चक्राब्जमण्डले कुम्भस्थापनादि विधाय च ।
यथापूर्वं पायसान्नं होमान्ते स्थापितैर्घटैः ॥ २४८ ॥

अभिषिच्य तदम्भांसि पाययेत् स्त्रियमागताम् ।
सा पुत्रान् लभते त्विष्टान् बहून्विद्याविचक्षणान् ॥ २४९ ॥

इष्ट्वा नारायणं देवं चक्राब्जे प्रोक्तवर्त्मना ।
अनुग्रहे निग्रहे च सर्वेषां शक्तिमान् भवेत् ॥ २५० ॥

---

1. इतरेण धारयन्तं M_2
2. -न्नत्वमवाप्नुयात् T, P_1, P_2
3. मन्त्राभिमन्त्रितं T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कम्पने वसुधादीनां पर्वतानां च भेदने ।
शोषणे वा समुद्राणां सर्पाणां स्तम्भनेऽपि च ॥ २५१ ॥

सर्गस्थितिविनाशानामपि कर्ता यथा हरिः ।
ध्यानाच्च देवदेवस्य जपान्मन्त्रस्य च क्षणात् ॥ २५२ ॥

नश्यन्ति भूतवेतालप्रमुखानि चतुर्मुख ।
दुष्टसत्वानि मन्त्रस्य प्रभावान्नात्र संशयः ॥ २५३ ॥

विष[1]दष्टमवस्थाप्य ध्यात्वा च गरुडध्व[2]जम् ।
देवं विद्यां समुच्चार्य तीक्ष्णतुण्डेन ताडयेत् ॥ २५४ ॥

गरुडस्य च पक्षाभ्यां विषदष्टस्य मूर्धनि ।
एवं ध्यात्वा विषं सर्वं व्यपोह्योत्थापयेन्मृतम् ॥ २५५ ॥

भुक्तं विषेण संसृष्टमन्नं बीजं फलं तथा ।
जरयेद्विद्यया सद्यः सर्वदोषं च नाशयेत् ॥ २५६ ॥

अक्षयश्चाभिवृद्धिश्च धनस्य यदि काङ्क्षतः ।
संस्पृश्य विद्यया सर्वं निक्षिपेद्बहु जप्तया ॥ २५७ ॥

बन्धूककुसुमप्रख्यमात्मानं भगवन्मयम् ।
ध्यायन् यायात्सभां तत्र क्रुद्धश्शाम्यति भूमिपः ॥ २२८ ॥

अनुक्तास्सिद्धयः सर्वाः सिध्यन्त्यत्यन्तविस्तृताः ।
शास्त्रे मन्त्र[3]प्रभावेन देवभूयं प्रपद्यते ॥ २५९ ॥

वृष्टिकामो बहिश्शालां पूर्वोक्तविधिना कृताम् ।
चक्राब्जमण्डलादीनि कृत्वा कर्माणि पूर्ववत् ॥ २६० ॥

---

1. दुष्ट M_1 2. गरुडसंस्थितम् M_1 3. प्रसादेन M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्ताहमाज्यसिक्ताभिः समिद्भिर्जुहुयात्सुधीः ।
वैतसीभिः प्रतिदिनं नियुतायुतसंख्यया ॥ २६१ ॥

वृष्टिर्भवति तद्राष्ट्रे तद्देशे वा दिनत्रये ।
मरीचिक्षुण्णसंमिश्रैः सर्षपैः राजसर्षपैः ॥ २६२ ॥

पूर्वोक्तसंख्यया होमादतिवृष्टिश्च शाम्यति ।
देवतादिपदप्रेप्सुर्विद्यया लोकमीप्सितम् ॥ २६३ ॥

[1]स्वर्गाद्यभीष्ट[2]लोकस्य महिमानुगुणैर्जपैः ।
लभते तत्तदाश्चर्यं फलं नैवात्र संशयः ॥ २६४ ॥

चिन्तारत्नं तथैवान्यमणिमादिगुणं [3]पदम् ।
लिप्सुर्मन्त्रजपैः कोटिसंख्यैः प्राप्नोति मन्त्रवित् ॥ २६५ ॥

मन्त्राधिदैवतं देवं द्रष्टुकामो जितेन्द्रियः ।
षण्मासान्मन्त्रमनिशं जपेत् तध्यानमास्थितः ॥ २६६ ॥

आगत्य देवदेवेशः प्रत्यक्षो भवति क्षणात् ।
वरांश्च दुर्लभांस्तस्मै प्रददाति यथेप्सितान् ॥ २६७ ॥

मन्त्रिणे मन्त्रमाहात्म्यादचिरेण चतुर्मुख ।
मन्त्रान्तराणां या सिद्धिः कल्पे समीरिता ॥ २६८ ॥

सापि प्रसिध्येदस्यैव सकला वीर्यवत्तया ।
षडङ्गानि च वेदाश्च मन्त्राश्चान्ये परश्शताः ॥ २६९ ॥

अन्यच्च वाङ्मयं सर्वं मन्त्रेऽस्मिन् सुसमाहितम् ।
अपुनर्भवलिप्सूनां गतिरष्टाक्षरं मतम् ॥ २७० ॥

---

1. स्वर्गादेरिष्ट M_2 2. लोके M_1 3. परम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जन्मन्यस्मिन्नतीते वा यदेनः सञ्चितं महत् ।
तन्मन्त्रजापमात्रेण प्रलयं याति निश्चयम् ॥ २७१ ॥

म्रियमाणश्शुचिर्भूत्वा मन्त्रमेतदुदीरयन् ।
प्राप्नोति वैष्णवं स्थानं दुष्प्राप[1]मविनश्वरम् ॥ २७२ ॥

किं तस्य बहुभिर्मन्त्रैः किं तस्य बहुभिः श्रुतैः ।
यस्यैषा वशमापन्ना विद्या सर्वार्थसाधनी ॥ २७३ ॥

ये मन्त्रमाहात्म्यमिदं शृण्वन्ति च पठन्ति च ।
तेषामपि फलान्याहुः पूर्वोक्तानि मनीषिणः ॥ २७४ ॥

चतुर्मुखश्चतुर्वक्त्रैः फलान्यस्य प्रदर्शयन् ।
नान्तं जगाम विस्तीर्णं संक्षेपोऽयमुदीरितः ॥ २७५ ॥

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
श्रीमदष्टाक्षरमन्त्रवैभवो नाम पञ्चविंशोऽध्यायः ॥

—: * :—

षड्विंशोऽध्यायः ॥

विष्णुगायत्र्यादिमन्त्रोद्धारः ॥

श्रीभगवान्—

गायत्रीं वैष्णवीं ब्रह्मंश्चतुर्विंशत्यक्षरात्मिकाम् ।
शृणु वक्ष्यामि परमं रहस्यं कथ्यतेऽधुना ॥ १ ॥

मातृकाचक्रमभ्यर्च्य छन्दसामादिमुद्धरेत् ।
आदिदेवशिरश्चात्र विन्नेशं तदनन्तरम् ॥ २ ॥

---

1. मविनाशनम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वह्न्यन्तं गोपनं पञ्चशाखं[1] विष्णुशिरः [2]स्मृतम् ।
सुमुखं गोपनयुत[3]मन्यच्च मरुदादिमत् ॥ ३ ॥

[4]मायाश्रितं सुधाधाम [5]वैधरोऽन्वक् च मन्दरम् ।
विष्णुशीर्षो भास्करोऽथ माधवाधिष्ठितः क्रमात् ॥ ४ ॥

आदिदेवसमाक्रान्तः कुम्भशुक्रोदयावहौ ।
वैधरो देवतान्तश्च पीयूषरुचिराशिराः ॥ ५ ॥

अनिलः प्रणवाद्यन्तो महामायाशिराः क्रमात् ।
धनदोऽनु ततो दक्षो विष्णुमूर्धाऽथ भास्करः ॥ ६ ॥

मायाशिराश्च वैराजो विष्ण्वन्तो भद्रपाणियुक् ।
ओतदेहः परः कुम्भः त्रिविक्रमपरः स्मृतः ॥ ७ ॥

क्रोधनं वनमाल्यन्तं तद्द्वयं भुवनावधि ।
विसर्गः पापहन्ता च वह्निश्चाद्यर्णसंयुतः ॥ ८ ॥

चकारश्चोतदेहश्च द्वौ दृष्टि[6]र्विष्णुमूर्धगः ।
दरश्च गोपनश्चोभौ विजयोर्णस्समुद्धृतः ॥ ९ ॥

छन्दश्च देवी गायत्रमृषिर्ब्रह्माधिदैवतम् ।
विष्णुष्षडङ्गानि तथा [7]क्रुद्धोल्कादीनि पद्मज ॥ १० ॥

मूर्धादिपादपर्यन्तमक्षरन्यसनं मतम् ।
मूर्ध्नि फाले नयनयोर्नासिकापुटयोस्तथा ॥ ११ ॥

श्रोत्रयोरास्यगलयोर्हृदये बाहुमूलयोः ।
न्यासःकूर्परयोश्चैव तथैव मणिबन्धयोः ॥ १२ ॥

---

1. पश्चाच्छङ्खं T, P_1, P_2 2. तथा A   3. अन्वक् च M_2
4. मायायुतं M_2 5. विजयान्वक् M_2 6. वृष्टिः M_2 7. क्रुद्धोल्कादीनि T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हस्तयोः कुक्षिमध्ये च गुह्ये चोर्वोश्च जङ्घयोः ।
पादयोश्च क्रमादेवं न्यासः प्रोक्तश्चतुर्मुख ॥ १३ ॥

पीतं रक्तं च धूम्राभं श्वेतं कृष्णं च लोहितम् ।
वलक्षं पीतकं रक्तं श्यामं शङ्खनिभं तथा ॥ १४ ॥

पाटलं स्फटिकाभं च पीतं रजतसन्निभम् ।
चन्द्रदीधितिसङ्काशं पद्मकिञ्जल्कसन्निभम् ॥ १५ ॥

ताराभं बन्धुजीवाभं नक्षत्राभं च पाटलम् ।
जपाकुसुमसङ्काशं तप्तजाम्बूनदप्रभम् ॥ १६ ॥

रविप्रभं च[1] वर्णानां वर्णभेदः प्रदर्शितः ।
कालमेघनिभं सौम्यं चतुर्बाहुं किरीटिनम् ॥ १७ ॥

शङ्खचक्रगदापाणिं गरुडारूढमच्युतम् ।
एवं ध्यात्वाऽर्चयेद्देवं प्रातःकाले समाहितः ॥ १८ ॥

स्फटिकोपलसङ्काशं गरुडारूढविग्रहम् ।
मध्यन्दिनेऽर्चयित्वा तमाचरेज्जपमात्मवान् ॥ १९ ॥

प्रदोषेषु चतुर्हस्तं वैनतेयोपरिस्थितम् ।
श्यामलं पुण्डरीकाक्षं ध्यायन्मन्त्रमुदीरयेत् ॥ २० ॥

[2]कुर्वंस्त्रिषवणस्नानं व्रतस्थः संयतेन्द्रियः ।
चतुर्विंशतिलक्षेण मन्त्रजापेन सिध्यति ॥ २१ ॥

मन्त्रवित्साधको वारितर्पणं होमकर्म च ।
कुर्वन्नाप्नोति सकलां सिद्धिमिष्टां सुदुर्लभाम् ॥ २२ ॥

---

1. चाक्षराणां P_1 2. कुर्यात P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गोमूत्रयावकाहारो जपेल्लक्षमतन्द्रितः ।
पातकेभ्यो महद्भ्योऽपि मुच्यते नात्र संशयः ॥ २३ ॥

ब्रह्मकूर्चं पिबन् लक्षत्रयं मन्त्रं जपन् सुधीः ।
तत्समेभ्यः पातकेभ्यो [1]विमुक्तो मन्त्रवित्तमः ॥ २४ ॥

ब्रह्मादिदेवताः सर्वा निनीषुर्वशमात्मनः ।
अणिमादि फलं प्रेप्सुः तथैवाकर्षणोद्यतः ॥ २५ ॥

वशीकारे च सर्वेषां पातालगमने तथा ।
गन्धर्वयक्षप्रमुखान् प्रमुखानात्मनः सदा ॥ २६ ॥

चिकीर्षुरष्टाक्षरवदनुतिष्ठेच्चतुर्मुख ।
सकृदुच्चारयन्मन्त्रं विष्णुगायत्रिसंज्ञितम् ॥ २७ ॥

[2]वेदानामसकृत्सर्वशाखाध्ययनपुण्यभाक् ।
केशकीटादिदुष्टानि हवींषि ध्यानमास्थितः ॥ २८ ॥

स्पृष्ट्वा जपेन्मन्त्रमिदं सद्यश्शुद्धानि पद्मज ।
चतुर्णां मूलमन्त्राणां फलमेतेन सिध्यति ॥ २९ ॥

श्रीकरं मन्त्रमपरं वक्ष्ये सर्वार्थसाधनम् ।
अष्टाक्षरं चतुर्वक्त्रै रहस्यं परमं शृणु ॥ ३० ॥

[3]वर्णचक्रं लिखित्वादौ [4]सम्यगभ्यर्च्य तत्पुनः ।
उद्धरेच्छ्रीकराष्टार्णं मन्त्रं मन्त्रप्रभाववित् ॥ ३१ ॥

आदौ समुद्धरेत्तारमुदयं तदनन्तरम् ।
द्विरेकनेत्रमायान्तं क्रोधनं कौस्तुभाक्षरम् ॥ ३२ ॥

---

1. मुच्यते M_2 2. उदीरयन् सकृत् A 3. चक्रं लिखित्वा भूम्यादौ A, M_2 4. समभ्यर्च्य ततः पुनः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्णुशीर्षं ततो लक्ष्मीमनकं तदनन्तरम् ।
महामायायुतं पद्मप्रमेयमनन्तरम् ॥ ३३ ॥

अग्निमादिं चतुर्वक्त्र ठठेति [1]श्रीकराह्वयम् ।
बीजमस्य प्रवक्ष्यामि यथातत्त्वमुदीर्यते ॥ ३४ ॥

दीप्तिमाननलः पञ्चबिन्दूर्ध्वेन्दुनिष्ठितः ।
बीजमङ्गानि षट् चापि क्रुद्धोल्कादीनि पूर्ववत् ॥ ३५ ॥

छन्दश्च देवी गायत्रं ऋषिरस्य प्रजापतिः ।
देवता देवदेवेशः प्रत्यर्णं पूर्ववत् स्मृतः ॥ ३६ ॥

ऋषिश्छन्दो दैवतं च ध्यानं सम्प्रति कथ्यते ।
कल्पकानोकहच्छायामाश्रित्य सुखशीतलाम् ॥ ३७ ॥

गरुडस्य चतुर्बाहोस्सर्वालङ्कारधारिणः ।
स्कन्धदेशे सुखासीनमष्टबाहुं किरीटिनम् ॥ ३८ ॥

कुन्देन्दुधवलं सौम्यं सर्वाकल्पपरिष्कृतम् ।
दिव्यगन्धविलिप्ताङ्गं दिव्यमालाविभूषितम् ॥ ३९ ॥

पीताम्बरधरं नीलकुन्तलैरुपशोभितम् ।
चक्रं च मुसलं बाणमङ्कुशं दधतं भुजैः ॥ ४० ॥

चतुर्भिर्दक्षिणैरन्यैः शङ्खं कौमोदकीं तथा ।
शार्ङ्गं पाशं च कल्याणैः प्रसन्नेन्दुनिभाननम् ॥ ४१ ॥

गरुडोऽपि च हस्ताभ्यामुभाभ्यां पादपङ्कजे ।
देवस्य धारयन् कुम्भं पूर्णं पीयूषवारिणा ॥ ४२ ॥

---

1. श्रीधरा M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इतराभ्यां च [1]बाहुभ्यां स्पृशन्नास्ते स्थितं तथा ।
श्रियं च वामोरुतले रुक्माभां क्षौमवाससीम् ॥ ४३ ॥

दिव्यगन्धविलिप्ताङ्गां सर्वाकल्पपरिष्कृताम् ।
सुभ्रूललाटमकुटां कर्णविश्रान्तलोचनाम् ॥ ४४ ॥

लावण्यामृततोयेन वर्षन्तीमिव सर्वतः ।
पाशाङ्कुशधरां लक्ष्मीं कन्दर्पशरपीडिताम् ॥ ४५ ॥

ध्यात्वैवं पूजयित्वा तु व्रतस्थस्संयतेन्द्रियः ।
द्वादशाहं जपेन्मन्त्रं ध्यात्वा पार्श्वे निषिद्ध्वयम् ॥ ४६ ॥

ऊर्ध्वबाहुर्जले तिष्ठन्नुरोदघ्ने समाहितः ।
आदित्याभिमुखो मन्त्री जुहुयाच्च समिच्छतम् ॥ ४७ ॥

बिल्वोद्भवैस्तथा लक्ष्मीं कुसुमैः पायसोदनैः ।
शुद्धोदनै[2]र्घृताक्तैश्च अष्टोत्तरसहस्रकम् ॥ ४८ ॥

एवं कृते विधानेन पुष्टिरुत्पद्यतेऽचला ।
पौष्टिकादि च पूर्वोक्तं फलं पूर्वोक्तसंख्यया ॥ ४९ ॥

शान्तिकं पौष्टिकं कर्म मन्त्रेणानेन साधयेत् ।
लक्ष्मीनारायणाह्वानं मन्त्रं परमदुर्लभम् ॥ ५० ॥

तस्योद्धारं प्रवक्ष्यामि शृणु वर्णक्रमेण तम् ।
उद्गीथं मनुजेशानं विष्णुं मन्दरपोतवत्[3] ॥ ५१ ॥

[4]सूक्ष्मदङ्मुख्यमपरं गदिनं कुम्भमर्पितम् ।
आद्यन्तं विजयं दत्तं माहेन्द्रं चाप्रमेयकम् ॥ ५२ ॥

---

1. हस्ताभ्यां T, P_1, P_2 2. घृताक्तैश्च M_1 3. मेव तत् T, P_1, P_2
4. सूक्तीन्दु T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गरुडं दक्षमपरं महामायां विनायकम् ।
आदिदेवं ततो वह्निं गोपनं च चतुर्गतिम् ॥ ५३ ॥

आद्यं प्रचण्डमाकारं शङ्खमादिं ठठेति च ।
उद्धृत्य षोडशार्णं तं मन्त्रबीजं च कथ्यते ॥ ५४ ॥

द्युमणिं बिन्दुमपरं वामनं बिन्दुमुद्धरेत् ।
अङ्गानि पूर्वमुक्तानि छन्दो गायत्रमुच्यते ॥ ५५ ॥

विद्धि शुक्रो मुनिर्देवो लक्ष्मीनारायणः स्मृतः ।
जपष्षोडशलक्षं तु तदर्धं वारितर्पणम् ॥ ५६ ॥

होमस्तदर्धो मन्त्रस्य फलान्याहुर्यथाक्रमम् ।
सङ्कर्षणादिमूर्तीनां तिसृणां मनुरुच्यते ॥ ५७ ॥

आदितः पूर्ववत् सप्तवर्णानामानुपूर्वशः ।
उद्धारश्शिष्टवर्णानां ब्रह्मन् सम्प्रति कथ्यते ॥ ५८ ॥

दीप्तिमान्वह्निरौर्वश्च ध्रुवशुक्रस्तथादिमान् ।
बिन्दुः प्रजापतिश्चाद्यो वह्निरुग्रो मुखं ततः ॥ ५९ ॥

सुमुखं गोपनयुतं वायुराद्यं ठठान्तिमम् ।
द्वादशार्णात्मको मन्त्रो बीजमङ्गं च पूर्ववत् ॥ ६० ॥

छन्दश्च देवी गायत्रं ऋषिः स्यान्नीललोहितः ।
देवः सङ्कर्षणो वर्णो देवतातत्त्वनिर्णयः ॥ ६१ ॥

द्वादशाक्षरवज्ज्ञेयः पुरश्चरणमीरितम् ।
फलानि पूर्वमुक्तानि वाक्सिद्धिर्महती भवेत् ॥ ६२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञानं च महदाप्नोति यच्चान्यदधिकाङ्क्षितम्[1] ।
तत्सर्वमचिरादेव सिध्येन्मन्त्रप्रभावतः ॥ ६३ ॥

शङ्खगोक्षीरधवलं चतुर्बाहुं किरीटिनम् ।
वसानं [2]वासःक्षौमं च पूर्णचन्द्रनिभाननम् ॥ ६४ ॥

मुक्ताभूयिष्ठमाकल्पं सौवर्णमतिशोभनम् ।
दधानं मुख्यहस्तेन ज्ञानमुद्रासमन्वितम् ॥ ६५ ॥

पुस्तकं वामहस्तेन बिभ्राणं भुजयोर्द्वयोः ।
[3]ऊर्ध्वयोः स्फाटिकं शङ्खमक्षमालां यथातथम् ॥ ६६ ॥

धवलैः कालजैः पुष्पैःशोभितं वनमालया ।
श्वेतपद्मे सुखासीनमेवं ध्यायीत मन्त्रवित् ॥ ६७ ॥

ध्यायतो [4]बुद्धिरमला भवेद् ज्ञानं च पुष्कलम् ।
शान्तिकं पौष्टिकं कर्म कुर्यादेतेन पद्मज ॥ ६८ ॥

बहुना किं प्रलापेन द्विषट्काक्षरवत्फलम् ।
सर्वमाप्नोति मनुना साधकः कमलासन ॥ ६९ ॥

प्रद्युम्नमन्त्रमधुना सर्वकामफलप्रदम् ।
ब्रवीमि तस्य चोद्धारः कथ्यतेऽक्षरशःक्रमात् ॥ ७० ॥

आदितः सप्तवर्णानामुद्धारः पूर्वमीरितः ।
अस्यासाधारणार्णानां सम्प्रत्युद्धार उच्यते ॥ ७१ ॥

पाप्मानमनलं विष्णुमन्त्रं वायुमुकारवत् ।
मन्दरं भद्रपाणिं च मधुसूदनमारुतौ ॥ ७२ ॥

---

1. -दमिकांक्षितम् T 2. वसनं क्षौमं T, P_1, P_2 3. स्फाटिकीं दक्षिणे हस्तेऽक्षमालां A 4. -रतुला T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आग्नेयी दश चैकं चाप्यर्णस्संहनन मतम् ।
अनुस्वारपरो विष्णुर्बीज[1]मङ्गानि पूर्ववत् ।। ७३ ।।

ऋषिः सनत्कुमारस्याच्छन्दो गायत्रमुच्यते ।
प्रद्युम्नो देवता मन्त्रः साधनं फलमेव च ॥ ७४ ॥

पूर्वोक्तं मन्त्रमपरमनिरुद्धमतः परम् ।
शृणु ब्रह्मन्यथापूर्वं सप्तार्णानामनुक्रमात् ॥ ७५ ॥

उद्धारः परिशिष्टानामर्णानां कथ्यतेऽधुना ।
प्रणवाद्यो भद्रहस्तो माया सप्तार्चिरेव च ॥ ७६ ॥

उदयौ द्वौ च सुभगौ गोपनो वायुरादिमान् ।
बीजमस्याप्रमेयश्च विसर्गश्चावसानतः ॥ ७७ ॥

ऋषिश्च सनकश्छन्दः पूर्ववद्देवता तथा ।
अनिरुद्धो द्वादशार्णः क्रमेण समुदीरितः ॥ ७८ ॥

यथापुरं षडङ्गानि साधनं फलमेव च ।
चतुर्विंशतिमूर्तीनां समाख्या द्वादशादिभिः ॥ ७९ ॥

प्रसिद्धास्ताश्चतुर्थ्यन्ताः सप्ताक्षरपुरस्कृताः ।
मन्त्रबीजानि चैतेषां आद्यर्णाः प्रणवादयः ॥ ८० ॥

बिन्दुशीर्षाश्चतुर्व्यूहनाम्ना उद्धार ईरितः ।
अष्टानामितरासां च मूर्तीनां च समाह्वयाः ॥ ८१ ॥

चतुर्थ्यन्तास्सप्त[2]वर्णा पूर्वा मन्त्राः समीरिताः ।
नृसिंहोऽधोक्षजश्चोभावच्युतः पुरुषोत्तमः ॥ ८२ ॥

---

1. मङ्गश्च T, P_1, P_2 2. वर्णपूर्वाः T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जनार्दनस्तथोपेन्द्रो हरिः कृष्ण उदीरितः ।
बीजान्याद्यक्षराण्येषां अङ्गानि च यथापुरम् ॥ ८३ ॥

छन्दश्च देवी गायत्रं देवता च चतुर्मुख ।
ऋषयो मूर्तयस्तास्ताः पुरश्चर्या च पूर्ववत् ॥ ८४ ॥

उक्तमेवफलं चैषामैहिकामुष्मिकात्मकम् ।
इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
विष्णुगायत्र्यादिमन्त्रोद्धारो नाम षड्विंशोऽध्यायः ॥

—: * :—

सप्तविंशोऽध्यायः ॥

मत्स्यादि मूर्तिमन्त्रकथमम् ॥

श्रीभगवान् :—

मत्स्यादिदशमूर्तीनामवतारक्रमान्मनुः ।
उच्यते पूर्ववच्चक्रमक्षराणां समालिखेत् ॥ १ ॥

साधारणान् गृहीत्वाऽर्णान् यथापूर्वं चतुर्मुख ।
असाधारणरूपं [1]तत्सम्प्रत्युद्ध्रियते क्रमात् ॥ २ ॥

स्पर्शान्तमाद्यं विजयं चन्द्रमन्वक्चतुर्गतिम् ।
आदिममग्निं हृषीकेशं पवित्रं मधुसूदनम् ॥ ३ ॥

[2]श्वसनं चाप्रमेयं च द्वादशार्णाः समीरिताः ।
माधवं पुरुषात्मानं हृषीकेशं च [3]बिन्दुमत् ॥ ४ ॥

---

1. च M_1 2. श्वसनादयः बिन्दुमदन्ताश्शब्दाः पुल्लिङ्गप्रथमान्ताः M_2 ग्रन्थे दृश्यते । 3. बिन्दुमान् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बीजमङ्गेषु यद्रूपमसाधारणमुच्यते ।
स्पर्शान्तमादिं सर्वत्र षट्सु चाद्यश्च बिन्दुमान् ॥ ५ ॥

आदिदेवं महामायां हृषीकेशं च गोपनम् ।
विष्णुमौर्वीं षडङ्गेषु मध्यमार्णं क्रमोदितम् ॥ ६ ॥

उद्धृत्यैवं प्रयोक्तव्यं ऋषिरस्य मनुः स्मृतः ।
छन्दश्च देवी गायत्रं मत्स्यरूपः परः पुमान् ॥ ७ ॥

देवता रूपरहितः पञ्चार्णो वा मनुः स्मृतः ।
बीजं तदङ्गानि तथा साधनं च यथापुरम् ॥ ८ ॥

मूर्तेरनन्तरायास्तु मन्वर्णोद्धारणं श्रृणु ।
असाधारणरूपस्य स्पर्शनादि गुहालयम् ॥ ९ ॥

अनलं मन्दरं विष्णुं पूर्ववद् द्वादशाक्षरम् ।
बीजोद्धारः क्रोडरूपी भूधरश्च गुहालयः ॥ १० ॥

सानुस्वारो बीजमेतत् षडङ्गानि चतुर्मुख ।
ऋषिरेतस्य दूर्वासाश्छन्दः पूर्ववदिष्यते ॥ ११ ॥

देवता कमठाकारो देवः सम्प्रत्यनन्तरम् ।
वराहवपुषो मन्त्रं वर्णचक्रात् समुद्धरेत् ॥ १२ ॥

वरुणो विष्णुरनलश्चादिदेवश्च भास्करः ।
गोपनः पुरुषात्मा च विष्णुरेते समुध्दृताः ॥ १३ ॥

अस्याऽसाधारणा वर्णाः प्रोक्तास्साधारणाः पुरा ।
एकादशाक्षरात्मायं बीजं सम्प्रति कथ्यते ॥ १४ ॥

सूक्ष्मदृग्बिन्दुपर्यन्तः षट्चाचामङ्गपद्धतिः ।
बीजमेव मुनिश्शङ्खश्छन्दो गायत्रमीरितम् ॥ १५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नारायणो देवतास्य नत्यन्तश्च षडक्षरः ।
यद्वा पूर्ववदेवाङ्गं बीजं च कमलासन ॥ १६ ॥

त्रयोदशार्णानुद्धृत्य पूर्वोक्तान् व्याहृतित्रयम् ।
उद्धरेत्पतिशब्दं चतुर्थ्यन्तमनन्तरम् ॥ १७ ॥

भूमेः पतिस्त्वमाशास्ये मे देहि तदनन्तरम् ।
दापयेति ठठान्तः स्याद्द्वात्रिंशद्वर्णसन्ततिः ॥ १८ ॥

छन्दोऽनुष्टुप् ऋषिः पूर्वो देवता सा चतुर्मुख ।
बीजमुक्तं तदङ्गानि भङ्क्त्वा मन्त्रं प्रकल्पयेत् ॥ १९ ॥

वर्णान् कनकसङ्काशान्न्यसेदङ्गेषु पूर्ववत् ।
ध्यात्वा षोडशलक्षाणि जपेन्मन्त्रमतन्द्रितः ॥ २० ॥

उर्वरायाः पतिस्सद्यो भवेन्मन्त्रप्रभावतः ।
पातालगमनादीनि फलान्यस्यापि पद्मज ॥ २१ ॥

चतुष्षष्ट्यर्णसंघातो मालामन्त्रः प्रदृश्यते ।
त्रयोदशार्णाः प्रथममेकदंष्ट्रपदं ततः ॥ २२ ॥

चतुर्थ्यन्तं तथा मेघपदं द्विः प्रोच्य च क्रमात् ।
उल्कावर्णपदद्वन्द्वं चतुर्थ्यन्तं ततःपरम् ॥ २३ ॥

छन्दोमयःप्रत्ययान्तं सम्बुध्यन्तमुदीरयेत् ।
द्विर्लोडन्तो दहिर्वाच्यो हन्तिश्च मथिरेव च ॥ २४ ॥

पचिश्च महदाद्यन्तं भौमेति पदयोर्युगम् ।
हुं द्विरुच्चार्यारिशिरःस्वं तथैव [खनिं] पुनः ॥ २५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोडन्तमायमा[1]ग्नीयीमिति मन्त्रपदस्थितिः ।
बीजमुक्तं [2]तदङ्गानि भङ्क्त्वा मन्त्रं प्रयोजयेत् ।। २६ ।।

जामदग्न्यो [3]मुनिः प्रोक्तश्छन्दोऽतिच्छन्द[4] ईरितः ।
देवता देवदेवेशः स्थूलघोणवपुः स्मृतः ।। २७ ।।

लक्षं जपेदिमं मन्त्रं [5]भूमिकामश्चतुर्मुख ।
मृत्स्नया जुहुयात्तावद्यावदाप्नोति मेदिनीम् ।। २८ ।।

अष्टाक्षरमनोस्तुल्यफलोऽयं मनुरीरितः ।
[6]उरुकावर्णं चतुर्थ्यन्तमक्षरस्यावसानतः ।। २९ ।।

चतुष्षष्टिप्रभेदस्य मन्त्रस्य नृहरेर्मया ।
न विस्तारः कथयितुं शक्यते बोद्धुमेव वा ।। ३० ।।

तस्मात् त्रिचतुरो भेदाः कथ्यन्ते कमलासन ।
वर्णचक्रादयोद्धारः सम्प्रत्येकाक्षरात्मनः ।। ३१ ।।

मन्त्रस्य कथ्यते ब्रह्मन् ब्रह्मकोशपुरस्कृतः ।
नृसिंहकर्षणो बिन्दुरित्येकाक्षरमीरितम् ।। ३२ ।।

एतदेव भवेच्छन्दो देवी गायत्रमुच्यते ।
देवो मुनिश्च दुर्वासा नृसिंहो देवता मता ।। ३३ ।।

वर्णश्च पाटलो लक्षत्रयं जप्यं विपश्चिता ।
जिगीषुणा चतुर्वर्गफलमन्यच्च वाञ्छितम् ।। ३४ ।।

त्रियक्षरञ्च नत्यन्तमेतदेवाङ्गमप्यतः ।
अष्टाक्षरात्मनोऽस्यैव मन्त्रस्योद्धारणं क्रमात् ।। ३५ ।।

---

1. आग्नेयी T,P ; अग्नायीमन्त्रगति M 2. तथा P_1, P_2 3. ऋषिः T,P
4. अधिच्छन्दईरितः T 5. भूमीप्सुश्च T,P 6. T कोशे P_1, P_2 ग्रन्थयोर-
धिकतया दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणवो नतिरन्वक्च विघ्नेशो मधुसूदनः ।
अनलश्चादिरिन्दुश्च रामोऽनुस्वार एव च ॥ ३६ ॥

गोपतिर्गोपनश्शङ्खो विष्णुरष्टाक्षरः स्मृतः ।
बीजमुक्तं तदङ्गानि मुनिर्व्यासोऽन्यदीरितम् ॥ ३७ ॥

जपसंख्या फलान्यस्य तथैव कमलासन ।
सप्ताक्षरं च नत्यन्तमन्यत् प्रणववर्जितम् ॥ ३८ ॥

बीजादि पूर्ववत् सर्वं पञ्चाङ्गो जप एव च ।
साधारणाः सप्तवर्णाः पञ्चासाधारणास्तथा ॥ ३९ ॥

पूर्वोक्तद्वादशार्णात्मा शङ्खोदरसमाह्वयः ।
यथापूर्वं षडङ्गानि बीजं चैव यथापुरम् ॥ ४० ॥

प्रत्यक्षरं लक्षजपो होमस्तर्पणमेव च ।
पुरुषार्थस्य सर्वस्य साधकस्साध्वनुष्ठितः ॥ ४१ ॥

मन्त्रो नृसिंहवपुषो द्वात्रिंशार्णात्मकोऽपरः ।
वक्ष्यते तस्य वर्णानामुद्धारः संप्रदर्श्यते ॥ ४२ ॥

छन्दसामादिरुदयो गदी वह्निरर्चां मुखम् ।
यष्टिः कुम्भो महामाया ज्वलनो वैष्णवस्तथा ॥ ४३ ॥

स्पर्शान्तं द्विरचामादि द्वादशात्मा च गोपनः ।
[1]पर्जन्यो बिन्दुरुग्रात्मा[2] प्रचण्डश्चोदयस्तथा ॥ ४४ ॥

मन्दरो जन्महन्ता च पीयूषात्मा स वैष्णवः ।
[3]महेन्द्रो वाङ्मुखं पद्मपाणिर्विजयसंज्ञितः ॥ ४५ ॥

---

1. पञ्चास्यो M_1 2. रुद्रात्मा M_1 3. इन्द्रचापमुखं भद्रपाणि M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्धचन्द्राकृतिश्शुक्लः प्रणवादिर्विभावसुः ।
वरुणश्चाप्रमेयश्च वैराजो ब्रह्मसाधनः ॥ ४६ ॥

स्पर्शान्तमुदयं स्पर्शद्वितीयं विष्णुदैवतम् ।
[1]माधवं भद्रपाणिश्च पद्मनाभः कलात्मकः ॥ ४७ ॥

त्रिविक्रमो ध्रुवः पूषा स्वरादिर्मन्दरः स्मृतः ।
भल्लायुधो महामाया क्रोधरूपी च वैष्णवः ॥ ४८ ॥

वनमाली स्वरादिश्च माधवः[2] सूक्ष्मलोचनः ।
अप्रमेयो[वै]धरश्च[3] ज्वलनोङ्कारसंयुतः ॥ ४९ ॥

द्विर्मन्दरः पद्मनाभो विजयश्च चतुर्भुज ।
उदयो मन्दरशिराः पदमेतदनन्तरम् ॥ ५० ॥

वर्णानिमु[4] समीकृत्य [5]नमाम्यहमुदीरयेत् ।
विराडृषिरनुष्टुप् च च्छन्दो नरहरिः स्मृतः ॥ ५१ ॥

देवता बीजमस्योक्तं मन्त्रं भङ्क्त्वाऽङ्गकल्पना ।
न्यासश्चाङ्गेषु पूर्वोक्तक्रमेण कमलासन ॥ ५२ ॥

[6]ध्यायेत् स्फटिकवर्णाभं जपसंख्या च पूर्ववत् ।
मन्त्रोऽयं नारसिंहस्य सकलापन्निवारणः ॥ ५३ ॥

समस्तसम्पज्जननो वाच्यो नैव च कस्यचित् ।
उच्यते नरसिंहस्य मालामन्त्रश्चतुर्मुख ॥ ५४ ॥

अधिकं सप्तदशभिर्वर्णैरर्णशतत्रयम्[7] ।
प्रथमं छन्दसामादिर्नतिश्च तदनन्तरम् ॥ ५५ ॥

---

1. मायावी M_1 2. मायावी M_1 3. वैष्णवश्च M_2 4. वर्णानिमान् समीकृत्य M_1 5. जपेल्लक्षत्रयं बुधः M_2 6. ध्येयः स्फटिकवर्णाभः M_2
7. द्वयम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थ्यन्तं पदं वाच्यं नारसिंहेति मन्त्रिणा ।
तदेव च महत्पूर्वं [1]देवदानवपूर्वकम् ॥ ५६ ॥

शोणितेतिपदं पश्चाद्दिग्धपूर्वं नखोत्तरम् ।
पदमेकं चतुर्थ्यन्तं [2]नमोऽन्तं समुदीरयेत् ॥ ५७ ॥

पच ग्रहेति च पदं शुषिर्ण्यन्तः समुद्धृतः ।
ग्रशिं णिजन्तो हन्तिच सन्तिलोढ्मधमोदयः ॥ ५८ ॥

हुं फट् तदन्तरं प्रोच्य तथा [3]कलिपदं ततः ।
चरेति च लुपेत्युक्त्वा क्षरेति तदनन्तरम् ॥ ५९ ॥

ह्रां ह्रौं खर चिरं चैव द्रूंन्हयौं ज्वलनमेव च ।
ज्वलिश्शुचिर्द्रविस्फेटिर्ण्यन्ता लोण्मध्यमोदयः ॥ ६० ॥

भिदिच्छिदिस्तं विकरो लोण्मध्यमशिशास्ततः ।
[4]हिसिमृज्भ्यां णिजन्ताभ्यां लोण्मध्यममुदीरयेत् ॥ ६१ ॥

[आं]पूर्वो नयतिर्लोटि हुम्फडन्तमुदीरितम् ।
द्रवद्रवेति च ततो विपूर्वं तद्द्वयं पुनः ॥ ६२ ॥

पातालान्तं सर्वशब्दं वासिनामिति पश्चिमम् ।
हृदयादीनि कथयेत् कृषिर्ण्यन्तश्च मध्यमे ॥ ६३ ॥

आङ्पूर्वो विद्विषिर्ण्यन्तो लोटि सम्बुद्धिशीर्षकम् ।
भगवत्पदमुच्चार्य नारायणपदं ततः ॥ ६४ ॥

वासुदेवहृषीकेशपदद्वितयमीरयेत् ।
दानवादि[र्ल]डन्तश्च जहि राक्षसपूर्वकम् ॥ ६५ ॥

---

1. दैत्य M_1 2. नमोऽस्तु M_1 3. बल M_2 4. हिति(सि?) मद्भ्यां निजन्ताभ्यां T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्तकेति पदं पश्चादुक्त्वा कौमोदकी धनुः[1] ।
धरेति[2] गरुडादिं च ध्वजान्तं प[द]मञ्जज ॥ ६६ ॥

त्रिपूर्वधामन्नित्येतन्नतिरस्त्विवति ते पदम् ।
त्वां प्रपन्नोऽस्मीति पठेदेवमुच्चार्यते मनुः ॥ ६७ ॥

बीजमुक्तं षडङ्गानि प्रोच्यन्ते पदशोऽधुना ।
प्रणवादिश्च [3]नत्यन्तश्च चतुर्थ्यन्तश्च विग्रहः ॥ ६८ ॥

पुरुषादिमुखादिश्च नरसिंहपदं तथा ।
वज्रशब्दं द्विरुच्चार्य क्रमाच्च नखविग्रहौ ॥ ६९ ॥

वज्रेति नखदंष्ट्रेति चोक्त्वाऽऽयुधपदं ततः ।
महानरपदं सिंहपर्यन्तं षष्ठमीरितम् ॥ ७० ॥

अनिरुद्धो मुनिश्छन्दस्त्वतिपूर्वं च देवता ।
नृसिंहरूपी भगवान् इति सर्वमुदीरयन् ॥ ७१ ॥

बिलद्वारि जपेन्मन्त्री षोडश प्रयतः स्थितः ।
लक्षाणि सद्यः पातालवासिनः कुरुते वशे ॥ ७२ ॥

लोकान्तरगतानां च वशीकारक्षमो भवेत् ।
एतावन्ति फला[4] न्यन्येत्यभिधातुं न शक्यते ॥ ७३ ॥

अतोऽन्यं नारसिंहस्य मन्त्रं सर्वार्थसाधकम् ।
चतुश्शताक्षरं तस्य समुद्धारः प्रदर्श्यते ॥ ७४ ॥

आदावुद्गीथमुद्धृत्य [5]नत्यन्तं ब्रह्मसाधनम् ।
भल्लायुधं गदध्वंसं वारुणं विजयं तथा ॥ ७५ ॥

---

1. मनुः M; तथा T,A
2. ठठेति M_1
3. सत्यन्तश्च P
4. फलान्यन्यैरभिधातुं M_1
5. सत्यन्तः P

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

माधवं भद्रहस्तं च [1]पावकं श्वेतदीधितिम् ।
विक्रमं सध्रुवं ब्रह्मन् भास्करं मधुविद्विषम् ॥ ७६ ॥

मारुतं माधवं ब्रह्मन् धनदं मधुसूदनम् ।
श्वसनं वारुणं जन्महन्तारमृतधारकम् ॥ ७७ ॥

द्विरदं सर्वदेहं स्याद्वैधरं तदनन्तरम् ।
अचामादिं सध्रुवञ्च क्रोधरूपमधोक्षजम् ॥ ७८ ॥

स पर्वतं हुतवहमावृतं मधुविद्विषम् ।
दरं [2]सचन्द्रं फुल्लं च माध[वं] [3]नगवारिणम् ॥ ७९ ॥

सविक्रमं च कमलं पर्वतं पाशपाणिनम् ।
[4]सबन्धुं कमलं पञ्च बिन्दुमस्तकभूषितम् ॥ ८० ॥

सुमुखं चाग्निशिरसं करालं मृगवल्लभम् ।
क्षपाकरं तथायान्तं यामिनीनाथमब्जज ॥ ८१ ॥

हृदयाह्लादमाकारं चतुर्गतिमनन्तरम् ।
नृहरिं भुवनं सूक्ष्मलोचनं रामशीर्षकम् ॥ ८२ ॥

विजयं पाटलं भानुं सूदनं सुमुखं तथा ।
[5]यान्तं तच्छिरसं पश्चाद्वारुणं गजवाहनम् ॥ ८३ ॥

वासुदेवं तथा [6]क्रोधरूपमाकारमारुतौ ।
वैधरं सूदनं भद्रहस्तं वारुणमैन्दवम् ॥ ८४ ॥

[7]पूर्णेन्दुनामकमथ मधुसूदनसंज्ञकम्[8] ।
[9]वत्सोतदेहं सुमुखं विक्रमं विजयाभिधम् ॥ ८५ ॥

---

1. वामनं M_2 2. सचक्रं M_2 3. नगवारुणम् M_1 4. सबिन्दुं T
5. मायान्तं शिरसः पश्चात् दारुणं खगवाहनम् M_2 6. क्रोडरूप 7. एष अर्धश्लोकः T कोशे P_1,P_2 ग्रन्थयोश्च न दृश्यते । 8. संज्ञितम् M_2 9. वत्सोतदेहं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दृष्टिविक्रमपाशान्तसुभगार्पितविघ्नराट् ।
तद्द्वितीयमचामादिद्वितयं श्वसनं तथा ॥ ८६ ॥

माधवं सध्रुवं भानुमान्तं माधवभास्करौ ।
रामं भल्लायुधं पश्चान्तकं स्यात्सुधारसम् ॥ ८७ ॥

भद्रहस्तमचामादि भान्तमान्तरसूदनौ ।
भद्र वसुं श्वेतरुचिं विक्रमं सद्ध्रुवं तथा ॥ ८८ ॥

मार्ताण्डं [1]माधवं भानुं गोपनन्नान्तमाधरौ ।
यान्तं स श्रीधरं चोग्रं वसुं वारुण[2]गोधनौ ॥ ८९ ॥

कुशेशयं माधवं च सुमुखं कौस्तुभं तथा ।
विघ्नेशं गोपनं ब्रह्मन् रोहिताश्वं सगोपनम् ॥ ९० ॥

श्वसनं सुमुखं पश्चाद्वरुणं मधुविद्विषम् ।
दाक्षायणीशमुदयं वैधरं माधवं ततः ॥ ९१ ॥

अमृतं [3]वैधरमचां द्वितीयं मान्तमब्जज ।
ओतदेहं तथा दृष्टिं [4]यान्तमाकारमक्षरम् ॥ ९२ ॥

वक्रतुण्डं गन्धवहं [5]विष्टरं विजयं तथा ।
अमृतं विक्रमपरं श्रीवत्सं वरुणार्पितम् ॥ ९३ ॥

यान्तं [6]गुहालयं [7]नान्तं षान्तं च मधुसूदनम् ।
[8]सध्रुवं द्रुहिणं क्रोधं पावकं सुमुखं पुनः ॥ ९४ ॥

सपश्चिमं पद्मनाभं वैधरं च चतुर्मुख ।
पवमानं सभुवनं [9]भान्तं कुञ्जरगोपनौ ॥ ९५ ॥

---

1. मदनं M_1 2. गोपनौ A 3. वैधरं पश्चात् द्वितीयं A 4. वान्तमाकारमक्षमम् A ; स्वान्तमाकारमक्षयम् M_2 5. विष्टपं M_1 6. गुणालयंभान्त्रं M_2 7. णान्तं T 8. सवर्णं M_2 9. हान्तं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भद्रहस्तं [1]सरामं च यान्तं स्याच्छ्रीधरं तथा ।
भद्रं च धनदं पापहननं जयमन्दरौ ॥ ९६ ॥

विघ्नेशं सूदनं भल्लं भास्करं स्याच्चतुर्गतिम् ।
शुभदं वामनपरमुग्रं वसुशिरस्तथा ॥ ९७ ॥

प्रद्योतनं तथा यान्तममृतधामोग्रवामनौ ।
कमलं माधवपरं सरसीरुहसम्भव ॥ ९८ ॥

[2]वान्तं च शुभदं दण्डं खर्वं खड्गधरं पुनः ।
सरोजमृतधामानं कत्तृतीयं च वैधरम् ॥ ९९ ॥

अर्चां द्वितीयं धनदं बहुलं सौरमान्तरौ ।
नासिक्यं च समुर्चाय हुंफट्शीर्षाणि योजयेत् ॥ १०० ॥

त्रयोदशानि बीजानि हुम्फडन्तानि योजयेत् ।
[3]बीजाक्षरेषु प्रत्येकं हुंफट्कारमुदीरयेत् ॥ १०१ ॥

द्वादशाङ्गविदां प्रोच्यं भास्करं सगुहालयम् ।
नासिक्यं नृहरिं चौर्वं चन्द्रार्धं [4]यान्तमौषधम् ॥ १०२ ॥

सद्ध्रुवं मारुतं चौर्वं[5] सदण्डं च क्षपाकरम् ।
समरं[6]सद्ध्रुवं भानुमौर्वं नासिक्यमब्जज ॥ १०३ ॥

प्रद्योतनं सभुवनमर्धेन्दुं सान्तमेव च ।
साग्निं सवामनं सार्धं चन्द्रं चैव सरोरुहम् ॥ १०४ ॥

वासवं वामनपरं सध्रुवं [7]कत्तृतीयकम् ।
माहेन्द्रमौर्वं नासिक्यं [8]माधवं द्विरदाननम् ॥ १०५ ॥

---

1. वराहं M_1,P_1 2. लान्तं T 3. बीजाक्षराणि M_2 4. धान्त M_2
5. चौर्वं M_1 6. समनुं M_1 7. सतृतीयकम् M_2 8. माधरं M_2; माठरं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुभद्रं[1] श्रीधरं भद्रहस्तं गारुडमेव च ।
चित्रभानुं शशिधरं पीयूषं वसुशीर्षकम् ॥ १०६ ॥

मारुतं भद्रहस्तं च विजयं वसुसूदनौ ।
प्रचण्डं बन्धुसहितं वक्रतुण्डं गुहालयम् ॥ १०७ ॥

[2]सुमुखार्णं च सप्तार्चि र्देरं चन्द्रमसां मुखम् ।
अपामधिपतिं चाग्निं जृम्भलं द्विरदाननम् ॥ १०८ ॥

धनदं वरुणं मायां भान्तं स्याद्ब्रह्मसाधनम् ।
पन्नगं सुमुखं पापहननं [3]यान्तमब्जज ॥ १०९ ॥

अमृतं विक्रमयुतं वैधरं धूलिकेतनम् ।
गोपनं सद्ध्रुवं [4]चन्द्रं सार्धेन्दुं भास्करं वसुम् ॥ ११० ॥

सपश्चिमं हुतवहं मतिमद्वासवं ततः ।
पाटलं सर्वरोधं स्यात् कुञ्जरं मन्दरद्वयम् ॥ १११ ॥

लक्ष्मीं [5]सविजयं चाग्निं हृषीकेशं चतुर्मुख ।
भद्रहस्तं मानुषेशं सूदनं हरिमन्दिरम् ॥ ११२ ॥

शङ्खं कलानिधिमपां नाथं वसुमधुद्विषौ ।
[6]पश्चिमं विजयं चाग्निं सुभद्रं पुरूषात्मकम् ॥ ११३ ॥

कलानिध्योश्च युगलं वारुणं वसुशीर्षकम् ।
वैधरं मधुविद्वेषी[7] माधवीं मधुविद्विषम् ॥ ११४ ॥

अर्धचन्द्रं हुतवहमनन्तं च द्विरुद्धरेत् ।
सान्तं सविक्रमं [8]सेन्द्रं बिन्दुमस्तकभूषितम् ॥ ११५ ॥

---

1. सुभगं M_1 2. सुमुखान्तं M_2 3. नान्त M_2 4. चान्द्रं M_2 5. सविजयां M_2 6. पचमं M_1 7. चापि M_1 8. सिन्दुं A; बन्धुं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दश पञ्च च बीजानि हुम्फडन्तानि पूर्ववत् ।
मन्दरं विक्रमवशं[1] ऐन्द्रं त्रैविक्रमं तथा ॥ ११६ ॥

खड्गहस्तं सरामं च वासवं सहविक्रमम् ।
वैधरं चोर्ध्वलोकेशं श्रीबीजं चानुनासिकम् ॥ ११७ ॥

ओतदेहं सयष्टिं च अचामादिं सयष्टिकम् ।
अचां द्वितीयमर्धेन्दुं कपिलं सङ्गिणं तथा ॥ ११८ ॥

[2]माठरं गोपनं दण्डं माठरं पञ्चबिन्दुकम् ।
नासिक्यं भास्करं वीरसेनं यष्टिं च भास्करम् ॥ ११९ ॥

ओतदेहं सयष्टिं च [3]पतनं चौर्वनासिकौ ।
[4]रोहिताश्वं च कलशं विक्रमं कमलासन ॥ १२० ॥

वासुदेवं सहृदयाह्लादनं बन्धु[5]मस्तकम् ।
शुक्लं सहस्रकिरणमैन्दवं चाग्निमस्तकम् ॥ १२१ ॥

[6]वैरिश्चं बन्धुसाहितं पावकं सुमुखं तथा ।
पञ्चमं [7]त्वृतधामानं ककुभाह्वमनन्तरम् ॥ १२२ ॥

सवारुणं [8]सुरपतिं सबन्धुं विजयं तथा ।
लक्ष्मीं मधुद्विषमथो एकदंष्ट्रगतिं पुनः ॥ १२३ ॥

अग्निशीर्षं द्वितीयं च झषं [9]पञ्चान्तकं मतम् ।
द्रुहिणं [10]चोदयं ब्रह्मन् वासवं वामनं [11]ततः ॥ १२४ ॥

---

1. परं M_1 2. माधरम् M_2 3. तापनं चौर्वनासिका M_2 4. लोहिताक्षं च कमलं M_2 5. बिन्दु M_1 6. वैरिं च T 7. कृतधामानं T 8. वसुपतिं M_1 9. पन्चात्मकं मतम् T 10. चोदनं M_2 11. तथा M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुभदं पश्चिममर्चां द्वितीयं कमलासन ।
द्वितीयं सध्द्रुवं चाब्जयोनिं[1] श्रीधरपङ्कजे ॥ १२५ ॥

श्रीवत्समजं विजयं राममस्तकमन्दरम् ।
उदयं शुक्रशत्रुं च विजयं ब्रह्मसाधनम् ॥ १२६ ॥

मन्दरं यान्तधनदं यान्तं चन्द्रघटं वसुम् ।
भल्लायुधं हृषीकेशमेकनेत्रं घनं पुनः ॥ १२७ ॥

सबन्धुमन्दरं दृष्टियुगलं चाग्निशीर्षकम् ।
भद्रं चतुर्गतिमथो फणीन्द्रं यान्तसूदनौ ॥ १२८ ॥

नृहरिं कलानिधिमचामादिं [2]यान्तं मधुद्विषम् ।
[3]कत्तृतीयं गदध्वंसं विघ्नेशं नरवाहनम् ॥ १२९ ॥

अमृतं वसुनामानं धरित्रींमधुसूदनम् ।
कमलं विक्रमपरं [4]यान्तं वामनहस्तकम् ॥ १३० ॥

नान्तं [5]गुणालयं चैव णान्तं डान्तमधुद्विषम् ।
पश्चिमं चैन्दवमथो भान्तार्पितसगोपनम् ॥ १३१ ॥

[6]धनदं चोतवपुषं भद्रं दक्षं च सूदनम् ।
वैधरं चैन्दिरमर्चां द्वितीयं कमलासन ॥ १३२ ॥

त्रिविक्रमं भद्रकरं महामायाङ्कितं वसुम् ।
मृगेशं वरुणं चैव वैराजं पञ्चबिन्दुकम् ॥ १३३ ॥

क्षपाकरं कञ्जभवं ततः स्याद्विघ्ननायकम् ।
सद्दृष्टिं वैधरं देवदत्तं कुम्भं चतुर्मुख ॥ १३४ ॥

---

1. योनिस्स्या च्छशिपङ्कजे M_2 2. धान्तं M_2 3. तत्तृतीयं तु गन्धर्वं M_1 4. धान्तं M_1 5. गुहालयं M_1 6. अनलं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]गतं सत्कृतधामाह्वं मार्ताण्डं [2]पाशहस्तकम् ।
समाधवं स्याद्विजयं गोपनं [3]विषमध्वनिम् ॥ १३५ ॥

सरसीरुहं सोर्ध्वलोकं सरसीरुहसम्भव ।
पद्मां स मन्दराकारौ प्रचण्डझषसंमितौ ॥ १३६ ॥

[4]वैधरं वरुणं रामं भूधरं वह्निमस्तकम् ।
जृम्भलं ऋतधामा च स्यातां भास्करमन्दरौ ॥ १३७ ॥

[5]आद्यन्तं यान्तमाकारं गारुडं हिमदीधितिम् ।
ओङ्कारादिं शशिधरं [6]सविष्णुं वरुणं वसुम् ॥ १३८ ॥

[7]सुधारसं प्रचण्डाग्निं भवे[8]द्दतमनन्तरम् ।
क्रोधरूपं सरामं च गदं च ऋतधामकम् ॥ १३९ ॥

गोपतिं वारुणपतिं विक्रमं यादसां पतिम् ।
मधुद्विषं हुतवहं प्रचण्डं यामिनीपतिम् ॥ १४० ॥

सुधारसं [9]वसुयुतं जन्मध्वंसमपां पतिम् ।
यान्तं सुधारसं बन्धुं द्विद्विराकारमिन्दिराम् ॥ १४१ ॥

द्विरदं पापहननं मधुसूदनमब्जज ।
विजयाकार [10]गर्भाश्च आकार[11]विधुभाधराः ॥ १४२ ॥

पावकं पीतवर्णाभं ब्रह्मसाधनमब्जज ।
[12]भद्रविक्रमतोयेशमाकारेन्दुसविक्रमाः ॥ १४३ ॥

---

1. गदं M_1 2. वामहस्तकम् M_2 3. विषय M_1 4. वैराजं A
5. अमृतं M_2 6. विष्णुं वरुणमस्तकम् M_2 7. सुधासमं प्रवर्णाङ्कं M_2
8. द्रुत M_2 9. बन्धुयुतं M_2; वसुयुतं T 10. भर्गाश्च M_1
11. विधुमोधराः T ; विधमादराः M_2 12. सुखदं विक्रमतोयेशं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]इभाकारं ततो द्युम्नभास्करगामूतवैधराः ।
मारुताकारभद्राश्च [2]मान्ताकारमहोत्पलाः ॥ १४४ ॥

उग्रात्मवसुवायव्यसूदना विधिरञ्जज ।
[3]उग्रशीर्षकमारुत्यौ पश्चिमद्युतिमैन्दवम् ॥ १४५ ॥

वामनं वैधरं सूक्ष्मलोचनं [4]कत्तृतीयकम् ।
कुम्भं भद्रकरं चापि माधवीं भास्करं मधु ॥ १४६ ॥

सूदनं त्रिदशाहारं विक्रमं चोग्ररूपकम् ।
प्रचण्डमोतदेहं च शुभदं [5]वित्तवर्धनम् ॥ १४७ ॥

पावकं सुमुखं भद्रहस्तं वैराजमक्षरम् ।
कुम्भं सुदर्शनं चैव कपिलाक्षं चतुर्मुख ॥ १४८ ॥

द्विःप्रपन्नोऽस्मीति पदं समुच्चार्य पितामह ।
ब्रह्मकोशं पुरस्कृत्य नृहरिं चानलं तथा ॥ १४९ ॥

ब्रह्मसाधननासिक्यौ बीजं प्रोक्तमतःपरम्[6] ।
[7]निगमादिं सुभद्रं च पाटलं सध्रुवं तथा ॥ १५० ॥

मन्त्रस्य शक्तिमुध्दृत्य छन्दसामादिमुद्धरेत् ।
गारुडं मधुहन्तारं नासिक्यं विजयं वसुम् ॥ १५१ ॥

सपद्मनाभं मायां च सूक्ष्मदङ्माधवं[8] घटम् ।
भद्रहस्तं वैधरं च श्रीधरं चाग्निविक्रमौ ॥ १५२ ॥

वैराजं भास्करं यान्तं मधुशत्रुसमीरणौ ।
मन्दरं [9]माठरमचां द्वितीयं विघ्नपावकौ ॥ १५३ ॥

---

1. गुहाकारं A,M_2 2. प्रान्ता A 3. उग्रपावक M_1 4. तत्तृतीयकम् M_1 5. वित्तदर्शनम् T,M_2 6. मनन्तरम् M_1 7. निगमादीन् M_1 8. माधरं M_1 9. माधवमचां A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कलानिधिं सबन्धुं च सार्धचन्द्रं [1]त्विषां पतिम् ।
सूदनं शङ्खमपरं [2]कत्तृतीयं चतुर्मुख ।। १५४ ।।

[3]सान्तं [4]वसुयुतं चैव द्विरुच्चार्य चतुर्मुख ।
हुम्फडन्तं च नत्यन्तं हृन्मन्त्रं परिकीर्तितम् ।। १५५ ।।

वेदादिं पन्नगं पञ्चबिन्दुभूषितमस्तकम् ।
नासिक्यं भद्रहस्तं च मधुद्वेषिं वसुं तथा ।। १५६ ।।

ऐन्दवं विक्रमपरं नासिक्यं भास्करं घटम् ।
सबन्धुं कमलं पद्मनाभं वामनहस्तकम्[5] ।। १५७ ।।

पुण्डरीकं सबन्धुं च वैराजं वैधरं ततः ।
गोधनं विजयं मान्तं वैधरं मधुसूदनम् ।। १५८ ।।

मानुषं चामृतं भद्रकरं गोपनपद्मजौ ।
सगोपनं दरं चैव माधरं [6]कत्तृतीयकम् ।। १५९ ।।

ऋतं च सैन्धवं बन्धुं सद्ध्रुवं [7]माठरं त्वचाम् ।
द्वितीयं पुरुषं ब्रह्मन् माधवीं माधरं पुनः ।। १६० ।।

भृगुं खड्गकरं चैव द्विरुच्चार्यमतः परम् ।
हुम्फडन्तं शिरोमन्त्रं ठठ इत्यवसानकम् ।। १६१ ।।

वेदादिमुरगं षष्ठं अचामर्धेन्दुमैन्दवम् ।
फुल्लनेत्रं सभुवनं गर्हितं [8]भूधरात्मकम् ।। १६२ ।।

कुम्भं सविक्रमं पद्मं खेटकीं कलशं त्वचाम् ।
तृतीयं [9]कमलं पञ्चबिन्दुं सुमुखमब्जज ।। १६३ ।।

---

1. द्विषांपतिम् T 2. तत्तृतीयं M_1 3. चान्तं M_1 4. वायुसुतं A, M_2 5. मस्तकम् M_2 6. तत्तृतीयकम् M_1 7. माधरं M_2 ८. भूसुरात्मकम् A, M_2 9. कलशं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यान्तं च शिरसामब्जयोनिमेणेशमैन्दवम् ।
स्वाहाधरं शशिधरं मुखं [1]भूधरसूदनौ ॥ १६४ ॥

चतुर्गतिं शतानन्दं वासुदेवं सपश्चिमम् ।
कलानिधिं सरामं च यष्टिं भास्करगोपनौ ॥ १६५ ॥

चतुर्गतिं [2]खर्वदेहं सूदनं भानुविक्रमौ ।
[3]द्विरसेन्दुं हुम्फडन्तं शिखामन्त्रमुदीरितम् ॥ १६६ ॥

देवानां दास [4]वचसा अन्ते संयोज्य मन्त्रवित् ।
ओङ्कारं नृहरिं वीरसेनं नासिक्यमैन्दवम् ॥ १६७ ॥

माठरं यामिनीनाथमृतधाम सदर्भितम् ।
आखण्डलेशं सर्वेशमाकारं [5]कत्तृतीयकम् ॥ १६८ ॥

द्विरदं विक्रमपरं बहुलं घटविक्रमौ ।
अम्भोरुहं चोतदेहं हृदयाह्लादविक्रमौ ॥ १६९ ॥

कलानिधिं सुभद्रान्तं सुमुखान्तं समाधवम् ।
चान्तं शशधरं देवदत्तं चान्तं सकुम्भकम् ॥ १७० ॥

ऐन्द्रं च कुञ्जरमुखं पीयूषद्युतिविक्रमौ ।
सयष्टिं द्विमणिं चादिदेवं यान्तं हिमालयम् ॥ १७१ ॥

सदण्डं गरुडं बन्धुं पश्चिमं च द्विरुद्धरेत् ।
हुम्फडन्तं च कवचं हुंफट्शीर्षं प्रकीर्तितम् ॥ १७२ ॥

आगमादिं नरहरिं चौर्वं नासिक्यमब्जज ।
वैघरं गोपनं णान्तं मारुत्यं [6]माधवं मधु ॥ १७३ ॥

---

1. घवं M_1 2. खड्गदेहम् M_2 3. द्विरभ्यसेत् हुंफडन्तं शिरोमन्त्रमुदीरितम् T, P_1, P_2 4. वचनमन्ते T. 5. तत्तृतीयकम् M_1 6. वैधरं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूदनं भद्रहस्तं च पीयूषं सरसीरुहम् ।
गोपनं पुलहं चैव सूदनं मारुतं वसुम् ॥ १७४ ॥

कूटं [1]फुल्लायुधमर्चा षष्ठं वैराजमेव च ।
[2]कत्तृतीयं पद्मनाभं भास्करं मधुविद्विषम् ॥ १७५ ॥

दृष्टिं सवामनं भद्रहस्तं साग्निं समुद्धरेत् ।
भास्करं भद्रहस्तं च तदूद्धिरुच्चार्य मन्त्रवित् ॥ १७६ ॥

पश्चिमं वक्रतुण्डं च मन्दरं सुप्रतिष्ठितम् ।
तानुदीर्याथ मन्त्रज्ञः सुभद्रं चैन्दवं पुनः ॥ १७७ ॥

सदक्षं वामनशिरा अम्भोरुहनिकेतन ।
अम्भोरुहं ससुवनं पावकं भुवनं तथा ॥ १७८ ॥

नृहरिं पापहननं विक्रमं विजयं पुनः ।
वैरिञ्चं [3]वामनं दक्षमौग्रं दक्षं चतुर्मुख ॥ १७९ ॥

[4]गुहालयं सविजयमग्निशीर्षं[5] च मारुतम् ।
[6]एणेशं मन्दरं भानुं सूदनं विघ्ननायकम् ॥ १८० ॥

यान्तं ताराधिपं मायां सद्भ्रुव माठरं तथा ।
मधुद्विषं [7]मारुतं च हुम्फडस्त्रं प्रकीर्तितम् ॥ १८१ ॥

अस्त्रशब्दं चतुर्थ्यन्तं फडन्तं च समुद्धरेत् ।
उदूगीथं नृहरिं सर्गमन्धरं माठरं त्वचाम् ॥ १८२ ॥

द्वितीयं पश्चिमं पद्मनाभं चादिसमन्वितम् ।
खड्गहस्तं च सुमुखं [8]पुण्डरीकाक्षमम्बुजम् ॥ १८३ ॥

---

1. मल्लायुध M_1 2. तत्तृतीयं M_1 3. वासवं M_1 4. गुणालयं M_1
5. मह्निशीर्षं M_1 6. कोणेशं M_1 7. माधवं M_2 8. मेदिन्याः पदमम्बुजम् T,P_2; पतिमम्बुजम् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सगोपनं सुरपतिं गोपनं खद्वितीयकम् ।
भद्रहस्तं सरामं च वासवं ब्रह्मसाधनम् ॥ १८४ ॥

खड्गहस्तं गजमुखं सूदनं च चतुर्गतिम् ।
अचामादिं गजमुखमौषधं नान्तमब्जज ॥ १८५ ॥

माधवीं मारुतं यान्तमाधरं पश्चिमं तथा ।
सबन्धुं सप्रचण्डं चाप्येणेशं पाटलाप्रियम् ॥ १८६ ॥

मार्तण्डं मधुविद्वेषिं भद्रं स्याद्दतधामकम् ।
दाक्षायणीशं रामं स्यादनुस्वारं चतुर्मुख ॥ १८७ ॥

दिवाकरं चादिदेवं दरं वैधरगोपनौ ।
पावकं पुरुषात्मानं द्विरुक्तं कमलासन ॥ १८८ ॥

हुम्फडन्तं च नेत्राभ्यां वौषट्कारं प्रयुज्य च ।
एवं न्यस्य विधानज्ञो विष्कम्भान्तं सदण्डकम् ॥ १८९ ॥

दिवाकरसहस्राभं हृदयार्णं षडुद्धरेत् ।
उत्पलं कुमुदं रक्तजपाबन्धूककिंशुकम् ॥ १९० ॥

पाटलं हृदयादीनां वर्णषण्णां क्रमाद्भवेत् ।
रक्षामन्त्रं प्रवक्ष्यामि छन्दसामादिमुद्धरेत् ॥ १९१ ॥

विघ्नेशं पद्मनाभं स्याद्द्विजराजं सविक्रमम् ।
सदण्डं च समार्तण्डं बहुलं सगुहालयम् ॥ १९२ ॥

पश्चिमं वामनपरं प्रचण्डं हरिणं भवेत् ।
भल्लायुधं गदध्वंसं लान्तं भद्रकरं तथा ॥ १९३ ॥

अचामादिं दिनमणिं माधवौ सौरमक्षरम् ।
एणेशं धनदं दक्षं वसुशीर्षं च सूदनम् ॥ १९४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धनाध्यक्षं तथा दक्षं पावकं मस्तकस्थितम् ।
[1]यान्तं सविक्रमं खान्तं हान्तं स्यात्कपिलं पुनः ॥ १९५ ॥

द्विरदास्यं बन्धुपरं [2]माधवीं यान्तशीर्षकम् ।
वासुदेवं खड्गधरं चतुर्गतिमनन्तरम् ॥ १९६ ॥

मुखं सवैधरं ब्रह्मन् माठरं तद् द्विरुद्धरेत् ।
पवित्रमप्रमेयं स्यात्तुण्डं चादिसमन्दरम् ॥ १९७ ॥

सर्वरोधं द्विरुच्चार्य कमलं सविलोचनम् ।
यथापुरं सदण्डं च सूदनं यान्तमारुतौ ॥ १९८ ॥

द्विर्वक्त्रं सुभद्रं च विक्रमं विघ्नवैधरौ ।
तद्द्विरुद्धच्छलध्वंसी बन्धुविघ्नं सवैधरम् ॥ १९९ ॥

[3]ऐन्दिरं चोतदेहं च उग्रं मान्तं चतुर्मुख ।
अत्रिं चाग्निं मधुद्वेषिममृतं धूलिकेतनम् ॥ २०० ॥

तार्क्ष्यं सङ्कर्षणं दण्डं तद्द्विरुच्चार्य पद्मज ।
मार्तण्डमूर्ध्वनासिक्यं तदुदीर्यमतः परम् ॥ २०१ ॥

पावकं चौर्वशिरसं सदण्डं गोपनं तथा ।
गदध्वंसं छलध्वंसं तदुदीर्य जयंतथा ॥ २०२ ॥

वैराजं यान्तशिरसं शुक्लं वैराजपावकौ ।
जृम्भलं समता ब्रह्मन् माठरं दक्षसंज्ञितम् ॥ २०३ ॥

प्रचण्डं माधवं चैव कलशं बन्धुशीर्षकम् ।
कमलां वारुणं यान्तं हृषीकेशं च पश्चिमम् ॥ २०४ ॥

---

1. यान्तं M_2 2. माधवं M_2 3. एणेश A
विजयं उदयं चैव वैराजं भुवनं तथा । २०२ ।
एष अर्धश्लोकः M_1 कोश एवोपलभ्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]मायाजितं प्रचण्डं च माधवं च ठठान्तिमम् ।
बीजमङ्गानि चोक्तानि दुर्वासा ऋषिरुच्यते ॥ २०५ ॥

छन्दोऽ[2]नुष्टुब् देवता च महानरहरिर्हरिः ।
[3]मालामन्त्रे [4]त्रिवर्णाः स्युः शुक्लपीतसितासिताः[5] ॥ २०६ ॥

तत्त्वं च परमव्योम सकलीकरणं तथा ।
विकलीकरणं चैव मन्त्रस्याप्यायनं भवेत् ॥ २०७ ॥

मोचनं चैव इत्येते कथिताः कमलासन ।
चतुष्षष्टिविधे मन्त्रे नारसिंहे महानयम् ॥ २०८ ॥

नृसिंहो व्योमचक्राख्यः पातालाख्यश्च सूरिभिः ।
ध्यायेन्मृत्युभये कृत्याप्रवेशे युधि विद्विषाम् ॥ २०९ ॥

उच्चाटने संहनने भूतानामपनोदने ।
आख्यायते ध्यानमस्य स्मृतं सवितृमण्डले ॥ २१० ॥

मध्ये विकस्वरे शुभ्रे पङ्कजे विष्टरोदरे ।
आसीनं षोडशमुखं भुजैस्तद्द्विगुणैर्युतम् ॥ २११ ॥

आयुधैश्शङ्खचक्राद्यैर्दुर्दर्शै रश्मिमालिभिः ।
परचक्रप्रतिक्षेपे दुष्करेष्वन्यकर्मसु ॥ २१२ ॥

ब्रह्मोवाच :—

द्वादशाङ्गानि यो वेत्ति मन्त्रं सोऽर्हति वेदितुम् ।
इत्युक्तं भगवन् भूयो जिज्ञासा तेषु वर्तते ॥ २१३ ॥

---

1. मायाङ्कितं M_2; मायाविनं M_1 2. वस्तं T,P,P_1 3. मूलमन्त्रे M_2
4. ऽत्रवर्णाः M_1 5. सितारुणाः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्री भगवान् :—

बीजं शक्तिस्तथैवाङ्गं हृदयादि [1]च षड्विधम् ।
ऋषिश्छन्दो देवता च वर्णोद्दीपनमेव च ॥ २१४ ॥

आप्यायनं मोचनं च सकलीकरणं तथा ।
विकलीकरणं चैव द्वादशैतानि पद्मज ॥ २१५ ॥

तेषां स्वरूपं वक्ष्यामि क्रमात्तदवधार्यताम् ।
मन्त्रस्य प्रकृतिर्बीजमक्षरं तत्समुध्दलम् ॥ २१६ ॥

आत्मा मन्त्रस्य सा शक्तिर्यथा[2] मन्त्रफलप्रदा ।
हृदयादीनि मन्त्रस्य षडङ्गानि पितामह ॥ २१७ ॥

देवस्येव मुखादीनि एषु मन्त्रः प्रतिष्ठितः ।
ऋषिः फलस्य द्रष्टा स्याच्छन्दस्तदभिधीयते ॥ २१८ ॥

अक्षराणामियत्ता या देवता वाच्यमुच्यते ।
रूपभेदश्च शुक्लादिर्वर्णाः कमलसम्भव ॥ २१९ ॥

सम्पुटीकरणं रेफलकाराभ्यां तु दीपनम् ।
यथोदिताक्षरैस्सर्वैः संस्कारश्शोषणादिभिः ॥ २२० ॥

मन्त्रस्य देववत् प्रोक्तं यत्तदाप्यायनं बुधैः ।
मन्त्रस्य मोचनं [3]नाम प्रयोगः स्तम्भनादिषु ॥ २२१ ॥

मन्त्राक्षराणां प्रत्येकं सम्पुटीकरणं स्मृतम् ।
सकलीकरणं विद्धि प्रणवेन चतुर्मुख ॥ २२२ ॥

वौषट्कारवषट्कारहुङ्कारैः पृथगीरितैः ।
देवतानामभीष्टानां सन्निधिर्यः [4]पुटादिषु ॥ २२३ ॥

---

1. चतुर्विधम् M_1 2. अमुत्र M_1 3. तावत् M_1
4. पटादिषु M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रार्थ्यते [1]स चतुर्वक्त्र विकलीकरणाह्वयः ।
एतान्येव प्रयुञ्जीत विद्ययोराद्ययोरपि ॥ २२४ ॥

एकादशाक्षरो मन्त्रो वामनस्य प्रदर्श्यते ।
पूर्वोदितास्सप्तवर्णा विशेषः समुदीर्यते ॥ २२५ ॥

पीयूषमादिदेवं च मन्दरं चादिमुद्धरेत् ।
विघ्नेशं गोपनं वायुमाद्यं चेति चतुर्मुख ॥ २२६ ॥

बीजं शिरस्यूर्ध्वलोको यष्टिश्चेति चतुर्गतिम् ।
अङ्गानि षट् फलादीनि स्वरान्तान्यानुपूर्वशः ॥ २२७ ॥

सानुस्वाराणि योज्यानि काश्यपो मुनिरिष्यते[2] ।
छन्दश्च दैवं गायत्रं वामनो देवता पुनः ॥ २२८ ॥

लक्षाण्येकादश जपेद्धोमे च जलतर्पणे ।
ततस्सिध्यति मन्त्रोऽयं पुरुषार्थचतुष्टयम् ॥ २२९ ॥

फलमन्यच्च यच्चेष्टमष्टाक्षरवदीरितम् ।
ओमादि नति पूर्वाणि [3]चत्वार्याद्यानि पूर्ववत् ॥ २३० ॥

सप्ताक्षरस्य मन्त्रस्य साधनं च यथापुरम् ।
सप्तलक्षजपादुक्तं फलमाप्नोति मन्त्रवित् ॥ १३१ ॥

गृहीत्वार्णान् सप्त पूर्वान् वैराजोऽ[4]ग्निस्त्रिविक्रमः ।
यादसांपतिं मायां च स्पर्शादिरनलोन्मुखम् ॥ २३२ ॥

स्पर्शान्तश्चादिदेवश्च शङ्खो विष्णुरितीरितः ।
द्वादशार्णात्मको मन्त्रस्तदेव कमलासन ॥ २३३ ॥

---

1. च T 2. रुच्यते M_1 3. चत्वार्यङ्गानि M_1 4. अत्रिः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रिविक्रमस्य बीजं च भास्करो विष्णुरेव च ।
अर्धचन्द्राकृति[1]श्चेति तदेवाङ्गं च षड्विधम् ॥ २३४ ॥

ऋषिश्च देवता छन्दः पूर्वोक्तान्येव साधनम् ।
पूर्ववत्फलमस्यापि राज्यादि प्राप्तिरिष्यते ॥ २३५ ॥

[2]नत्वेकं शक्यते वक्तुमानन्त्यात्फलसम्पदाम् ।
रामस्य जामदग्न्यस्य मन्त्रोद्धारश्चतुर्मुख ॥ २३६ ॥

गृहीत्वा पूर्ववत्सप्त वर्णान् साधारणांस्ततः ।
असाधारणवर्णानां क्रमादुद्धारणं शृणु । २३७ ॥

जन्महन्ता गोपनश्च [3]माधवी विष्णु[4]रन्वतः ।
[5]दृष्टिश्चादिगति र्भद्रपाणिर्वायुश्च गोपनः ॥ २३८ ॥

चतुर्गतिः स्वरादिश्च वह्निराकार एव च ।
मन्दरश्चादिदेवश्च श्वसनो विष्णुरब्जज ॥ २३९ ॥

हुम्फडन्त इति प्रोक्तो मन्त्रः सप्तदशाक्षरः ।
अनलः प्रणवादिश्च सयष्टिर्बीजमीरितम् ॥ २४० ॥

एतदेवाङ्गमावृत्तं षट्कृत्वो [6]गार्ग्यदर्शनः ।
छन्दश्च दैवं गायत्रं जामदग्न्योऽस्य देवता ॥ २४१ ॥

जपेद्विंशतिलक्षाणि ततस्सर्वार्थसाधनः[7] ।
दशाक्षरोऽथवा मन्त्रो जामदग्न्यपदं विना ॥ २४२ ॥

बीजादि सर्वं पूर्वोक्तं मन्त्रश्शत्रुक्षयावहः ।
मन्त्रो रामावतारस्य ब्रह्मन् दाशरथेर्वरः ॥ २४३ ॥

---

1. श्चेते देवताङ्गं च M_2 2. नैकैकं M_1 3. मायावी M_1 4. रन्वितः M_1
5. श्चादिर्गदी भद्र 6. गादि T,; मार्ग A 7. साधनम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कथ्यते भरतादीनां तद्देवीनामनुक्रमात् ।
द्वादशाक्षरमारभ्य मन्त्रं तदनु पङ्कज ॥ २४४ ॥

चतुर्मूर्तिमयायेति पदमुच्चार्य मन्त्रवित् ।
अभिरामशरीरेति चतुर्थ्यन्तमुदीरयेत् ॥ २४५ ॥

रामेति तद्विभक्त्यन्तं ठठेति तदनन्तरम् ।
द्वात्रिंशदक्षरात्मायं मनुरुक्तश्चतुर्मुख ॥ २४६ ॥

बीजमस्यानलो विष्णुः सानुस्वरः क्रमात्स्मृतः ।
अङ्गानि षट् च तद्बीजमकारादिक्रमाद्भवेत् ॥ २४७ ॥

अपरं राममन्त्रं ते कथयामि चतुर्मुख ।
प्रथमं प्रणवं प्रोच्य [1]पञ्चबिन्दुं सयष्टिकम् । २४८ ॥

चतुर्थ्यन्तं चतुर्मूर्तिपदमुक्त्वा ततः परम् ।
[2]चतुर्गतिमयायेति शरशार्ङ्गभृदन्वतः ॥ २४९ ॥

चतुर्थ्यन्तं [3]शरत्पूर्वमिन्दीवरपदं तथा ।
त्विषेति च पदं पश्चात्प्रयोज्यं भगवत्पदम् ॥ २५० ॥

चतुर्थ्यन्तं समुच्चार्यमभिरामपदं ततः ।
शरीरायेति च प्रोच्य रामायेति पदं तथा ॥ २५१ ॥

नत्यन्तमिति मन्त्रस्य पदोद्धारः प्रदर्शितः ।
बीजं तदङ्गषट्कं च तदृषिश्च शरभः स्मृतः ॥ २५२ ॥

छन्दश्च पूर्ववद्देवो रामात्मा भगवान् हरिः ।
जपेदक्षरलक्षं तु ततस्सिध्यति मन्त्रराट् ॥ २५३ ॥

---

1. पञ्च बीजं M_1 2. चतुर्वेद M_2 3. शिरः पूर्वं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फलं चाभीष्टमचिराल्लभते दुर्लभं महत् ।
मातृकाचक्रविन्यस्ता[1]र्णषण्डान् सुमन्त्रितान् ॥ २५४ ॥

अभ्यर्च्य कुसुमैस्तस्मिन्नुद्धरेत् भगवन्मयः ।
अतोऽन्य[2]मन्त्रसंघातं [3]मालामन्त्रं यथातथम् ॥ २५५ ॥

वक्ष्यामि सम्प्रति ब्रह्मन् यथावदवधार्यताम् ।
आदौ नादं सप्तवर्णं वसुं मधुनिषूदनम् ॥ २५६ ॥

स्पर्शान्तं गोपनं शङ्खं मुखं विष्णुं जयं तथा ।
अचां पञ्चममाहेन्द्रौ [4]नादादिं घटविक्रमान् ॥ २५७ ॥

[5]शखिनं शिखिनं दक्षं करालं वसु[6]निष्ठितम् ।
[7]हान्तं मधुद्विषं ब्रह्मन् धूलिकेतनमादिमम् ॥ २५८ ॥

नान्तयान्तौ सदक्षाह्वौ पश्चिमोदयमक्षरम् ।
[8]अत्रिं रमाधरं [9]क्रोधरूपिणं चानलाह्वयम् ॥ २५९ ॥

अचां द्वितीयं पवनं कलशं बिन्दुमस्तकम् ।
उग्रात्मसुमुखौ स्यातां यादोनाथमृगाधिपौ ॥ २६० ॥

दिनेशमादिं नासिक्यं शशाङ्कं मधुविद्विषम् ।
वैराजं माधवीं भद्रकरं माधवमब्जज ॥ २६१ ॥

वक्रतुण्डमचामादिं विजयोदयसंज्ञितम् ।
[10]पश्चान्तकं तथा यान्तं मस्तकस्थं जयं पुनः ॥ २६२ ॥

[11]राममन्दरशंखः स्युर्गोपनं पवनं मुखम् ।
आदिमल्लायुधौ रामवसुगोपनपाटलौ ॥ २६३ ॥

---

1. न्वर्ण M_1 2. मर्ण M_1 3. मूल M_1 4. नादादीन् M_1; 5. शङ्खिनां शङ्खिनम् M_2 6. गोपनम् M_1 7. भान्तं A, M_2 8. अग्निं M_1 9. तोयरूपिणम् M_1 10. पश्चात्मकं A 11. रामं T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]श्रीवत्समादिमनलं वामनाग्निं मधुद्विषम् ।
चतुर्गतिं खड्गधरमेकदृक्वैधरं तथा ॥ २६४ ॥

[2]दक्षं चाग्निं हृषीकेशं विजयद्वयमन्वतः ।
यान्तं तच्छिरसं पश्चात्पवनं मृगवल्लभम् ॥ २६५ ॥

ऋक्षेशमेकनयनं दरगोपनविघ्नराट् ।
[3]बन्धुयान्तौ च भुवनं वैधरौ पुण्यभास्करौ ॥ २६६ ॥

श्वसनं दक्षभुवनौ चक्रविघ्नेशसप्तमम् ।
[4]अचां [5]कारणमेणेशं कलात्मा वसुविक्रमाः ॥ २६७ ॥

करालगोपनौ पापहननौ विक्रमं तथा ।
माहेन्द्रकुम्भावनलो मधुसूदनभास्करौ ॥ २६८ ॥

यान्तगोपनसप्तार्चिर्मधुसूदनमारुताः ।
प्रचण्डगोपनौ खड्गधरश्रीधरवैजयाः ॥ २६९ ॥

पीयूषगोपनौ[6] पद्मश्रीधरौ वनमालिनौ ।
मेघपश्चात्मद्विरदकमलामधुविद्विषः ॥ २७० ॥

पीतो मृगेशपवनगोपनाश्शुक्लश्रीधराः ।
[7]पावकस्थानगोविन्दवैराजदरवैधराः ॥ २७१ ॥

मधुसूदनविघ्नेशसुधारससमाह्वयाः ।
ब्रह्मसाधनसप्तार्चिर्गतिर्भास्कर[8]सप्तमाः ॥ २७२ ॥

अचामादिं धरो वेधाः ब्रह्मसाधनखेटकी ।
अग्निश्च कपिलं ब्रह्मन् भल्लायुधसविक्रमम् ॥ २७३ ॥

---

1. श्रीवत्सं चादि M_1 2. मन्दरश्च हृषीकेशं A 3. बिन्दु M_1
4. ककारचारुमेणेशं M_2 5. ककारमर्णेशं M_1 6. रोधनौ M_1
7. पवनस्थान M_1 8. सत्तमा M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विघ्नेशं वैधरं प्रेतनायकं रामशीर्षकम् ।
भद्रपाणिं तथादक् च सरसीरुहसम्भव ॥ २७४ ॥

दक्षादि देवहुतभुक् चतुर्गतिमनन्तरम् ।
[1]श्रीवत्सवासुदेवौ द्वौ क्रोधरूपसमीरणौ ॥ २७५ ॥

[2]करालं च ऋतं भद्रपाणिं वैराजमारुतौ ।
पश्चिमं वसुकर्मं[3] च विक्रमं दृष्टिगोपनौ ॥ २७६ ॥

विघ्नेशच्छलविध्वंसमाधवा वैधरात्मकम् ।
जलजं पापहन्तारं हुतभुक्कमलं घटम् ॥ २७७ ॥

वक्रतुण्डं तथा द्युम्नं द्विरदाननविक्रमम् ।
भान्तमग्निं चोतदेहं वक्रतुण्डं चतुर्गतिम् ॥ २७८ ॥

पश्चिमाननयान्तौ च ओतदेहसमन्वितौ ।
वैराजद्वितयं दक्ष गोपनं नासिकोद्भवम् ॥ २७९ ॥

गदध्वंसं च कपिलमत्रिं मधुनिषूदनम् ।
यान्तं चतुर्गतिं शुक्रं वारुणाग्निसमीरणाः ॥ २८० ॥

एकदन्तमेकदृष्टिं बहुलं मधुविद्विषम् ।
[4]प्रचण्ड विक्रमं वक्रतुण्डं च सगुहालयम् ॥ २८१ ॥

सुमुखं हुतभुक् शङ्खमनलं मधुविद्विषम् ।
यष्टिं दक्षं तथाकारं नासिक्यं धूलिकेतनम् ॥ २८२ ॥

ध्रुवं माहेन्द्रमाकारमर्धांशुं कुम्भगोपनौ ।
सद्भुतं जन्महन्तारं [5]वारुणं पुलहं तथा[6] ॥ २८३ ॥

---

1. वासुदेवादौ M_1 वासुदेवाद्यौ T 2. कारणं M_2 3. भद्रं M_1
4. अयमर्धोऽनन्तर श्लोकपूर्वार्धश्च A, M, T, कोशेषु नोपलब्धौ । 5. वरुणं M_1
6, ततः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मुसलीकुम्भमाकारं पीतवायुधनप्रदाः ।
श्रीधरं भद्रहस्तं च [1]हरिं स्वाहामयावहम् ॥ २८४ ॥

हुम्फडन्तं नवैतानि बीजानि कमलोद्भव ।
पद्मपाणिं पद्मनाभं वनमालां त्रिविक्रमम् ॥ २८५ ॥

श्रीवत्सं [2]शंखिभुवनं भद्रहस्तास्सविक्रमाः ।
अग्निं मृगेशं वरुणं वैराजं बन्धुमस्तकम् ॥ २८६ ॥

दरं ताक्ष्यं तथा चादिदेवं शुक्लं श्रियःपतिम् ।
वसुगोपनशीतांशुभुवनानलवारुणाः ॥ २८७ ॥

मृगेशविजयाकारविष्कम्भारशुक्लविक्रमौ ।
दृक्पुण्यमादिदेवं च [3]भास्करं ऋतधामकम् ॥ २८८ ॥

सूक्ष्मदृक्शङ्खदक्षौ च वैधरोऽग्निश्चतुर्गतिः ।
पश्चिमं त्रितदक्षादि अग्निवायुसरोरुहाः ॥ २८९ ॥

ऋतधामा जयागोपा पश्चिमा शुक्लमब्जज ।
भानुगोपनसप्तार्चिर्भल्लायुधगुहालयाः ॥ २९० ॥

वैराजककुभौ कुम्भहव्यवाट् कपिलाह्वयाः ।
वैधरं भास्करं पापहननं वक्रतुण्डकम् ॥ २९१ ॥

गदिनं ऋतधामानं भास्करं सुमुखं तथा ।
कुम्भविक्रमजन्माह्व पद्मनाभस्सदेवराट् ॥ २९२ ॥

सुभद्रशङ्खदक्षाह्वमोतदेहोऽथ भास्करः ।
पवनं पापहननं गोपनौ विजयो दरः ॥ २९३ ॥

---

1. नृहरिं M_1 2. शङ्खभुवनं M_1 3. प्रभाकर सविक्रमौ M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदयं पीतकमलं मधुसूदनविघ्नराट् ।
माहेन्द्रशुभदौ [1]वह्निगोधनौ कुम्भविक्रमौ ॥ २९४ ॥

अग्निरत्रिः [2]कुम्भधरौ लक्ष्मी खर्वाश्चतुर्मुख ।
शुक्लोदयं तथा दृष्टिश्श्रीवत्सं वसुशीर्षकम् ॥ २९५ ॥

विघ्नेशशुभदौ स्यातां सरसीरुहसम्भव ।
मधुसूदनः शार्ङ्गपाणिः पञ्चान्तक विद्धि पुनः ॥ २९६ ॥

[3]और्वदक्षौ तदेहाश्च दृष्टिं सरसिजं तथा ।
वामनो धनदो यान्तः सुभगाग्निवनस्रजः ॥ २९७ ॥

रामपुण्याग्निगरुडविक्रमौ जयविक्रमौ ।
सुभगोऽग्नरादिदेवः कुञ्जरेण मुखाक्षरः ॥ २९८ ॥

करालं कपिलं पापहननं पवनात्मजम् ।
श्रीधरं दृष्टिधनदं पञ्चबिन्दुं सविघ्नराट् ॥ २९९ ॥

शुभोतदेहावुमात्मा चतुर्गतिमचां मुखम् ।
शैलद्वयं द्वादशात्मा गोपनश्शुक्लपश्चिमौ ॥ ३०० ॥

श्रीधरस्सुमुखो भूमिरनलः पञ्चबिन्दुकः ।
[4]करालाग्नि महामाया सुभगो बन्धुरन्वतः ॥ ३०१ ॥

वैराजं विक्रमं पापहनन बन्धुमस्तकम् ।
प्रचण्डं पुण्डरीकाक्षं वासुदेवं [5]जयं वसुम् ॥ ३०२ ॥

सूक्ष्मदृक्कुम्भवरुण पश्चिमाननमाधराः ।
उमात्म मृगदक्षाह्वा गोपना धनदः कुटः ॥ ३०३ ॥

---

1. गोपनौ M_1 2. पुण्यधनौ श्रीश्च दृष्टिः M 3. ओतदक्षोतदेहाश्च M_2
4. करालात्रि M_1 5. च दृग्वसुम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षः पुण्योदयश्शुक्लो शुभदृष्टिर्विनायकः ।
वैधरो मधुहन्ता च मन्दरं ब्रह्मसाधनम् ॥ ३०४ ॥

अत्रिरग्निः पवित्राह्वा वैधरौ[1] स्पर्शपश्चिमः ।
भद्रादि देवभल्लाह्वामुग्रभूर्मि मधुद्विषम् ॥ ३०५ ॥

एकदृग्दक्षविघ्नेशमाधवामृगवल्लभाः ।
भास्करं देवदत्तं च भानुं बन्धुं सुभद्रकम् ॥ ३०६ ॥

गदध्वंसं तथा कुम्भं द्विरदं पश्चिमाननम् ।
और्वाग्नि भुवनावुग्रयष्टिर्वैधाः श्रियःपतिः ॥ ३०७ ॥

अग्निं रमाधरं द्विश्च अग्निकूटविगर्हितम् ।
तथा भद्रमधुद्वेषि दृष्टिगोपनमस्तकान् ॥ ३०८ ॥

वैराज दक्षकमलगोपना बिन्दु पक्षिराट् ।
मनुं ध्रुवाग्निमाकारं बिन्दुचन्द्रमधुद्विषः ॥ ३०९ ॥

[2]नासिक्यमादिरत्रिश्च बन्धुमन्दरविष्टपाः ।
वैराजरेफशङ्खाह्वमाधवावादिविघ्नराट् ॥ ३१० ॥

मृगेशकमलौ दक्षं गुहमम्भोरुहासन ।
जयोऽग्निर्वायुरेणेशमुखो गरुडवाहनः ॥ ३११ ॥

बन्धुपीत पवित्राह्वा मधुसूदनवैजयाः ।
गोपनो भार्गवाकारशुक्लोदयहुताशनाः ॥ ३१२ ॥

पीतोतदेहकमलविघ्नविक्रममाधवाः ।
गोपनं [3]सोमबन्धुश्च करिगोपनयष्टयः ॥ ३१३ ॥

---

1. वैराजस्पर्शपश्चिमः M_2 2. नासिक्यं बन्धुरत्रिश्च M_2 3. साम M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिनेशमृतधामाह्वा दृष्टिशङ्कमधुद्विषः ।
विघ्नवायू तथा गोपकमलौ शत्रुदाहकः ॥ ३१४ ॥

[1]धान्तशङ्खौ मधोर्हन्ता पद्मक्रोधाग्निमारुताः ।
आदिश्चक्री सुबन्धुश्च पीतस्सर्वपुरान्तकः ॥ ३१५ ॥

उदयोरन्तरामौ वै राजते पवनाग्नयः ।
आदिःखर्वतनुर्बन्धुपीतपद्ममधुद्विषः ॥ ३१६ ॥

पाटलं पश्चिमं पद्मनाभं वैधरमाधवौ ।
भल्लायुधं गदी कुम्भवैराजमृगवल्लभा ॥ ३१७ ॥

श्रीवत्समग्निमीश्वरं कुम्भं पीतद्वयं तथा ।
सुभद्रगोपनौ शङ्खमन्दरौ [2]दिनकृत्तथा ॥ ३१८ ॥

अर्चां चतुर्दशं जन्म शशाङ्कमृगवल्लभाः ।
हुताशगोपदक्षाह्वा माधव्यश्च गुह्यालयः ॥ ३१९ ॥

वैराजयुगसप्तार्चिर्दरदेवहुतान्तिमाः ।
अनलो यष्टिसहितो बीजमस्य समीरितम् ॥ ३२० ॥

शरभङ्गऋषिस्तस्य वरिवं छन्द ईरितः ।
जपो लक्षत्रयस्तस्मिन् चतुश्शतमिताक्षरे ॥ ३२१ ॥

पुंसो रामावतारस्य परस्य परमात्मनः ।
चतुश्शतार्णरूपोऽयं मालामन्त्रस्समुद्धृतः ॥ ३२२ ॥

यथापुरं पुरश्चर्या सिद्धिश्चैव यथापुरम् ।
अन्येषां भरतादीनां इतरव्यूहनामभिः ॥ ३२३ ॥

---

1. दान्त शङ्खौ T; यान्त शङ्खौ M_1,M_2 2. नतिकृत्तथा M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आत्मशीर्षैश्चतुर्थ्यन्तैर्नामानि सहितानि च ।
चतुर्थ्यन्तानि वाच्यानि मन्त्ररूपाणि पद्मज ॥ ३२४ ॥

[1]बीजान्याद्यक्षराण्येव सानुस्वाराणि योजयेत् ।
सीतादीनां च देवीनां चतुर्थ्यन्तास्समाह्वयाः ॥ ३२५ ॥

[2]मन्त्रषष्ठेति पर्यन्तो बीजान्याद्यक्षराणि च ।
श्रीमन्त्रवत् पुरश्चर्या तद्वच्च फलसम्भवः ॥ ३२६ ॥

रामस्य बलभद्रस्य मनुस्सम्प्रति कथ्यते ।
सप्तार्णं पदमुच्चार्य ततः पश्चादुदीरयेत् ॥ ३२७ ॥

रामायेति चतुर्थ्यन्तं बलभद्रपदं तथा ।
बीजमस्योच्यते ब्रह्मन् जृम्भलम्पुलहं तथा ॥ ३२८ ॥

सानुस्वारो हृषीकेशः पैङ्गलः स्यादृषिः स्मृतः ।
छन्दः पूर्ववदेव स्याद्देवता मुसलायुधः ॥ ३२९ ॥

रामः कमलपत्राक्षो बीजमेवाङ्गपद्धतिः ।
लक्षाण्यक्षरसंख्यानि [3]भवेन्मन्त्रस्य सिद्धये ॥ ३३० ॥

फलमिष्टमवाप्नोति पातालगमनादिकम् ।
चतुर्वर्गफलावाप्तेः फलमस्य [4]करे स्थितम् ॥ ३३१ ॥

यादवस्याथ कृष्णस्य मन्त्रस्सम्प्रति कथ्यते ।
उद्गीथमुच्चार्य मुखे स्पर्शादि तदनन्तरम् ॥ ३३२ ॥

ऋतधामा ततः पश्चात्क्रोधरूपमनन्तरम् ।
वनमालिनमाकारं श्वसनं विष्णुमस्तकम् ॥ ३३३ ॥

---

1. बीजाद्यान्यक्षराण्येव T, M_2 2. मन्त्रेषुठठेतिं M_1 3. जपे M_1
4. पदे M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नत्यन्तमिति षड्वर्णा मन्त्रस्य कथिता मया ।
बीजं कमलमाद्यं स्यात्सप्तार्चिस्तदनन्तरम् ॥ ३३४ ॥

और्वः पश्चात्सयष्टिः स्यादेतेनैवाङ्गकल्पना ।
सनकोऽस्य भवेद्द्रष्टा छन्दो गायत्रमुच्यते ॥ ३३५ ॥

देवता भगवान् कृष्णः पुरश्चर्या च पूर्ववत् ।
फलानि पूर्वमुक्तानि नानन्त्यादुच्यते पुनः ॥ ३३६ ॥

गोवर्धनाख्यमन्त्रस्य वर्णोद्धारः प्रदर्श्यते ।
वेदादिं पूर्वमुच्चार्य प्रथमे स्पर्शपञ्चके ॥ ३३७ ॥

तृतीयां यादिषु तथा स्वरेषु च चतुर्मुख ।
सद्ध्रुवं गदिनं ब्रह्मसाधनं च सुधारसम् ॥ ३३८ ॥

आदिं सप्तार्चिषं पुण्यं मकरं तदनन्तरम् ।
भद्रबाहुं द्वितीयं च श्वसनं मुखमन्वतः ॥ ३३९ ॥

नत्यन्तमेवमुद्धारः कथितो नववर्णकः ।
मन्त्रस्तदेव बीजादिसाधनं फलमीरितम् ॥ ३४० ॥

गोपालमन्त्रस्योद्धारः कथ्यते कमलासन ।
छन्दसामादिमुच्चार्य तृतीयं [1]स्पर्शसंज्ञितम् ॥ ३४१ ॥

ओतदेहं पवित्रं च वामनं ककुभं ततः ।
[2]अनिरुद्धं विघ्नराजमकारं यादसाम्पतिम् ॥ ३४२ ॥

आद्यं [पु]लहमावृत्तं स्पर्शोपान्तं च गोपनम् ।
प्रभञ्जनं स्वरेष्वादिं ठठान्तो मनुरीरितः ॥ ३४३ ॥

---

1. स्पर्शसंज्ञकम् M_1 2. अप्रमेयं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बीजं तृतीयं स्पर्शानां पीतं तुर्यमचामतः ।
नासिक्यमङ्गानि पुनर्गोपनं खड्गसंज्ञितम्[1] ॥ ३४४ ॥

मुख्यं स्पर्शादिमनलं गोपनं [2]स्पर्शनं तथा ।
आद्यं ठठान्तं प्रथमं तदेवाङ्गमनन्तरम् ॥ ३४५ ॥

विपूर्वमधिकं पश्चादङ्गं त्रैलोक्यपूर्वकम् ।
रक्षणेति चतुर्थ्यन्तं तद्विभक्त्यन्तमन्वतः ॥ ३४६ ॥

असुराद्यन्तकपरं पदं सर्वाद्यनन्तरम् ।
ग्रहं निवारणायेति हुम्फडन्तमितीरितम् ॥ ३४७ ॥

मन्त्रस्य नारदो द्रष्टा विराट् छन्दश्च देवता ।
कृष्णावतारो भगवान् जपस्थानं पुरोदितम् ॥ ३४८ ॥

[3]सहस्रशः प्रतिस्थानं जपः प्रोक्तश्चतुर्मुख ।
जपात् सिध्यति मन्त्रोऽयं साधयत्यखिलं फलम् ॥ ३४९ ॥

आश्चर्यमपरं मन्त्रं वक्ष्यामि कमलासन !
उच्चार्य प्रणवं पूर्वं माधरं तदनन्तरम् ॥ ३५० ॥

चतुर्थ्यन्तमुदीर्याथ तद्विभक्त्यन्तमद्भुतम् ।
भोगेश्वरपदं तद्वत्तद्वच्चक्रीपदं ततः ॥ ३५१ ॥

सुवर्णादिध्वजान्तं च पदं तादृग्विभक्तिकम् ।
पीतादिवासश्शब्दान्तं वासुदेवपदं[4] ततः ॥ ३५२ ॥

तद्विभक्तिशिरो योज्यं नत्यन्तो मनुरुद्धृतः ।
पूर्वमङ्गानि योज्यानि पूर्ववन्नातिरिच्यते ॥ ३५३ ॥

---

1. संज्ञकम् M₁ 2. श्वसनं M₁ 3. सहस्रांशः M₁ 4. परं T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋषिश्छन्दो देवता च पूर्ववत्फलमेव च ।
धर्मार्थकाममोक्षादि नेह भूयः प्रतन्यते ॥ ३५४ ॥

मालामन्त्रं तावदर्णं देवस्य मधुविद्विषः ।
कृष्णावताररूपस्य चतुर्वर्गफलप्रदम् ॥ ३५५ ॥

उद्धरामि यथातत्त्वं यथावदवधार्यताम् ।
निगमादिद्विषट्कार्णं सरोजमृतधामकम् ॥ ३५६ ॥

क्रोधं प्रचण्डं मधुभिच्छङ्खकुम्भ[ऋ]तान्विताः ।
क्रोधश्चण्डकमः कुम्भशं खा[ग्नि] मधुसूदनाः ॥ ३५७ ॥

दरश्रीवत्स एणेश क्रोधसूक्ष्मनमतः परम् ।
वासुदेवो गदी पापहननं च चतुर्गतिम् ॥ ३५८ ॥

अग्निबिन्दुर्विरिञ्चादि देवाश्शङ्खमचां मुखम् ।
पवित्रमग्निमधुभिद्धद्रपाणिद्वयं पुनः ॥ ३५९ ॥

वैधरं पश्चिमवसुं दक्षेन्दुभुवनात्मकम् ।
सूक्ष्मचक्षुर्गतिस्सोमः कुम्भाग्निस्सगुहालयौ ॥ ३६० ॥

पवित्रगोपनौ वायुं पश्चिमाग्निं मधुद्विषः ।
वैराजमाधवीविघ्नः सारङ्गासि धराः परः ॥ ३६१ ॥

बन्धुर्वैराजहुतभुक् पश्चात्मद्विरदाननः ।
गोपनः शङ्खदिनकृद्दतवैधरमारुताः ॥ ३६२ ॥

अब्जोतदेहावद्रिश्च यान्तभद्रत्रिविक्रमाः ।
माहेन्द्रशङ्खमधुभिन्मारुताः [1]ककुभाह्वयाः ॥ ३६३ ॥

1. शार्ङ्गपाणयः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भृगुगोपनविघ्नेशजन्महन्त्रेणसंहिताः ।
मारुतो गोपनो वायुरिन्दुभास्करमैन्दवम् ॥ ३६४ ॥

ऋतं लक्ष्मीं महामायां क्रोधाग्निवरुणाह्वयाः ।
अत्रिर्विघ्नद्वयं शङ्खो द्विरदः सूक्ष्मलोचनः ॥ ३६५ ॥

श्रियःपतिं तथा जन्महन्तारं वक्रतुण्डकम् ।
हुताशचण्डमधुभिद्धाशुक्रदिनेश्वराः ॥ ३६६ ॥

कालात्मा प्रतिमाकारजयपावकभद्रकाः ।
उदैकश्चक्षुरमृतं विक्रमा विधिपावकौ ॥ ३६७ ॥

दक्षो विधिश्चिन्तधामा दक्षगोपनमञ्जज ।
शङ्खनादिं गदध्वंसं माहेन्द्रं पञ्चबिन्दुकम् ॥ ३६८ ॥

सध्रुवं चेन्दिराबीजं पुष्टिबीजं ततः परम् ।
कामबीजं पाशबीजं श्रीवत्सं बिन्दुमस्तकम् ॥ ३६९ ॥

चक्र[1] खड्गधरो ब्रह्मा पद्मनाभोऽथ पश्चिमः ।
वैधरं[2] दक्षकमल श्रीधराः पीतवामनौ ॥ ३७० ॥

इन्दिरा पापहन्तना गोपना वित्तवर्धनाः ।
मधुसूदननासिक्यकुशेशय रमाधराः ॥ ३७१ ॥

श्रीवत्सद्वंद्वबहुल[3]वित्तेशमधुविद्विषः ।
कपिध्वजो गदी यान्तदक्षश्रीधरचन्द्रमाः ॥ ३७२ ॥

पीतादिदेवश्शीतांशुर्मायाकमलमञ्जज ।
[4]मनुर्दक्षोतदेहौ च दृष्टिः शङ्खघटाह्वयः ॥ ३७३ ॥

---

1. छत्री M_1 2. वैराज P_2 3. विघ्नेश M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मायाकरालमीकारचण्डार्णवसुमस्तकम् ।
नादादिं पश्चिमं पद्मनाभं वैराजविक्रमौ ॥ ३७४ ॥

पावकं चोर्ध्वलोकेशं पश्चिमं चाप्रमेयकम् ।
खर्वविक्रममाहेन्द्रभल्लायुधसुधारसाः ॥ ३७५ ॥

विघ्नमन्दरविघ्नेशमाधवी सुप्रतिष्ठिताः ।
कुम्भोदरामशुभदपीयूषाग्निगुह्यालयाः ॥ ३७६ ॥

पश्चिमाननविघ्नेश माया मन्दराश्मकाः ।
वसुमूर्त्तिमहेन्द्रादि देवाः कपिलसंयुताः ॥ ३७७ ॥

जृम्भलो यान्तसुभगहुताशधनदाः परः ।
गोविन्दविघ्न भुवनविधिः पश्चिमसंज्ञिताः ॥ ३७८ ॥

सप्तार्चिः पीतवर्णाभं देवरो मतिमांस्तथा ।
शङ्खगोपनवैराज श्रीधरो धनदाभिधः ॥ ३७९ ॥

मधुद्विट्कुञ्जरमुखश्चतुर्गतिसपन्नगाः ।
भद्रहस्तो मधुद्वेषी गदध्वंसी द्वयान्वितः ॥ ३८० ॥

भद्रपाणिस्तथा पुण्यं सरसीरुहसम्भव ।
सुधारसो वसुमूर्त्तिर्गोपनाख्यमतः परम् ॥ ३८१ ॥

करालवन्धुविघ्नेशौ पद्मबिन्दु[1]शुभाह्वयाः ।
मधुहन्ता तथा ब्रह्मा मायाविघ्नश्चवामनाः ॥ ३८२ ॥

यान्तं[2]माधवपीयूषवैराजाः पद्मबिन्दुकम् ।
शशाङ्ककमलौ भद्रपाणिद्वयैधरान्विताः ॥ ३८३ ॥

---

1. गुहाह्वयः M   2. माधर M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एणेशकुम्भ [1]दृक् स श्री श्रीधराश्चान्तयादिकाः ।
गदी च ऋतधामा च दिनकृद्वरुणो मृगः ॥ ३८४ ॥

वैराजं मधुहन्तारं [2]विष्णवाभं भद्रसाधनम् ।
मानुषेशं तथा दक्षं मधुसूदनवैधरौ ॥ ३८५ ॥

ऋक्षेशभुवनौ यान्तं मधुशत्रुहिमालयाः ।
उदयोऽग्निपवित्रं च बन्धु श्रीमधुविद्विषः ॥ ३८६ ॥

वक्रतुण्डविरिञ्चौ द्वौ हृषीकेशशुभाभिधौ ।
[3]भान्तादिदेवसुमुखौ पुण्डरीकविदर्भितौ ॥ ३८७ ॥

पूर्णचन्द्रं [4]सरामं च वैधरं मोहनाशनम् ।
पीयूषरामदृक् शङ्कमधुशत्रुघनाधिपाः ॥ ३८८ ॥

स्वाहाधरं वैधरं च गोविन्दं विजयाभिधम् ।
श्वसनो दृष्टिमधुभिद्धेरम्ब मकरालयाः ॥ ३८९ ॥

कुशेशयमधुद्वेषी पीतमाधवमारुताः ।
अर्चां द्वितीयं नृहरिं वसुमस्तकमब्जज ॥ ३९० ॥

सूक्ष्मदृक् सोर्ध्वलोकेशवैराजमधुविद्विषः ।
पापहन्ता तथा सोमदक्षाकर विदर्भितौ ॥ ३९१ ॥

अर्चां द्वितीयमनलं [5]कमलामृतवैजयाः ।
द्वयंबन्धुं तथा दक्षं सन्धबाग्निस्त्रिविक्रमम् ॥ ३९२ ॥

स्वयम्भूर्जन्म[6]हन्ता च पीयूषाग्निमधुद्विषः ।
दृष्टिविक्रमयान्तौ च कुम्भबन्धुं चतुर्मुख ॥ ३९३ ॥

---

1. विजयमधुश्री श्रीयथोग्रकम् M_1 2. ब्रह्मविष्णुसुसाधनम् M_1 3. ह्रान्तादि M_2 4. समारं च M_2; माधरं च A 5. कमलामृत-वैजयाः T, P 6. हर्ता M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अग्निमारुतमाकारभद्रहस्तास्सविक्रमाः ।
वक्रतुण्डानिलौ विघ्नटग् दिनेशद्वयं तथा ॥ ३९४ ॥

कुञ्जरास्यं पश्चिमास्यं बकतुण्डं तथाक्षरम् ।
मन्दरः स्पर्शरोधश्च गदी च ऋतधा रविः ॥ ३९५ ॥

प्रचण्डपिण्डमाकारमधुभिद्वरुणाभिधम् ।
अचामेकादशं लक्ष्मीमुध्दृत्य कमलासन ॥ ३९६ ॥

समीर[1]कलशौ बन्धुसुभगौ मकरालयम् ।
सकविं पाण्डररुचिं मारुताभृत्रविक्रमाः ॥ ३९७ ॥

एकादश्यान्तमधुद्विट् शुक्लशङ्खेन्दवस्तथा ।
फुल्ललोचनमाकारखेटकी मारुताभिधः ॥ ३९८ ॥

सुभद्रवसुविघ्नेशवैधराः प्रेतनायकाः ।
सरामविघ्नटग्दक्षमधुसूदनमन्वतः ॥ ३९९ ॥

यान्तवायुघनाध्यक्षरमाधरगणाधिपाः ।
भुजङ्गहुतभुक्पुण्यदक्षद्विपसुगोपनाः ॥ ४०० ॥

सुभगो मन्दरद्वन्द्वमग्निभद्रकराह्वयम् ।
बन्धुमस्तकपश्चान्ता विष्कम्भ[2]द्युम्नभद्रकाः ॥ ४०१ ॥

विक्रमो दक्षहुतभुक् ब्रह्मसाधनमञ्जज ।
वक्रतुण्डधरौ शुक्लकुम्भाग्निद्विरदाननाः ॥ ४०२ ॥

मधुसूदन पश्चान्त पश्चिमा[ऋ]तमन्दराः ।
वैधरोऽग्निशिराश्शङ्खशुक्लकुम्भवपुश्शिराः ॥ ४०३ ॥

---

1. कमली M_2 2. द्विरदाननाः T. P_2

Digitized by Madhuban Trust, Delhi

सूक्ष्मदृक् चोर्ध्वविजयवरुणा वित्तवर्धनाः ।
यष्टि सरोरुहं यान्तं पश्चिमाग्निः समन्दराः ॥ ४०४ ॥

द्युमणिस्सध्रुवं शुक्लं वरुणोदरमन्वतः ।
ओतदेहं तथा दक्ष वक्रतुण्डं करालकम् ॥ ४०५ ॥

अग्निरेणेश श्रीवत्सकुम्भाग्निपद्मपश्चिमौ ।
ऋतं भल्लयुधं गोप पाशपाणिर्जनार्दनाः ॥ ४०६ ॥

[1]अत्रिं श्रीवत्समनलं वायुं शुक्लं जलाशयम् ।
वसुं मधुद्विषं चन्द्रं श्रीधराग्निं चतुर्मुख ॥ ४०७ ॥

सम्प्रसारणवैराजवसुशुक्लमधुद्विषः ।
वैधरो भद्रचण्डांशुध्वसनौ दक्षश्रीधरौ ॥ ४०८ ॥

चक्री समन्दरमचां पद्मं कमलोद्भव ।
उदयं विघ्ननयनावादि खड्गधरारमा ॥ ४०९ ॥

वैराजपद्महुन्भुक्पद्मबिन्दुर्धनाधिपाः ।
[2]अग्निरुग्रात्ममधुभिद् हृदयाह्लादमक्षरम् ॥ ४१० ॥

गदध्वंसं श्रियःकान्तं वनस्रक् तत्समीरणः ।
कुम्भविक्रमपद्मान्त ऋतभास्करवैजयाः ॥ ४११ ॥

भुवनोऽमृतवैराजवसुभल्लकरालकाः ।
वैराजजन्महन्तारं द्विरदः कुम्भवैजयाः ॥ ४१२ ॥

स्वशिरोग्निं तथा शुक्लपीतकुम्भास्तु [3]धामनि ।
नाथं रमाधरं [4]विघ्न मायाञ्चैव सरोरुहम् ॥ ४१३ ॥

---

1. अग्निं M_2 2. अनिरुद्धात्म M_2 3. स्स यामिनी T, P_2
4. विष्णुं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हुताशकपिला[क्षौ]द्रौ पश्चिमव्रतधानिलौ ।
छलध्वंसी पवित्राह्वा हृषीकेश[1]हुताशनौ ॥ ४१४ ॥

कान्तादि पीतफणभृद्दक्षवामनमस्तकान् ।
हैरम्बोऽग्नि मधुद्वेषी शुभदोदरमैन्दवम् ॥ ४१५ ॥

पाटलद्वन्द्वमोंकार चण्डांशुं कपिलाक्षरम् ।
[2]कमलोऽग्नि समुव[नं] दक्षगोपनयष्टिकाः ॥ ४१६ ॥

हुताशतार्क्ष्यमधुभिन्नासिक्यं चतुराननं ।
श्रीबीजं च गदध्वंसं पीतौर्वं ध्रुवमादिमत् ॥ ४१७ ॥

पाटलो बन्धुविजय वैराजमृगवल्लभाः ।
ककुभो माधववरं ठठान्तो मनुरीरितः ॥ ४१८ ॥

नारदोऽस्य मुनिर्द्दिष्टा वरिवं छन्द ईरितम् ।
देवता देवदेवेशः कृष्णः कमलसम्भव ॥ ४१९ ॥

अङ्गानि पूर्ववच्चास्य पुरश्चर्या च पूर्ववत् ।
जातिपुष्पैर्बिल्वफलैः[3] समिद्भिर्होममाचरेत् ॥ ४२० ॥

छायायां बिल्ववृक्षस्य जपहोमादिक भवेत् ।
अणिमादिकमैश्वर्यं पुरुषार्थचतुष्टयम् ॥ ४२१ ॥
फलं ददाति मन्त्रोऽयं मन्त्रविद्भिः सुसाधितः ।

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे
मत्स्यादिमूर्त्तिमन्त्रकथनं नाम सप्तविंशोऽध्यायः ॥

---

1. हुताशनम् T,P_1,P_2 2. कमलो भुवनं दक्षं गौपनायनयष्टिकाः M_2
3. पुष्पैः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टाविंशोऽध्यायः ।

यज्ञमूर्त्यादि मन्त्रोद्धारः ।

भगवान् :—

हे ब्रह्मन् यज्ञवपुषमन्त्रः सम्प्रति कथ्यसे ।
महाफलं प्रोच्यमान[1]मिमं त्वमवधारय ॥ १ ॥

आत्मने इति पर्यन्तमष्टाक्षरवदुद्धरेत् ।
कालाद्यनलमध्यं च विग्रहान्तं पदं ततः ॥ २ ॥

चतुर्थ्यन्तं मूर्तिशीर्षं यज्ञादिपरमन्वतः ।
तद्विभक्त्यन्तमपरं ठठान्तं मनुरीरितः ॥ ३ ॥

बीजमस्यानलं मुख्यमनुस्वारान्तमुद्धरेत् ।
अङ्गानि चानलादीनि षट्भारान्तान्यनुक्रमात् ॥ ४ ॥

सानुस्वाराणि योज्यानि [2]क्रतुद्रष्टा विराट् पुनः ।
छन्दश्च यज्ञमूर्त्यात्मा देवता भगवान् हरिः ॥ ५ ॥

लक्षत्रयं जपः कार्यो मन्त्रस्यास्य प्रसाधने ।
फलं प्रसूते धर्मादिपुरुषार्थचतुष्टयम् ॥ ६ ॥

अन्नाधिपतिमन्त्रस्य [3]प्रभावो रूपमेवच ।
कथ्यते सम्प्रति ब्रह्मन् न वाच्यं यस्य कस्यचित् ॥ ७ ॥

प्रणवादिर्मनुस्सर्वो विशेषस्तूच्यतेऽधुना ।
मुख्यमर्णं भद्रपाणिं द्विरुक्तं तदनन्तरम् ॥ ८ ॥

आदि देवं धनपतिं मायामुद्धृत्य पश्चिमम् ।
विष्णुं विजयनामानमाद्यं वायुमनन्तरम् ॥ ९ ॥

---

1. मिह M_1 2. मन्त्रद्रष्टा M_1 3. प्रभावं इति T, P_1, P_2 कोशग्रन्थेषु पाठः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवदत्तं च दक्षादिमाद्यं दक्षं पुनस्तदा ।
आदिदेवं मनुष्येशं द्विरुक्तं मुख्यमन्वतः ॥ १० ॥

मन्दरं पापहननमृतधा वैष्णवाक्षरम् ।
शङ्खमादिमचामन्वक् द्विःप्रोक्तं प्रेतनायकम् ॥ ११ ॥

प्रणवादिं ठठेत्यन्तमिति मन्त्रश्चतुर्मुख ।
बीजमस्य प्रवक्ष्यामि द्वादशात्मानमुद्धरेत् ॥ १२ ॥

ज्वलनं वामनं [1]बिन्दुमेतदेवाङ्गमुच्यते ।
आकारादिक्रमाद्दीर्घस्वरभक्तिविशेषकृत् ॥ १३ ॥

अस्ले विशेषो विष्णुश्च विसर्गश्च समीरितः ।
व्यासो द्रष्टास्य मन्त्रस्य छन्दस्तु बृहती तथा ॥ १४ ॥

देवतान्नपतिः प्रोक्तो मन्त्रस्यास्य चतुर्मुख ।
अन्यथा शृणु वक्ष्यामि बह्वन्नफलदं शुभम् ॥ १५ ॥

नत्यन्तं प्रणवं पूर्वं वरुणं च त्रिविक्रमम् ।
क्रोधरूपं प्रचण्डं च विष्णुं वरुणमन्वतः ॥ १६ ॥

माधवं पूर्णचन्द्रं च [2]पीयूषात्मानमेव च ।
आदिं वैश्वानरं मुख्यं पवित्रं प्रणवादि च ॥ १७ ॥

एकनेत्रमकारश्च श्वसनं माधवं ततः ।
मन्दरं प्रणवाद्यं च दीप्तिमन्तं चतुर्मुख ॥ १८ ॥

गोपानं जृम्भलं विष्णुं माहेन्द्रं गोपनं ततः ।
वायुमाद्यं ठठान्तश्च वर्णोद्धार इतीरितः ॥ १९ ॥

---

1. बीज M_1 2. पीयूषाकारमेव च M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बीजमङ्गानि पूर्वोक्तमृषिरस्य पराशरः ।
छन्दश्च देवी गायत्रं देवतान्नपतिर्भवेत् ॥ २० ॥

पूर्णेन्दुबिम्बमध्यस्थे सितपद्मे विकस्वरे ।
आसीनं धवलाकारं नीलकुञ्चितमूर्धजम् ॥ २१ ॥

दुकूलं क्षौमवसनं बालयोग्य विभूषणम् ।
कलधौतमयं पात्रं पायसान्नेन पूरितम् ॥ २२ ॥

बिभ्राणं दक्षिणेहस्ते दध्योदनमथेतरे ।
ध्यायेत् लक्षत्रयं धीमान् जपेत्तद्गतमानसः ॥ २३ ॥

अन्नेन जुहुयाच्चाग्नौ नियतं मन्त्रवित्तमः ।
बह्वन्नत्वमवाप्नोति सर्वमिष्टं लभेत च ॥ २४ ॥

शक्तीशमन्त्रमधुना कथयामि चतुर्मुख ।
आदितः सप्तवर्णानामुद्धारः पूर्वमीरितः ॥ २५ ॥

क्रोधनं हृदयाह्लादं भुवनं भास्करं ततः ।
गुहालयमनुस्वारं रविमग्निं च मारुतम् ॥ २६ ॥

[1]सयष्टिं पीतमाद्यर्णं कमलं क्रोधरूपिणम् ।
माधवीं पञ्चबिन्दुञ्च हननं चाप्रमेयकम् ॥ २७ ॥

वैराजमप्रमेयञ्च पुरुषात्मा च माधवः ।
नारायणं चतुर्थ्यन्तं ठठेति मनुरीरितः ॥ २८ ॥

अंशुमान् वीतिहोत्रश्च वामनो बिन्दुमस्तकः ।
[2]अङ्गं च बीजं पूर्वोक्तमृषिश्चापि पराशरः ॥ २९ ॥

---

1. २७, २८ श्लोकद्वयमिदं A, T कोशयोः P_1, P_2 पन्थयोरुपलब्धम् ।
2. अङ्गञ्च T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छन्दश्च देवी गायत्रं शक्तीशो देवता तथा ।
जपेत् द्वादशलक्षं [1]तु प्राप्नुयात् सर्वमीप्सितम् ॥ ३० ॥

कालनेमिमनुर्ब्रह्मन् कथ्यते सर्वसाधकः ।
आद्यर्णाः पूर्ववत्सप्त पीयूषात्मा त्रिविक्रमः ॥ ३१ ॥

उग्रदेहः प्रचण्डश्च विष्णुः कलशमाधवौ ।
कमलं गोपनयुतं माहेन्द्रं विष्णुमस्तकम् ॥ ३२ ॥

विघ्नेशं [2]देवदत्तं च [3]दक्षं मायापरिष्कृतम् ।
पतङ्गामृतधामानं वैधरं च चतुर्गतिम् ॥ ३३ ॥

आद्यं सुधारसं माया [4]अत्रिर्गोपनहव्यवाट् ।
आद्यं सुमुखमाद्यं[5] च श्वसनं चाप्रमेयकम् ॥ ३४ ॥

हुम्फडन्तं ठठपरं मनुरेवं समुद्धृतः ।
बीजं वक्ष्ये दिनकरं भुवनं यष्टिमस्तकम् ॥ ३५ ॥

क्रुद्धादि पूर्ववच्चाङ्गं नारदो मन्त्रदर्शनः ।
छन्दो विराड्देवता च कालनेमिश्चतुर्मुख ॥ ३६ ॥

जपसंख्या फलं चापि द्विषट्काक्षरवद्भवेत् ।
त्रैलोक्यमोहनं मन्त्रं कथयामि यथातथम् ॥ ३७ ॥

उद्गीथं कमलं पीतं वामनं [6]बिन्दुमस्तकम् ।
एकाक्षरो मनुरयं देवताङ्गमनुक्रमात् ॥ ३८ ॥

षड्भिर्युतमचामाद्यैः सानुस्वारं प्रयोजयेत् ।
ऋषिर्वृद्धमनुश्छन्दो दैवं गायत्रमीरितम् ॥ ३९ ॥

---

1. तत् M_1 2. देवदेवश्च A 3. दक्षमाया T,P 4. मन्त्र A
5. माकारं A 6. ध्रुव M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रैलोक्यमोहनो देवो देवता जपतर्पणम् ।
होमश्च फलमप्यस्य निधिस्थानोपलम्भनम् ॥ ४० ॥

जपन् भूयस्तथा सर्वं दुर्लभं फलमश्नुते ।
षोडशार्णो मनुर्ब्रह्मन् त्रिलोकीमोहनात्मकः ॥ ४१ ॥

उच्यते पूर्ववत्तस्य वर्णानाद्यान् समुद्धरेत् ।
त्रैलोक्यमोहनपदं[1] चतुर्थ्यन्तं ततः परम् ॥ ४२ ॥

तद्विभक्तिपदं[2] विष्णुपदं स्वाहान्तमुद्धरेत् ।
मनुरेषस्स एवाङ्गं बीजं पूर्ववदीरितम् ॥ ४३ ॥

मुनिः पुलस्त्यश्छन्दश्च पूर्ववद्देवता तथा ।
जपसंख्या फलं चैव मूलमन्त्रवदिष्यते ॥ ४४ ॥

मन्त्रो नवाक्षरश्चान्यस्त्रिलोकीमोहनात्मकः ।
त्रैलोक्यमोहनपदं चतुर्थ्यन्तं नमस्तथा ॥ ४५ ॥

बीजमङ्गमयं चैव सर्वकामफलप्रदम् ।
निगमादिं चतुर्थ्यन्तं पदं त्रैलोक्यमोहनम् ॥ ४६ ॥

अंशुमालिनमग्निं च पञ्चबिन्दुं सयष्टिकम् ।
शङ्खिनं पुलहं पञ्चबिन्दुयष्टिसमन्वितम् ॥ ४७ ॥

तद्बीजं च द्विरभ्यस्य नतिश्च तदनन्तरम् ।
द्वादशार्णात्मको मन्त्रस्त्रिलोकीमोहनात्मकः ॥ ४८ ॥

प्रत्यक्षरं लक्षजपो द्वादशाक्षरवत्फलम् ।
कामकामेश्वरी नाम मन्त्रः सर्वफलप्रदः ॥ ४९ ॥

---

1. मिंद M_1 2. परं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उद्‌गीथं पूर्वमुच्चार्य भास्करं ज्वलनं ततः ।
महामायां यष्टियुतामित्येकाक्षरमुद्धरेत् ॥ ५० ॥

एतदेवाङ्गमुदितं शौनको मुनिरुच्यते ।
छन्दश्च देवी गायत्रं देवता पुरुषोत्तमः ॥ ५१ ॥

लक्षमेकं जपेन्मन्त्री सर्वकामानवाप्नुयात् ।
शङ्खकुन्देन्दुधवलं चतुर्बाहुं किरीटिनम् ॥ ५२ ॥

गरुडारूढमारोप्य देवीं वामोरुविष्टरे ।
दाडिमीकुसुमप्रख्यां सर्वाकल्पपरिष्कृताम् ॥ ५३ ॥

पाशाङ्कुशधरां लक्ष्मीं कामविह्वललोचनाम् ।
कामकामेश्वरीमेवं ध्यायेदेकाग्रमानसः ॥ ५४ ॥

त्रैलोक्यमोहनं नाम मनुस्सम्प्रति कथ्यते ।
ब्रह्मकोशमुदीर्यादौ नत्यन्तं तदनन्तरम् ॥ ५५ ॥

पदानि सम्बुध्यन्तानि क्रमेणोद्धारयेत् सुधीः ।
पुरुषाद्युत्तमपदं रूपमप्रतिमेति च ॥ ५६ ॥

लक्ष्म्यादि च निवासान्तां सकला[दिं]जगत्पदम् ।
क्षोभणान्तं च सर्वादिपदं स्त्रीहृदयावधि ॥ ५७ ॥

विदारणशिरश्चापि त्र्यादि भुवनावधि ।
उन्मादकरपर्यन्तं सुरासुरपदं ततः ॥ ५८ ॥

मनुजेति समुच्चार्य सुन्दरीजनमन्वतः ।
मनांसीति समुच्चार्य तापयेति चतुर्मुख ॥ ५९ ॥

दीपयेति पदं पश्चाच्छोषयेति च मारय ।
स्तम्भय द्रावयाकर्षपर्यन्तं च क्रियापदम् ॥ ६० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्विर्वक्तव्यं [1]ततो ब्रह्मन् परमं सुभगावधि ।
सम्बुध्यन्तं च सौभाग्यं करोति च पदं ततः ॥ ६१ ॥

सर्वकामपदं प्रोच्य पदं चामुकमित्यतः ।
हनेति द्विःसमुच्चार्य चक्रेण गदयेति च ॥ ६२ ॥

खड्गेन सर्वबाणैश्च द्विर्भिन्देति पठेत्ततः ।
पाशेनेति ततो बन्ध बन्धेति च पदद्वयम् ॥ ६३ ॥

अङ्कुशेनेति सम्प्रोच्य ताडयेति द्विरभ्यसेत् ।
[2]कुर्विति द्विः समुच्चार्य किं तिष्ठ पदमन्वतः ॥ ६४ ॥

तावद्यावत्पदे प्रोच्य समीहितपदं ततः ।
मे सिद्धिर्भवतूच्चार्य मे हुम्फडिति शीर्षकम् ॥ ६५ ॥

इत्येष मालामन्त्रस्य समुद्धारः प्रदर्शितः ।
निगमादिरनन्तं च और्वश्चन्द्रार्धशेखरम् ॥ ६६ ॥

बीजमेवं समुध्दृत्य षडङ्गानि मनुः पुनः ।
षोढा विभज्य कर्तव्या ऋषिः स्यान्नलकूबरः ॥ ६७ ॥

छन्दोऽतिच्छन्दनामास्य देवता पुरुषोत्तमः ।
[3]ध्यायेत्तमेव पुरुषं साधयेन्मन्त्रवित्तमः ॥ ६८ ॥

अष्टबाहुं विशालाक्षं गरुडारूढमच्युतम् ।
अकलङ्कशशिप्रख्यं पूर्णेन्दुसदृशाननम् ॥ ६९ ॥

सुभ्रूललाटमकुटं लावण्यामृतसागरम् ।
पीतकौशेयवसनं कपोलमृष्टकुण्डलम् ॥ ७० ॥

---

1. तथा ब्रह्मन् प्रथमं M_2 2. कुर्वन्ति T, P_1, P_2 3. ध्यात्वा तमेव M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चक्रं च मुसलं बाणमङ्कुशं दक्षिणे भुजे ।
शङ्खं कौमोदकीं शार्ङ्गं पाशं वामेषु बिभ्रतम् ॥ ७१ ॥

सर्वलक्षणसम्पूर्णं सर्वाकल्पपरिष्कृतम् ।
दिव्यचन्दनलिप्ताङ्गं [1]दिव्यस्रग्दामविभूषितम् ॥ ७२ ॥

देव्योऽष्टौ परितस्तस्य बालव्यजनपाणयः ।
वीजयन्ति सदा देवं कामविह्वललोचनाः ॥ ७३ ॥

एताभ्यो बहिरष्टौ च दिक्षु चक्रादि धारिणः ।
पुरुषा देवदेवेशं प्रणिपत्य बहिः स्थिताः ॥ ७४ ॥

एवं सपरिवारं तं ध्यात्वा देवं समाहितः ।
सप्ताहं मन्त्रजापेन वश्या मनुजयोषितः ॥ ७५ ॥

दिवसेषु च तावत्सु पुनर्यक्षादियोषितः ।
तिष्ठन्ति संमुखा सर्वा मन्मथाविष्टचेतसः ॥ ७६ ॥

भजन्ति मन्त्रिणं मन्त्र [2]वैभवान्मोहयन्ति च ।
[3]जपी भूयस्तथा कामान् सर्वान्विन्दन्त्यसंशयम्[4] ॥ ७७ ॥

किं पुनर्बहुनोक्तेन देवः प्रत्यक्षतामियात् ।
शान्तिः पुष्टिश्च धर्मश्च कामार्थौ मोक्ष एव च ॥ ७८ ॥

पातालाकाशगमनमन्तर्धानमदृश्यताम् ।
निधानं [5]बलिसिद्धिश्च खननं चौषधं तथा ॥ ७९ ॥

पादुकां गुलिकां चापि रसायनमनुत्तमम् ।
[6]अक्षसूत्रं दरं खड्गं तथा वेतालसाधनम् ॥ ८० ॥

---

1. स्रग्वस्त्रदाम भूषितम् M_2 2. प्रभावान्मोह A, M 3. जपन् भूयः तदा M_2 4. संशयः T, P_1, P_2 5. बलसिद्धिं च M_2 6. अक्षसूत्रधरं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फलानि दुर्लभान्येवं सिध्यन्ति मनुवैभवात् ।
प्रत्येकं न प्रदर्श्यन्ते ग्रन्थविस्तरभीरुभिः ॥ ८१ ॥

फलानां दिगियं प्रोक्ता दुर्लभानां चतुर्मुख ।
त्रैलोक्यमोहनाख्यस्य कामकामेश्वरस्य च ॥ ८२ ॥

एकाक्षरमुखस्योक्तं फलं मन्त्रस्य पद्मज ।
मन्त्रे यज्ञवराहस्य वक्ष्यामि कमलासन ॥ ८३ ॥

गृहीत्वा पूर्ववत् सर्ववर्णानाद्याननुक्रमात् ।
स्पर्शान्तं भास्करं चाद्यं [1]कलशं प्रणवादि च ॥ ८४ ॥

अनलं चादिदेवान्तं भास्करं मधुसूदनम् ।
श्वसनं वर्णमाद्यं च ओषधीशमचां मुखम् ॥ ८५ ॥

वह्निं प्रचेतसं मुख्यं मारुतं प्रणवादि च ।
मुसलिं चन्द्रधवलमचामादिमनन्तरम् ॥ ८६ ॥

श्रीवत्समादिमनलं महामायाग्निगोपनम् ।
दरं विष्णुं खड्गधरं विजयं श्रीधरं तथा ॥ ८७ ॥

पीयूषरूपममलं माधवं वैधरं तथा ।
आदिं पवित्रदंष्ट्रिं च प्रणवादि [2]विभूषितम् ॥ ८८ ॥

श्वसनं चाप्रमेयं च कलात्मा विष्णुमस्तकः ।
वरुणं दहनाक्रान्तं वैधरं माधवाक्षरम् ॥ ८९ ॥

वरुणं चादिवर्णं च तथैवोग्रात्मसंमितम् ।
अनलं माधवोपेतं मन्दरं प्रथमं मरुत् ॥ ९० ॥

---

1. कमलं M_2 2. सगोपनम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मधुसूदनविक्रान्तं पवनं श्वेतरोचिषम् ।
वरुणं वीतिहोत्रं च सुभद्रं च गुहालयम् ॥ ९१ ॥

वैराजमादि देवान्तं विजयं मन्दरं तथा ।
भद्रपाणिं मृगेशं च वैधरं यष्टिमस्तकम् ॥ ९२ ॥

उमात्मा पर्वतं चादिं ऋतधामपरिष्कृतम् ।
विघ्नेशं मारुतं चैकनेत्रं शुक्लशिरस्तथा ॥ ९३ ॥

सुभद्रं चोर्ध्वलोकेशं नाभिपङ्कजसम्भव ।
माधवीमप्रमेयं च वनमाली झषस्तथा ॥ ९४ ॥

माहेन्द्रं गोपनयुतं मारुतं प्रथमस्वरम् ।
भल्लायुधं हृषीकेशं सुभद्रं भुवनं वसुम् ॥ ९५ ॥

प्रचेतसं कलात्मानममृतं सविसर्गकम् ।
पवित्रमादिं वैराजं मुख्यं पवनमाधवौ ॥ ९६ ॥

सुभद्रमौत्रं दक्षं च मुखद्विपदमीरयेत् ।
शशाङ्कद्विरदं[1] वह्निं भुवनं द्विपदं पठेत् ॥ ९७ ॥

अर्चां द्वितीयं दृष्टिं च मायां [2]कलशमादिशत् ।
[3]हव्यवाड्गोपनयुतं भास्करं मधुसूदनम् ॥ ९८ ॥

प्रभञ्जनमकारं च सूक्ष्मदृग्भुवनं तथा ।
माधवी रामसहितं पश्चिमाननमादिमत् ॥ ९९ ॥

एकनेत्रमिकारं च विजयं कलशं [4]तथा ।
मन्दरं देवदत्तं च वैधरं विष्णुमस्तकम् ॥ १०० ॥

---

1. भुवनं M_1 2. कमलमादिमम् A 3. विवस्वान् M_2
4. ध्रुवम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्विर्नूयात् गोपनाकान्तं पश्चिमाननमादिमत् ।
प्रभञ्जनमकारं च ठठान्तो मनुरीरितः ॥ १०१ ॥

सूक्ष्मदृग्भुवनं सर्गं बीजमेतत्समुद्धृतम् ।
मन्त्रं षोढा विभज्याङ्गकल्पना काश्यपो मुनिः ॥ १०२ ॥

छन्दो विराट् [1]स्तोमघोणी देवता कमलासन ।
जपो लक्षद्विषट्कं स्यात्फलं सर्वं यथापुरम् ॥ १०३ ॥

दरोदरनृसिंहस्य मनुस्सम्प्रति कथ्यते ।
ओङ्कारं पूर्वमुध्दृत्य कमलं शत्रुदाहकम् ॥ १०४ ॥

गुहालयं सयष्टिं च गोपतिं भुवनं ध्रुवम् ।
फुल्ललोचनमाद्यं च हृद्याह्लादनं तथा ॥ १०५ ॥

भद्रपाणिं स्वरादिं च ज्वलनं चादिमं तथा ।
ओषधीशमिकारं च यष्टिं भास्करगोपनौ ॥ १०६ ॥

श्वसनं च नतिर्मन्त्रो नारसिंह उदीरितः ।
अयमेव मनुर्बीजं छन्दो गायत्रमीरितम् ॥ १०७ ॥

देवता नृहरिर्द्दिष्टा कपिलो ध्यानमुच्यते ।
दरोदरे सुखासीनं शतपत्रे विकस्वरे ॥ १०८ ॥

तप्तजाम्बूनदनिभं चतुर्बाहुमुदायुधम् ।
पर्यङ्कबन्धसुभगं प्रसारितभुजद्वयम् । १०९ ॥

जानुनोरुपरिष्टाच्च सर्वाकल्पपरिष्कृतम् ।
व्यात्तानन त्रिनयनं नखदम्भोलिभीषणम् ॥ ११० ॥

1. स्तोमपाणी T ; दीर्घघोणी सोमऋषिः कमलासन M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सिंहस्यार्धं नरस्यार्धं मेघगम्भीरगर्जितम् ।
एवं ध्यात्वा जपेदष्टलक्षं मन्त्री समाहितः ॥ १११ ॥

सावित्रे मण्डले देवमासीनं सर्वकामदम् ।
ध्यायेल्लभेत धर्मादि पुरुषार्थचतुष्टयम् ॥ ११२ ॥

बहुनात्र किमुक्तेन सर्वान् कामानवाप्नुयात् ।
चतुर्णां पुरुषादीनां मनुः सम्प्रति कथ्यते ॥ ११३ ॥

प्रणवादीन् सप्तवर्णान् समुद्धृत्य [1]यथापुरम् ।
स्वं स्वं नाम चतुर्थ्यन्तं मन्त्रानेषां प्रकल्पयेत् ॥ ११४ ॥

तेषां बीजानि वक्ष्यामि [2]वर्णोद्धारैः क्रमादहम् ।
[3]तिग्मांशुर्गोपनयुतस्सदण्डः पुरुषात्मनः ॥ ११५ ॥

मार्ताण्डः पञ्चबिन्दुश्च [4]सेन्दुः सत्यः स कथ्यते ।
वैराजं पावकं पञ्चबिन्दुं नासिक्यमेव च ॥ ११६ ॥

त्रयीतनुं हृषीकेशं यष्टिं चानन्तनामनि ।
ऋषिश्छन्दो देवता च फलमष्टाक्षरे तथा[5] ॥ ११७ ॥

हयग्रीवस्य मन्त्रस्य वर्णोद्धारः प्रदर्श्यते ।
सप्तवर्णान् समुध्दृत्य विजयं बहुलं ततः ॥ ११८ ॥

[6]कालात्मा चैकदृग्वह्निं गोपतिं विष्णुमस्तकम् ।
श्वसनं प्रणवादिं च लक्ष्मीं बिन्दुमनन्तरम् ॥ ११९ ॥

ज्वलनं गोवनयुतं[7] शशाङ्कं माधवं तथा ।
स्वाहान्तमश्वशिरसः कथितः षोडशाक्षरः ॥ १२० ॥

---

1. तथा M_2 2. वर्णोद्धरक्रमात् M_1 3. शीतांशुः A 4. सेन्दुः M_1
5. यथा M_1 6. कलात्मा A,M_2 7. प्रणवादिं च M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स एव बीजमङ्गानि कुद्धोल्कादि यथापुरम् ।
ऋषिर्बृहस्पतिर्ह्यस्य छन्दो गायत्रमुच्यते ॥ १२१ ॥

देवो हयशिरानाम देवता कमलासन ।
दशलक्षं जपेन्मन्त्रं महद्ज्ञानमवाप्नुयात् ॥ १२२ ॥

ओङ्कारपूर्वं नत्यन्तं चतुर्थी देवता क्रमात् ।
ठठान्तो मन्त्रराजोऽयं दशाक्षरविदर्भितः ॥ १२३ ॥

[1]बीजानि पूर्ववत्सर्वं [2]कर्तव्यं कमलासन ।
अतोऽन्यं वाजिशिरसो मालामन्त्रं ब्रवीमि ते ॥ १२४ ॥

[3]अर्णस्सप्तकमुद्धृत्य पदं हयशिरास्तथा ।
चतुर्थ्यन्तं सर्वविद्यालयेति पदमन्वतः ॥ १२५ ॥

[4]सकलामरशब्दादिगुरवे पदमुद्धरेत् ।
समस्त प्रतिशब्दादि [5]हन्त्वानन्त्येत्यनन्तरम् ॥ १२६ ॥

वीर्यं तेजः पदं पश्चाज्ज्ञानैश्वर्यपदं ततः ।
[6]शक्तिश्चैव बलं चैव सर्वाद्यावासमन्वतः ॥ १२७ ॥

तद्विभक्ति ततः पश्चात्परमात्मपदं ततः ।
चतुर्थ्यन्तं वासुदेवशब्दस्ताद्विभक्तिकः ॥ १२८ ॥

ज्ञानज्ञेयपदं तद्व्यक्ताव्यक्तपराय च ।
सर्वदुष्टासुरं प्रोच्य दुरितं [7]व्रजिनं तथा ॥ १२९ ॥

प्रमाथि तद्विभक्त्यन्तं तत्सद्रुचिरपूर्वकम् ।
पदं च तुरगायेति ज्ञानमुच्चार्य मूर्तये ॥ १३० ॥

---

1. बीजादि M_1 2. स्मर्तव्यं M_2 3. वर्णं M_1 4. सकलामल M_2
5. वान्तानन्त्येत्यनन्तरम् T 6. शक्तिशब्दचतुर्थ्यन्तः सर्वन्यास समन्वितः A,M_2
7. पूजनं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति चोच्चार्य तस्यानु सहस्रं कोटिमन्वतः ।
पदं च विद्यादिनिकरं मुञ्च गच्छ पदे ततः ॥ १३१ ॥

स्फोटिर्विजृम्भिलोहन्तं द्विर्वक्तव्यं च तिङ्पदम् ।
सर्वादितेजोमध्यं च निध्यन्तं च पदत्रयम् ॥ १३२ ॥

चतुर्थ्यन्तं समुच्चार्य निर्धूतपदमन्वतः ।
[1]विकीर्णपदमुच्चार्य प्राक् प्रदीप्तपदं ततः ॥ १३३ ॥

केसरं च [2]कटं शब्दं कलापपदमन्वतः ।
प्रदीप्तसूर्यमंशुं च प्रतीकाशपदं तथा ॥ १३४ ॥

भास्कराकारशब्दं च ऊर्ध्वमूर्ध्वजमन्वतः ।
शङ्खनाभमताङ्घ्रिश्च प्रसरव्रातदीप्तिमान् ॥ १३५ ॥

द्रवत्कनकमुच्चार्य पिङ्गलायतमाननम् ।
महास्वर समाकारं विशुद्धदशनं ततः ॥ १३६ ॥

पद्धतिं निर्गतां चोक्त्वा विराजितपदं तथा ।
लोकत्रयद्रवद्दीप्तपदं चामीकरादिमत् ॥ १३७ ॥

पिङ्गलायतमुच्चार्य विस्फारितपदं पठेत् ।
लोचनादिमहाशब्दं विभिषणपदान्वितम् ॥ १३८ ॥

नासिकापुटमद्रीन्द्रशिखराकारसंयुतम् ।
रुचिरं पदमुच्चार्य विकुञ्चितपदं तथा ॥ १३९ ॥

महाश्रवणसंयुक्तं श्रेयसेति पठेत्पदम् ।
तच्छब्दं च चतुर्थ्यन्तं दुष्टसत्वानन्तरम् ॥ १४० ॥

1. बिदीर्ण M_2 2. सटा T.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भिन्द्धिच्छिन्द्धिस्तथा मारिमर्दिस्त्रासिश्चघातवः ।
लोडन्ताद्भिः समुच्चार्य स्वौं वौमिति पदद्वयम् ॥ १४१ ॥

ध्वसि हन्ति तथा ध्मापि हन्ति ग्राहि च ताडय ।
पचिर्मन्दिश्च ते एते लोडन्ताद्भिः कृतास्तथा ॥ १४२ ॥

परविद्यापदं प्रोच्यच्छिन्द्धिर्ण्यन्तः प्रयुज्यताम् ।
अमीत्युक्त्वा तथा नारी लोण्मध्यमशिराः स्मृतः ॥ १४३ ॥

एह्येहि भगवन् शब्दं वज्रशब्दमनन्तरम् ।
अङ्कुशेनेति तदनु प्रोच्य चाकर्षयेति च ॥ १४४ ॥

हृदयाद्यादिरन्नकृस्याद्भक्तिपूर्वजनेति च ।
जिह्वादि निलयं प्रोच्य बडवानलमन्वतः ॥ १४५ ॥

सम्बुध्यन्तं विश्वमूर्ति सौमनस्यमनन्तरम् ।
भगवन्निति वक्तव्यमोङ्कारं हृदयं ततः ॥ १४६ ॥

सदा [1]यद्ब्रह्मसदनादात्मेति च पदं पुनः ।
चिद्घनादि चतुर्थ्यन्तं भगवत्पदमीरयेत् ॥ १४७ ॥

ठठान्तमुद्धरेदेवं हयग्रीवं चतुर्मुख ।
पूर्वोक्तमेवास्य बीजं पूर्ववच्चाङ्गपद्धतिः ॥ १४८ ।

व्यासो मुनिर्हयग्रीवो देवता छन्द उत्कृतिः ।
ध्यायन् हयशिरोवक्त्रादद्धान्तं फेनमुल्बणम् ॥ १४९ ॥

पिबन्निव सुधीर्मन्त्रराजं[2] मन्त्रविदुच्चरेत् ।
अयुतं नियुतं वापि [3]जपेन्मन्त्रस्यसिद्धये ॥ १५० ॥

---

1. सद्ब्रह्म सदसदात्मेति M_1 2. जालं M_1 3. जपोमन्त्रस्य सिद्धिदः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विद्यापारमवाप्नोति वागीशत्वं च पद्मज ।
व्याख्यातृत्वं च कर्तृत्वं शास्त्राणां बहुवर्त्मनाम् ॥ १५१ ॥

सकृद्ग्रहणमात्रेण विद्याः सर्वाः प्रतिष्ठिताः ।
[1]अविस्मृतिश्च तासु स्यात्पुरुषार्थचतुष्टये ॥ १५२ ॥

नासाध्यं किञ्चिदस्यास्ति दीर्घमायुश्च विन्दति ।
षण्णां मुकुन्दमुख्यानं मनुः सम्प्रति कथ्यते ॥ १५३ ॥

सप्तार्णान् पूर्वमुच्चार्य नामधेयानि षट् तथा ।
चतुर्थ्यन्तानि योज्यानि शिष्टार्णानेवमुद्धरेत् ॥ १५४ ॥

जीमूनमादिं नासिक्ये वरुणं प्रणवादि च ।
सबिन्दुं भास्करं रेफं पञ्चबिन्दुं सयष्टिकम् ॥ १५५ ॥

ठठान्तं च मुकुन्दस्य मनुरेवं समुध्दृतः ।
*भास्करं पावकं पञ्चबिन्दुर्यष्टिसमन्वितः ॥ १५६ ॥

अक्षरं च द्विरभ्यस्येन्मार्तण्डं च [2]गुहान्वयम् ।
सानुस्वारं द्विरभ्यस्येद्विष्णुशब्दमनन्तरम् ॥ १५७ ॥

चतुर्थ्यन्तं ठठान्तञ्च बभ्रोर्मनुरुदीरितः ।
पर्वतं भुवनं भानुमूर्ध्वलोकेशनासिके ॥ १५८ ॥

भास्करं पावकं पञ्चबिन्दुं नासिक्यमुद्धरेत् ।
फट्कारं च हुतान्तं च मनुश्चैवं वृषाकपेः ॥ १५९ ॥

शुभदं पावकं चैव पञ्चबिन्दुं [3]सदर्थकम् ।
अक्षरं तद् द्विरुच्चार्य ठठान्तो मन्त्र ईरितः ॥ १६० ॥

---

1. अविस्मृतिश्च नास्यस्यात् गुरुः M_2 * A,T कोशमोः P, P_2 पन्थयोश्चाय-मर्धं उपलभ्यते । 2. गुहालयम् M_1 3. सदण्डकम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शौरेस्तथापरं वक्ष्ये दाशार्हं मनुमब्जज ।
सवितारं बृहद्भानुं सयष्टिं पञ्चबिन्दुकम् ॥ १६१ ॥

हुतान्तश्च मनुः प्रोक्तो वैकुण्ठमनुरुच्यते ।
परमात्मा चतुर्थ्यन्तं वरुणं प्रथमं स्वरम् ॥ १६२ ॥

नासिक्यं कुम्भमाकारमर्धेन्दुं भास्करं ततः ।
हृषीकेशमनुस्वारं नारायणपदं ततः ॥ १६३ ॥

चतुर्थ्यन्तं ठठान्तं च वैकुण्ठमनुरीरितः ।
ऋषिश्छन्दो देवता च बीजमङ्गानि षट् तथा ॥ १६४ ॥

अष्टाक्षरवदेतेषां फलानि च चतुर्मुख ।
अथापराजितं मन्त्रं वक्ष्यामि कमलासन ॥ १६५ ॥

निगमादीन् सप्तवर्णान् गृहीत्वादौ यथापुरम् ।
चतुर्थ्यन्तानन्तपूर्वमन्तःशब्दं समुद्धरेत् ॥ १६६ ॥

सहस्रादि च शीर्षान्तं तद्विभक्तिपदं पुनः ।
तत्सुगन्धं तथा क्षीरमुदार्णवपदान्वितम् ॥ १६७ ॥

[1]शायिनेति पदं प्रोच्य शेषभोगपदं तथा[2] ।
पर्यङ्केति चतुर्थ्यन्तं तद्विभक्तिश्च वाहनम् ॥ १६८ ॥

[3]गरुडादिपदं पश्चाद्वासुदेवपदं ततः ।
तद्विभक्तिश्च नत्यन्तं वासः पीतादि तादृशम् ॥ १६९ ॥

---

1. शायिन्निति M_1 2. पुनः M_1
3. कर्णिका कोटरपदं निवासित पदं तथा ।
श्रियादि निलयं पश्चात् धृतपाणिद्वये पदम् ॥ अ कोशेऽयं श्लोकः १६९ तमस्य स्थाने उपलभ्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सम्पूर्वं कर्षणपदं सम्बुध्यन्तमनन्तरम् ।
प्रद्युम्नाद्यनिरुद्धं च तद्विभक्तिपदं स्मृतम् ॥ १७० ॥

[1]मायादिशीर्षं सम्बुद्धौ वराहं तद्वदिष्यते ।
नृसिंहवामनपदे त्रिविक्रममनन्तरम् ॥ १७१ ॥

रामशब्दं त्रिरुच्चार्य कृष्णेति पदमुद्धरेत् ।
वरप्रदेति नत्यन्तमस्तीत्यन्वक्क्रियापदम् ॥ १७२ ॥

[2]ते च शब्दं चतुर्थ्यन्तमसुरेति पदं ततः ।
दैत्ययक्षपदे चोक्त्वा राक्षसेति पदं ततः ॥ १७३ ॥

भूतं पिशाचं सिद्धं च योगिनी डाकिनीति च ।
ब्रह्मादिराक्षसपदं विनायकपदं ततः ॥ १७४ ॥

पूतनारेवतीस्कन्ध पुरोगम समुध्दतिः ।
ग्रहादीनि च नक्षत्रग्रहानित्यप्यनुक्रमात् ॥ १७५ ॥

अन्यां चेति महत्पूर्वं गृहानिति पठेत्पदम् ।
हनिं दहिं पचिं चैव मथिद्यन्तं शबन्वितम् ॥ १७६ ॥

अनिभिर्द्विः पर्थींश्चैव पतिस्यन्तं समन्वितम् ।
आख्यातं द्विः समुच्चार्य गृहाणेति तथैव च ॥ १७७ ॥

आविशध्वंसिरपरा द्रुह्यन्तलोट्परः ।
चत्वारो धातवो मन्त्रे द्विर्वक्तव्याश्चतुर्मुख ॥ १७८ ॥

चक्रं गदां चवज्रं च तृतीयान्तमुदीरयेत् ।
भस्मीकुर्वित्यनुक्रम्य बाहुं सम्बुद्धिशीर्षकम् ॥ १७९ ॥

---

1. हयादिशीर्षं M_1 2. देव M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सहस्रारपदं सर्वं मुख्य प्रहरणायुधम् ।
जयेति विजयेति द्वे पदे द्विः प्रोच्य पद्मज ॥ १८० ॥

अनन्त[1]मपरा पूर्वं जितं प्रतिहतं तथा ।
नञ् पूर्वं नेतृपर्यन्तं सहस्रादिपदं ततः ॥ १८१ ॥

प्रज्वलिर्ज्वलिरित्येते लोडन्ते द्विः [2]समुद्धरेत् ।
विश्वरूपं समुध्दृत्य मधुसूदनमन्वतः ॥ १८२ ॥

महापुरुषवैकुण्ठनारायणपदं ततः ।
पद्मादि नाभिपर्यन्तं हृषीकेशपदं ततः ॥ १८३ ॥

सर्वमुक्त्वा तथाभूतं वशीकरणमुद्धरेत् ।
शङ्खचक्रगदामुक्त्वा धरेति तदनन्तरम् ॥ १८४ ॥

उध्दृत्य सर्वभूतं च नमस्कृतपदं तथा ।
सर्वमन्वङ्नागपदं प्रमर्दन पदान्वितम् ॥ १८५ ॥

सर्वं प्रपठ्यानुपूर्व्यादसुरोत्साधनं[3] ततः ।
सर्वदेवमनुक्रम्य महेश्वरमुदीरयेत् ॥ १८६ ॥

सर्वं ग्रहं समुच्चार्य निवारणपदं तथा ।
यन्त्रमन्यञ्च[4] सर्वादि प्रभञ्जनपदं ततः ॥ १८७ ॥

सर्वदुःखप्रशमनं सर्वज्वरविनाशनम्[5] ।
सर्वबन्धमनुक्रम्य विमोक्षणपदं तथा ॥ १८८ ॥

दुःस्वप्नमध्यं सर्वाधि [6]विनाशनमनुद्धरेत् ।
नमस्कृतान्तं सर्वादिभूतमध्यं पदत्रयम् ॥ १८९ ॥

---

1. मपरान् T 2. समुच्चरेत् M_2 3. त्सादनं M_1 4. यन्त्रमध्यं च M_1 5. निवारणम् M_1 6. विनाशनं समुद्धरेत् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदद्वयं पूर्ववत् स्यादपकर्षणमाचरेत् ।
जनार्दनेति सम्बुद्धौ नमश्चास्त्विति ते पदम् ॥ १९० ॥

अप्रमेयमनुस्वारसहितं बीजमीरितम् ।
मन्त्रं षोढा विभज्याङ्गमृषिः प्रद्युम्न उच्यते ॥ १९१ ॥

छन्दोऽतिच्छन्द एतस्य विश्वरूपश्च देवता ।
साधयेन्मन्त्रविन्मन्त्रमष्टाक्षरसमाधिना ॥ १९२ ॥

अपराजितमन्त्रेण नासाध्यं विद्यते फलम् ।
वश्यमुच्चाटनं चैव तथा मारणकर्म च ॥ १९३ ॥

कृत्यादिभूतदोषाणां निवारणमनन्तरम्[1] ।
फलानि लिप्सुस्सर्वाणि मन्त्रमेनं समाश्रयेत् ॥ १९४ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मेतन्त्रे चर्यापादे
यज्ञमूर्त्यादि मन्त्रोद्धारो नामऽष्टाविंशोऽध्यायः ॥

—: * :—

एकोनत्रिंशोऽध्यायः ॥

परिवारमन्त्रवर्णनम् ॥

श्री भगवान् :—

देवीनां च श्रियादीनां [2]मन्त्रविष्टरकल्पनम् ।
मन्त्रांश्च परिवाराणां प्रथमावरणादिषु ॥ १ ॥

अनुक्रमेण वक्ष्यामि यथा [3]तदवधारय ।
छन्दसामादिराद्यर्णं तुर्यमेरनन्तरम् ॥ २ ॥

---

1. मनुत्तमम् T, P_1, P_2 2. मन्त्रान् विष्टरकल्पनम् T, P_1, P_2
3. वदवधारय M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निं च महतीं मायामनुस्वारं च पश्चिमम् ।
एकाक्षरो मनुर्ब्रह्मन् श्रियस्सर्वफलप्रदः ॥ ३ ॥

ऋषिर्मङ्कणकः प्रोक्तश्छन्दो गायत्रमुच्यते ।
श्रीरस्य देवताङ्गानि स्वेनुरूपेण कल्पयेत् ॥ ४ ॥

बिल्वानोकहमूले तु लक्षजापेन साधयेत् ।
समिद्भिश्च तदीयाभिः जुहुयाल्लक्षसंख्यया ॥ ५ ॥

श्रीपुष्पैः पायसान्नैश्च जुहुयादुक्त संख्यया ।
श्रियमाप्नोति महतीं श्रीकामो नात्र संशयः ॥ ६ ॥

प्रणवादिचतुर्थ्यन्तं नाम नत्यन्तमीरितम् ।
चतुरक्षरमन्त्रोऽयमपरं श्रीसमारूतम् ॥ ७ ॥

ऋषिरस्य धनाध्यक्षः छन्दः श्रीर्देवता तथा ।
प्रत्यक्षरं जपेल्लक्षं साधको मन्त्रसिद्धये[1] ॥ ८ ॥

[2]प्राग्वच्च बीजमङ्गानि फलमप्यस्य पूर्ववत् ।
निगमादिं भद्रहस्तं हैरम्बं [3]मन्दराधिपम् ॥ ९ ॥

शुभदं दहनं मायां मारुतं माधवं तथा ।
सप्ताक्षरोऽयं श्रीमन्त्रः सर्वमन्यद्यथापुरम् ॥ १० ॥

गृहीत्वैकाक्षरं पूर्वं भानुमग्निं[4] च वामनम् ।
भल्लायुधं च माहेन्द्रं हृषीकेशं सयष्टिकम् ॥ ११ ॥

शशाङ्कमौर्वं नासिक्यं सुभद्रं गदिनं परम् ।
जलाधिदैवमाद्यर्णं वैराजं गोधनं धरम् ॥ १२ ॥

---

1. वित्तये M_1 2. प्रागुक्तं M_1 3. मन्दराभिधम् M_2
4. मुसं च M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुलहं कमलं शक्रं दाहकं पाटलप्रियम् ।
गोधनं कमलं [1]चित्रभानुं मायाविभूषितम् ॥ १३ ॥

प्रभञ्जनं मृगेशं च स्वाहायां विरमेत्ततः ।
षोडशाक्षरमन्त्रोऽयं श्रियः कमलसम्भव ॥ १४ ॥

ओङ्कारपूर्वं नत्यन्तं कमलं मन्दरं तथा ।
माहेन्द्रं वरुणं चादिदेवं चन्द्रं त्रिविक्रमम् ॥ १५ ॥

विघ्नेशं पञ्चबिन्दुं च हुतान्तं त्विदमीरितम् ।
पूर्ववत्सर्वं बीजादि[2] परिग्राह्यं चतुर्मुख ॥ १६ ॥

[3]इत्युद्धृतो मनुश्चान्यः श्रियः कमलसम्भव ।
उध्दृत्य पूर्वमुद्गीथं श्रीवत्समनलं तथा ॥ १७ ॥

वामनं यष्टिशिरसं[4] दिनेशं यान्तमब्जज ।
पञ्चबिन्दुं सयष्टिं च शुभदं वसुमस्तकम् ॥ १८ ॥

महामायाङ्कितं दण्डं ठठ इत्यवसानकम् ।
मङ्कणोऽस्य ऋषिश्छन्दो गायत्री श्रीश्च देवता ॥ १९ ॥

जपेल्लक्षत्रयं मन्त्रं बिल्वारण्येऽथ साधयेत् ।
वश्याकर्षणभूलाभ[5]खनिरत्नादिसिद्धयः ॥ २० ॥

ध्यानमस्य प्रवक्ष्यामि श्रियो माहेन्द्रमण्डले ।
आसीनायाः परिजनानि[6]न्द्रादीनर्चयेत्क्रमात् ॥ २१ ॥

---

1. मायां M_1 2. बीजादि पूर्वं तत्सर्वं M_1

3. पूर्वोक्तां श्चतुरो वर्णान् गृहीत्वा तदनन्तरम् ।
देवानां दानवचनं हुमन्तं तदनन्तरम् । T,P

4. सहितं M_2 5. धन M_2 6. दुर्गादीन् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थ्यन्तं स्वनामोक्त्वा नत्यन्तं मन्त्रमब्जज ।
मण्डले तत्र [1]पद्मस्य पूर्वादिषु दलेषु च ॥ २२ ॥

वासुदेवादयो व्यूहाश्चत्वारो दिक्षवस्थिताः ।
तेषां नाम चतुर्थ्यन्तं नत्यन्तं प्रणवान्वितम् ॥ २३ ॥

गुल्गुलुश्च करण्डश्च दमकश्शललस्तथा ।
कोणवर्णेषु संस्थाप्य मन्त्रांस्तन्नामपूर्वकम् ॥ २४ ॥

रतिस्सरस्वती भूमिः प्रीतिः कीर्तिश्चतुर्मुख ।
शान्तिः पुष्टिश्च तुष्टिश्च श्रियोधस्ताश्च शक्तयः ॥ २५ ॥

नामानि तासां मनवो यथापूर्वमुदीरिताः ।
पार्श्वे च दक्षिणे तस्याः श्रियः[2] पद्मनिधिः [3]स्थितः ॥ २६ ॥

वामे शङ्खनिधिर्नाम तयोर्मन्त्रो यथापुरम् ।
धनदो माणिभद्रश्च जृम्भलो नलकूबरः ॥ २७ ॥

पूर्णभद्रश्चलेन्द्रश्च कलिसृक् शिबिकुण्डलः ।
पूर्वादिदिक्षु भविनामेतेषां मनुरुच्यते ॥ २८ ॥

निगमादिं सुभद्रं च एकदन्तं सयष्टिकम् ।
धनदस्य मनुःप्रोक्तो नाम नत्यन्तमेव च ॥ २९ ॥

भल्लायुधं पद्मनाभं पञ्चबिन्दुं सदण्डकम् ।
नलकूबरमन्त्रश्च कथितः कमलोद्भव ॥ ३० ॥

ककुभं पद्मनाभं च नासिक्यं जृम्भलो मनुः ।
स्पर्शान्तं पुलहंश्चोर्ध्वलोकेशं तदनन्तरम् ॥ ३१ ॥

---

1. अब्जस्य T 2. स्थिताः M_1 3. श्रियः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

माणिभद्रस्य [1]सदृशो मनुः सर्वार्थसाधकः ।
पश्चिमं पीतवर्णाभं भुवनं यष्टिमस्तकम् ॥ ३२ ॥

पूर्णभद्रस्य कथितो मनुरेवं चतुर्मुख ।
[2]वक्रतुण्डमकारं च पुलहं भुवनं पुनः ॥ ३३ ॥

नासिक्यं मनुरेतस्मिन् शिबिकुण्डलनामनि ।
ब्रह्माणमादिंपुलहं गुहालयसयष्टिकम् ॥ ३४ ॥

उद्धारश्च मनोरेवं कथितः कलिमालिनः ।
वक्रतुण्डं पीतवर्णं हृषीकेशं च तद्ध्रुवम् ॥ ३५ ॥

चरेन्द्रमन्त्रः कथितः पूर्वादिषु यथाक्रमम् ।
मन्दरं पुलहं चैव [3]गुणालयसयष्टिकम् ॥ ३६ ॥

महेन्द्रस्य मनुः प्रोक्तः सुभगः पुलहोदयः ।
धनाध्यक्षस्य मन्त्रोऽयं कथितः कमलासन ॥ ३७ ॥

पार्श्वे च दक्षिणे पूज्याः श्रियः परिजनाः स्थिताः ।
खड्गदामोदरं चैव महामायां सबिन्दुकम् ॥ ३८ ॥

चिन्तारत्नस्य कथितो मनुः पूर्वदलाश्रयः ।
श्रीवत्समग्निं भुवनं सदण्डं च चतुर्मुख ॥ ३९ ॥

कथितश्च [4]बलामन्त्रस्ताक्ष्यस्थाने समर्चनम् ।
इन्द्रादयोलोकपालास्स्वाशासु परितस्थिताः ॥ ४० ॥

तृतीयावरणे चापि बलाकी वनमालिनी ।
विभीषी शाङ्करी चैव दिक्षुपूर्वादिषु स्थिताः ॥ ४१ ॥

---

1. कथितो A   2. वक्रतुण्डं च भुवनं T,P_1,P_2 3. गुहालय विदर्मितम् T,P_1,P_2 4. कमलामन्त्रः T; शबलामन्त्रः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सकञ्चुका वेत्रहस्ता मन्त्रास्तासां समाह्वयाः ।
विष्वक्सेनपदे पुष्पधारिणीमर्चयेत्ततः ॥ ४२ ॥

कल्पकं पारिजातं च हरिचन्दनमूरुहम् ।
सन्तानमन्दरौ चैव द्वारभूषु निवेशयेत् ॥ ४३ ॥

बिल्वं च सरसीं चैव शतपत्रसमाकुलाम् ।
श्रियं परिगतां [1]पक्षिसङ्घातकलनिस्वनाम् ॥ ४४ ॥

परिवारान् प्रकल्प्यैवं तत्तन्नामभिरर्चयेत् ।
चतुर्थ्यन्तैर्नति परैः प्रणवप्रमुखैस्तथा ॥ ४५ ॥

मालामन्त्रं प्रवक्ष्यामि श्रियः कमलसम्भव ।
उद्गीथमुक्त्वा प्रथमं नतिश्च तदनन्तरम् ॥ ४६ ॥

उक्त्वा भगवती शब्दं च श्रीचतुर्थ्यन्तमन्वतः ।
धीरापदं च सम्बुद्धौ श्रीपूर्वं निलयस्तथा ॥ ४७ ॥

आकारपूर्वं भरणं शतमण्डितमन्वतः ।
शरीरेति च सम्बुद्धिः पदान्येवं समुद्धरेत् ॥ ४८ ॥

भास्करं चानलं पञ्चबिन्दुं चन्द्रार्धशेखरम् ।
कलात्मानं विसर्गान्तं बीजमेतद् द्विरुच्चरेत्[2] ॥ ४९ ॥

द्विरुच्चार्यं [3]भरपदं पापशब्दादनन्तरम् ।
अलक्ष्मीमिति वक्तव्यं नाशयेति द्विरीरयेत् ॥ ५० ॥

भास्करं [4]पावकं पञ्चबिन्दुं यष्टिमनन्तरम् ।
[5]त्रिरभ्यसेत्तथा सप्तजन्म पूर्वार्जितं तथा ॥ ५१ ॥

---

1. पक्षी संघातालिकुलनिस्वनाम् M_2 2. समुद्धरेत् T, P_1, P_2 3. हरपदं M_1 4. चानलं T, P_1, P_2 5. द्विरभ्यस्ये T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अखिलं प्रोच्य दारिद्र्यं पदं दूरात्तथा पदम् ।
[1]उत्सारयेति द्विःप्रोच्य चन्द्रमादिविसर्गितम्[2] ॥ ५२ ॥

त्रिस्त्रिःप्रोच्यं त्वद्भक्तजनशब्दमनन्तरम् ।
वसुं नियोजयेत्युक्त्वा धारयेतिपदं पुनः ॥ ५३ ॥

पूरयेति द्विरुच्चार्य पदमम्भोरुहासन ।
प्रपन्नलोकं ह्रीङ्कारं त्रिरुच्चार्य हयं गजम् ॥ ५४ ॥

विविधं पशुमुच्चार्य निचयं तदनन्तरम् ।
दासीदासं परिजनं तदन्तं द्विर्विलोकय । ५५ ॥

मां च सौम्येति चेत्युक्त्वा अवलोकनसंयुतम् ।
लक्ष्मीमग्निं विक्रमं च श्रीधरं यष्टिमस्तकम् ॥ ५६ ॥

त्रिरुच्चार्य [3]वजेति द्विर्भवतीति च पद्मज ।
सुरासुरेत्यनुपदं[4] सिद्धगन्धर्वराक्षसम् ॥ ५७ ॥

यक्षविद्याधरपदं निखिलं जन्तुशब्दकम् ।
मनोभिरिति चाकाङ्क्ष्य समागममनन्तरम् ॥ ५८ ॥

प्रियेति सम्बुद्धिपदं भास्करं सगुहालयम् ।
सार्धचन्द्रमिदं बीजं त्रिरुच्चार्य परादिते ॥ ५९ ॥

वरं विविधमुच्चार्य सितमालाम्बरं तथा ।
धारिणीति समुच्चार्य निखिलं रोचिषं वसु ॥ ६० ॥

निचया भवती पद्मा सम्बुद्धौ तत्त्रयं पदम् ।
श्रीपदं चापि नत्यन्तमस्त्वित्येतत् क्रियापदम् ॥ ६१ ॥

---

1. उत्सादयेति M_1 2. विसर्जितम् M_2; विसर्जनम् T 3. जयेति M_1
4. गुणंः T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युष्मच्छब्दं चतुर्थ्यन्तं ठठान्तो मनुरीरितः ।
पूर्ववद्बीजमस्यापि मन्त्रे भङ्क्त्वाङ्गकल्पना ॥ ६२ ॥

छन्दोऽतिच्छन्दमेतस्य देवता श्रीधनाधिपः ।
द्रष्टा फलं जपं चास्य द्विषट्काक्षरवत् फलम् ॥ ६३ ॥

अधुना[1] वसुधामन्त्रं प्रवक्ष्यामि चतुर्मुख ।
ब्रह्मकोशं मुखं तस्य श्रीवत्सं ज्वलनं तथा ॥ ६४ ॥

वामनं [2]माधवं देवदत्तं श्रीबीजमेव च ।
कमलं बहुलं पञ्चबिन्दुं सुभगमन्वतः ॥ ६५ ॥

भद्रहस्तं विधातारमनलं वामनं तथा ।
सुभगं गोपनयुतं विघ्नेशं च समीरणम् ॥ ६६ ॥

करालमग्निमीकारं ठठान्तं षोडशाक्षरम् ।
[3]तारादिवसुमध्यं च ठठान्तं हृदयादिषु ॥ ६७ ॥

[4]योजयेच्च नमस्कारपदं [5]श्रीपदमन्वतः ।
[6]तथा सौम्यौ च सम्बुद्धौ समयेतिपदद्वयम् ॥ ६८ ॥

अभयंकरि[7] चेत्युक्त्वा महाशब्दमनन्तरम् ।
टावन्तस्समयावन्तः[8] सम्बुद्धौ च [9]ढढावधि ॥ ६९ ॥

ह्यन्तमेति तथा पूर्वं गच्छेति पदमन्वतः ।
द्विर्वक्तव्यं पदद्वन्द्वं [10]भगपूर्वाबधीति च ॥ ७० ॥

---

1. वसुधायामनुर्ब्रह्मन् वक्ष्यामि श्रूयतां त्वया M_2 2. मारुतं M_1 3. ताराधिप-समध्यं तं M_1 4. अङ्गेषु योजयेन्मन्त्रं नमस्कार पदं शृणु M_1,P_2 5. श्रुणु स याचितः T   6. सा माया च तथा सौम्या सम्बुद्धौ तत्पदद्वयम् M_1,P_2 7. स भयंकरि M_1,P_1,P_2 8. शब्दः M_1,P_2 9. ठठाविधि M_2,P_1 10. भगपूर्वं नसीति च M_2; A.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वसुशब्दं देहि [1]शीर्षं ठठान्तं तेनचाह्वयेत् ।
देवीं च वसुधां ध्यायेत्तप्तहाटकरोचिषम् ॥ ७१ ॥

सिंहासनस्थामाकल्पैरनेकैर्भूषितां सदा ।
गृहीतदाडिमीनालवामहस्तां तथेतरे ॥ ७२ ॥

हस्ते दधानां सुभगं चिन्तारत्नं चतुर्मुख ।
पूर्णं नानाविधैरत्नैः कुम्भं [2]चोर्ध्वमुखं स्थितम् ॥ ७३ ॥

दक्षिणे चरणाङ्गुष्ठे पश्चिमामरभूरुहम् ।
पार्श्वयोरुभयोश्चापि वालव्यजनपाणिभिः ॥ ७४ ॥

अन्याभिश्शुक्लताम्बूल धारिणीभिश्च सेविताम् ।
शङ्खपद्मनिधी चापि वमन्तौ विपुलं धनम् ॥ ७५ ॥

परस्परमुखप्रेक्षौ परिवारौ स्थितौ पुनः ।
अनुक्त परिवाराश्च ग्राह्याः श्रीमनुवर्त्मना ॥ ७६ ॥

समुद्रगायाः सरितः स्रोतसि प्राङ्मुखःस्थितः ।
स्तनदघ्ने जपेल्लक्षं मन्त्रसिद्धौ समाहितः ॥ ७७ ॥

वैशाखे मासि शुक्ले च पक्षे मासर्क्षपश्चिमे ।
व्रतं समापयेच्चक्रे पुजयेच्च महानिशि ॥ ७८ ॥

मल्लिकावकुलैश्चान्यैः सुगन्धैः कालजैश्शुभैः ।
गोघृतैश्च तिलैरन्यैर्यथाभिलषितैरलम् ॥ ७९ ॥

तर्पणं मन्त्रजापं च नित्यमेतत् समाचरेत् ।
एवमाचरतः सम्यङ्मन्त्रिणो यावदायुषम् ॥ ८० ॥

---

1. शीर्घं M_1 2. चाधोमुखं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वसति श्रीर्गृहे तस्य सप्तजन्मसु निश्चला ।
मनुं धरण्या वक्ष्यामि साधनं च यथातथम् ॥ ८१ ॥

छन्दसामादिमुध्दृत्य सूक्ष्मदृक् पुलई तथा ।
हृषीकेशं विसर्गान्तं मनुरेकाक्षरः स्मृतः ॥ ८२ ॥

गोपनं पञ्चबिन्दुश्च ऊर्ध्वलोकेशमन्वतः ।
वीरसेनं कलान्तं च सङ्कर्षणसमाह्वयम् ॥ ८३ ॥

सबिन्दुं गतिसन्तानं[1] कल्पयेद्धृदयादिषु ।
पैठकोऽस्य मुनिश्छन्दो दैवं गायत्रमीरितम् ॥ ८४ ॥

देवता धरणीदेवी जपेल्लक्षमतन्द्रितः ।
मनुर्धरण्याः सप्तार्णः कथ्यते कमलासन ॥ ८५ ॥

धनदं पावकं चादिं सुमुखं गोधनाह्वयम् ।
नत्यन्तमेवं [2]सप्तार्णो धरण्याः[3] सम्प्रदर्शितः ॥ ८६ ॥

मनुश्चतुस्त्रिंशद्वर्णः कथ्यते कमलोद्भव ।
आदाय चादौ सप्तार्णान् कुम्भमादिमचामनुः ॥ ८७ ॥

शशाङ्कमादिं भुवनं सुभगं दत्तसंज्ञितम् ।
सुभद्रमूर्ध्वलोकेशं विजयं विष्णुशीर्षकम् ॥ ८८ ॥

मोहनाशं तथाकारं वैराजं चाग्निविक्रमम् ।
भल्लायुधं च माहेन्द्रं हृषीकेशं विदर्भितम् ॥ ८९ ॥

सानुस्वारं च कमलं पावकं सगुहालयम् ।
नासिक्यं त्रिदशाहारं त्रिविक्रमसमाह्वयम् ॥ ९० ॥

---

1. अङ्गसन्तानं M. 2. पञ्चार्णो M_1 3. मनुः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रोधरूपं च सुमुखं सोदकं कलशं ततः ।
प्रणवादिं च माहेन्द्रं[1] पुलहं च समुद्धरेत् ॥ ९१ ॥

पावकं पाटलं ब्रह्म माहेन्द्रञ्च गुहालयम् ।
प्रभञ्जनं पूर्णचन्द्रमौषधं यष्टिसंयुतम् ॥ ९२ ॥

सुभद्रं देवदत्तं च भास्करं यष्टि मस्तकम् ।
स्वाहायां विरतिर्मन्त्रः कथितः कमलासन ॥ ९३ ॥

पूर्वोक्तं बीजमङ्गानि ऋषिश्छन्दश्चदेवता ।
सारस्वतं मनुवरं प्रवक्ष्यामि यथातथम् ॥ ९४ ॥

निगमादिं श्वेतरश्मिं मनुमर्धेन्दुशेखरम् ।
[2]इत्युद्धरेत् स्वयं गां च द्रष्टा काश्यपनन्दनः ॥ ९५ ॥

छन्दश्च देवी गायत्र देवता भारती स्वयम् ।
लक्षमेकं नियमवान् जपेन्मन्त्रमतन्द्रितः ॥ ९६ ॥

अतुला वाग्विभूतिः स्याल्लभते ज्ञानमुत्तमम् ।
[3]सकृद्ग्रहणमात्रेण ग्रहणं दृढमश्नुते ॥ ९७ ॥

स्मृतिप्रमोषो नैवास्य सभायां [4]न पराभवः ।
अन्यं सारस्वतं मन्त्रमधुना कथयामि ते ॥ ९८ ॥

मुखमस्य ब्रह्मकोशं गोधनं चन्द्रशेखरम् ।
कमलं पुलहं मायामनुस्वारपरिष्कृताम् ॥ ९९ ॥

यष्टिं[5] यष्ट्याविसर्गान्तः पूर्वोक्तं मन्त्रमन्वतः ।
त्र्यक्षरस्यचोद्धारः कथितः कमलासन ॥ १०० ॥

---

1. सुभगंपुलहान्तं A,M_2 2. इत्युद्धरेत्स्वयं चाङ्गम् M_1 3. सकृच्छ्रवण M_2 4. स्वपराजितः M_1 5. यष्टिवर्ज विसर्गान्तं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्रष्टा वसिष्ठो मन्त्रस्य विराट्छन्दः सरस्वती ।
देवता जपसंख्या च लक्षत्रयमुदाहृतम् ॥ १०१ ॥

परावरज्ञो वाग्मी च सप्तकृत्वोऽभिमन्त्रितम् ।
जलं पिबेद्ध्रुवं तस्य कल्याणी वाग्भविष्यति ॥ १०२ ॥

षडक्षरगणो मन्त्रः कथ्यते कमलासन ।
तारकं वरुणं चादिं नासिकयं ज्वलनाह्वयम् ॥ १०३ ॥

मधुसूदनमन्वक् च हुम्फडन्तं नमस्कृतिः ।
ऋषिर्महेश्वरश्छन्दो विराट् सैव च देवता ॥ १०४ ॥

दशाक्षरं मन्त्रराजं वर्णोद्धारेण चोच्यते ।
व्यापी सुधारसश्चापि वैधरो विष्णुमस्तकः ॥ १०५ ॥

वर्णान्त एव चत्वारः समनन्तरमीरिताः ।
ईरयित्वा तथा कुम्भं मधुसूदनमन्वतः ॥ १०६ ॥

पश्चान्तकः पाशपाणिं मधुसूदन पश्चिमम् ।
वैधरं रामसहितं विघ्नेशं बन्धुमस्तकम् ॥ १०७ ॥

हुतान्तवर्णानुध्दृत्य मनुरेष समीरितः ।
अङ्गानि रूपं मन्त्रस्य बीजमेवं विभाजितम् ॥ १०८ ॥

चन्द्रमण्डलमध्यस्थां तुषारनिचयप्रभाम् ।
वमन्तीममृतं वक्राज्जिह्वामध्यगतां स्मरेत् ॥ १०९ ॥

ध्यायतो मन्त्रिणस्तस्य वाक्सिद्धिरतुला भवेत् ।
निगमादिं च नत्यन्तं सुभद्रं गदिनं तथा ॥ ११० ॥

कुम्भमादिं च विजयं गोविन्दं मधुकेतनम् ।
विजयं माधवयुतं[1] ठठान्तं मनुमुद्धरेत् ॥ १११ ॥

---

1. गोधरं वायुं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्वलनं चादिमर्धेन्दुं बीजमेवं समुद्धरेत् ।
द्रष्टास्य देवलश्छन्दो विराट् देवी रतिस्तथा ॥ ११२ ॥

दशलक्षं जपेन्मन्त्रं ततःसिध्यति मन्त्रिणः ।
वश्याकर्षणविद्वेषमुखा च फलसन्ततिः ॥ ११३ ॥

दूरादागमनं चापि प्रोषितस्याचिराद्भवेत् ।
सप्तवर्णान् समुच्चार्य पूर्वोक्तान् समनन्तरम् ॥ ११४ ॥

पवित्रं पीठमन्वक्च पञ्चबिन्दुमनन्तरम् ।
वैराजं [1]गोघनं वायुं ठठान्तं मनुमुद्धरेत् ॥ ११५ ॥

एकचक्षुश्चपीठं च हृषीकेशं सबिन्दुकम् ।
बीजमुक्तं मनोरस्य मुनिराङ्गिरसः स्मृतः ॥ ११६ ॥

छन्दश्च देवीगायत्रं देवता प्रीतिरुच्यते ।
साधयित्वा यथापूर्वं धर्मादिफलभाग्भवेत् ॥ ११७ ॥

सप्तार्णाः पूर्ववद्ग्राह्याः करालं वामनं ततः ।
ए[क]दृग् गोधनं चित्रभानुं च मधुसूदनम् । ११८ ॥

यष्टिं करालमग्निं च ध्रुवं चाग्नेश्च योषितम् ।
तदेव बीजं द्रष्टा च मनुः कीर्तिश्च देवता ॥ ११९ ॥

छन्दश्च देवीगायत्रं पूर्ववत् सिद्धिसाधने ।
वर्णानादाय सप्तादौ परिशिष्टान् समुद्धरेत् ॥ १२० ॥

श्रीवत्सं गोपनं भद्रपाणिं च विजयं तथा ।
स्पर्शनं वीरसेनं च शुभदं दहनं मनुम् ॥ १२१ ॥

---

1. गोपनयुतं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यष्टिं च भास्करोपेतं पावकं बिन्दुपञ्चकम् ।
सयष्टिं बीजसहितं श्रियः स्वाहापदावधि ॥ १२२ ॥

छन्दो विराड् गौतमऋषि र्देवता शान्तिरुच्यते ।
मनुना साधयेद्ब्रह्मन् पादुकादि फलं महत् ॥ १२३ ॥

सप्तवर्णान् यथापूर्वं नृहरिं पावकं तथा ।
महामायामनुस्वारं विजयं प्रणवादिकम् ॥ १२४ ॥

उदयं क्रोधरूपं च भूधरं गोपनं तथा ।
ठठान्तमेवमुध्दृत्य मनुर्ज्ञेयो विचक्षणैः ॥ १२५ ॥

द्रष्टा व्यासो विराट् छन्दो देवता तुष्टिरीरिता[1] ।
लक्षत्रयजपेनैव तुष्टिश्च महती भवेत् ॥ १२६ ॥

सप्तार्णाः पूर्ववद् ग्राह्याः शिष्टार्णस्योध्दृतिः क्रमात् ।
भास्करं पावकं पञ्चबिन्दुं यष्टिसमन्वितम् ॥ १२७ ॥

पवित्रं भुवनं क्रोधरूपं भूधरमन्वतः ।
गोविन्दमाग्नेयीमन्वगुध्दृत्य मनुरीरितः ॥ १२८ ॥

[2]द्रष्टेरितस्तथेशाना पुष्टिश्छन्दो विराडभूत् ।
अष्टलक्षं जपेन्मत्रं पुष्टिकामस्समाहितः ॥ १२९ ॥

भुक्त्वा भोगांश्च [3]विपुलान् रसायनपुरोगमान् ।
अतलादिषु लोकेषु मन्त्री चरति देववत् ॥ १३० ॥

योगासनाङ्गान्याधारशक्त्यादीनि चतुर्मुख ।
यानि तेषां कल्पनेषु वर्णोद्धारपुरस्सरम् ॥ १३१ ॥

---

1. रुच्यते T, P_2 2. हारीतो मुनिरीशाना M_1 3. विविधान् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रान्वक्ष्याम्यानुपूर्व्या यथावदवधारय ।
ब्रह्मकोशं मुखं विद्यात् पवित्रमृतधाम च ॥ १३२ ॥

हृषीकेशं बिन्दुपरं प्रतर्दनमतः[1] परम् ।
पद्मनाभं च नासिक्यं गोपनं सुभगं पुनः ॥ १३३ ॥

आदि देवं हुतवहं श्रीवत्सं कमलाह्वयम् ।
वैराजं [2]वीरसेनं च नतिमेवं समुद्धरेत् ॥ १३४ ॥

आधारशक्तिमन्त्रोऽयं कथितः कमलासन ।
चतुर्मुखं चतुर्बाहुं शुद्धस्फटिकवर्चसम् ॥ १३५ ॥

किरीटहारकेयूर प्रमुखाकल्पभूषितम् ।
श्रीवत्साङ्कं शङ्खचक्रगदापद्मायुधैर्युतम् ॥ १३६ ॥

तेजोमण्डलमध्यस्थं ध्यायेदाधाररूपिणम् ।
ब्रह्मकोशं दिनकरं भुवनं पावकाह्वयम् ॥ १३७ ॥

गुहालयं ध्रुवं भूयः कमलं सगुहालयम् ।
पावकं मन्तरं पद्ममाकारं बिपुलं तथा ॥ १३८ ॥

गोपनं च गदध्वंसं विनायकमनन्तरम् ।
[3]प्रभञ्जनं माधवं च नत्यन्तं मनुमुद्धरेत् ॥ १३९ ॥

एकवक्त्रं चतुर्बाहुं जपापुष्पसमद्युतिम् ।
शङ्खचक्रधरं क्रुद्धं [4]पद्मकौमोदकीधरम् ॥ १४० ॥

वह्निमण्डलमध्यस्थं [5]ज्वलनापीतविग्रहम् ।
सकलाभरणोपेतं ध्यायेत्कूर्ममनन्तरम् ॥ १४१ ॥

---

1. गुहालयम् M_1 2. गोधनं वायुं M_1 3. चतुर्गतिं माधवं च सत्यन्तः कूर्ममन्त्रराट् A. M_2 4. शक्तिंकौमोदकीधरम् M_2 5. ज्वालावितत विग्रहम् A.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उद्गीथं भानुमाकारं यष्टिमादिं विनायकम् ।
द्विरदं विजयाकारं श्वसनं प्रथमं स्वरम् ॥ १४२ ॥

नतिं चोध्दृत्य मन्त्रोऽयमनन्तस्य प्रदर्शितः ।
स्फटिकाद्रिप्रतीकाशं चतुर्बाहुं किरीटिनम् ॥ १४३ ॥

पूर्णचन्द्राननं सौम्यं सितपुष्पैर्विराजितम् ।
लाङ्गलं मुसलं मुख्यकरयोर्दधतं शिवम् ॥ १४४ ॥

जघन्यकरयोश्शङ्खचक्रद्वन्द्वं यथायथम् ।
नीलाम्बरधरं दंष्ट्राकरालवदनैर्युतम् ॥ १४५ ॥

[1]प्रशान्तवपुषायुक्तं सहस्रफणमुन्नतम् ।
फणामणिसहस्रांशुनीराजनविराजितम् ॥ १४६ ॥

अनन्तवक्त्रकुहरैरुद्वमन्तमुदर्चिषम् ।
मण्डलीकृतनागेन्द्र [2]भोगवेष्टनविग्रहम् ॥ १४७ ॥

ध्यायेदनन्तमुभयोः पार्श्वयोर्नागयोषितः ।
देव्यस्तस्य सुखासीनाः फणामण्डलमण्डितः ॥ १४८ ॥

ध्यात्वा भुवो मनुः पश्चाद्वर्णोद्धारेण वक्ष्यते ।
तारं सुभगनामानमर्चिष्मन्तं चतुर्मुख ॥ १४९ ॥

सुमुखं [3]गोघनं वायुं नत्यन्तमिति कल्पयेत् ।
तस्योपरि फणीन्द्रस्य तपनीयनिभां शुभाम् ॥ १५० ॥

चतुरश्रां महापीठीं कल्पयेन्मधुविद्विषः ।
धर्मादीनां चतुर्णांत्वधर्मादीनां च तावताम् ॥ १५१ ॥

---

1. पृष्टतोनागवपुषम् M. 2. भोगिवेष्टनविष्टरम् M_2 3. गोपनाह्वानं M_2.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पादानां कल्पनामन्त्राः वक्ष्यन्ते कमलासन ।
आद्यर्णान् प्रणवादींश्च सानुस्वारान्यथायथम् ॥ १५२ ॥

चतुर्थ्यन्तानि नामानि प्रोच्यन्ते नतिमीरयेत् ।
मध्ये सदाशिवपदं पादत्वेन प्रकल्पयेत् ॥ १४३ ॥

तच्चतुर्थ्यन्तमादौ च भास्करं सगुहालयम् ।
नत्यन्तं चैव पादानां नवानां कल्पयेन्मनून् ॥ १५४ ॥

ऋगादयश्चतुर्वेदास्तेषां तु मनवः पुनः ।
सानुस्वारांस्तदाद्यर्णान् प्रोच्यादौ कमलासन ॥ १५५ ॥

चतुर्थ्यन्तानि नामानि ऋगादीनां नतिः पुनः ।
मनून् प्रकल्पयेदेवं भौतिकादिरहङ्कृतिः ॥ १५६ ॥

तिस्रः प्रकल्पयेत्पश्चात्तासां मन्त्रान् ब्रवीमि ते ।
प्रणवादीन् फुल्लनयनानचामादिं सदण्डकम् ॥ १५७ ॥

भौतिकादिरहङ्कारश्चतुर्थ्यन्तो नतिस्तथा ।
पश्चिमं मारुतं चोर्ध्वलोकेशं बिन्दुमस्तकम् ॥ १५८ ॥

पदं च तैजसं शिष्टं पूर्ववन्मनुरीरितः ।
कुम्भमौर्वं सनासिक्यं वैकारिपदमन्व[1]तः ॥ १५९ ॥

शिष्टं यथापुरं सर्वं मनुरन्यः समीरितः ।
सत्त्वं रजस्तमश्चेति गुणान् पश्चात्प्रकल्पयेत् ॥ १६० ॥

सानुस्वारांस्तदाद्यर्णांश्चतुर्थ्यन्तांस्तदाह्वयान्
मनून् प्रकल्पयेदेवं मध्याद्यैस्तत्प्रकल्पनम् ॥ १६१ ॥

---

1. मन्ततः M_1.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आत्मशब्दं चतुर्थ्यन्तं महयादि पदपूर्वकम् ।
हुम्फडन्तं च नत्यन्तं प्रयुञ्जीत मुनुं पुनः ॥ १६२ ॥

प्रणवं मन्दरं यष्टिं मुसलं पञ्चबिन्दुकम् ।
अमृतं गोपनयुतं विजयं माधवीं तथा[1] ॥ १६३ ॥

भद्रहस्तं मृगेशं च नतिमुध्दृत्यमन्त्रवित् ।
मन्त्रेणास्तरणाध्यासो वह्न्यादिमण्डलत्रयम् ॥ १६४ ॥

तस्योपरिष्टादध्यासान्मन्त्रान् सर्वान् यथाक्रमम् ।
पावकं शशिनं सूर्यं त्रयमा[2]कारबिन्दुकम् ॥ १६५ ॥

मनुमेवं समुध्दृत्य पद्मं चोपरिकल्पयेत् ।
प्रणवं पश्चिमं यष्टिं पवित्रं विजयं तथा ॥ १६६ ॥

दक्षं च गोपनपरं[3] श्वसनं च विनायकम् ।
विष्णुं च मन्दरं स्वर्गमुध्दृत्याजमनुः स्मृतः ॥ १६७ ॥

श्रीवत्सादि द्वादशानां शक्तीनां तत्समाह्वया ।
चतुर्थ्यन्ताः [4]सनासिक्याः तदाद्यर्णपुरस्कृताः ॥ १६८ ॥

मन्त्रो भद्रासनस्यैष कथितः कल्पनाक्रमः ।
ब्रह्मादयस्त्रयः पश्चात्सनकादित्रयं पुनः ॥ १६९ ।

विनायकश्च दुर्गा च मन्त्रिणो गुरुरन्वतः ।
प्रणवाद्याश्चतुर्थ्यन्ता नत्यन्ताश्च तदाह्वयाः ॥ १७० ॥

[5]तानर्चयेच्च ब्रह्मादीन् परिचर्यामुखैर्हरे ।
अष्टौ व्याप्त्यादिकाः शाक्तीः प्रथमावरणे यजेत् । १७१ ॥

---

1. ततः M_1 2. साकार M_1 3. युतं M_2 4. सनासिक्यः तावदन्य M_2 5. तैर M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्ववत्तत्समाख्याभिर्मन्त्रैः पञ्चायुधान्यपि ।
[1]दिव्यानि दिक्पतीन् सर्वानिन्द्रादीन् विहगाधिपम् ।। १७२ ।।

सेनेशं च चतुर्थ्यन्तैर्नत्यन्तैश्च स्वनामभिः ।
पूर्ववत् पूजयेद्ब्रह्मन् द्वितीया[2]वरणे ततः ।। १७३ ।।

चण्डप्रचण्डावन्तस्थौ द्वाःस्थौ च मनुना यजेत् ।
निगमादिं खड्गधरमृतमोतं सयष्टिकम् ।। १७४ ।।

वक्रतुण्डं प्रचण्डं च पुण्डरीकाक्षगोपनौ ।
प्रभञ्जनं चाप्रमेयं नत्यन्तो मनुरीरितः ।। १७५ ।।

प्रथमं छन्दसामादिं पश्चिमं ऋतधामकम् ।
सदण्डं पापहननं दहनं वक्रतुण्डकम् ।। १७६ ।।

प्रचण्डंपुण्डरीकाक्षं चतुर्थ्यन्तं तथा नतिः ।
चण्डप्रचण्डयोर्मन्त्रः समुद्धृत्यार्णमीरितः ।। १७७ ।।

उदुम्बरस्य नत्यन्तं शान्तिमा[3]दिविभक्तिकम् ।
उदीरयेदधिष्ठात्री तस्य शान्तिश्च देवता ।। १७८ ।।

सरस्वती दक्षिणस्यां रतिश्चोत्तर दारुणि ।
श्रीः पश्चिमादधस्तस्याः शान्तिर्भवति देवता ।। १७९ ।।

[4]चतुर्थ्यन्तश्च तन्नाम मन्त्रश्चोक्तः चतुर्मुख ।
कवाटे दक्षिणे विश्वनेत्रस्याद्देवता तथा ।। १८० ।।

उत्तरे विश्ववक्त्रश्च देवता वेत्र दारुषु ।
वसन्ति वेदशास्त्राणि नाराचेषु तथामराः ।। १८१ ।।

---

1. द्वितीयावरणे चाग्निमिन्द्रादीन् विहगाधिपम् M_1 2. तृतीयावरणे M_1
3. तादृग्विभक्तिकम् M_1 4. चतुर्थ्यन्तो नाममन्त्रः प्रोक्तश्चैवचतुर्मुख । M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋषयः कीलदेशेषु भूतेशः पङ्क्तिकाभुवि ।
विश्वभावनवासः स्यात्कन्दपद्द्वयं तथा ॥ १८२ ॥

नाम तेषां चतुर्थ्यन्तं मनुर्वास्तुपतेस्तथा ।
क्षेत्रेशस्य मनुर्ब्रह्मन् छन्दसामादिमुद्धरेत् ॥ १८३ ॥

नृसिंहमुदयं दक्षमृतधाम सदण्डकम् ।
चतुर्थ्यन्तं नमोऽन्तश्च तार्क्ष्यमग्रेहरेः स्थितम् ॥ १८४ ॥

द्वारपार्श्वे शङ्खचक्रद्वयं तत्संज्ञयार्चयेत् ।
वह्निमधामार्चने मन्त्रं छन्दसामादिमुद्धरेत् ॥ १८५ ॥

वरुणं बन्धुशिरसं क्रोधरूपं वनस्रजम् ।
वरुणं देवदत्तं च पश्चिमं वह्निगोपनौ ॥ १८६ ॥

शशाङ्क[1]मादिदेवान्तं वैधरं दहनं ततः ।
हृषीकेशं पश्चिमं च रामं सुमुखमन्वतः ॥ १८७ ॥

माधवं हुम्फडन्तं च स्वाहान्तावथिको मनुः ।
दिङ्मूर्तयश्चानुपूर्व्या कथ्यन्ते कमलासन ॥ १८८ ॥

इन्द्रेशानौ नृसिंहश्च विरिञ्चिश्च क्रमात् भवेत्[2] ।
दिङ्मूर्तयोऽथवा शक्तिधरः पशुपतिस्तथा ॥ १८९ ॥

श्रीधरो धनदश्चेति यद्वा क्रोडाकृतिर्हरिः ।
नृसिंहः श्रीधरश्चेति हयशीर्षाकृतिस्तथा ॥ १९० ॥

अपि वा स्यात् चतुर्वक्त्र नरनारायणावुभौ ।
हरिः कृष्णश्च कथितो यद्वा [3]मत्स्यादयः क्रमात् ॥ १९१ ॥

---

1. आदिदेवं च M_2 2. स्मृतः M_1 3. मत्स्यादयो M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वासुदेवादयो व्यूहा यद्वा दिङ्मूर्तयः क्रमात् ।
क्रमाच्च तोरणायान्ते पूर्वपश्चिमधामयोः ॥ १९२ ॥

चतुरश्रायते धाम्नि पूर्वपश्चिमनालयोः ।
पूर्णश्च पुष्करश्च द्वावधिष्ठाने पुनः क्रमात् ॥ १९३ ॥

आग्नेये हस्तिवदनो याम्ये पशुपतिस्तथा ।
वारुणे दक्षिणामूर्तिः कौबेरे विश्वरूपधृक् ॥ १९४ ॥

शाङ्करे च चतुर्वक्त्र तस्मिन् भगवती तथा ।
अन्तर्मण्डलसंबन्धि गोपुरोभयपार्श्वयोः ॥ १९५ ॥

चन्द्रादित्यौ तथोर्व्यान्विन्द्रदिक्षु[1] विदिक्षु च ।
मन्मथश्च विधाता च [2]विघ्नेशः षण्मुखस्तथा ॥ १९६ ॥

दुर्गाधनदरुद्राश्च क्षेत्रेशस्तदनन्तरम् ।
सोमेशानान्तरे चैव विष्वक्सेनः प्रतिष्ठितः ॥ १९७ ॥

दक्षिणोर्वीतले सप्तमातरो वीरभद्रकः ।
विघ्नेशः पार्श्वयोस्तासां[3] ज्येष्ठा निरृति भूतले ॥ १९८ ॥

इन्द्रादयः स्वासु दिक्षु द्वितीयावरणे पुनः ।
भगवत्प्रमुखे तार्क्ष्यो द्वितीयावरणे ततः ॥ १९९ ॥

[4]तदीयगोपुरद्वारपार्श्वयोः पुरुषाच्युतौ ।
खल्वरिकाधरित्रीषु [5]वह्न्यादीनां दिशि क्रमात ॥ २०० ॥

हयशीर्षः कर्षणश्च क्रोडाकृतिरनन्तरम् ।
प्रद्युम्नोऽनन्त नामानावनिरुद्धो नृकेसरी ॥ २०१ ॥

---

1. अग्न्यादिषु च दिक्षु च M_2 2. विश्वेशः P^1, P_2 3. स्तेषां T, P^1, P_2. 4. द्वितीय A, M_2 5. खड्गं कौमोदकींधनुः M_2.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चक्रं च मुसलं शङ्खं खड्गं कौमोदकीं धनुः ।
वज्रं पद्ममिति प्रोक्तं प्रागादिषु तृतीयके ॥ २०२ ॥

गोपुरो भयपार्श्वस्थाः द्वादशाः शीतरश्मयः ।
यमाग्निमध्ये वसवः पितरो यमराक्षसोः ॥ २०३ ॥

विश्वेदेवाश्च मध्यस्था निर्ऋतेर्वरुणस्य च ।
मरुतःपाशहस्तस्य श्वसनस्य च मध्यमाः ॥ २०४ ॥

पाशीमारुतयोर्मध्ये मुनयःसप्त च स्थिताः ।
कुबेरेशानयोर्मध्ये रुद्राश्चैकादशास्थिताः[1] ॥ २०५ ॥

क्षेत्रपालश्च तत्रैव प्राच्यादौ कुमुदादयः ।
[2]मर्यादाह्वयसालस्य द्वारि पूर्णश्च पुष्करः ॥ २०६ ॥

उर्वीतले समाराध्याः प्राङ्गणे क्लृप्तपीठके ।
[3]स्थाप्याश्चैवोत्तमगणाः प्राच्यादिष्वष्टसु क्रमात् ॥ २०७ ॥

तथोपेन्द्रादयः स्थाप्या महत्यावरणे तथा ।
महीतले मध्यगणा विश्वेशाद्या दिशि क्रमात् ॥ २०८ ॥

[4]जयादयो गोपुराणां बहिर्भूमौ व्यवस्थिताः ।
बलिपीठेषु सर्वत्र प्रथमावरणादिषु ॥ २०९ ॥

आद्याश्च [5]कर्मजाश्चैव ये भूताः प्राग्दिशिस्थिताः ।
प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिकाङ्क्षिणः ॥ २१० ॥

भूमौ व्योम्नि तथा वृक्षपर्वतादिषु विष्ठिताः ।
विनायकः क्षेत्रपालः शूराश्च कुमुदादयः ॥ २११ ॥

---

1. स्मृताः T,P_1,P_2 2. मध्यान्त हरिसालस्य M_2 3. स्थाप्या-देवोत्तमगणाः M_1 4. ऋगादयो M_1 5. कूर्मजाश्चैव M_2, A.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वैः पारिषदैश्चान्यैस्सार्धं गृह्णन्तु ते बलिम् ।
चण्डादयोऽथ द्वारस्थाश्चतुर्थ्यन्तैस्स्वनामभिः ॥ २११ ॥

प्रणवाद्यैश्च नत्यन्तै र्देवीपरिजनान्विताः ।
सवाहनास्ते सम्पूज्याः स्वे स्वे देशे चतुर्मुख ॥ २१३ ॥

बलिपीठेषु सर्वेषां बलिग्रहणकाङ्क्षिणाम् ।
तत्तन्नाम समुच्चार्य बलिर्देया विचक्षणैः ॥ २१४ ॥

धामेशानं विनातेन बलिदानेन योऽर्चयेत्[1] ।
हरन्ति राष्ट्रं राजानं धामचात्मानमेव च ॥ २१५ ॥

परिवाराननभ्यर्च्य तथैवाग्नेसमिन्धनम् ।
[2]भोगैरकृत्वा देवस्य पूजा स्यान्निष्प्रयोजना ॥ २१६ ॥

तस्माद्यथोक्तमार्गेण पूजनं स्थानवृद्धिदम् ।
वर्धनं राजराष्ट्राणां पूजनं वृद्धिकाङ्क्षिणाम् ॥ २१७ ॥

दृश्यादृश्येन रूपेण स्थितानां बलिकाङ्क्षिणाम् ।
भूतानां भूतिकामेन देयोऽवश्यं बलिस्सदा ॥ २१८ ॥

इति श्री पञ्चरात्रे महोपनिषदि पाद्मेतन्त्रे चर्यापादे
श्रियादि परिवारमन्त्रवर्णनं नाम एकोनत्रिंशोऽध्यायः ॥

—: * :—

1. योर्चति P_1,P_2 2. होमै M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रिंशोऽध्यायः ।

तिथिदेवतामन्त्रोद्धारः ।

श्री भगवान्ः—

तिथियागं[1] चतुर्वक्त्र ब्रवीमि सुखसाधनम् ।
काम्यस्य कर्मणः कालः शुक्लपक्षस्तथा तिथिः ॥ १ ॥

जपहोमार्चनैः सम्यक् कालेष्वाराधयेत् सुधीः ।
अग्निर्ब्रह्मा धनेशानौ विघ्नेशः श्रीःषडाननः ॥ २ ॥

भानुर्वृषध्वजो दुर्गा यमो बलनिषुदनः ।
विष्णुः कामोऽश्विनौ चन्द्र इत्युक्तास्तिथिदेवताः ॥ ३ ॥

प्रणवं नवबिन्दुं च वरुणं श्रीधरं ततः ।
गदध्वंसं भद्रहस्तं पावनं माधवं ततः ॥ ४ ॥

ठठान्तमुध्दृत्य मनुः कथितो जातवेदसः ।
अग्निमाद्यमनुस्वारं बीजं तेनाङ्गपद्धतिः ॥ ५ ॥

छन्दो विराड् देवलश्च द्रष्टाग्निरधिदेवता ।
चतुर्थ्यन्तं स्वाभिधानं नत्यन्तमपरो मनुः ॥ ६ ॥

ऋषिच्छन्दो देवतापि मनोरस्यापि पूर्ववत् ।
प्रत्यक्षरं [2]जपः साधनं स्थापनं मन्त्रयोर्द्वयोः ॥ ७ ॥

काम्यस्य लाभस्सर्वस्य फलमत्यन्तदुर्लभम् ।
निगमादिं कालनेमिमृतधामविदर्भितम् ॥ ८ ॥

मार्ताण्ड[3]मन्दरयुतं प्रचण्डं माधवं नतिम् ।
इत्युद्धरेद्ब्रह्मन्मनुमुद्धारोऽन्यस्य कथ्यते ॥ ९ ॥

---

1. योगं M_1 2. लक्षजापः M_1 3. मण्डल M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थ्यन्तं ब्रह्मपदमाग्नेयी निष्ठितं मनुः ।
वैराजमक्षप्रथमं विजयं रोहिणीपतिम् ॥ १० ॥

अकारमेकनेत्रं च बीजं प्रणवसंयुतम् ।
एतदेवाङ्गसन्तानः स्वरश्छन्दश्च लोहितः ॥ ११ ॥

मुनिर्ब्रह्मा च देवश्च यष्टव्यं पङ्कजोदरे ।
प्रणवं सूक्ष्मदृष्टिं च भद्रपाणिं सबिन्दुकम् ॥ १२ ॥

[1]उद्धृत्येकाक्षरो मन्त्रः कुबेरस्य समीरितः ।
उष्णिक् छन्दो मुनिर्वह्निर्धनेशानश्च देवता ॥ १३ ॥

आरम्भं नतिमन्वक् च [2]सुभगं विघ्ननायकम् ।
पवित्रं विजयं पश्चाद्ध्वंसनं माधवं तथा ॥ १४ ॥

कमलं चोदयं प्रोच्य जृम्भलं मृगवल्लभम् ।
पावकं गोपनयुतं सदागतिमनन्तरम् ॥ १५ ॥

कुम्भं शशाङ्कं [3]भुवनं हेरम्बं रामसंयुतम् ।
वक्रतुण्डं जगत्प्राणं मन्दरं पश्चिमाननम् ॥ १६ ॥

अग्निमाद्यं मारुतं च प्रथमं प्रेतनायकम् ।
अचामादिमथाग्नेयीमुध्दृत्य मनुरीरितः ॥ १७ ॥

धनदस्य नभो द्रष्टा छन्दो गायत्रमीरितः ।
[4]दैवं धनाधिपो देवो बीजं पूर्ववदीरितम् ॥ १८ ॥

अङ्गुष्ठे माणिभद्राख्यं तर्जन्यां पूर्णभद्रकम् ।
[5]कलिमालिं मध्यमायां विकुण्डलमनामिकाम् ॥ १९ ॥

---

1. पुमित्येकाक्षरो M_1 2. सुभद्रं M_1 3. पवनं हेरम्भं कामसंज्ञितम् M_2
4. एवं M_1 5. कलिमादिं मध्यमया विजृम्भलमनामिका M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मूले कनिष्ठिकायां च मध्ये च मणिबन्धयोः ।
मखेन्द्रं पाणितलयोरङ्गन्यासे घनाधिपम् ॥ २० ॥

स्नात्वा जृम्भलमन्त्रेण प्रक्षिपेदुदकाञ्जलिम् ।
अम्भोजकर्णिकामध्ये महाकायं महोदरम् ॥ २१ ॥

द्विभुजं पीतवसनं चिन्तारत्नं करे स्थितम् ।
धारयन्तं मनः कान्तं मन्त्रिभ्योभीतिसितं वसु ॥ २२ ॥

यक्षयक्षीपरिजनं ध्यायन्नर्घ्यादिभिर्यजेत् ।
ऋद्धिं गुप्तिं च तत्पार्श्वे चतुर्थ्यन्तं स्वसंज्ञया ॥ २३ ॥

अर्घ्याद्यैरर्चयित्वा तु ततो जृम्भलमब्जज ।
कलिमलिं मणिभद्रं [1]चरेन्द्रं पूर्णभद्रकम् ॥ २४ ॥

मुखेन्द्रं शिखिपूर्णञ्च कुण्डलं नलेकूबरम् ।
अम्भोजकर्णिकामध्ये दलेष्विन्द्रादिषु क्रमात् ॥ २५ ॥

अर्चयेत्पुरतश्शङ्खनिधिं पद्मनिधिं तथा ।
[2]शबलां पुरतो न्यस्येत्पृष्ठतः कल्पकद्रुमम् ॥ २६ ॥

जपहोमौ तर्पणादि फलं मूलमनोर्यथा ।
वक्ष्यामि जृम्भलमनुमर्णोद्धारेण सम्प्रति ॥ २७ ॥

ओमादिं सुभगं भद्रहस्तं वैधरमक्षरम् ।
आदिदेवं मारुतं च धनदं भद्रबाहुकम् ॥ २८ ॥

पवित्रं विजयं चैव मारुतं माधवं तथा ।
[3]जन्महन्तृ तथाम्नायं माधवं सूक्ष्मदर्शनम् ॥ २९ ॥

---

1. वरेन्द्रं A 2. शम्बरम् M_2; जबलां T 3. जन्महन्ता ऋतं चापि माधवीं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्कम्भमादिदेवं च स्पर्शनं स्वाहया युतम् ।
बीजमाद्यक्षरं भर्गो द्रष्टा छन्दो विराण्मनोः ॥ ३० ॥

देवता जृम्भलः कार्यः फलं सर्वं प्रयच्छति ।
विघ्नेशमन्त्रमुद्धृत्य वर्णान्वक्ष्याम्यनुक्रमात् ॥ ३१ ॥

उद्गीथं च तृतीयं च स्पर्शेषु [1]पुलहं मनुम् ।
[2]दण्ड इत्युद्धृतो मन्त्रो गणकः षड् विराट् तथा ॥ ३२ ॥

देवताविघ्नराजश्च जपो लक्षत्रयं स्मृतम् ।
भूतं भव्यं भविष्यच्च स्वप्ने पश्यति मन्त्रवित् ॥ ३३ ॥

आरब्धं कर्म निर्विघ्नं फलं दुग्धे यथेप्सितम् ।
तृतीयादिं च सुमुखमाद्यं पश्चिमसंज्ञितम् ॥ ३४ ॥

अचां मुखं च विजयं प्राणं माधवमन्वतः ।
नत्यन्तमादौ पूर्वोक्तं मनुं च मनुरीरितः ॥ ३५ ॥

अजो मुनिश्छन्द उष्णिग्देवता विघ्ननायकः ।
सप्तलक्षं जपेन्मन्त्रं सिद्धयः पूर्वमीरिताः ॥ ३६ ॥

एकाक्षरं नतिशिरो मनुरस्य[3] समीरितः ।
निगमादिं दिनकरज्वलनं पञ्चबिन्दुकम् ॥ ३७ ॥

सानुस्वारं गदध्वंसं पद्मनाभं च वामनम् ।
यष्टिं सहस्रकिरणं पावकं दण्डशेखरम् ॥ ३८ ॥

त्रियक्षरमनुर्ब्रह्मन् कथितः सर्वसाधनः ।
अब्जादि गदितं वर्णमाकारादिस्वरान्तकम् ॥ ३९ ॥

---

1. सुलभं मनुं M_2, पुलहं वसुम् A 2. दग्धमित्युद्धृतोमन्त्रो गणना T. P_1
3. रन्यः T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रयुञ्जीत मनुश्चान्यो वक्ष्यते कमलासन ।
उद्गीथमादिं कमलं पावकं पञ्चबिन्दुकम् ।। ४० ।।

अर्धेन्दुसहितं भद्रमनलं बिन्दुवामनम् ।
सरोरुहं समाहेन्द्रं महामाया सयष्टिकम् ।। ४१ ।।

बीजं च तत्स्वराद्यर्णं गदध्वंसं प्रचण्डकम् ।
पश्चिमाननवैराजौ मायां च वसुधारसम् ।। ४२ ।।

आदिमग्निमकारं च षट्पदद्वयमीरयेत् ।
शशिनं वरुणं वह्निं ककुभं भद्रबाहुकम् ।। ४३ ।।

मन्दरद्वयमेकारं वरुणं कमलासुखम् ।
अचां दक्ष गोपनं च विघ्नेशं श्वसनं तथा ।। ४४ ।।

ठठान्तमित्थमुद्धारो बीजादि कथितं पुरा ।
ऐहिकामुष्मिकफलं सर्वमेतेन साधयेत् ।। ४५ ।।

श्रियं पूर्वोक्तमार्गेण देवीमर्घ्यादिभिर्यजेत् ।
तत्कटाक्षनिपातेन लभते श्रियमुत्तमाम् ।। ४६ ।।

तारं नतिं क्रोधरूपं प्रचण्डं दक्षमन्वतः ।
उदयं सर्वदेहं च गोपनं च प्रभञ्जनम् ।। ४७ ।।

शशाङ्कं श्रीधरं ह्रस्वमृतधामसमाह्वयम् ।
दिनेशं माधवीमन्वक् प्रचण्डं मधुसूदनम् ।। ४८ ।।

श्वसनं स्वाहया सार्धं मनुरेष समीरितः ।
जृम्भलं [1]चोर्ध्वलोकेशं पुलहं यष्टिमस्तकम् ।। ४९ ।।

---

1. पुलहं चोर्ध्वलोकेशं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतद्बीजसमुद्धारस्तदेवाङ्गमृषिः पुनः ।
वर्णात्मा कथितश्छन्दो गायत्रं देवता गुहः ॥ ५० ॥

दाडिमीकुसुमप्रख्यां तन्मन्त्रेण समर्चयेत् ।
एवं कृतवतो वंशे सुब्रह्मण्यादयो ग्रहाः ॥ ५१ ॥

न पीडयन्ति तद्वंश्यान् भवन्ति चिरजीविनः ।
निगमादिं चोषधीशमनुनासिक्यमुद्धरेत् ॥ ५२ ॥

एकाक्षरोऽयं कथितो मन्त्रः सर्वार्थसाधकः ।
हारीतो मन्त्रदृक् छन्दो विराट् सूर्यश्चदेवता ॥ ५३ ॥

ब्रह्मकोशं पद्मपाणिमृतं सुमुखसंज्ञितम् ।
राममिन्दुं हृषीकेशमग्निं वायुं [1]अचां मुखम् ॥ ५४ ॥

वैधरं बिन्दुवैशजं वायुं तारं समुद्धरेत् ।
इत्थमष्टाक्षरो मन्त्रो बीजमेकाक्षरं स्मृतम् ॥ ५५ ॥

ऋषिरत्रिश्च देवश्च पूषा चैवाधिदेवता ।
परं सप्ताक्षरं मन्त्रं मन्त्रैरुद्धृत्य वर्ण्यते ॥ ५६ ॥

सप्तार्णाः पूर्ववद्ग्राह्याः सुभद्रमधुसूदनौ ।
भद्रहस्तं च कलशं माधवं पूर्वमीरितम् ॥ ५७ ॥

बीजमभ्यन्तरीकृत्वा द्विरुक्तं ककुभं तथा ।
अप्रमेयं गन्धवहमाद्यमेतदनन्तरम् ॥ ५८ ॥

पादद्वितयमावाह्यमादिदेवमनन्तरम् ।
पावकं विक्रमयुतं वैधरं ऋतधाम च ॥ ५९ ॥

---

1. च गोपनम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मारुतं चापि[1] नासिक्यं विघ्नेशं गोपनाह्वयम् ।
कमलामादिपवनमाद्यं द्विःपदमीरयेत् ॥ ६० ॥

माधवीमादिसहितमक्षरं द्विरदं पठेत् ।
[2]पवित्रं गोपनयुतं पठेच्च स्वरसंयुतम् ॥ ६१ ॥

विघ्नेशं दहतिं धातुं लोडन्तं [3]द्विस्समुद्धरेत् ।
शान्तरोगं सुखपदं पूर्वलोडन्तमध्यमम् ॥ ६२ ॥

यमं चण्डं द्विरुच्चार्य त्रिरन्वक् प्रणवं पदम् ।
स्वनाम्ना प्रणवान्तेन मनुरेवं समुध्दृतः ॥ ६३ ॥

बीजमङ्गानि चोक्तानि सिन्धुद्वीपश्च दृष्टवान् ।
अत्तिच्छन्दः स्वयं छन्दः सूर्यश्चानेन कथ्यते ॥ ६४ ॥

पद्ममध्ये कर्णिकायामादित्यं दलमूमिषु ।
प्राच्यादिषु ग्रहानन्यान् [4]तदानीं बिम्बमर्चयेत् ॥ ६५ ॥

क्रमात् षडृतवः सर्वे ग्रहास्सानुग्रहास्तथा ।
आयुरारोग्यसौन्दर्य समृद्धिसुखसम्पदः ॥ ६६ ॥

सप्तजन्मसु वंशेऽस्य भवन्ति निरवग्रहाः ।
प्रणवं नतिमत्स्वक् च शुभदं च त्रिविक्रमम् ॥ ६७ ॥

वरुणं गोपनं वायुमादिमुध्दृत्य मन्त्रवित् ।
मनुः पञ्चाक्षरः कार्यो बीजं सम्प्रति कथ्यते ॥ ६८ ॥

गोपतिं विष्णुसहितमनुस्वारं समुद्धरेत् ।
बीजमेतच्चतुर्वक्त्र षडङ्गानामुदाहरेत् ॥ ६९ ॥

---

1. चानुनासिक्ये M_2 2. पश्चिमं M_2 3. समुच्चरेत् M_1 4. नद्यादीनि समर्चयेत् M_2; अर्घ्यादिभिः तथार्चयेत् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपमन्युःऋषिश्छन्दो देवं गायत्रमुच्यते ।
प्रतिपाद्यो महेशानो जपः स्याल्लक्षपञ्चकम् ।। ७० ।।

अष्टाक्षरवदस्यापि फलं साधनमेव च ।
रक्ताम्बुजासनासीनमर्चयेत्तद्दलेषु च ।। ७१ ।।

प्रागादिषु षडङ्गानि पार्वतीनन्दिकेश्वरौ ।
क्रमाद्विन्यस्य पुरतो वाहनं सम्यगर्चयेत् ।। ७२ ।।

दिक्ष्वष्टसु सुरेन्द्रादीनष्टावर्घ्यादिनार्चयेत् ।
सृष्ट्यादि न्यसनं कृत्वा प्रथमं तदनन्तरम् ।। ७३ ।।

अक्षरन्यसनं कुर्यात् स्थानेष्वेतेषु पञ्चज ।
मूर्ध्नि चास्ये च हृदये गुह्ये पादतले तथा ।। ७४ ।।

वर्णानां क्रमशो वर्णाः पञ्चानां कथ्यतेऽधुना ।
स्फटिकं पाटलं पीतं श्वेतं नीलमिति स्मरेत् ।। ७५ ।।

शिवोऽहमिति चात्मानं भावयेन्मन्त्रवित्तमः ।
[1]ध्यायन्तं देवदेवेशमाराध्यं वृषभध्वजम् ।। ७६ ।।

त्यक्त्वा सांसारिकं दुःखमेति स्थानमनश्वरम् ।
भोगानप्यैहिकान् भुक्त्वा दुर्लभानमरैरपि ।। ७७ ।।

ओमादिसप्तवर्णानामुद्धारः पूर्वमीरितः ।
वैधरं नृहरिं मायां प्रचण्डं मधुसूदनम् ।। ७८ ।।

मन्दरं चोर्ध्वलोकेशं वैराजं[द्विः] चतुर्मुख ।
पावकं पवनं देवदत्तं पाटलमन्वतः ।। ७९ ।।

---

1. ध्यायन्नेवं समाराध्य देवेशम् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गोपतिं मारुतमथो मन्दरं माधवीं तथा ।
माधवं धनदं ब्रह्मन् मधुसूदन संज्ञितम् ॥ ८० ॥

नासिक्यं पश्चिमं पद्मनाभं च पवनाह्वयम् ।
खङ्गं द्विरुच्चरेत् स्वाहा इति [1]मन्त्रं समुद्धरेत ॥ ८१ ॥

मनुमन्यं प्रवक्ष्यामि तमर्णैरुद्धगम्यहम् ।
तारमत्रिं गरुत्मन्तं रामं सुमुखमन्वतः ॥ ८२ ॥

गोपनं मन्दरं चोर्ध्वलोकेशं [2]विजयं पुनः ।
तमर्णं चाभिशङ्खञ्च माधवं वरुणाभिधम् ॥ ८३ ॥

गोपनं च करालं च कमलं जृम्भलं ततः ।
[3]श्रीधरं सुभगं मायां जन्मध्वंसमनन्तरम् ॥ ८४ ॥

पाशपाणिं चादिदेवं भद्रहस्तं च पश्चिमम् ।
ऋताह्वयं वैधरं च मधुभिन्मारुतं ततः ॥ ८५ ॥

नतिमुध्द्दृत्य कथितो वर्णान् षोडशसंज्ञितान् ।
मन्त्रयोरनयोर्ब्रह्मन् जीवो द्रष्टाभिधीयते ॥ ८६ ॥

धर्मवर्ती महेशानो देवता दक्षिणा तनुः ।
दिनेश रामसहितं श्वसनं मतिबिन्दुमत् ॥ ८७ ॥

बीजमेतदतो ध्यानमीशानस्य ब्रवीमि ते ।
कुन्देन्दु मुक्ता शङ्खाभं सर्वाकल्पपरिष्कृतम् ॥ ८८ ॥

वैयाघ्रचर्मवसनं जटामण्डलमण्डितम् ।
नासाग्रन्यस्तनयनं शशिखण्डविराजितम् ॥ ८९ ॥

---

1. मन्त्रं समुध्दृतम् T,P_1 2. भुवनं A 3. विघ्नेशं T,P

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रसन्नवदनं देवं चतुर्भुजमभीष्टदम् ।
वामजानुनि विन्यस्त वामेतर पदाम्बुजम् ॥ ९० ॥

स्फाटिकीं चाक्षमालां वै बिभ्राणं दक्षिणेकरे ।
वामे कराम्बुजे स्वीये धृत विज्ञानपुस्तकम् ॥ ९१ ॥

दर्शयन्तं ज्ञानमुद्रां महर्षिगण सेवितम् ।
ध्यायतो मन्त्रिणस्त्वेवं सिध्यन्ति सकलाः कलाः ॥ ९२ ॥

गङ्गाप्रवाहवत्तस्य वाक्प्रसारः प्रवर्तते ।
चतुर्वर्गफलावाप्तिस्तस्य हस्ते स्थिता ध्रुवम् ॥ ९३ ॥

जपन् भूयस्तथाकामान् दुर्लभान् सुखमश्नुते ।
तिथौ भगवतीं दुर्गां नवम्यां सम्यगर्चयेत् ॥ ९४ ॥

निगमादिं वैधरं च भुवनं च विसर्जनम् ।
मनुरेकाक्षरः प्रोक्तः समुध्दृत्य यथातथम् ॥ ९५ ॥

स्वीकृत्यैकाक्षरं पूर्वं गतध्वंसं हुताशनम् ।
स्पर्शनं गोपनाह्वानं [1]नतिं च मनुरीरितः ॥ ९६ ॥

बीजमस्योद्धरिष्यामि गोपतिं पावकं ततः ।
वामनं यष्टिशिरसमस्य कात्यायनो मुनिः ॥ ९७ ॥

छन्दश्च देवी गायत्रं वनदुर्गा च देवता ।
मन्त्रमन्यं प्रवक्ष्यामि दुर्गाश्रयमनुत्तमम् ॥ ९८ ॥

निगमादिं विष्णुसंज्ञं कपिलं जृम्भलाह्वयम् ।
माधवं च सुरेन्द्रादिं प्रद्युम्नं कालनेमिजम् ॥ ९९ ॥

मधुसूदननामानं पुलहं मायया वृतम् ।
करालं देवदत्ताख्यं शशाङ्कं [2]कमलानुगौ ॥ १०० ॥

---

1. नतिं T 2 कलशानुजो M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पवित्रमादिदेवं तं नृहरिं स्पर्शनं तथा ।
ब्रह्माणमग्निं चोध्दृत्य पञ्चबिन्दुमनन्तरम् ॥ १०१ ॥

आदिं श्रीवत्समुदयं सुभद्रं नासिकाह्वयम् ।
भास्करं भद्रबाहू द्वौ वैधरं गोपतिद्वयम् ॥ १०२ ॥

पवित्रखड्गनामानौ द्वौ च दक्षमनन्तरम् ।
सुप्रतिष्ठं द्विरुच्चार्य दिनकृन्माधवौ ध्रुवौ ॥ १०३ ॥

फट्कारमग्न्यादिमन्वगित्युध्दृत्य जपेन्मनुम् ।
[1]अस्योद्धारक्रमादन्यं मन्त्रं वच्मि चतुर्मुख ॥ १०४ ॥

प्रणवं वैधरं पश्चाच्छ्रीधरं गदिनं तथा ।
वैश्वानरं मृगपतिं तमेवार्णमनन्तरम् ॥ १०५ ॥

[2]यान्तं नृसिंहं सुमुखं रामं स्वाहां समुद्धरेत् ।
[3]उध्दृतोऽयं मनुश्चान्यो बीजमङ्गानि पूर्ववत् ॥ १०६ ॥

ऋषिर्जयमतिच्छन्दो गिरिदुर्गा च देवता ।
उद्गीथं श्रीधरं चैव दृष्टिद्वन्द्वं त्रिविक्रमम् ॥ १०७ ॥

क्रोधरूपी च जीमूतं पश्चिमं भुवनाह्वयम् ।
बहुलं श्रीधरं क्रोधं विक्रमं सरसीरुहम् ॥ १०८ ॥

विक्रमं धर्मशीतांशुं शशाङ्कं च सुधामयम् ।
पश्चिमं रामशिरसं क्रोधरूपं पवित्रकम् ॥ १०९ ॥

भल्लायुधं तथा शङ्खं[4]माधवौ द्वयमाधवम् ।
शुक्रमादिं मृगपतिं श्रीधरं पश्चिमाननम् ॥ ११० ॥

---

1. अर्णोद्धार P_2 2. यान्तं नासिक्यसुमुखं नाम स्वाहान्तमुद्धरेत् M_2
3. इत्युध्दृतो M_2 4. वैधरं बन्धुमस्तकम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीहारदीधितिं सर्वेरोधं विक्रमशीर्षकम् ।
वैराजं कपिलंशङ्खं वैधरं बन्धुमस्तकम् ॥ १११ ॥

शुभदं कमलं वायुं मन्दरं वित्तवर्धनम् ।
आदिं कशलमनिलं नासिक्यं यादसां पतिम् ॥ ११२ ॥

गोपनं विजयं विघ्ननायकं दक्षमाधवौ ।
सुभद्रं च गदिं [1]कुम्भं वैराजं बन्धुशीर्षकम् ॥ ११३ ॥

शुभदं मन्दरं शङ्खं ठठान्तं मनुरीरितः ।
षोढा विभज्य तं मन्त्री हृदयाद्यङ्गकल्पनम् ॥ ११४ ॥

द्रष्टा वरेण्यको नाम ह्यनुष्टुप् छन्द ईरितम् ।
देवता वनदुर्गास्या[2]दस्याष्टाक्षरवत् फलम् ॥ ११५ ॥

सर्वदाह्वयदुर्गाया मन्त्रमुद्धारयामि ते ।
उद्गीथं नतिमन्वकू च सूक्ष्मदग्दृष्टिशीर्षकम् ॥ ११६ ॥

गदध्वंसमकारं च कुम्भमाद्यं चतुर्मुख ।
वैराजं राजमानं वै वैधरं श्रीधराह्वयम् ॥ ११७ ॥

[3]गदिनं [4]बन्धुसंज्ञं च स्वाहाशीर्षं[5] श्रियःपतिम् ।
गदिनं [6]पावकं चैव दृष्टिमीकारपावकम्[7] ॥ ११८ ॥

देहं च [8]विक्रमं चण्डं रामं मन्दरसंज्ञितम् ।
मधुसूदं गन्धवहं माधवं मन्दराह्वयम् । ११९ ॥

---

1. घोरं M_2, T 2. तदष्टाक्षरवत् T, P_2 3. हयासुर निहन्तारं हयशीर्वं श्रिधः पतिम् । A कोशेऽयमर्धोऽधिकः पठ्यते । 4. मृगसंज्ञं च M_1 5. हयशीर्षं T 6. सुगोपं च M_1 7. कारमन्वतः P_1,P_2 8. विष्णुं च वक्रतुण्डश्च M_1; देवं च वक्रतुण्डञ्च M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदित्यं गोपनं दक्षमादिदेवं च मारुतम् ।
मृगेशं मन्दरं भानुं मधुसूदनसंज्ञितम् ॥ १२० ॥

पुलहं देवदत्तं च दक्षञ्च यदुभास्करम् ।
राममुग्रात्मनात्मानं मधूसूदनमन्वतः ॥ १२१ ॥

शशाङ्कं श्रीधरं सप्तजिह्वं कुम्भं त्रिविक्रमम् ।
गजाननं [1]गोपतिं च लक्ष्मीं भद्रं त्रिविक्रमम् ॥ १२२ ॥

वैधरं भुवनाह्वानमुग्ररूपं च खेटकम् ।
भल्लायुधं ततो ब्रह्मन् श्वसनं नासिकाभुवम् ॥ १२३ ॥

विधातारं हुतवहं विक्रमं च सुधारसम् ।
रामं च भद्रं सुभगमनिलं विघ्ननायकम् ॥ १२४ ॥

रामं महेन्द्रं [2]सुभगं महेशं गगनाह्वयम् ।
मार्ताण्डमादिदेवं च शशाङ्कं श्रीधरं तथा ॥ १२५ ॥

चित्रभानुं तथा दक्षं वैधरं हव्यवाहनम् ।
विघ्नेशं विक्रमं दृष्टिं देवदत्तमपांपतिम् ॥ १२६ ॥

मधुसूदननामानं कलात्मानमतः परम् ।
भुवनं पावकं दृष्टिं [3]गोपनं विजयं तथा ॥ १२७ ॥

वायुं पवित्रमाकारं[4] [5]मुसलं विक्रमं पुनः ।
एकनेत्रं माधवं च कलशं पावकाह्वयम् ॥ १२८ ॥

वैधरं देवदत्तं च विघ्नेशं मधुसूदनम् ।
दहनं गोपनं चैव मारुतं वनमालिनम् ॥ १२९ ॥

---

1. गोपनं M_1 2. श्वसनं मृगेशं मन्दराह्वयम् M_1 3. गोघनं M_2
4. मुकारं M_1 5. कमलं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मायां च वैश्वराह्वानं मधुसूदनमन्दरौ ।
ओतदेहं दृष्टिमग्निं पश्चिमाननमन्वतः ॥ १३० ॥

ऋतधामं विक्रमं च श्वसनं मृगनायकम् ।
पुष्टिबीजं त्रिरुच्चार्य सहस्रकिरणाह्वयम् ॥ १३१ ॥

गुहालयमनुस्वारं बीजमेतत् त्रिरुद्धरेत् ।
[1]भद्रं गुहालयं चैव विजयं गदिनं तथा ॥ १३२ ॥

पद्मनाभं गोपतिं च कलशं मृगराट् तथा ।
वैराजमादिदेवं च डुण्डुभं लोचनोदयौ ॥ १३३ ॥

उग्रात्मा खेटको वह्निं गोपतिं विहगाधिपम् ।
श्वेतांशुं पश्चिमं लक्ष्मीमादिदेवमनन्तरम् ॥ १३४ ॥

वक्रतुण्डं गोपनं च भद्रपाणिमनन्तरम् ।
विजयाकारमादिं च शशाङ्कं च सदागतिम् ॥ १३५ ॥

द्विरभ्यसेत्कालनेमिं भद्रं पुण्यं द्विरुच्चरेत् ।
मन्दरं चादिदेवं च दहनं श्वसनं तथा ॥ १३६ ॥

द्विर्ब्रूयात् सूक्ष्मदग्ब्रह्मन् करालं विजयं पुनः ।
पीयूषमादिं विजयं वसुमस्तकनिष्ठितम् ॥ १३७ ॥

नीहारदीधितिमचामादिं पीतं [2]समाधवम् ।
सुभद्रं कमलं चैकदृष्टिं च चतुरानन ॥ १३८ ॥

पवित्रमृतधामानं त्रिविक्रममतः परम् ।
पुरुषात्मानमेणेशं पश्चिमं [3]पुरतस्तथा ॥ १३९ ॥

---

1. सुभद्रं गुहालयं चक्रं M_2 2. च माधवम् M_1 3. पुरूवं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्रुव ध्रुव तथा ह्रस्वं माहेन्द्रं मन्दरं ततः ।
सर्वरोधं गजास्यं च मायां कमलमन्दरौ ॥ १४० ॥

एकनेत्रमृतं शूलं [1]बहुकुक्षिस्त्रिविक्रमम् ।
कराल पद्मनाभाख्यं विघ्नेशं विजयं तथा ॥ १४१ ॥

भद्रहस्तं तथा रामं शशाङ्कं मनुमन्वतः ।
सुभद्रं गोपनं पश्चात्पद्मान्तिकमथानिलम् ॥ १४२ ॥

पश्चिमं पद्मनाभाख्यं ऋतधामसमन्वितम् ।
जृम्भलं पुलहं पापहननं पद्मनाभकम् ॥ १४३ ॥

दृष्टिं मृगेशममृतं मायां च द्विर्गुहालयम्[2] ।
पवित्रमृतधामानं वैधरं माधवं ततः ॥ १४४ ॥

[3]मारुतं कमलां पद्म पवित्रमृतधाम च ।
अत्रिं मृगपतिं लक्ष्मीं बहुलं पद्मबिन्दुकम् ॥ १४५ ॥

पवित्रमृतधामानं वैराजं[4] विक्रमं तथा ।
[5]पश्चिमं पद्मनाभाख्यं वैधरं मृगवल्लभम् ॥ १४६ ॥

दक्षं रविं गोपनाख्यं सुभद्रं भुवनं तथा ।
ककुभं माधवं पश्चान्माधवीं भास्कराह्वयम् ॥ १४७ ॥

गोपनं मतिमन्तञ्च पुलहं माधवं रविम् ।
यष्टिं च व्याहरेद्ब्रह्मन् तथैव मधुसूदनम् ॥ १४८ ॥

1. लम्बकुक्षिं A 2. आर्यादूर्वी गुहालयम् T, P शशाङ्कं च गुहालयम् M_1 3. माधवं M_2 4. मुखं वैराज विक्रमम् A,M_2
5. तं तथा पश्चिमं पद्मं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्रुवं नभोमणिं गोपं बिन्दुं च चतुराननं ।
एवं त्रिर्व्याहरेदर्णं सुगतं सागरोत्तमम् ॥ १४९ ॥

मन्द्रं भास्करं पश्चाद्दीपनं माधवीं तथा ।
आदिदेवं जगत्प्राणं माधवं नतिमुद्धरेत् ॥ १५० ॥

इत्येवमुध्दृतो मन्त्रो ब्रह्मन् सर्वार्थसिद्धिदः ।
[1]शतेन संमितोवर्णो रश्मीत्यादिभिरेव सः ॥ १५१ ॥

भास्करं [2]मन्दरं पञ्चबिन्दुं यष्टिमनन्तरम् ।
उध्दृत्य बीजमेतेन षडङ्गानि प्रकल्पयेत् ॥ १५२ ॥

द्रष्टा ककुत्स्थश्छन्दः स्यादतिच्छन्दोऽत्र[3] देवता ।
सर्वदाह्वानमन्त्रस्य चतुर्लक्षो जपस्मृताः ॥ १५३ ॥

ज्ञानाध्यानाज्जपान्मन्त्रः सिद्धिं सर्वां प्रयच्छति ।
मन्त्रिणो नित्ययुक्तस्य प्रत्यहं प्रयतात्मनः ॥ १५४ ॥

आमुष्मिकं चैहिकं च फलं सर्वं प्रयच्छति ।
दशम्यामर्चयेद्ब्रह्मन् कृतान्तमभयप्रदम् ॥ १५५ ॥

[4]निगमादिं गन्धवहं हृषीकेशमनन्तरम् ।
दण्डं प्रभञ्जनं दक्षं चादिदेवं सदागतिम् ॥ १५६ ॥

[5]नतिमुध्दृत्य कथितो मनुर्वैवस्वताह्वयः ।
बीजमर्णान् समुध्दृत्य श्वसनं यष्टिशीर्षकम् ॥ १५७ ॥

उदितं तेन बीजेन हृदयाद्यङ्गकल्पनम् ।
ऋषिस्सत्यातपश्छन्दो गायत्रं दैवमीरितम् ॥ १५८ ॥

---

1. नतेन T, M_2 2. दहनं M_2 3. हि देवता M_1
4. उद्गीथमादिं M_2 5. मनूद्धारोऽपि M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रश्च पितृदैवत्यो जपः स्यात्पञ्चलक्षकः ।
तेनाराध्य श्राद्धदेवमभीष्टं सर्वमश्नुते ॥ १५९ ॥

प्रथमं छन्दसामादिं विक्रमं मानुषेश्वरम् ।
वैधरं वह्निमपरं गोपनं पवनं मुखम् ॥ १६० ॥

नतिमुध्दृत्य मघोनः कथितो मनुरब्जज ।
वैधरं चोर्ध्वलोकेशं नासिक्यं बीजमुध्दृतम् ॥ १६१ ॥

ऋषिर्देवो[1] विराट् छन्दो देवता वलसूदनः ।
एतेनेष्ट्वा तुरासाहं साम्राज्य फलमश्नुते ॥ १६२ ॥

द्वादश्यां मूलमन्त्रेण पूजयेदुक्तवर्त्मना ।
भगवन्त श्रियःकान्तं फलमीप्सन् सुदर्लभम् ॥ १६३ ॥

निगमादिं च नत्यन्तं पश्चिमोदयनं तथा ।
क्रोधरूपं पवित्रं च श्रीवत्सं पावकं ततः ॥ १६४ ॥

अदिदेवं च पवनं गोपनं [2]यष्टिमन्वतः ।
[3]गोपतिं बहुलं पञ्चबिन्दुं नरहरिं ततः ॥ १६५ ॥

और्वं यष्टिं च कमलं[4] गोपनं मन्दराह्वयम् ।
वैधरं देवदत्तं च [5]कमलं गोपनं तथा ॥ १६६ ॥

शङ्खं ठठान्तमुध्दृत्य मनुरेष समीरितः ।
[6]स्वर्गादिं पुलरं बन्धुं नासिक्यं बीजमुद्धरेत् ॥ १६७ ॥

ऋषिः श्रीनिधिरस्योक्तो विराट् छन्दश्चदेवता ।
मन्मथस्तेन यष्टव्यः सः सर्वफलकाङ्क्षिभिः ॥ १६८ ॥

---

1. जीवो M_1 2. यष्टिमस्तकम् A, M_2 3. गोपनं M_2
4. कलशं M_2 5. कलशं M_1 6. स्पर्शादिं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकार्णमपरं मन्त्रमुद्धरिष्यामि पद्मज ।
तारं गरुडमौर्वं च सबिन्दुं मनुरीरितः ॥ १६९ ॥

लक्ष्मेकं जपेन्मन्त्री कर्मण्याकर्षणादिके ।
समर्थं कामदैवत्यं मनुमन्यं ब्रवीमि ते ॥ १७० ॥

उद्गीतं कमलं पीतं मायामर्धेन्दुशेखरम् ।
करालं गोपनं दक्ष वैधरं तदनन्तरम् ॥ १७१ ॥

मृगेन्द्रं वरुणं चादिदेवं श्वसनसंज्ञितम् ।
शुक्रं सुधामयं वह्निं ककुभं सविनायकम् ॥ १७२ ॥

शशाङ्कं माधवं ब्रह्मसाधकं भास्कराह्वयम् ।
हैरम्बं गोपनं वायुं ककुभं यादसांपतिम् ॥ १७३ ॥

पुलहं निगमादिं च तद्वयं तत् द्विरुच्चरेत् ।
पश्चिमं ऋतधामानं पूर्णं पर्वभिरुच्चरेत् ॥ १७४ ॥

शशाङ्कमादिं जलजं पीतं वरुणमब्जज ।
ककुभं विष्णुविघ्नेशौ प्रथमं तिग्मदीधितिम् ॥ १७५ ॥

पद्मनाभं वैधरं च वायुमाद्यं च मन्दरम् ।
मन्दराद्यद्वयं भूयस्तदेव समनन्तरम् ॥ १७६ ॥

वरुणं विष्णुमब्जाक्ष[1] यष्टिमब्दोदयौ तथा ।
दहनं श्रीधरं वर्णं पुलहं ब्रह्मसाधनम् ॥ १७७ ॥

करालमाद्यं कलशं मुखं श्रीवत्समन्वतः ।
प्रभञ्जनं गोपनं च स्पर्शमाद्यमपां पतिम् ॥ १७८ ॥

1. बीजमब्जं च M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ठठान्तमुध्दृत्य मनुः कथितः कमलासन ।
ऋषिः कलिङ्गोऽतिच्छन्दः कामश्चदेवता ॥ १७९ ॥

जपेद्द्विरष्टौलक्षाणि नासाध्यं तेन मन्त्रिणा ।
रतिश्च विरतिश्चोभे तस्य पार्श्वे स्थिते [1]सदा ॥ १८० ॥

[2]मन्त्रस्तयोश्चतुर्थ्यन्तं नाममात्रं त्रिशीर्षकम् ।
मदनः प्रथमो बाणस्तथैवोन्मादनोऽपरः ॥ १८१ ॥

मोहनं द्रेषणं च द्वे दीपनं पञ्चमं स्मृतम् ।
मल्लिका केतकी जातिः पङ्कजं यूथिका तथा ॥ १८२ ॥

पुष्पाणि क्रमशो बाणमाहुस्तेषां मनुं पुनः ।
संविद्वर्णाश्च सहिताश्चतुर्थ्यन्तसमाह्वयाः ॥ १८३ ॥

तेषां नत्यन्तसहितं तैस्तेषामर्चनं विदुः ।
धनुरङ्कुशपाशाश्च तस्यास्त्राणि मनोभुवः ॥ १८४ ॥

मन्त्राश्च पूर्ववत्तेषां नामान्येव चतुर्मुख ।
कल्पकानोकह प्रायः पुष्पितद्रुमशोभिते ॥ १८५ ॥

उद्याने मञ्जुशिञ्जान पक्षिसंघनिषेविते ।
मध्ये महाह्रदे पूर्णे सरोजैश्च विकस्वरैः ॥ १८६ ॥

विष्टरे काञ्चने न्यस्ते शुभास्तरणसंयुते ।
आसीनं सह देवीभ्यां सर्वाभरणभूषितम् ॥ १८७ ॥

रक्तचन्दनलिप्ताङ्गं रक्तमाल्योपशोभितम् ।
चारुकुण्डलिनं कान्तं युवानं क्षौमवाससम् ॥ १८८ ॥

---

1. स्थिरे M_1 2. मन्त्रो द्वयोश्चतुर्थ्यन्तं नामानीति विशीर्षकम् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वसानमप्सरोमुख्यैः स्त्रीगणैः परितो वृतम् ।
ध्यायन्ननेन मनुना क्रमादर्घ्यादिभिर्यजेत् ॥ १८९ ॥

[1]कामगायत्र्यया चापि यजेत मकरध्वजम् ।
जपादि पूर्ववत्सर्वं वश्यं च भुवनत्रयम् ॥ १९० ॥

मन्त्रिणो नित्ययुक्तस्य किमन्यैरतिविस्तरैः ।
अश्विनोर्मन्त्रमधुना ब्रवीमि कमलासन ॥ १९१ ॥

उध्दृत्य पूर्वमुद्गीथं विघ्नेशं पाटलप्रियम् ।
ब्रह्मसाधननामानं श्रीवत्सं च सुधामयम् ॥ १९२ ॥

मायां सुभद्रमाकारमश्विनोरीरितो मनुः ।
आदिमर्धेन्दुसहितं बीजं तेनाङ्गकल्पना ॥ १९३ ॥

भृगुर्द्रष्टा बृहच्छन्दः प्रतिपाद्यौ तथाश्विनौ ।
जपन् वै पञ्चलक्षेण सिद्धि [2]स्सर्वार्णसाधनः ॥ १९४ ॥

राजयक्ष्मादयो रोगा न तिष्ठन्ति तदन्वये ।
औषधानि च दक्षाणि व्याधीनामपनोदने ॥ १९५ ॥

तत्करस्पर्शमात्रेण सर्वं वस्त्वौषधं भवेत् ।
पौर्णमास्यां तथा सोमं यजेत मनुवित्तमः ॥ १९६ ॥

निगमादिं पूर्णचन्द्रमोतदेहं समन्दरम् ।
मधुमारुतविघ्नेशं माधवीं च विसर्जनम् ॥ १९७ ॥

सोमस्य कथितो मन्त्रो बीजमुद्धारयामि ते ।
सितमादिमनुस्वारं कुर्यात्तेनाङ्गसन्ततिम् ॥ १९८ ॥

---

1. साम M_2 2. स्सर्वार्थसाधनः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्रष्टा कौमोदको नाम पङ्क्तिश्छन्दश्च देवता ।
जपः पूर्ववदेवास्य गायत्र्या वा समर्चयेत् ॥ १९९ ॥

फलं च सर्वं पूर्वोक्तं चन्द्रसालोक्यमप्यथ ।
इत्युक्तास्तिथयो देवास्तेषां मन्त्रसमर्चनम् ॥ २०० ॥

फलानि च समस्तानि क्रमेणाप्युदितानि ते ।
नासाध्यं तिथियोगैस्तैरैहिकामुष्मिकात्मकम् ॥ २०१ ॥

फलं मन्त्रप्रसादेन तद्देवानां महत्तया ।
सुकृतान्यपि कर्माणि विना विघ्नेशपूजया ॥ २०२ ॥

न फलन्त्यन्तरायेण निहतानि चतुर्मुख ।
तदादौ कर्म कुर्वाणैराराध्यो विघ्ननायकः ॥ २०३ ॥

इति श्री पञ्चरात्रे महोपनिषदि पाद्मतन्त्रे चर्यापादे
तिथि देवता मन्त्रोद्धारो नाम त्रिंशोऽध्यायः ॥

——: * :——

एकत्रिंशोऽध्यायः ॥

विष्वक्सेनोत्पत्तिः, किरीटादि मन्त्रोद्धारणम् च ॥

ब्रह्मा :—

भगवन् विघ्नराजस्य जन्म कीदृक् कुत[1]श्च सः ।
भूषणानां च कोटीरप्रमुखानां यथातथम् ॥ १ ॥

---

1. च कुतश्च सः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चक्रादीनामायुधानां तार्क्ष्यसेनेशयोरपि ।
मनवः पूजिता यैस्तैः पूजिताः फलहेतवः ॥ २ ॥

इति सर्वं समाचक्ष्व मयि ते[1] यद्यनुग्रहः ।

श्रीभगवान् :—

असुरैरर्दिता देवा बलिनो युद्धदुर्जयैः ॥ ३ ॥

शरण्यं शरणं जग्मुः प्रद्युम्नमभयप्रदम् ।

देवा :—

आहवेषु वयं दैत्यैर्बलवन्तोऽपि बाधिताः ॥ ४ ॥

यथा ते विघ्नविहताः पलायन्ते तथा कुरु ।
प्रद्युम्नस्तैरिति प्रोक्तः क्रुद्धस्संरक्तलोचनः ॥ ५ ॥

कोपात्तस्य समुद्भूतं [2]सम्यक् स्तम्बेर[3]माननः ।
सञ्जातं प्राञ्जलिपुटं कुर्वाणं तं पुरःस्थितम् ॥ ६ ॥

तं दृष्ट्वा गजवद्वक्त्रं प्रोवाचेदं वचस्तदा ।
देवानामसुराणां च सङ्ग्रामे समुपस्थिते ॥ ७ ॥

सन्निधाय भवांस्तत्र दैत्यानां विघ्नमाचर ।
इत्युक्त्वा मिषतस्तस्य प्रद्युम्नो भगवान् हरिः ॥ ८ ॥

अन्तर्दधे सुराश्चापि प्रतिजग्मुर्यथागतम् ।
ततः प्रभृति विघ्नेशप्रसादाद्देवतागणाः ॥ ९ ॥

असुरान् जघ्निवांसस्ते न च जग्मुः पराभवम् ।
आकल्पस्य किरीटस्य मनुं वक्ष्यामि सम्प्रति ॥ १० ॥

व्यापिनं नतिमुध्दृत्य कमलं तदनन्तरम् ।
महामायां सप्तजिह्वां पञ्चबिन्दुसमाह्वयम् ॥ ११ ॥

---

1. चेदस्त्यनुग्रहः M_2 2. सद्यः M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हृदयाह्लादमाकारं पवनं शुक्रमन्दरौ ।
दाक्षायणीशविजयौ मन्दरं च सरोरुहम् ॥ १२ ॥

श्रीधरं हृदयाह्लादं माधवं वित्तवर्धनम् ।
कुम्भं हुताशनं देवदत्तं क्षीरं सुधामयम् ॥ १३ ॥

दहनं गोपनं वायुं करालं कमलोद्भव ।
ओतदेहं क्षितिधरं [1]विक्रमं धूमकेतनम् ॥ १४ ॥

अमृतं बन्धुसहितं भद्रहस्तं त्रिविक्रमम् ।
चतुर्गतिं श्रीधरंच विजयं माधवं तथा ॥ १५ ॥

हस्तिवक्त्रं वैधरं च भुवनं कामगं ततः ।
[2]वैराजं वैधराह्वानमीरयित्वा ततः परम् ॥ १६ ॥

रामं पवित्रं विजयं गोपनं द्विरदाननम् ।
[3]महेन्द्रं कुञ्जरमुखं विक्रमं सूक्ष्मलोचनम् ॥ १७ ॥

गोपनं [4]स्पर्शनामादिदेवं समसरोरुहम् ।
माहेन्द्रं पश्चिमं चादिदेवं च धनदाह्वयम् ॥ १८ ॥

विक्रमं पश्चिमं चैव विजयं चतुरानन ।
प्रभञ्जनं मृगेशं च मधुसूदनसंज्ञितम् ॥ १९ ॥

मार्ताण्डं पावकमथो पञ्चबिन्दुं सबिन्दुकम् ।
करालमृतधामानं महामायां सषष्ठिकम् ॥ २० ॥

गोपतिं श्रीधरयुतं नासिक्यं फट्कृतिं तथा ।
स्वाहायां विरमेन्मन्त्रं बीजमस्योच्यतेऽधुना ॥ २१ ॥

---

1. विक्रमं धामकेतनम् T 2. विक्रमं M 3. उपेन्द्रं A
4. स्पर्शनामानमादिदेवं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कमलं ऋतधामानं महामायां परिष्कृतम् ।
उध्दृतं यत् षडङ्गानि द्रष्टा चाखण्डलस्तथा ॥ २२ ॥

छन्दश्च पङ्क्तिरित्युक्तं किरीटो देवतापि च ।
किरीटिनं च द्विभुजं महाकायं [1]महोदरम् ॥ २३ ॥

कृताञ्जलिपुटं [2]प्रह्वं सुस्थितं भूषणैर्युतम् ।
ध्यात्वैवं मन्त्रविन्मन्त्रं पञ्चलक्षमतन्द्रितः ॥ २४ ॥

नरत्यन्तं छन्द्रसामादिं श्रीशब्दं कलशं तथा ।
एकनेत्रं [3]हुतवहं शशाङ्कं मधुसूदनम् ॥ २५ ॥

सदागतिं चादिदेवं नासिक्यं यष्टिसंज्ञितम् ।
लक्ष्मीं करालं पुलहं महामायां सबिन्दुकम् ॥ २६ ॥

तार्क्ष्यमौर्वादिकं यष्टिं हुम्फट्कारं हुतान्तिमम् ।
श्रीबीजं तद्भवेद्वीजमृ षश्चैव प्रजापतिः ॥ २७ ॥

विराट् छन्दश्च गायत्रं श्रीवत्सो देवता मता ।
श्रीवत्समन्त्रमपरं कथयामि चतुर्मुख ॥ २८ ॥

ओङ्कारं प्रथमं सोमं स्वरादि जयमारुतौ ।
माधवं तारकाधीशमेकनेत्रं समारुतम् ॥ २९ ॥

कलशं विजयं पश्चान्महामाया परिष्कृतम् ।
शुक्रं च तारं श्वसनं कुम्भं वैराजमेव च ॥ ३० ॥

अनलं पूर्णचन्द्रं च पुलहं माधवं तथा ।
नरयन्तं शुक्रविजयौ श्वसनं श्वेतरोचिषम् ॥ ३१ ॥

---

1. महाभुजम् M_2 2. ह्रस्वं P_2 3. शशिधरं T,P

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षं दरं देवदत्तमोषधीशं तथाऽब्जज ।
वैराजं प्रथमं कुम्भममृतधामविदर्भितौ ॥ ३२ ॥

जयं सदागतिं देवदत्तं चैव ठठान्तिमम् ।
श्रीबीजं पूर्वमेवोक्तमृषिर्देवल उच्यते ॥ ३३ ॥

छन्दश्चाक्षरपङ्क्तिः स्याच्छ्रीवत्सो देवता मता ।
ततो लक्षजपेनैव सर्वान् कामानवाप्नुयात् ॥ ३४ ॥

प्रणवादिं च नत्यन्तं विधातारं तथा मनुम् ।
[1]सकारं विजयं लोकं सुभद्रं मधुविद्विषम् ॥ ३५ ॥

प्रभञ्जनं पावकं च वैराजं विघ्ननायकम् ।
गोपनं धनदं मायां पश्चिमं प्रथमस्वरम् ॥ ३६ ॥

वैराजं मारुतं पश्चादेकारं प्रथमस्वरम् ।
माधवीं पद्मनाभं च विजयं ब्रह्मसाधनम् ॥ ३७ ॥

[2]अग्निं भल्लायुधं कुम्भमाकारं मारुतं तथा ।
अर्चां द्वितीयं [3]कमलं पुरुहं च पवित्रकम् ॥ ३८ ॥

आदिदेवं च धनदं त्रिविक्रममनन्तरम् ।
पश्चिमं विजयं चादिं [4]स्पर्शनं माधवं तथा ॥ ३९ ॥

ओषधीशमिकारं च दृष्टिं च धनदं पुनः ।
रामं प्रद्युम्नसहितं पश्चिमं पद्मनाभकम् ॥ ४० ॥

प्रभञ्जनं छलध्वंसं द्वयं स्वाहावसानकम् ।
कौस्तुभं बिन्दुसहितं बीजमेतद्धृषिः पुनः ॥ ४१ ॥

---

1. नकारं M_2 2. अग्निं T,P 3. कलशं A 4. मारुतं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जमदग्निर्विराट् छन्दो देवता कौस्तुभाह्वया ।
कौस्तुभं च चतुर्थ्यन्तमुच्चार्य नतिमुद्धरेत्[1] ॥ ४२ ॥

पञ्चलक्षजपात्तस्य मनोः सिध्यति वाञ्छितम् ।
सप्तार्णपूर्वकं कुम्भं भद्रहस्तं प्रियद्विषम् ॥ ४३ ॥

भद्रहस्तं मन्दरञ्च मधुसूदनमब्जज ।
पुलहं देवदत्तं च माधवीं मधुसूदनम् ॥ ४४ ॥

माहेन्द्रं रामनामानं विघ्नेशं पञ्चबिन्दुकम् ।
पश्चिमं श्रीधरं वह्निं भुवनं तदनन्तरम् ॥ ४५ ॥

क्रोधाग्निं वासुदेवं च वैराजौ द्वौ च मन्दरम् ।
पश्चिमं पद्मनाभं च मायाशिरसमन्वतः ॥ ४६ ॥

मारुतं माधवयुतं ठठान्तो मनुरीरितः ।
कलशं मारुतं पश्चादुदयश्चानिरुद्धकम् ॥ ४७ ॥

बीजं मुनिश्च धनदः पङ्क्तिश्छन्दश्च देवता ।
वनमालापरं मन्त्रं कथयामि महाफलम् ॥ ४८ ॥

ब्रह्मकोशं नतिं कुम्भं मुखं विघ्नेशमन्दरौ ।
गोपनं पुलहं चादिदेवं शङ्खं च गोधनम् ॥ ४९ ॥

माधवं सूदनं वायुं मृगेशं दक्षगोपनौ ।
चतुर्गतिश्चादिदेवमनलं सगुहालयम् ॥ ५० ॥

पश्चिमं विक्रमपरं प्रचण्डं पञ्चबिन्दुकम् ।
[2]दक्षं दिनकरं चक्षुः द्वितीयं श्वेतदीधितिम् ॥ ५१ ॥

1. मुच्चरेत् M 2. एकदष्टिं नकारश्च M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षद्वयं वासुदेवं तिग्मांशुं बन्धुशीर्षकम् ।
द्विरदास्यं पञ्चबिन्दु श्वेतरोचिवमादिमत् ॥ ५२ ।

अमृतं वह्निशिरसं कमलं गोपनाह्वयम् ।
मन्दरं [1]वैधरं मायां पञ्चमं गजवाहनम् ॥ ५३ ॥

माधवं श्वेतदीधितं च कुम्भं बहुलशीर्षकम् ।
विजयं चैकदृष्टिं च वरुणं पाटलप्रियम् ॥ ५४ ॥

चतुर्गतिं सूदनं च मारुतं चादिमत्तथा ।
चतुर्थमृतधामानमग्निं च श्वसनं पुनः ॥ ५५ ॥

ब्रह्मकोश[2]परां चैव भद्रपाणिं च [3]पद्मजाम् ।
विजयं प्रणवादिं च श्वेतदीधितिमब्जज ।। ५६ ।

शशाङ्कं पद्मनाभं वैधरं मायामहाधनौ ।
पश्चिमं विजयं मायाशीर्षं विघ्नेशमीरयेत् ॥ ५७ ॥

विक्रमं सूक्ष्मदृष्टिं च गोपनं च चतुर्मुख ।
जन्मध्वंसं च कलशं पुलहं च द्विरुच्चरेत् ॥ ५८ ॥

पूर्ववच्च द्विरभ्यस्य पुष्टिबीजमथोद्धरेत् ।
गोपतिं गोपनं यष्टिं वरुणं चादि [4]बिन्दुकम् ॥ ५९ ॥

भास्करं भुवनं यष्टिं फट्कारं च ठठान्तिमम् ।
पीयूषं पवनं ब्रह्मसाधनं यष्टिशीर्षकम् ॥ ६० ॥

बीजमेतच्चतुर्वक्त्र [5]प्रधानार्णाङ्गकल्पना ।
[6]भवश्चास्य मुनिश्छन्दो अस्या उष्णिकूच देवता ॥ ६१ ॥

---

1. वैधरमचां M_2 2. परं M_2 3. पद्मजम् A 4. भद्रकम् M_2
5. प्रथमा M_2 6. भवश्चापि M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्विभुजां बालिकां पीनवक्षोरुहविभूषिताम् ।
करण्डमकुटोपेतां बिभ्राणां वनमालिकाम् ॥ ६२ ॥

दर्पणं वामहस्तेन बिभ्राणां दक्षिणेन तु ।
पुष्पमञ्जरिकां[1] द्वाभ्यां ध्यात्वा लक्षं जपेन्मनुम् ॥ ६३ ॥

अन्येषां भूषणानां च चतुर्थ्यन्तं समाह्वयम् ।
मन्त्रं नमोऽन्तं जानीयात् बीजमाद्यं प्रकल्पयेत् ॥ ६४ ॥

प्रभामनुं प्रवक्ष्यामि यथावदवधारय ।
उद्गीथमादिं नत्यन्तं [2]पश्चिमंत्वृतधामकम् ॥ ६५ ॥

भल्लायुधं चादिदेवं श्वसनं सूक्ष्मलोचनम् ।
अर्चां द्वितीयं श्वेतांशुं कमलं [3]चादिमत्तया ॥ ६६ ॥

पावकं चौषधं पद्मपाणिं वैराजमन्वतः ।
मृगेशं जन्मविध्वंसं ब्रह्मसाधनसंयुतम् ॥ ६७ ॥

ककुभं कलशं चादिदेवं पुलहमठजज ।
ओङ्कारं माधवीमग्निं मायामस्तक भूषितम् ॥ ६८ ॥

पाटलप्रियमाकारं पीताभं मधुविद्विषम् ।
श्रीवत्समादिं विजयं शशाङ्कं विष्णुमस्तकम् ॥ ६९ ॥

मार्ताण्ड[4]मिन्दुमनलं मधुसूदनमारुतौ ।
श्रियःपतिमथैकाक्षं गोपनं कमलोद्भव ॥ ७० ॥

अमृतं त्वृतधामानं विजयं कमलालयम् ।
ओतदेहं सुभद्रं च बन्धुमस्तकभूषितम् ॥ ७१ ॥

---

1. मञ्जलिकां T,P_1 2. पश्चिमाद्दतधामकम् M_1 3. त्वादिमत्तया M_1 4. मिन्द्र M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विजयं गोपनं प्राणं हुंफट्कारं ठठान्तकम् ।
आद्यर्णं यष्टिसहितं बीजमस्य प्रकीर्तितम् ॥ ७२ ॥

ऋषिर्भास्कर एतस्य पङ्क्तिच्छन्दश्च देवता ।
प्रभा जपश्च मन्त्रस्य लक्षसंख्यः प्रकीर्तितः ॥ ७३ ॥

भोगांश्च पुष्कलान् भुक्त्वा मन्त्रविन्मन्त्रवैभवात ।
परं पदमवाप्नोति देहत्यागे न संशयः ॥ ७४ ॥

निगमादिं कौस्तुभं च गोपनं बिन्दुमैन्दवम् ।
विक्रमं वैधरं पुण्यं रामं [1]शुक्लसमाह्वयम् ॥ ७५ ॥

वैराजमग्निमाकारं स्पर्शनं विष्णुमस्तकम् ।
नत्यन्तमुद्धरेन्मन्त्रमेवमक्षस्रजः सुधीः ॥ ७६ ॥

अक्षमालाधरं ध्यायेद्द्विभुजं स्फटिकप्रभम् ।
अलङ्कृतं पीतवस्त्रं पद्मविष्टरसंस्थितम् ॥ ७७ ॥

वरदाभयदाकारं मन्त्रस्य च जपस्तथा ।
मन्त्री च महदाप्नोति [2]फलमत्यन्तदुर्लभम् ॥ ७८ ॥

उद्गीथं सुभगं शङ्खमूर्ध्वयष्टिमनन्तरम् ।
धनदं च हृषीकेशं मन्दरं ब्रह्मसाधनम् ॥ ७९ ॥

बहुलं चैकनेत्रं च पद्मान्तं बन्धुमस्तकम् ।
अनलं गोपनं शङ्खमचामादिं नतिं ततः ॥ ८० ॥

धूपपात्रमनुः प्रोक्तो घण्टामन्त्रः प्रवक्ष्यते ।
आम्नायादिं क्षितिधरं हृषीकेशं रविं तथा ॥ ८१ ॥

---

1. शुक्लोदयाह्वयम् M_1 2. पद M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]गुहालयं च नासिक्यं पद्मपाणिं प्रचण्डकम् ।
[2]झषाकारेण संयुक्तं चतुर्गतिं नमस्कृतिः ॥ ८२ ॥

कथितं च मनुर्ब्रह्मन् दीपपात्रस्य कथ्यते ।
उद्गीथं [3]ककुभं चादिं गदध्वंसमर्चां मुखम्[4] ॥ ८३ ॥

पावकं विजयं जन्महन्तारं ब्रह्मसाधनम् ।
वैराजं विक्रमपरमनलं च गुहालयम् ॥ ८४ ॥

पश्चिमं चादिदेवं च श्वसनं नतिशीर्षकम् ।
दीपपात्रस्य कथितो [5]मनुः सम्प्रति कथ्यते ॥ ८५ ॥

ब्रह्मकोशमुखं ब्रह्मन् सप्तार्णं तदनन्तरम् ।
शशाङ्कं श्रीधरं दृष्टिमादिलक्ष्मीं हुताशनम् ॥ ८६ ॥

लम्बोधरं चादिदेवं दरं विष्णुं च माधवम् ।
नभोमणिमथो रामं पुलहं चादिमत्तथा ॥ ८७ ॥

वक्रतुण्डं विधातारं वक्रतुण्डमर्चां मुखम् ।
कमलं त्वृतधामानं यान्तश्च मधुसूदनम् ॥ ८८ ॥

मुसलं गोपनयुतं श्वसनं ककुभं ततः ।
अमृतं [6]पीतवर्णाभं हुम्फट्कारं ठठान्तिमम् ॥ ८९ ॥

शुक्लं मुखं सबिन्दुं च बीजमेवं समुद्धरेत् ।
तारं करालमाकारं पुलहं चादिमत्तथा ॥ ९० ॥

वक्रतुण्डं विधातारं बहुलं मधुविद्विषम् ।
आदिं चतुर्गतिं हुम्फडित्यादि हृदयादिषु ॥ ९१ ॥

---

1. विजयं त्वथनासिकयं M_2 2. झषमाकार T, P_1, P_2 3. कमलं M_1
4. मवाङ्मुखम् M_2 5. मन्त्रः M_1 6. पूर्णवर्णाभं फट्कारान्तं M_2; पीतवर्णार्णं P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कालरुद्रोऽथ भगवानृषिश्छन्दः प्रकीर्तितम्[1] ।
[2]गायत्रं देवता चास्य हेतिराजस्सुदर्शनः ॥ ९२ ॥

जपेत् द्वादशलक्षं च सिद्धये मूलमन्त्रवत् ।
आदितः सप्तवर्णांश्च पूर्वोक्तान् शशिनं तथा ॥ ९३ ॥

श्रीधरं वैधरं विष्णुं श्रीवत्समनलं तथा ।
[3]भद्रहस्तादिदेवं च शंखादिं च चतुर्मुख ॥ ९४ ॥

सुदर्शनस्य कथितो द्वादशार्णात्मको मनुः ।
बीजमङ्गं यथापूर्वं द्रष्टाच कपिलःस्मृतः ॥ ९५ ॥

छन्दो विराड् देवता च हेतिराजः सुदर्शनः ।
[4]जपो द्वादशलक्षं च द्विषट्काक्षरवत् फलम् ॥ ९६ ॥

आम्नायादिं च नत्यन्तं सुदर्शनपदं ततः ।
चतुर्थ्यन्तं प्रयुन्जीत फलमष्टाक्षरे तथा ॥ ९७ ॥

ऋषिर्भवस्तथा छन्दो [5]गायत्रं [6]हेतिसंज्ञितम् ।
पूर्वोदितं द्विषट्कार्णं माधवीमादिमुद्धरेत् ॥ ९८ ॥

नभोमणिं चादिदेवं बकतुण्डमचांमुखम्[7] ।
करालमृतमग्निं च गोपनं ककुभं तथा ॥ ९९ ॥

अचांद्वयं गन्धवहं मुखं दक्ष चतुर्मुख ।
गोपतिं गोपनमथो जृम्भलं चादिमत्तथा ॥ १०० ॥

माहेन्द्रं यादसां नाथं द्विरदं पन्नगाधिपम ।
स्पर्शनं नृहरिं कुम्भं रामं सुभगमन्वतः ॥ १०१ ॥

---

1. प्रकीर्तितः P_1,P_2 2. गायत्री T,P_1,P_2 3. भद्रहस्तं चादिदेवं M_1
4. जपेद् M_1 5. गायत्री T,P_1 6. हेतिराडिनः M,P_2 7. वाङ्मुखम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राचेतस सयष्टिं च शुक्रमादिं दरं तथा ।
अमृतं बन्धुसहितं धनाध्यक्षमपां पतिम् ॥ १०२ ॥

नासिक्यं शशिनं चादिं मारुतं मन्दरद्वयम् ।
मुखं लक्ष्मीं तथैकाक्षं वसुं चैव गुहालयम् ॥ १०३ ॥

सयष्टिं कुञ्जरमुखं गोपनं शुभदं दरम् ।
माधवीं गोपतिं चैव गोपनं कालनेमिजित् ॥ १०४ ॥

माहेन्द्रं गोपनं शङ्खं ककुभं कुम्भसंज्ञितम् ।
पुलहं मुसलं कुम्भं [1]माहेन्द्रं भुवनाह्वयम् ॥ १०५ ॥

गदध्वंसं हुतवहं वैराजं मृगवल्लभम् ।
जन्मध्वंसं [2]शशधरमेणेशं च ठठान्तिमम् ॥ १०६ ॥

बीजमङ्ग यथापूर्वमृषिः स्यान्नीललोहितः ।
यष्टिच्छन्दश्च कथितो देवता हेतिराडसौ ॥ १०७ ॥

जपेल्लक्षत्रयं मन्त्री [3]जपस्यास्य च वैभवात् ।
निग्रहेऽनुग्रहे शक्तिः स्तम्भविद्वेषणादिकृत् ॥ १०८ ॥

चलाचलसमुद्रादिशोषणं कम्पनं तथा ।
तत्कटाक्षविनिक्षेपात् सृष्ट्यादीनां विधिर्भवेत् ॥ १०९ ॥

सुदर्शनमहामन्त्रं वक्ष्यामि चतुरानन ।
[4]मातृकाचक्रमालिख्य समभ्यर्च्य यथाविधि ॥ ११० ॥

स्वीकृत्य द्वादशार्णं च वक्रतुण्डमचांमुखम् ।
करालमग्निसहितं गोपनं मारुतं ततः ॥ १११ ॥

---

1. नत्यन्तं M_2 2. शशिधरं M_1 3. जपः स्यात्सिद्धिवैभवात्
4. मातृकां च समालिख्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पश्चिमं पावकं खड्गमनलं च कृशानुकम् ।
विधातारं चादिदेवं पुलहं मधुसूदनम् ॥ ११२ ॥

दरं हुतवहं तार्क्ष्यं द्विर्वसुञ्च समुद्धरेत् ।
पाटलप्रियमाकारं दरं ध्रुवसमन्वितम्[1] ॥ ११३ ॥

लक्ष्मीं मुखं च वैराजमग्निं भुवनशीर्षकम् ।
द्विरदाननमाकारं कमलां मधुसूदनम् ॥ ११४ ॥

स्पर्शनं वैधरं चादिमनलं वैधरं तथा ।
अमृतं चादिदेवं च माहेन्द्रं च समीरणम् ॥ ११५ ॥

शुक्लं मुखं भास्करं च कमलं विक्रमं तथा ।
अनलं सुमुखं विष्णुं पद्मनाभविनायकौ ॥ ११६ ॥

जन्मध्वंसं च कलशं पुलहं बन्धुसंमितम् ।
वैराजं शुभदं रामं खर्वदेहं हुताशनम् ॥ ११७ ॥

वैधरं ऋतधामानं नृहरिं मृगवल्लभम् ।
पवित्रमृतधामानं माधवं भुजगं ततः ॥ ११८ ॥

चुतुर्गतिं तथा दृष्टिं चादिदेवं हुताशनम् ।
भुवनं चण्डमत्रिं[2] च ऊकारं कमलोद्भव ॥ ११९ ॥

क्रोधरूपं दिनमणिं विघ्नेशं मधुसूदनम् ।
एकाक्षं मन्दरं पद्मं वैधरं गोपतिं तथा ॥ १२० ॥

पश्चिमं वक्रतुण्डं च खड्गं गोपनमन्वतः ।
भूधरं [3]मारुतं स्पर्शं तृतीयं [4]ककुभं तथा[5] ॥ १२१ ॥

---

1. विष्णुसमन्वितम् M_1 2. मन्त्रिं M_1 3. मघवम् M_2
4. ककुभाद्वयम् M_2 5. ततः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यान्तं च विजयंत्वग्निं[1]माकारं श्वेतरोचिषम् ।
[2]आदिं दरं तथेन्द्रं च विजयं ज्वलनं तथा ॥ १२२ ॥

श्रीधरं च गदध्वंसं भुवनं च हुताशनम् ।
उदयं चतुर्गतिं विघ्ननायकं [3]त्वेकचक्षुषम् ॥ १२३ ॥

स्वाहाधवं [4]गोपनं च यष्टिं च कमलालयम् ।
वक्रतुण्डं चोर्ध्वलोकं प्रचण्डं वसुमस्तकम् ॥ १२४ ॥

मारुतं वरुणं चाग्निं पश्चिमं [5]स्वान्तमब्जज ।
पवित्रमृतधामानं मारुतोदयसंज्ञितौ ॥ १२५ ॥

विरिञ्चिविजयौ [6]चाग्नि देवमन्दरश्रीधरौ ।
[7]मारुतात् षष्टमन्त्रं च पद्मां विजयमादिमत् ॥ १२६ ॥

यष्टिं लक्ष्म्यास्तृतीयं च शिखण्डं ब्रह्मसाधनम् ।
[8]खेटकं मारुतं पापहननं पावकं ततः ॥ १२७ ॥

शशाङ्कं विक्रमं [9]चार्तिदण्डनं विक्रमं तथा ।
अर्धेन्दुशेखरं पश्चात्पश्चान्तमृतधाम च ॥ १२८ ॥

नभोमणिं पवित्रं च पवनान्तं च मन्दरम् ।
गजाननं च विजयं दहनं बिन्दुशेखरम् ॥ १२९ ॥

नीहारदीधितिं यष्टिं स्वान्तं चैवाग्नि[10]सप्तमम् ।
माधवीमिन्दुयान्तौ च दक्षं च मधुविद्विषम् ॥ १६० ॥

अर्धेन्दुमिन्दुमाकारं मन्दरं मायया युतम् ।
क्रोधरूपं हुतवहं भुवनं पुण्यविक्रमौ ॥ १३१ ॥

---

1. वह्नि M_1 2. आदिदेवं A, M_2 3. ए M_1 4. गोधनं M_2
5. ता M_1 6. चादिदेवं श्रीधरमन्दरौ M_1 7. मरुतां षष्ठमादिं च M_1 मरुता त्रिषुमन्त्रं च T 8. खेटकीं T 9. चाग्निं गदिनं M 10. सप्तकम् A,T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यान्तं सुभद्रमोङ्कारं मुसलं द्विरदाननम् ।
धनदं विक्रमं स्पर्शं गोपनञ्च चतुर्गतिम् ॥ १३२ ॥

वैराजं वामनं तार्क्ष्यं प्रचण्डं श्वेतदीधितिम् ।
विक्रमं वैधरं पुण्यं प्रचण्डं कुञ्जराननम् ॥ १३३ ॥

एकनेत्रं हुतवहं मधुसूदनसंज्ञितम् ।
यान्तोदयौ शुक्रलोकौ बहुलं ब्रह्मसाधनम् ॥ १३४ ॥

सप्रार्चिं श्रीधरं [1]त्रिन्द्रं यष्टिं [2]पञ्चान्तकं तथा ।
यान्तं चाग्निद्वितीयं च मन्दरं पवनद्वयम् ॥ १३५ ॥

भद्रपाणिमथैकाक्षं यान्तं च मधुविद्विषम् ।
लम्बकुक्षिं च विजयं शिखिनं मन्दरं तथा ॥ १३६ ॥

सर्वरोधं भद्रबाहुं माधवं कमलं ततः ।
नासिक्यं खर्वदेहं च वक्रतुण्डं सरोरुहम् ॥ १३७ ॥

यान्तं कुशेशयं कुम्भं सुमुखं द्वि(स्स)मुद्धरेत् ।
ओतदेहं [3]तथादिं च श्वसनं विजयं तथा ॥ १३८ ॥

करालमग्निवदनं मुखं पावकगोपनौ ।
नीहारदीधितिं चैव चषकं हव्यवाहनम् ॥ १३९ ॥

विघ्नेशं गोपनं चाग्नि मधुसूदनमारुतौ ।
चण्डं हुतवहं रामं पुलहं बन्धुशीर्षकम् ॥ १४० ॥

सुधामयमिकारं च माहेन्द्रं रामशीर्षकम् ।
स्पर्शान्तं विक्रमाद्यञ्च नत्यन्तं बन्धुमस्तकम् ॥ १४१ ॥

---

1. चेन्द्रं M_2 2. पञ्चांशकम् A_2 3. तदादिं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खङ्गं त्रिविक्रमं पीतवर्णाभं च त्रिविक्रमम् ।
माधवीं सर्वरोधं च [1]वैधरं मन्दरद्वयम् ॥ १४२ ॥

यान्तार्णाग्निरथं पश्चाद्यान्तं गोपनमस्तकम् ।
विहगेशं श्वेतरोचिं मुखं हुतवहं तथा ॥ १४३ ॥

श्रीधरं चैकनयनं पश्चिमं [2]बन्धुमस्तकम् ।
श्रीवत्सं चादिदेवान्तं प्रचण्डं कमलाभिधम् ॥ १४४ ॥

अथोर्ध्वलोकं श्रीवत्सं मन्दरं मधुविद्विषम् ।
प्रचण्डं पुण्डरीकाक्षं शुभदं च सरोरुहम् ॥ १४५ ॥

भुवनं गजमुखं बन्धुं बहुलं मृगवल्लभम् ।
अमृतं चैकनयनं पञ्चबिन्दुं सुधामयम् ॥ १४६ ॥

विक्रमं कुञ्जरमुखं गोपनं [3]धूलिकेतनम् ।
करालं जन्मविध्वंसं [4]कुलिशं च हुताशनम् ॥ १४७ ॥

शशाङ्कमादिं यान्तं च वरुणं पुलहं तथा ।
हृषीकेशं तथैकाक्षं वरुणं बन्धुशीर्षकम् ॥ १४८ ॥

क्रोधरूपं [5]गोपतिं च दान्तं मन्दरगोपनौ ।
शिखिनं स्पर्शन चादिं षट्कृत्वः पुलहं क्षिपेत् ॥ १४९ ॥

जयं सदागतिं बन्धुं पीयूषं विक्रमाभिधम् ।
हिरण्यगर्भमनलं मन्दरद्वयमब्जज ॥ १५० ॥

[6]पुण्डरीकाक्षमग्न्यन्तं विजयं रामशीर्षकम् ।
नभोमणिं चादिदेवममृतं मायया युतम् ॥ १५१ ॥

---

1. मन्दरं वैधरद्वयम् M_1 2. बन्धुसप्तकम् T 3. धूमकेतनम् M_1
4. कलशं M_1 5. गोपनं A, M_2 6. सुमुखं पुण्डरीकाक्षं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अत्रिं च धनदं कुम्भंद्वयमर्धेन्दुमादिमत् ।
हस्तिवक्त्रं च कमलमनलं च सुधामयम् ॥ १५२ ॥

अग्निं च गोपनं मान्तं श्रीधरं सुभगं तथा ।
स्पर्शत्रयं बृहद्भानुं गोपनं सुमुखं ततः ॥ १५३ ॥

माधवीं वासुदेवं च वैधरं माधवाह्वयम् ।
सुभद्रं चन्द्रधवलं मुसलं च द्विरुच्चरेत् ॥ १५४ ॥

ब्रह्मन्ननन्तरं तस्य मारुतं मधुविद्विषम् ।
कुम्भं [1]सविक्रमं लक्ष्मीं सुधादीवितिविक्रमौ ॥ १५५ ॥

क्रोधरूपं प्रचण्ड च भुवनं वक्रतुण्डकम् ।
करालं शिखिनं दक्षं भद्रहस्तं तथोदरम् ॥ १५६ ॥

ओषधीशं तथा दक्षं पावकं च ठठान्तिमम् ।
बीजमङ्गं यथापूर्वमृषिर्दक्षः प्रजापतिः ॥ १५७ ॥

छन्दोऽतिच्छन्द एतस्य देवता च सुदर्शनः ।
सप्ताधिका सप्ततिश्च वर्णानां द्वे शते समे ॥ १५८ ॥

जपेन सिध्यति मनुर्लक्षद्वादशसंख्यया ।
कृष्णपक्षे चतुर्दश्यामुपोष्य प्रयतात्मवान् ॥ १५९ ॥

निशीथे दृढधीर्मन्त्री श्मशाने वा चतुष्पथे ।
जपेद्भूतादयस्तस्य प्रत्यक्षाः सर्वकामदाः ॥ १६० ॥

महासुदर्शनं मन्त्रमपरं कथयामि ते ।
द्विषट्काक्षरमुद्धृत्य गोपतिं मृगवल्लभम् ॥ १६१ ॥

---

1. त्रिविक्रमं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैराजं विक्रमपरमनलं[1] मधुसूदनम् ।
[2]गदध्वंसमचामादिं दक्षं दिनकराह्वयम् ॥ १६२ ॥

गोपनं धृतिमन्तं च पुलहं पश्चिमाननम् ।
ऋतधामा दिनमणिं पावकं सुमुखं ततः ॥ १६३ ॥

अमृतं ककुभं पद्मनाभं [3]गोपतिमञ्जज ।
सुभगं बन्धुशिरसं पवित्रं विजयं तथा ॥ १६४ ॥

चतुर्गतिं देवदत्तं पश्चिमं बन्धुमस्तकम् ।
प्रचण्डं पुण्रीकाक्षं गोपनं वैधराह्वयम् ॥ १६५ ॥

सरामं चैकनेत्रं च मारुतं ब्रह्मसाधनम् ।
अत्रिं चतुर्गतिं श्वेतदीधितिं च स्वर दिमत् ॥ १६६ ॥

विघ्नेशद्वितयं पश्चान्मायामस्तकमुद्धरेत् ।
सुभद्रं सूदनं शङ्खं वैधरं पद्मबिन्दुकम् ॥ १६७ ॥

पश्चिमं चैकनयनं सूदनं गदिनं तथा ।
भद्रबाहुं सरामं च ककुभं कुम्भगोपनौ ॥ १६८ ॥

माहेन्द्रं सूदनं विश्वरूपं भूधरमञ्जज ।
शुभदं विजयं शुक्लं गोपनं श्वेतदीधितिम् ॥ १६९ ॥

ऋतं च सूदनं यान्तं देवरं मन्दरोदयौ ।
भृगुं खड्गधरौ द्वौ च माधवं भुवनाह्वयम् ॥ १७० ॥

आकारं वक्रतुण्डं च वैधरं श्रीधरं तथा ।
उग्रात्मानं पवित्रं च पद्मनाभं च माधवम् ॥ १७१ ॥

---

1. यान्तं च; वामनं A 2. जन्म M_1 3. गोपनं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नृहरिं सूदनं शुक्रं भुवनं बहुलद्वयम् ।
तार्क्ष्यं झषं [1]गोपनं च कमलं बन्धुमस्तकम् ॥ १७२ ॥

विघ्नेशं वामनमपरं सुभद्रं सगुहालयम् ।
एकनेत्रं चादिदेवं पश्चिमाननमब्जज ॥ १७३ ॥

शुक्रं दक्षं सूदनं च यान्तं पश्चिमवक्त्रकम् ।
ऋतधामं तथा दक्षं सर्वरोधं सपश्चिमम् ॥ १७४ ॥

विक्रमं शुभदं चादिदेवं खड्गधरं तथा ।
चतुर्गतिं वासुदेवं गदध्वंसं सविक्रमम् ॥ १७५ ॥

भद्रहस्तं पञ्चबिन्दुमोषधीशं करालकम् ।
विघ्नेशं वैधरं कुम्भं विक्राममनन्तरम ॥ १७६ ॥

कुञ्जराननमाकारं चतुर्गतिमर्चां मुखम् ।
[2]शिखिनं मानुषेशं च नृहरिं स्पर्शषोडशीम् ॥ १७७ ॥

ऋतधामोतदेहं च भद्रबाहुमनन्तरम् ।
अर्चा द्वितीयं दृष्टिं च गदिनं पद्मनाभकम् ॥ १७८ ॥

मार्ताण्डं सूदनं विघ्ननायकं विजयं तथा ।
पद्मनाभं [3]गोपनं च शुक्रमादिं दराह्वयम् ॥ १७९ ॥

तत्समष्टिं द्विरुच्चार्य सोममादिं सयष्टिकम् ।
भास्करं पावकं चैव द्विर्वक्तव्यं तदक्षरम् ॥ १८० ॥

पीयूषं विक्रमं पुण्यं कलशं यष्टिशीर्षकम् ।
शशाङ्कमादिं शङ्खं च पूर्ववत् कमलोद्भव ॥ १८१ ॥

---

1. गोपति M_2 2. शङ्खिनं M_1 3. गोपतिं M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पीयूषं रामशिरसं स्पर्शानामपि षोडशम् ।
ऋतं च सूदनं शुक्ल[1]मत्रिञ्चैव यथापुरम् ॥ १८२ ॥

तार्क्ष्यद्वयं च कमलां विजयं ऋतधाम च ।
हृषीकेशं तथा भद्रद्वयं मधुनिषूदनम् ॥ १८३ ॥

श्रीवत्सं चादिमनलं च श्रियःपतिमनन्तरम् ।
पद्मान्तकं पद्मनाभमेकाक्षं मृगवल्लभम् ॥ १८४ ॥

जन्मध्वंसं श्वेतरश्मिमेणेशं दृष्टिवामनौ ।
सुभद्रं बन्धुशिरसं स्पर्शानां षोडशाक्षरम् ॥ १८५ ॥

विक्रमं चैकविंशं च बन्धुं तन्मस्तकस्थितम् ।
मुमुक्षं पवनाह्वानं ब्रह्मसाविजयाह्वयम् ॥ १८६ ॥

दहनं भद्रममृतं मतिमन्तं च सूदनम् ।
विक्रमं माधवीमग्निं वासुदेवं चतुर्मुख ॥ १८७ ॥

भल्लायुधं श्रीधरं च मुसलं प्रेतनायकम् ।
माधवं वैधरं विघ्ननायकं द्वितयं तथा ॥ १८८ ॥

अर्चां द्वितीयं पद्मान्तं विष्कम्भं द्विरदाननम् ।
धरित्रीं कमलाक्षं च सूक्ष्मदृग्बन्धुमस्तकम् ॥ १८९ ॥

वक्रतुण्डं मानुषेशमप्रमेयं वनस्रजम् ।
प्रचण्डं गोपनं शुक्लं भुवनं बहुलं तथा ॥ १९० ॥

विघ्नेशं वैधरं प्रेतनायकं माययायुतम् ।
हैरम्बं वैधरं चादिं पश्चिमं ऋतधामकम् ॥ १९१ ॥

---

1. उग्रं चैव M_2 ; वायुं चैव M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विजयं रामशिरसं भास्करं विजयाह्वयम् ।
अत्रिं मृगेशं वरुणं गोपनं श्वेतदीधितिम् ॥ १९२ ॥

श्रीधरं बहुलं पीतं जृम्भलं मोहनाशनम् ।
पश्चिमं भुवनं विघ्ननायकं द्वितयं तथा ॥ १९३ ॥

अचां द्वितीयं कमलमादिं शङ्खं विनायकम् ।
पश्चिमं भुवनं बिन्दुं शशाङ्कं द्विगुणं तथा ॥ १९४ ॥

भद्रबाहुं परामं च सुधादीधितिगोपनौ ।
यान्तं समीरणं चादिं पश्चिमं जातवेदसम् ॥ १९५ ॥

अमृतं विक्रमपरं वैधरं [1]चानलं वसु ।
[2]गोपनं विजय विघ्ननायकं विजयाह्वयम् ॥ १९६ ॥

ऋतधामं सरसिजं पद्मनाभं पितामह ।
वैराजं श्वसनं चादिदेवं भल्लायुधं करम् ॥ १९७ ॥

श्वसनं प्रणवादिं च विघ्नेशं [3]सर्वविक्रमौ ।
करालमृत[4]धामान्तं विजयं घनसंज्ञितम् ॥ १९८ ॥

स्वच्छन्द[5]मथदृष्टिं च चतुर्गतिमनन्तरम् ।
शशाङ्कं फुल्लनयनं वासुदेवं च खेटकम् ॥ १९९ ॥

शङ्खं पुलहमोङ्कारं मार्ताण्डं पश्चिमाननम् ।
क्रोधं वनजं भूमिं नासिक्यं श्वेतदीधितिम् ॥ २०० ॥

षोडशं कपिलं [6]भानुं चतुर्गतिमनन्तरम् ।
विधातारं तथा शैलं विजयं कमलोद्भव ॥ २०१ ॥

---

1. चानिलं तथा M_2; गोपनं M_1 2. कपिलं M_1 3. शर्वं M_2
4. मृतधामानं 5. माधवं दृष्टिं A; मधुदृष्टिं M_1 6. भद्रं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अचांत्रयोदशं चाग्निं कमलं चन्द्रदीधितिम् ।
वक्रतुण्डं चादिदेवं शङ्खं पीत[1]मचां मुखम् ॥ २०२ ॥

पूर्णचन्द्रं तथा दक्षं भुवनं वैधरात्मकम् ।
पद्मनाभं ध्रुवं लक्ष्मीं ब्रह्मसाधनसंज्ञितम् ॥ २०३ ॥

क्रोधरूपं दरं चादिं माधवं गोपतिं तथा ।
विक्रमं माधवं भानुं सरामं सूक्ष्मलोचनम् ॥ २०४ ॥

गदध्वंसं च पीयूषं विघ्नेशं पश्चिमाननम् ।
अचांद्वितीयं शुभदं सूदनं यष्टिशीर्षकम् ॥ २०५ ॥

करालं श्रीधरं लक्ष्मीं मृगेशं द्विरदाननम् ।
पद्मपाणिं भूधराख्यं द्वयं [2]वैधरमाधवी ॥ २०६ ॥

पश्चिमं पवनं लक्ष्मीं ब्रह्मसाधनसंज्ञितम् ।
क्रोधरूपमचामादिं स्पर्शनं दक्षगोपनौ ॥ २०७ ॥

यान्तं चतुर्गतिं पापहननं बहुलं तथा ।
वक्रतुण्डं करालं च [3]ककुभं ऋतधाम च ॥ २०८ ॥

भद्रबाहुं [4]चलध्वंसं मृगेशं दृष्टिमादिमम् ।
द्विरदाननयष्टिं चानलं गोपनाह्वयम् ॥ २०९ ॥

[5]सध्रुवं पुलहं बिन्दुं माहेन्द्रं मधुसूदनम् ।
अर्धचन्द्रं तथा चन्द्रं नासिक्यं तद्विरुद्धरेत् ॥ २१० ॥

शशाङ्कमृतधामानं सूदनं यष्टि[6]शीर्षकम् ।
तद्द्विरभ्यस्य [7]शीतांशुमर्पितं वसुमस्तकम् ॥ २११ ॥

---

1. मवाङ्मुखम् M_1 2. भूधर M_2 3. ऋतधाम च धाम च M ; ऋतधामविदर्भितम् M_1 4. गदध्वंसं M_1 5. बिन्दूलं M_1 6. मस्तकम् M_1 7. शीतांशु भुवनं वसुमर्पितम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुलहं वासुदेवाख्यं स्रष्टारं द्विरदाननम् ।
विक्रमं [1]बहुलं ब्रह्मन् गोपनं पुलहं तथा ॥ २१२ ॥

प्रचण्डं अन्मविध्वंसं विघ्नेशं च [2]तृतीयकम् ।
अर्चां [3]दृष्टिं द्वितीयान्तं भद्रबाहुं पवित्रकम् । २१३ ॥

ऋतं चक्रारद्विरदं चाननं मन्दराह्वयम् ।
प्रद्योतनं गोपनं च शशाङ्कं च श्रियःपतिम् ॥ २१४ ॥

वैधरं शुभदं चाग्निं श्रीवत्सं ब्रह्मसाधनम् ।
सुमुखं विक्रमपरं विजयं मुखमब्जज ॥ २१५ ॥

अत्रिं सरामं पश्चान्तं सुभगं मधुसुदनम् ।
यष्टिं करालमाकारं चतुर्गतिमनन्तरम् ॥ २१६ ॥

अपांपतिं श्वेतरश्मिं श्रियःपति[4]मतः परम् ।
स्तम्बेरमाननं मायां कलशं [5]दीप्तरोचिषम् ॥ २१७ ॥

सुभगं गोपनं यान्तं गोपनं पश्चिमाननम् ।
हृषीकेशं वसुं शङ्खं गोपनद्वितयं पुनः ॥ २१८ ॥

यष्टिबीजं द्विरुच्चार्य तिग्मदीधिं[6] पवित्रकम् ।
ऋतधामं तथैकाक्षं विक्रमं बहुलाह्वयम् ॥ २१९ ॥

गदध्वंसं तथैकाक्षं विक्रमं बहुलाह्वयम् ।
[7]गुहालयं [8]पापहननमृतं मधुविद्विषम् ॥ २२० ॥

रोचिः श्रियःपतिं कान्तं वैधरं माधवं तथा ।
पीयूषमादिं कमलमशिवं[9] धनदाह्वयम् ॥ २२१ ॥

---

1. पुलहं M_1 2. द्वितीयकम् M_1 3. दृष्टिद्वयं यान्तं M^1
4. मनन्तरम् M_1 5. सप्त M_2 6. द्युतिं M_1 7. गुहाश्रयं M_2
8. पापहरम M_1 9. नलं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋतधाम तथैकाक्षमचामेकादशं तथा ।
द्विरुद्धरेत् कामबीजं वैधरं [1]तूदयाह्वयम् ।। २२२ ।।

गदध्वंसं तथैवाग्निमस्तकस्थं पवित्रकम् ।
गोपनं विजयं चादिदेवं विष्कम्भसंज्ञितम् ॥ २२३ ॥

त्रिदशाकारमेकारं[2] श्वेतांशुं विक्रमं तथा ।
गजवक्त्रं सूदनं च कपिलाक्षमनन्तरम् ॥ २२४ ॥

तृतीयं ककुभं द्वन्द्वमस्तकस्थं[3] वसुं पुनः ।
जन्मध्वंसं च जलजं [4]सुधादीधितिविक्रमौ ॥ २२५ ॥

[5]कलशं पुरुषात्मानं गहनं पद्मनाभकम् ।
भास्करं सुमुखं ब्रह्मन् भुवनं विजयं वसु[6] ।। २२६ ॥

द्रुहिणं ऋतधामानं भूधरे क्रोधनं ततः ।
स्वर्शानां षोडशार्णञ्च [7]कुम्भेशं मुसलं ततः ॥ २२७ ॥

नीहारदीधितिमचामेकादशमतः परम् ।
[8]ज्वलनं मानुषघ्नं च विघ्नेशं गोपनाह्वयम् ॥ २२८ ॥

श्रीवत्सं जलजं शुक्रमचामादिं सरोरुहम् ।
चतुर्गतिं भद्रहस्तं विजयं पद्मनाभकम् ॥ २२९ ॥

हेरम्भं गोपनं चैव गादिनं कलुषापहम् ।
अचां द्वितीयं कमलं गोपनं वित्तवर्धनम् ॥ २३० ॥

[9]हरिणाननमाये द्वे ककुभं वरुणाह्वयम् ।
ब्रह्मन् पञ्चान्तकमतः धृतवासुमतः परम् ॥ २३१ ॥

---

1. वरुणाह्वयम् M_2 2. माकारं M_1; मैकारं T 3. मस्तकं सरसं पुनः M_1 4. सुधानिधित्रि M_1 5. मुसलं M_2 6. सुखम् M_2 7. मृगेशं A 8. अनलंमानुषेशं M_2 9. वारणानन M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैराजमग्निं नृहरिं ब्रह्मसाधनसंज्ञकम् ।
सुभद्रं सुमुखं कुम्भं मारुतं चोतदेहकम् ॥ २३२ ॥

दक्षं दाक्षायणीकान्तं मन्दरं पञ्चबिन्दुकम् ।
धूमध्वजं प्रचण्डं च सूदनं [1]कतृतीयकम् ॥ २३३ ॥

[2]हरिवक्त्रं रामसंज्ञं दृष्टिविक्रममब्जज ।
शुभदं कपिलं ह्रस्वं[3] भद्रहस्तं समीरणम् ॥ २३४ ॥

नीहारदीधितिमचामादिं कुम्भं हुताशनम् ।
शुक्लमोङ्कारसंयुक्तं सुभद्रं मधुसूदनम् ॥ २३५ ॥

स्पर्शं तृतीयमनलं विजयं सप्तमीं कलाम् ।
विक्रमं सूक्ष्मदृष्टिं च श्रीधरं यादसां पतिम् ॥ २३६ ॥

हेरम्बं वासुदेवं च भद्रहस्तं[4] च माधवीम् ।
अर्चाद्वितीयं [5]दृष्टिं च कमलं बहुलं तथा ॥ २३७ ॥

स्पर्शान्तं भुवनं चक्रं भृगुं ककुभसंज्ञितम् ।
नभोमणिं विक्रमं च पाटलं मधुविद्विषम् ॥ २३८ ॥

भल्लायुधं बन्धुशीर्षं विघ्नेशं वैधराह्वयम् ।
वक्रतुण्डमचामादिं कमलं पीठपूर्वकम् ॥ २३९ ॥

गोपनं मानुषं चैव [6]पुलहं बन्धुह[7]स्तकम् ।
ओतदेहं तथापीतं जन्मध्वंसं त्रिविक्रमम् ॥ २४० ॥

गोपतिं वरुणं विघ्ननायकं ऋतधामकम् ।
एकाक्षं मारुतं चादिदेवं बहुलमस्तकम् ॥ २४१ ॥

---

1. सत्तृतीयकम् M_1 2. करि M_1 3. ब्रह्मन् M_1 4. बाहुं M_1
5. दृष्टिं M_2 6. पुलहद्वयमस्तकम् M_2 7. मस्तकम् T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]पवनं सूक्ष्मदृक् प्रोक्तं सुदनं च चतुर्गतिम् ।
सुभद्रं च बृहद्भानुं गदिनं वरुणं मुखम् ॥ २४२ ॥

जयं कुम्भेशमखिलमृतं भुवनसंज्ञितम् ।
दृष्टिं च धनदं दक्षं हृषीकेशं जयाह्वयम् ॥ २४३ ॥

शशाङ्कं भुवन चादिं कमलामद्रिमस्तकम् ।
विघ्नेशं पश्चिमं बन्धुं नासिक्यं गदिनं तथा ॥ २४४ ॥

माहेन्द्रं शशिनं देवदत्तं लक्ष्मीं श्रियः पतिम् ।
[2]पद्मान्तकं पद्मनाभं गोपनं विघ्ननायकम् ॥ २४५ ॥

अमृतं समीरणमचां द्वितीयं पश्चिमाननम् ।
वैराजं माधवीमूर्ध्वलोकेशं विजयद्वयम् ॥ २४६ ॥

वहुलं समीरणं देवदत्तं मन्दरगोपनौ ।
गोपनं चौषधीशं च भुवनं वैधराह्वयम् ॥ २४७ ॥

श्रीवत्समग्निं विघ्नेशं गोपनं च चतुर्गतिम् ।
हुम्फट्कारं ठठान्तं च [3]मनुमेवं समुद्धरेत् ॥ २४८ ॥

बीजाङ्गानि यथापूर्वमृषिः स्यान्नीललोहितः ।
छन्दश्च वरिवस्संज्ञं देवता च सुदर्शनः ॥ २४९ ॥

अष्टलक्षं जपेद्ब्रह्मन् पाताले दिवि वा भुवि ।
गतिर्न प्रतिहन्येत मन्त्रिणो मन्त्रवैभवात् ॥ २५० ॥

सुदर्शन नृसिंहाख्यं मन्त्रं ब्रूमि चतुर्मुख ।
उद्गीथं नृहरिं पद्मनाभं सङ्कर्षणाह्वयम् ॥ २५१ ॥

---

1. पावनं M_2 2. पद्मात्मकं T 3. मन्त्र M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नासिक्यं शुक्रमादिं च गोपतिं प्रणवादि च ।
नीहारदीधितिं पद्मनाभं च मधुविद्विषम् ॥ २५२ ॥

अनलं ककुभं कुम्भं गोपनं [1]पुलहात्मकम् ।
अर्चाद्वितीयं स्पर्शान्तं सूदनं पुलहाह्वयम् ॥ २५३ ॥

विक्रमं कुञ्जरमुखं [2]माधवं तस्य मस्तके ।
मार्ताण्डं भद्रहस्तं च द्विरुच्चार्य प्रभाकरम् ॥ २५४ ॥

श्रीधरं कपिलाक्षं च फट्कारं खेटकीं ततः ।
ठठान्तमेवं कथितं द्वाविंशत्यक्षरात्मकम् ॥ २५५ ॥

बीजमङ्गानि चोक्तानि छन्दो गायत्रमीरितम् ।
द्रष्टा च जमदग्निः स्याद्देवता च सुदर्शनः ॥ २५६ ॥

सुदर्शनस्य हृदये विष्टितं नृहरिं हरिम् ।
स्फटिकाचलसङ्काशं परश्शतसटाकुलम् ॥ २५७ ॥

[3]प्रलयाम्बुदनिर्घोष गम्भीर [4]गहनध्वनिम् ।
शङ्खचक्रधरं द्वाभ्यां कराभ्यामितरौ पुनः ॥ २५८ ॥

प्रसार्य जानुनीभीमं नखदम्भोलि [5]भीषणौ ।
व्यत्यस्तचरणद्वन्द्वमासीनं पद्मविष्टरे ॥ २५९ ॥

भ्रुकुटीकुटिलं योगपट्टिकादृढबन्धनम् ।
व्यादाय वक्त्रकुहरं दंष्ट्रिणं स्फुरिताधरम् ॥ २६० ॥

त्रिणेत्रमखिलाकल्पकल्पितं ब्रह्मगर्जितम् ।
ध्यायेद्देवं च तन्मन्त्रं मन्त्री तरति दुर्गतिम् ॥ २६१ ॥

---

1. पुलहात्यजम् M_1 2. वामनं A 3. हाराद्यञ्जदनिर्घोषगम्भीर-भयदध्वनिम् A, M_2 4. भयद M_1 5. संमितौ M_1; निर्मितौ M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सकृत्स्मरणमात्रेण यथाभिलषितं फलम् ।
अन्येषु मन्त्रकल्पेषु यदुक्तं तत् समश्नुते ॥ २६२ ॥

वक्ष्यामि पाञ्चजन्यस्य मन्त्रं सर्वार्थसाधनम् ।
उद्गीथमादौ सप्तार्णानुष्टृत्य तदनन्तरम् ॥ २६३ ॥

पश्चिमं भुवनं चण्डं पुण्डरीकं हुताशनम् ।
महामायां करालं च गोपनं पन्नगाधिपम् ॥ २६४ ॥

सूदनं च तथा शङ्खं [1]कलशं मधुसूदनम् ।
मारुतं भुवनाह्वानं मन्दरं भुवनं ततः ॥ २६५ ॥

खर्वदेहं तथा चादिदेवं श्वसनमादिमत्[2] ।
वैधरं पञ्चबिन्दुं च पश्चिमं विजयं ततः ॥ २६६ ॥

यान्तं गुहालयं पापहननं मधुविद्विषम् ।
शङ्खं लक्ष्मीं तथायष्टिं खर्वदेहं च पश्चिमम् ॥ २६७ ॥

आदिदेवं महेन्द्रं च मधुसूदनशीर्षकम् ।
वायुं ठठान्तमुदितमिति प्रोक्तो मनुर्महान् ॥ २६८ ॥

श्रीवत्सो यष्टिरुद्गीथो बीजमेतत् प्रकीर्तितम् ।
अमुष्य सनको द्रष्टा छन्दः स्याद्बृहती मनोः ॥ २६९ ॥

देवता पाञ्चजन्यश्च चतुर्लक्षो जपस्स्मृतः ।
अतोऽन्यं पाञ्चजन्यस्य मन्त्रं शृणु चतुर्मुख ॥ २७० ॥

सप्तार्णमुद्धरेदादौ पश्चिमं मधुसूदनम् ।
भृगुं चन्द्रधरं खड्गधवलं ककुभाह्वयम् ॥ २७१ ॥

---

1. कमलं M_2 2. मादितः A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गजवक्त्रं तथा वायुमादिदेवसमीरणौ ।
पश्चिमं सप्तममर्चां सुमुखं निगमादिकम् ॥ २७२ ॥

पीयूषमन्त्रिं [1]सुभगं वरुणं मधुविद्विषम् ।
गजास्यमादिदेवं च श्वसनं श्वेतरोचिषम् ॥ २७३ ॥

वैधरं गोपनं चापि गदध्वंसं चतुर्मुखं ।
वैराजं विक्रमं दक्षं श्रीधरं ताक्ष्यर्वाहनम् ॥ २७४ ॥

गोपनं स्पर्शनं [2]जम्भहन्तारं सलिलाधिपम् ।
माहेन्द्रमादिं ज्वलनं तथार्चां षष्ठपञ्चमौ[3] ॥ २७५ ॥

गोपनं पश्चिमं गोपं पीतवर्णं मधुद्विषम् ।
श्वसनं च ठठान्तं च मनुरित्थमुदाहृतः ॥ २७६ ॥

बीजमङ्गानि [4]वै तस्य देवता चापि पूर्ववत् ।
विष्वक्सेनो ऋषिश्छन्दः सुप्रतिष्ठा पितामह ॥ २७७ ॥

पञ्चलक्षजपेनास्य साधको मन्त्रवैभवात् ।
अतलादिषु लोकेषु [5]चरन्न प्रतिहन्यते ॥ २७८ ॥

किं पुनर्धर्मकामार्थमोक्षाः कमलसम्भव ।
सप्तार्णमग्रे गोविन्दं गदिनं दृष्टिसूदनौ ॥ २७९ ॥

चुतुर्गतिं [6]चातिवीरं [7]भल्लायुधमर्चां मुखम् ।
अपां पतिं हुतवह [8]माकारं पश्चिमाननम् ॥ २८० ॥

रामं प्रचण्डं गोविन्दं ब्रह्मसङ्कर्षणावपि ।
मन्दरं वायुदेवाह्वं वैधरं विष्णुमस्तकम् ॥ २८१ ॥

---

1. सुमुखं M_2 2. चैव M_1 3. पाश्चमौ T, P_1, P_2 4. चे M_1
5. गतिर्न M_2 6. चादि T ; चाथ M_1 7. सुभगं गदिनं तथा M_1 8. मूकारं T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुशेशयधरे वीरसेनं हुम्फट् ठठान्तिमम् ।
इति कौमोदकीमन्त्रमुद्धरेद्बीजमस्य तु ॥ २८२ ॥

स्पर्श[1]द्वितीयमर्धेन्दुमेतेनैवाङ्गकल्पना ।
ऋषिः कृष्णस्तथा छन्दः पङ्क्तिः कौमोदकी पुनः ॥ २८३ ॥

देवता लक्षमन्त्रं च जपतः सिद्धिदो [2]भवेत् ।
आदावुध्दृत्य [3]चोङ्कारं गोपनं दृष्टिविक्रमौ ॥ २८४ ॥

वैराजं मारुतं पापहृननं [4]वसुमस्तकम् ।
वैराजं बन्धुशिरसं माधवीं सूदनं [5]दरम् ॥ २८५ ॥

पाटलप्रियमाकारं समीरण [6]मचां मुखम् ।
यान्तं गुहालयं ब्रह्मन् पश्चिमं बन्धुमस्तकम् ॥ २८६ ॥

सुमुखं देवदत्तं च हुम्फट्कारं ठठान्तिमम् ।
नादं पकारमूकारमर्धेन्दुशिरसं पुनः ॥ २८७ ॥

बीजं प्रकल्पयेद्ब्रह्मन् अमुनैवाङ्गकल्पना ।
द्रष्टा विरिञ्चिश्छन्दश्च विराट् पद्मोधिदेवता ॥ २८८ ॥

दशलक्षजपात् [7]ऋद्धिमखिलां प्राप्नुयान्नरः ।
इति पद्ममनुः प्रोक्तो बीजेनास्याङ्गकल्पना ॥ २८९ ॥

शुक्लं पुनर्विष्णुर्वह्नि पीयूषं गोपनाह्वयम् ।
सप्ताणोद्धरणात्पश्चान्मन्दरं [8]कमलासन ॥ २९० ॥

शशाङ्कमादिं पुलह गोपनं पवनं पुनः ।
ज्वलनं गोपनं दक्षं गोपनं कमलोद्भव ॥ २९१ ॥

---

1. द्वितय A 2. मनुः M_1 3. चोद्गीथं M_2 4. विजयं तथा M_2
5. ततः M_1 6. मधुद्विषम् M_1 7. सिद्धिरखिलं T, P_1, P_2 8. कमलाधरम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्गतिं च भुवनं सुमुखं मधुविद्विषम् ।
दरं सुखं ठठान्तं च मन्त्रविन्मन्त्रमुद्धरेत् ॥ २९२ ॥

मन्दरं भुवनं यष्टिं इति बीजमिदं मनोः ।
मुद्गलः स्यादृषिश्छन्दो विराण्मन्त्रस्य देवता ॥ २९३ ॥

मुसलः पञ्चलक्षं तु मन्त्रमस्य प्रचक्षते ।
उध्दृत्य सप्तवर्णांश्च हैरम्बं मधुसूदनम् ॥ २९४ ॥

[1]गजाह्वमत्रि कमलं मधुशत्रुं चतुर्गतिम् ।
विष्णुं शुक्रं पुनर्विष्णुं वह्निपीयूषगोपनाः ॥ २९५ ॥

शशाङ्कं भुवनं वह्निं श्रीवत्सं ब्रह्मसाधनम् ।
सुमुखं विक्रमं चापि विजयं वैधरं तथा ॥ २९६ ॥

रामं पञ्चान्तकं पुण्यं गोपनं यष्टिशीर्षकम् ।
पञ्चान्तकं गोपनं च श्वसनं हुङ्कृतिं तथा ॥ २९७ ॥

फट्कारं स्वाहयासार्धं खड्गस्य गदितो मनुः ।
चक्रमन्त्रस्य बीजं स्यात् ऋषिः श्रीनिधिरुच्यते ॥ २९८ ॥

छन्दो विराडधिपतिः [2]खड्गाख्यो हेतिराड् भवेत् ।
लक्षत्रयं जपेन्मन्त्री काङ्क्षितां सिद्धिमश्नुते ॥ २९९ ॥

सप्तार्णं कल्पयित्वादौ श्रीवत्सं मधुसूदनम् ।
शार्ङ्गहस्तं गदध्वंसं मधुसूदनशीर्षकम् ॥ ३०० ॥

ज्वलनं पवनादिं च वह्निं शुक्रमपांपतिम् ।
मधुसूदनपूर्णेन्दु भुवनं हव्यवाहनम् ॥ ३०१ ॥

---

1. गजास्य M_2 2. खड्गाह्वो M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पवित्रं सप्तममर्चां श्रियं मन्दरमादिमत् ।
विघ्नेशं गोपनं शङ्खं मुखं पश्चिमश्रीधरम् ॥ ३०२ ॥

बहुलं भुवनं क्रोधं त्रयोदशमर्चां तथा ।
हुताशमेकदृष्टी द्वौ मन्दरं पद्मसम्भव ॥ ३०३ ॥

पवित्रमृतधामानं वायुं यष्टिं मधुद्विषम् ।
चतुर्गतिं हुङ्कृतिं च फट्कारं च ठठन्तिमम् ॥ ३०४ ॥

हुम्फडन्तं मनुं कृत्वा बीजमाद्यर्णमुद्धरेत् ।
ऋषिर्हुतान्तो मन्त्रस्य छन्दश्छन्दोऽधिदेवदा ॥ ३०५ ॥

पाणौ जपन्नष्टलक्षं समरे विजयी भवेत् ।
ब्रह्मकोशं नतिं सर्गं कलात्मा कमलाह्वायम् ॥ ३०६ ॥

[1]माहेन्द्रं गोपनपरं शुभदं मधुविद्विषम् ।
शशाङ्कं श्रीधरं वह्निं वरुणं बन्धुमस्तकम् ॥ ३०४ ॥

विघ्नेशमादिदेवं च शुभदं गोपनं तथा ।
पवनं कूट[2]मौर्वं च नासिक्यं भास्करो मनुः ॥ ३०८ ॥

यष्टिं हुङ्कारफट्कारौ हुतान्तं मनुमुद्धरेत् ।
पीयूषमादिमर्धेन्दुं बीजं चामुष्य कल्पयेत् ॥ ३०९ ॥

शतदृग्दृष्टवान् मन्त्रं माच्छन्दो देवतापि च ।
पञ्चलक्षं जपेन्मन्त्रं विजयेत्तरसा रिपून् ॥ ३१० ॥

उद्गीथं पापघ्ननं गोपनं सध्रुवं मनुः ।
पश्चिमं गोपनं लक्ष्मीमादिदेवसमीरणौ ॥ ३११ ॥

---

1. यष्टिं हुङ्कारमाहेन्द्रं गोपनं M_1 2. मौर्वीं च T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नत्यन्तं कल्पयेन्मन्त्रं ऋषिः प्राचेतसःस्मृतः ।
छन्दो विराडधिपतिः पाशो लक्षत्रयं जपः ॥ ३१२ ॥

ब्रह्मकोशमचामादिं नासिक्यं सरसीरुहम् ।
भुवनं शुभदं पश्चादादिदेवं सदागतिम् ॥ ३१३ ॥

नत्यन्तमीरयेन्मन्त्रं द्रष्टा सत्यो विराट् पुनः ।
छन्दोऽङ्कुशो देवता स्याल्लक्षत्रयमिमं जपेत् ॥ ३१४ ॥

प्रणवादि चतुर्थ्यन्तं नामधेयं ठठान्तकम् ।
अन्येषामायुधानां च मन्त्रबीजमथादिमत् ॥ ३१५ ॥

सिद्धयश्च यथापूर्वं भवन्ति जपतोऽखिलाः ।
अतो वक्ष्ये मनुं ब्रह्मन् श्रूयतां कथ्यतेऽधुना ॥ ३१६ ॥

वश्याकर्षणविद्वेषमारणोच्चाटनादिषु ।
शोषणस्तम्भनावेश[1]सर्वाकर्षणकर्मसु ॥ ३१७ ॥

नष्टधनविषक्षेप समुद्रतरणादिषु ।
नभोलङ्घनवाय्वग्निजलभूमिप्रवेशने ॥ ३१८ ॥

इन्द्रजालादिविद्यासु [2]ऋषीणां विजये तथा ।
अतीतानागतज्ञाने भूतसंवनने तथा ॥ ३१९ ॥

देवतासन्निधानादौ [3]स्फोटमुष्यादिकर्मणि ।
एवमादिषु साध्येषु तथान्येष्वपि [4]कर्मसु ॥ ३२० ॥

इति मन्त्रं प्रयुञ्जीत गरुत्मन्तमनुस्मरेत् ।
सप्तार्णान् पूर्वमुध्दृत्य गदिनं हव्यवाहनम् ॥ ३२१ ॥

---

1. सर्पा T,P_2 2. ऋणानां M_2; सुराणां A 3. स्फुटमुष्ट्यादि M_2
4. मन्त्रवित् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भुवनं पुण्डरीकाक्षं गोपनं पवनं पुनः ।
पश्चिमं भुवनं वह्निं श्रीधरं क्रोधविग्रहम् ॥ ३२२ ॥

ब्रह्मसाधनवैराजौ जयं मन्दरमादिमत् ।
अमृतं गोपनं चापि गोपतिं द्विरदाननत् ॥ ३२३ ॥

आदिदेवं नभस्वन्तमनलं[1] च रमाधरम् ।
प्रचण्डं कमलं भद्रहस्तं वामनमस्तकम् ॥ ३२४ ॥

श्वसनं रोहिणीशं च मृगेशं मानुषेश्वरम् ।
गोपनं गदिनं पश्चात्कमलां भुवनं तथा ॥ ३२५ ॥

वासुदेवं [2]प्रचण्डं च विक्रमं विजयं तथा ।
[3]वैराजं रामसहितं गदिनं मोहनाशनम् ॥ ३२६ ॥

अर्चां [4]तृतीयमर्घेन्दुं पश्चान्तकमधुद्विषौ ।
मारुतं धूमकेतुं च सप्तकृत्वः समुद्धरेत् ॥ ३२७ ॥

हुङ्कृतिं फट्कृतिं स्वाहामोतदेहं ध्रुवं तथा ।
पुलहं सप्तकृत्वश्च हुम्फट्कारं ठठान्तकम् ॥ ३२८ ॥

तारं वरुणगोविन्दौ [5]विघ्नेशमथ माधवम् ।
स्पर्शान्तिकमकारं च पञ्चकृत्वस्सदागतिम् ॥ ३२९ ॥

षट्कृत्वो वरुणं चापि हुम्फट्स्वाहावसानकम् ।
निगमं पश्चिमं कूटं विक्रमं [6]वह्निगोपनौ ॥ ३३० ॥

ककुभं गोपनं चापि षट्कृत्वो मारुतं पुनः ।
व्यञ्जनार्णेषु सर्वत्र सुखोच्चारणमिच्छता ॥ ३३१ ॥

---

1. केशवं M_2 2. श्रीधरं च A,M_2 3. वैधरं M_1 4. द्वितीय M_1
5. विघ्नेशं जयमाधवौ M_1 6. विघ्न T,P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वरानुद्धरणे कर्तव्यं मनुशास्त्रोक्तवर्त्मना ।
हुंफट्स्वाहावसानं च गारुडं मन्त्रमुद्धरेत् ॥ ३३२ ॥

पश्चान्तकमनुस्वारं बीजमेतस्य कल्पयेत् ।
आदौ सुपर्णवचनं वक्रतुण्डगिरं पुनः । ३३३ ॥

महासुपर्ण इत्येवं खगेश्वरशिरस्तथा ।
अनन्तवीर्यवन्ताख्यं पक्षिराजं तथान्तिमम् ॥ ३३४ ॥

प्रणवादि चतुर्थ्यन्त नत्यन्तानि चतुर्मुख ।
कल्पयित्वाङ्गमन्त्राणि षड्भिरेतैर्यथाक्रमम् ।' ३३५ ॥

अङ्गानि हृदयादीनि स्पृशेन्मन्त्रविचक्षणः ।
अमुष्य काश्यपो द्रष्टा छन्दः पङ्क्तिर्निगद्यते ॥ ३३६ ॥

देवता गरुडस्तस्य जपो लक्षत्रयं स्मृतः ।
अधस्ताद्वटवृक्षस्य साधकस्साधयेन्मनुम् ॥ ३३७ ॥

आम्नायादिं नरहरिं वामनं पश्चिमाननम् ।
वैराजं पावकं तारं इति पञ्चाक्षरो मनुः ॥ ३३८ ॥

ऋषिर्मरीचिरेतस्य गरुडो देवता तथा ।
छन्दश्च देवी गायत्रं षडङ्गानि पुनःस्वयम् ॥ ३३९ ॥

उद्गीथं कमलं वायुं वासुदेवं ध्रुवं तथा ।
पश्चिमं बहुलं ब्रह्मसाधनं यष्टिमस्तकम् ॥ ३४० ॥

विघ्नेशं विक्रमं वह्निं महामायां ध्रुवं पुनः ।
पुष्पभद्रं तथा पीठं वामनं यष्टिकौस्तुभौ ॥ ३४१ ॥

बिन्दुं कलशचन्द्रार्घौ सूर्यबिन्दुकलात्मनः ।
पन्नगाधिपतिं बन्धुं वरुणं यादसां मुखम् ॥ ३४२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हुतान्तमुद्धरेन्मन्त्रमिति गारुडमुत्तमम् ।
स्यादिमं जगतः साक्षात्प्रत्यक्षः पक्षिपुङ्गवः ॥ ३४३ ॥

ब्रह्मकोशमथो पद्मं नासिक्यं भूधराह्वयम् ।
यष्टिं पापस्य हन्तारं बिन्दुं कमलमन्दरम् ॥ ३४४ ॥

अर्धेन्दुं कलशं बिन्दुं पश्चिमं पन्नगाशनम् ।
विक्रमाग्निमथो शत्रुं ककुभं मधुसूदनम् ॥ ३४५ ॥

वायुं स्वाहान्तमित्येवमन्यं गारुडमीरयेत् ।
आकाशारोहणं सिद्धिर्जपात्तस्य भविष्यति ॥ ३४६ ॥

एवं कृत्वाद्यमोङ्कारमादिदेवं स्वपश्चिमम् ।
स्वच्छन्दं च [1]द्विरुच्चार्य गदिनं हव्यवाहनम् ॥ ३४७ ॥

भुवनं [2]मेदिनीश्च द्विर्मन्दरं मधुसूदनम् ।
वैराजं [3]विपुलं पश्चाद्वामनं च द्विरीरयेत् ॥ ३४८ ॥

पवित्रं पद्मकञ्जं च नागेन्द्रं वायुमादिमम् ।
एताद्भिः कल्पयित्वाथो गोपनं यष्टिमन्तिमम् ॥ ३४९ ॥

तुष्टिबीजार्धशशिनं ठठान्तं कल्पयन्मनुम् ।
सप्तार्णानादितः कृत्वा भास्करं हव्यवाहनम् ॥ ३५० ॥

गोपनं यष्टिमार्ताण्डौ हव्यवाहनवामनौ[4] ।
चन्द्रार्धौ द्वादशात्मानं हृषीकेशमथो ध्रुवम् ॥ ३५१ ॥

वरुणं हृदयाह्लादं द्वन्द्वं कमलमाधवौ ।
वैराजं श्रीधरो भूयः पीठस्तु भुवनद्वयन् ॥ ३५२ ॥

---

1. त्रि 2. मेदिनीगोपं चतुर्गतिमनन्तरम् M_1 3. पुलहं M_2
4. मारुतौ M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विजयं श्रीधरं वह्निं भुवनं पुनरीरयेत् ।
लोकनेत्रोर्ध्वनासिक्यं करालं ब्रह्मसाधनम् ॥ ३५३ ॥

अनलं यष्टिमनिलं यष्टिं कुम्भोद्भवं तथा ।
हुतान्तमिति सर्वार्थं जानीयाद्गारुडं मनुम् ॥ ३५४ ॥

सप्तार्णमुध्दृत्य पुनः कलशं बन्धुमस्तकम् ।
क्रोधरूपं प्रचण्डं च त्रिदशाहारमाधवौ ॥ ३५५ ॥

चन्द्रं स्वाहापतिं चापि शशिनं बहुलं तथा ।
मृगाङ्कं श्रीधरं वह्निं भुवनं द्विचतुष्टयम् ॥ ३५६ ॥

भानुमत् पुलहद्वन्द्वं हुम्फडन्तं हुतान्तिमम् ।
इत्यन्यं गारुडं मन्त्रमूहेन्मन्त्रविचक्षणः ॥ ३५७ ॥

पवनेन हुताशेन माहेन्द्रेण प्रचेतसा ।
एतैश्चतुर्भिः प्रत्येकं क्रमव्यस्तैर्विषं हरेत् ॥ ३५८ ॥

समस्तैः प्रातिलोम्येन स्तम्भनादिं समाचरेत् ।
व्यापिनं विघ्नराजं च दामोदरमथो ध्रुवम् ॥ ३५९ ॥

एवमादिमिति ब्रह्मन् त्र्यक्षरं मनुमुद्धरेत् ।
येनैव साधितो मन्त्रो पक्षिराजोपलक्षितः ॥ ३६० ॥

त्रीणि तस्य भविष्यन्ति भुवनानि [1]विधेयताम् ।
आदिद्वितीयं भुवनं पश्चान्तं अमृतं तथा ॥ ३६१ ॥

गदिनं श्रीधरं वह्निमुदयं [2]भद्रमम्बुजम् ।
वैराजं विक्रमं स्वाहा और्वं च कमलाह्वयम् ॥ ३६२ ॥

---

1. विशेषताम् T,M_1,M_2, विधेस्तथा A. 2. चादि T,M_1,M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भुवनं पर्वतं बन्धुं माहेन्द्रादिश्रियं तथा ।
विक्रमं तार्क्ष्यवाहं च मृगेशं मन्दरं तथा ॥ ३६३ ॥

आदिसूर्यो गोपनं च मन्दरं भुवनं [1]दिशम् ।
अग्निं मृगाधिपञ्चापि स्वाहाकारावसानिकम् ॥ ३६४ ॥

इति मुद्रामनुर्ब्रह्मन् कल्पयेदथ मण्डलम् ।
विस्तरेषु निरीक्षन्तां तेषां संख्या न विद्यते ॥ ३६५ ॥

आत्मानं चिन्तयेन्मन्त्री गरुत्मन्तमनन्यधीः ।
अथ ध्यानं प्रवक्ष्यामि पक्षिराजस्य पद्मज ॥ ३६६ ॥

मेरुशृङ्गनिभाकारं रुक्मपक्षतिमण्डलम् ।
वैडूर्यनीलनासाग्रं वक्रतुण्डं भयङ्करम् ॥ ३६७ ॥

वज्रकल्पनखाकारं कल्पितोत्कटिकासनम् ।
[2]स्वन गम्भीरनिर्ह्रादं शिलाघनभुजान्तरम् ॥ ३६८ ॥

अनन्तकर्णाभरणं मूर्ध्नि वासुकिभूषणम् ।
महापद्मोदरं पद्म दामवेष्टित भूषणम् ॥ ३६९ ॥

मस्तके बद्धकार्कोटं कलाभाः कटिवेष्टितम् ।
उपवीतकृतेनापि शङ्खपालेन भूषितम् ॥ ३७० ॥

जयेन गुलिकेनापि [3]कल्पितानघनूपुरम् ।
धनञ्जयाभि[4]धानेन विजयेन च भोगिना ॥ ३७१ ॥

वामदक्षिणहस्ताभ्यां बिभ्राणं कटकद्वयम् ।
बालपल्लवताम्रेण[5] वारवाणेन शोभितम् ॥ ३७२ ॥

---

1. दशम् M_1 2. घन M_2 3. कल्पितं नवनूपुरम् M_1
4. मानेन A 5. मात्रेण M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उद्भिन्नभ्रुकुटीबन्धं करण्डमुकुटं तथा ।
पक्षविक्षेपगम्भीर कृतोर्ध्वनयनभ्रमम् ॥ ३७३ ॥

दंष्ट्राकरालवदनं ताम्रवर्तुलचक्षुषम् ।
[1]इत्थं ध्यात्वा गरुत्मन्तमेकतानेन चेतसा ॥ ३७४ ॥

साधयेत्साधनीयानि दुर्लभान्यपि [2]नाकिभिः ।
यथोक्तं जपतो मन्त्रमादित्ये न्यस्तचक्षुषः ॥ ३७५ ॥

ऊर्ध्वबाहोर्भविष्यन्ति दासा इव फणीश्वराः ।
विष्वक्सेनमनुर्ब्रह्मन् कथ्यते सर्वसिद्धिदः ॥ ३७६ ॥

तारं सुधामयं रामं क्रोधरूपं सुधामयम् ।
करालं शशिनं पश्चान्माधवं कुञ्जराननम् ॥ ३७७ ॥

गोपनं मारुतं चापि ठठान्तं मन्त्रमुद्धरेत् ।
तारेण बिन्दुना चापि बीजमेतस्य कल्पयेत् ॥ ३७८ ॥

एतेनैवाङ्गमन्त्राणि कल्प्यानि कमलासन ।
विश्वनाथमृषिं प्राहुर्विराट् छन्दो निगद्यते ॥ ३७९ ॥

देवता च मनोस्तस्य विष्वक्सेनो महाबलः ।
अथान्यः कल्पितो मन्त्रो विष्वक्सेनस्य पद्मज ॥ ३८० ॥

उद्गीथं भद्रपाणिं च मन्दरं ब्रह्मसाधनम् ।
[3]सुभद्रं गदिनं कुम्भं सुमुखान्तं समाधवम् ॥ ३८१ ॥

स्पर्शादिं [4]बिन्दुसहितं सध्रुवं कमलासन ।
दरान्तं गोपनं ब्रह्मन् धनदं रामशीर्षकम् ॥ ३८२ ॥

---

1. इति M_1 2. नातिभिः T,P_1 3. सुभगं M_1 4. बन्धु M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पश्चिमं निगमादिं च वैराजं च समाह्वयम् ।
खड्गहस्तं सरामं च जयं वसु[1]वरं तथा ॥ ३८३ ॥

[2]शुभदं सरोरुहं [3]वैराजं [4]विक्रममस्तकम् ।
पद्मपाणिं भद्रपाणिं पाशपाणिं च पश्चिमम् ॥ ३८४ ॥

सोदयं शत्रुहननं मृगेशं वक्रतुण्डकम् ।
प्रचण्डं पुण्डरीकाक्षं मधुशत्रुं चतुर्गतिम् ॥ ३८५ ॥

खड्गहस्तमचामादिं प्रचण्डं झषमर्षितम् ।
सुभद्रान्तं मधुद्वेषिं [5]वैराजं द्विर्वसुं[6]परम् ॥ ३८६ ॥

अचां द्वितीयं सुभगं पुण्डरीकविदर्भितम् ।
वैधरं विष्णुसहितं प्रचण्डं सवनालयम् ॥ ३८७ ॥

[7]श्रीवत्सं सध्रुवं खड्गहस्तधरं तथा ।
कमलं त्वृतधामं च सुभगं वसुगोपनौ ॥ ३८८ ॥

चतुर्गतिमचामादिं वैधरं गोपनं तथा ।
विजयं श्वसनं दत्तं सूदनं मृगलाञ्छनम् ॥ ३८९ ॥

समाधवं [8]ठठान्तं च कयलं माधवं ततः ।
पीतं च धनदं कुम्भमर्पितं सध्रुवं पुनः ॥ ३९० ॥

कलानिधिं च [9]पुरध्निमादिदेवं चतुर्गतिम् ।
वैधरं वरुणं मायां खेटकं च समुद्धरेत् ॥ ३९१ ॥

---

1. परं M_1 2. शुभं M_1 3. चैव M_1 4. रविमस्तकम् M_1 5. वैधरं गोपनं तथा M_2 6. पदम् M_1 7. खड्गहस्तमचामादिं गोपनं वैधरं तथा M_2 8. दधानं च T, P_1, P_2 9. पुरधमिति पाठः सर्वत्र दृश्यते। अस्यार्थः कः स्यादिति विमृश्यापि न ज्ञायते। पुरन्ध्रिमिति पाठः साधुः स्यात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पश्चिमं पद्मनाभं च मावृतं शुभमालिनीम् ।
समन्दरं [1]दरान्तं च मधुद्वेषिं सुमन्त्रजित् ॥ ३९२ ॥

ऐन्दवं कतृतीयं च संमतं [2]माठशभिधम् ।
सुन्दरं वैधरं पञ्चबिन्दुकं भद्रकं तथा ॥ ३९३ ॥

स्पर्शेषु षोडशं पद्मनाभं च चतुरानन ।
गोपनं [3]चैन्दवमथो चतुर्गतिमनन्तरम् ॥ ३९४ ॥

भान्तं मधुद्विषं यान्तं दरं च द्विः समुद्धरेत् ।
[4]कद्वितीयं सूदनं च वैधरं च चतुर्गतिम् ॥ ३९५ ॥

द्विर्वक्त्रव्यं दिनकरं भद्रपाणिमनन्तरम् ।
वैधरं भास्करं चापि पश्चिमं वक्रतुण्डकम् ॥ ३९६ ॥

मन्दरं सर्वरोधं च द्विर्गतीरिति संमितम् ।
गोपतिं सुमुखं चापि शुभदं ब्रह्मसाधनम् ॥ ३९७ ॥

क्रोधं चतुर्गतिं चाप्यादिबीजं चतुर्मुख ।
आदिदेवं तथाकुम्भं संप्रसारणमक्षरम् ॥ ३९८ ॥

श्रीवत्सं पुरुषात्मनं मन्त्रविक्रमनिष्ठितम् ।
वरुणं शङ्खमपरं पश्चिमं पद्मनाभकम् ॥ ३९९ ॥

सुभद्रं च मधुद्वेषिं कुम्भं भद्रकरं तथा ।
वैधरं शुभदं चाग्निं चतुर्गतिमनन्तरम् ॥ ४०० ॥

हुङ्कारं च वषट्कारमीरयेत्कमलासन ।
शुभदं वामन[5]परं क्रोधं चाग्निं मधुद्विषम् ॥ ४०१ ॥

---

1. मन्त्रराजं M_2
2. माधवाभिधम् M_2
3. माधवमथो M_2
4. तद्वितीयं A; कतृतीयं M_2
5. पदं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्गतिं सूदनं च वक्रतुण्डं समीरणम् ।
[1]माधवं विजयं भद्रहस्तं च समतं पुनः ॥ ४०२ ॥

विधातारं मृगेशं च भागं यान्तं सविक्रमम् ।
सरोरुहं मधुद्वेषिं पश्चिमं रामशीर्षकम् ॥ ४०३ ॥

माहेन्द्रममृतं बन्धुं कतृतीयं [2]मृगं तथा ।
भास्करं सूदनमथो शङ्खं खड्गधरं पुनः ॥ ४०४ ॥

वैराजं सोदयं चैव कतृतीयं वसुं परम् ।
द्वितीयं वासुदेवं च तृतीयं बन्धुसंहितम् ॥ ४०५ ॥

माधवं वरुणं पार्श्वं[3]मेधरं दरगोपनौ ।
चतुर्गतिं खड्गधरं सकृतं ब्रह्मसाधनम् ॥ ४०६ ॥

सबिन्दुं पश्चिमं चैव वाचां[4] सप्तमसाधने ।
सध्रुवं चेन्दिराबीजं पुष्टिबीजं सहुङ्कृतिम् ॥ ४०७ ॥

सुधारसं चौर्वपरं माधवं च चतुर्मुख ।
वौषट्कारं तथा लक्ष्मीं दरान्तं पञ्चबिन्दुकम् ॥ ४०८ ॥

यान्तं च सूदनं मान्तं श्रीशब्दं भद्रपाणिनम् ।
विक्रमं पुलहं धूमकेतनं सुरिनन्दनम् ॥ ४०९ ॥

हुङ्कृतिं वैधरं भानुं विघ्नेशं मधुसूदनम् ।
खर्वदेहं सबन्धुं च पीतं भल्लायुधं तथा ॥ ४१० ॥

माधवं वरुणं भद्रहस्तं सर्गिणमब्जज ।
पवित्रं सूदनमथो वैराजं च समीरणम् ॥ ४११ ॥

---

1. माधवीं P_1, P_2 2. ऋतं M_1 3. मन्दरं A 4. मचां M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ओङ्कारादि जयं पीतं सूदनं विधुरं पुनः ।
श्रीधरं माणिभद्रं च द्विरदं विक्रमं तथा ॥ ४१२ ॥

वक्रतुण्डधरं बिन्दुं पीयूषं रामशीर्षकम् ।
अत्रिं च सुदनं यान्तं मन्दरं दरवैधरौ ॥ ४१३ ॥

द्वयं वसुशिरश्शङ्कं कुम्भं विक्रममस्तकम् ।
पूर्णफुटं सध्रुवं[1] च वैधरं च चतुर्गतिम् ॥ ४१४ ॥

शुक्लं फुटं वह्निपरं वैधरं च मधुद्विषम् ।
सुभद्रं मधुविद्वेषं सरसीरुहसम्भव ॥ ४१५ ॥

कपिलाक्षं हुतवहं नृसिंहं च समुद्धरेत् ।
[2]बीजान्येतद्द्विरुच्चार्य शुक्लपीतान्तिमाक्षरम् ॥ ४१६ ॥

शीर्षं च गोपनं चण्डं पश्चिमं जयतत्परम् ।
भल्लायुधं मारुतं च सर्गिणं चतुरानन ॥ ४१७ ॥

कृपाकरं शरीरं च वसुतच्छिरसं तथा ।
सुभद्रमूर्ध्वलोकेशं विजयं सम्प्रसारणम् ॥ ४१८ ॥

सुभद्रं पुरुषात्मानं कलान्तं फट्कृतिं तथा ।
निगमादिं शशधरं माधवं वसुमाधवम् ॥ ४१९ ॥

भल्लायुधं तथा सर्गं फट्कृतिं दक्षमक्षरम् ।
गोपतिं गोपनं कुम्भं विक्रमं क्रोधरूपिणम् ॥ ४२० ॥

प्रचण्डं सार्धममृतं माधवं घटविक्रमम् ।
उग्रात्मानं तथा कुम्भं कमलं [3]द्विविधुन्तुदम् ॥ ४२१ ॥

दत्तं भद्रं सूदनं च दक्षान्तकं हुम्फडन्तकम् ।
स्वाहावसानमित्येवं विष्वक्सेनमहामनुम् ॥ ४२२ ॥

---

1. वैधरञ्च सध्रुवञ्च चतुर्गतिम् T   2. बीजमे M_1 3. द्विर्वसुं तथा M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उद्धरेद्बीजमस्याथ तारं कुम्भं मनुं ध्रुवम् ।
कल्पयेदमुनैवाङ्गमन्त्रं मन्त्रविचक्षणः ॥ ४२३ ॥

द्रुपदो दृष्टवानेतत् छन्दोऽतिच्छन्द उच्यते ।
विष्वक्सेनो देवता च जपेल्लक्षत्रयं पुनः ॥ ४२४ ॥

एतं महामनुं ब्रह्मन् जपतस्सिद्धिकाङ्क्षया ।
सुरासुरेभ्यस्सर्वेभ्यो भयं तस्य[1] प्रणश्यति ॥ ४२५ ॥

अथेदानीं प्रवक्ष्यामि तस्याराधनसंयुतम् ।
कल्पयित्वा महापद्मं दलैर्द्वादशभिर्युतम् ॥ ४२६ ॥

कर्णिकायां समासीनं [2]सेनान्यं सम्यगर्चयेत् ।
विष्वक्सेन नमस्तेऽस्तु नमो मृत्युभयावह ॥ ४२७ ॥

नमः पारिषदेशाय धुर्याय जगतां नमः ।
चराचराणा[3]मादिस्त्वं जन्मनाशो न विद्यते ॥ ४२८ ॥

धुरमाधाय लोकानां त्वय्येव पुरुषोत्तमः ।
योगनिद्रा सुखवशश्शेते शेषे मनोहरे ॥ ४१९ ॥

एकान्तिनां तपोभक्तिप्रकर्षक्षीणकर्मणाम् ।
भगवत्प्राप्तये द्वारदृष्टयस्त्वां प्रभूतये ॥ ४३० ॥

ब्रह्माणमाहुः कल्पादौ पालने तं मधुद्विषम् ।
पतिं पशूनां संहारे जगतस्तस्थुषामपि ॥ ४३१ ॥

पादेन मेदिनीं विश्वं मध्येन [4]परमम्बरम् ।
नाकं मूर्ध्ना त्वमाक्रम्य तिष्ठस्येको जगन्मय. ॥ ४३२ ॥

---

1. तत्र M_1 2. तेनाद्यं T, M_2 3. मादिस्त्वं M_1
4. पुनरम्बरम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्वं भूमिस्त्वमपां स्थानं तेजश्च त्वं समीरणः ।
आकाशस्त्वं त्वामियन्ते विभूतिर्व्याप्य तिष्ठति ॥ ४३३ ॥

त्वमेव भास्करो भूत्वा विश्वं तपसि विष्टपम् ।
आह्लादयसि तद्भूयः सोमो भूत्वा कृपानिधिः ॥ ४३४ ॥

[1]सत्त्वरूपस्य ते रूपे गुणावन्यो रजस्तमः ।
[2]विष्णुरूपे यथारूपे शुक्लरूपस्य वस्तुनः ॥ ४३५ ॥

त्वां सृष्ट्वा भगवानादौ भक्तत्वात्तैः हेतुभिः पुनः ।
त्वां स्मृत्वा [3]सत्तमं पश्चात्पुमानेति त्वदात्मवान् ॥ ४३६ ॥

वैभवेन निजेनैव बिभ्राणे त्वयि विष्टपम् ।
[4]पितामहस्सुखं शेते शेषेऽशेषजगत्पतिः ॥ ४३७ ॥

ऋग्भिः प्रातः स्तुवन्ति त्वां यजुभिर्मध्यमे दिने ।
सायाह्ने सामभिः पुण्यैः सूर्यात्मानं द्विजातयः ॥ ४३८ ॥

प्रवृत्तिहेतुं विश्वस्य त्वामेव प्रकृतिं विदुः ।
पुमांसमप्युदासीनं तत्साक्षिणमकल्मषम् ॥ ४३९ ॥

न किञ्चिदभिरूपं यद्विश्वं ते विष्टपं पुनः ।
नास्ति ते नामधेयं च त्वन्नामाग्नि सुहृद्विदः ॥ ४४० ॥

संख्या नास्ति गुणानां ते तेजसामपि भास्वतः ।
षड्गुणा इत्युक्तत्वात् प्रमेयादीन् प्रचक्षते ॥ ४४१ ॥

शक्नोषि बुध्यसे विश्वं बिभर्षि न विकारयम् ।
ईशिषे द्विषतो हंसि त्वमेव भुवनत्रयम् ॥ ४४२ ॥

---

1. सत्य A 2. शुक्ल 3. सन्ततं A 4. वीतभार A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हितैषी त्वं यथा स्वामिन् भक्तानां गतपाप्मनाम् ।
तथा च बान्धवास्तेषां साक्षादात्माहिकं बहु ॥ ४४३ ॥

जलानामिव सिन्धुर्वै दीधितीनामिवांशुमान् ।
स्वामिन्नाम्नायमूलानां विद्यानां प्रभवो भवान् ॥ ४४४ ॥

ननु तिष्ठन्ति शास्त्राणि बहूनि कथयन्नपि ।
न च त्वद्भक्तिसाराणां कल्याणानि विचिन्तयन् ॥ ४४५ ॥

भवेऽस्मिन् दुःखबहुले त्वामाहुर्योगिनां गतिम् ।
अपां शिवानामाधारमध्वगानां [1]विवासिनाम् ॥ ४४६ ।

धन्यं तव प्रदेशेषु गत्यन्तरमपश्यताम् ।
निर्वापयसि नोचेच्च त्वं कटाक्षसुधारसैः ॥ ४४७ ॥

दुःखदावाग्निभिर्दग्धा जन्तवस्तं महीमयाः ।
विशालवक्षसं श्यामं पुण्डरीकनिभेक्षणम् ॥ ४४८ ॥

सालाकारचतुर्बाहुं त्वामहं शरणं व्रजे ।
चक्रवाका इवादित्यं चातका वारिदं यथा ॥ ४४९ ॥

चकोरा इव शीतांशुमार्तस्त्वामहमाश्रये ।
एतत्पठति यःस्तोत्रं श्रुतिभिः संस्थितं त्विमम् । ४५० ॥

प्रीयते तस्य भगवान् सेनानीरविलम्बितम् ।
दद्याच्च सम्पदस्सर्वास्तस्मै भक्ताय दुर्लभाः ॥ ४५१ ॥

इति श्री पञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे
चर्यापादे " विघ्नराजोत्पत्ति-किरीटादि-मन्त्रोद्धारः नाम " एकत्रिंशोऽध्यायः ।

—: * :—

1. पिपासिनाम् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वात्रिंशोऽध्यायः ।

ऐहिकामुष्मिक सुदर्शन महामन्त्रवैभवः ।

ब्रह्मा :—

ऐहिकामुष्मिकं सर्वं मन्त्रं सौदर्शनं परम् ।
शुश्रूषा भगवन्नद्य रहस्यमपि पावनम् ॥ १ ॥

भक्ताय मह्यं दातव्यं प्रणताय यथातथम् ।

श्री भगवान् :—

हन्त ते कथयिष्यामि मन्त्रं सर्वार्थसाधनम् ॥ २ ॥

यथार्थ नाम तेनायं नाख्येयो यस्य कस्यचित् ।
उद्गीथमुद्धरेत् पूर्वं चन्द्रमाद्यं नभोमणिम् ॥ ३ ॥

आर्त्रि [1]सितद्युतिं वह्निं गोपनं ज्वलनं मुखम् ।
ऊष्मा[2]णमुदयं [3]वीरं [4]फुल्लाक्षं विष्णुमस्तकम् ॥ ४ ॥

हृदयाह्लादमित्येव मन्त्रोद्धारश्चतुर्मुख ।
वह्निमादिमनुस्वारं बीजमुध्दृत्य कल्पयेत् ॥ ५ ॥

षडङ्गमनुवर्णानामुद्धारः कथ्यते क्रमात् ।
अङ्गत्रयं चतुर्वक्त्र पूर्वमाविष्कृतं मया ॥ ६ ॥

चतुर्थ्यन्तं चक्रपदमुद्गीथादि प्रयोजयेत् ।
अनन्तरं सूर्यपदं तद्विभक्ते च तत्पदम् ॥ ७ ॥

पञ्चमं षष्टमप्यङ्गं पदं तत्तद्विभक्तिकमः ।
उद्धार्यं च सहस्रादि ज्वालाधारादि पूर्वकम् ॥ ८ ॥

---

1. स्विषं M_1 2. न्तमुदयं A, M_2 3. बिन्दुं A ; बीजं M_1
4. भल्लाक्षं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवमङ्गानि षड् ब्रह्मन् उक्तानि गहनानि ते ।
अहिर्बुध्न्यो मनोर्द्रष्टा विराट् छन्दः सुदर्शनः ॥ ९ ॥

देवता मुनयश्चात्र प्रत्यक्षरमथाब्जज ।
व्यासःकण्वो नारदश्च वसिष्ठः परमो भृगुः ॥ १० ॥

अत्रिष्षडेते द्रष्टारश्छन्दांस्यक्षरशः शृणु ।
उष्णिक्बृहत्यौ गायत्रं पङ्क्तिश्च जगती विराट् ॥ ११ ॥

वर्णाः कालाग्निवर्णाभाः कालश्चैव हि देवताः ।
करयोर्न्यस्य तलयोरुभयोरक्षराणि षट् ॥ १२ ॥

प्रथमान्तार्णशिष्टानामङ्गुष्ठादिषु पर्वसु ।
अङ्गुलीषु क्रमादेवमक्षरन्यास ईरितः ॥ १३ ॥

देहे च मूर्ध्नि चास्ये च हृदये गुह्यजानुनोः ।
पादयोर्न्यसनीयानि क्रमान्मन्त्राक्षराणि षट् ॥ १४ ॥

श्रीसुदर्शनगायत्रीमपरान्नपराजिताम् ।
वक्ष्यामि तस्य चोद्धारः पदशः कथ्यतेऽधुना ॥ १५ ॥

उद्गीथादि चतुर्थ्यन्तं सुदर्शनपदं ततः ।
वेत्ति लुडन्तमपरं बह्वर्थं पदमीरयेत् ॥ १६ ॥

महापूर्वं चक्रपदं तद्विभक्तिर्विभूतिजम् ।
ध्यायन्ती पद[1]मुच्चार्य पूर्ववत्तद्विभूषितम् ॥ १७ ॥

तत्पदं चास्मदादेशः नः पदं च द्विशीर्षकम् ।
प्रपूर्वं चोदयान्तं च पदमित्युद्धरेन्मनुम् ॥ १८ ॥

---

1. मुद्धार्य M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्य बीजं तु पूर्वोक्तं वेदितव्यं चतुर्मुख ।
आशासु दशसु स्थाप्य मन्त्रं तच्चक्रमुद्रया ॥ १९ ॥

तन्मध्ये स्थितमात्मानमग्निज्वालापरीतवत् ।
ध्यायेत् क्षितितले शुद्धे सहस्रदलपङ्कजे ॥ २० ॥

कर्णिकायां चक्रधरं द्विभुजं वृत्तलोचनम् ।
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥ २१ ॥

महोदरं महाकायं जपाकुसुमसन्निभम् ।
करण्डमकुटोपेतं रक्ताम्बरविभूषितम् ॥ २२ ॥

धारयन्तं शिखारत्ने चक्रं मेघसमप्रभम् ।
नाभिनेमिसमायुक्तं ज्वालामण्डलदुस्सहम् ॥ २३ ॥

ज्वलत्षडरसंयुक्तमयुतार्कसमप्रभम् ।
पद्ममेवं स्थितं ध्यायेत्तन्नाभौ च सुविस्तृते ॥ २४ ॥

चक्राभिमानिनं देवं द्विहस्तं पुरुषं स्थितम् ।
रक्ताम्बरधरं रक्तं रक्तचन्दनपङ्किलम् ॥ २५ ॥

करण्डमकुटोपेतं सर्वाकल्पपरिष्कृतम् ।
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलाननम् ॥ २६ ॥

उद्गिरन्तं हुतवहं करजैर्मारुतानुगम् ।
विस्फुलिङ्गाद्दुर्विषहाद्विसृजन्तमनेकशः ॥ २७ ॥

कामरूपसहस्रेभ्यः प्रलयाम्बुदनिस्स्वनम् ।
तर्जनं वामतर्जन्या बिभ्राणं दक्षिणे करे ॥ २८ ॥

निपीडिताङ्गुलिं शत्रुं प्रहरन्निव भीषणम् ।
दहन्निव च नेत्राभ्यां पिबन्निव महोदधिम् ॥ २९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्यात्वैवमर्चयेद्भोगैरर्घ्यादिभिरतन्द्रितः ।
सिद्धये मन्त्रराजस्य पुरश्चर्या यथोदिता ॥ ३० ॥

देशे काले च मन्त्रस्य [1]रूपं संख्या च पूर्ववत् ।
शाककन्दफलक्षीरसक्तुपिण्डान्नभक्षणः ॥ ३१ ॥

तोयैस्तर्पणमग्नौ च जुहुयात्समिदादिभिः ।
मन्त्रस्सिध्यति तस्यैवं कुर्वाणस्य यथाविधि ॥ ३२ ॥

सिद्धिं च सूचयत्यस्य स्वप्ने मङ्गलदर्शनम् ।
प्रयुञ्जीत ततो मन्त्रं शान्तिकादिषु कर्मसु ॥ ३३ ॥

षोडशस्तम्भसंयुक्तं कल्पयेद्यागमण्डपम् ।
स्थापयेत्तत्र विधिवत्कुम्भानां पञ्चविंशतिम् ॥ ३४ ॥

वेष्टितान् सूत्रवस्त्राद्यैर्धान्यराशिषु मङ्गलान् ।
एषु द्रव्याणि संगृह्य न्यसेत्कमलसम्भव ॥ ३५ ॥

घृतमुष्णोदकं रत्नं फलोदकमनन्तरम् ।
लोहतोयं मार्जनाम्भो गन्धाम्भश्चाक्षतोदकम् ॥ ३६ ॥

यवोदकं क्रमादेषु कुम्भेषु नवसु क्षिपेत् ।
पाद्यं गुलोदकं चैव [2]दधि चेक्षुरसं तथा ॥ ३७ ॥

अन्घ्र्यं च नालिकेराम्भः क्षीरं च तदनन्तरम् ।
सर्वौषधिजलं तद्वदाचामं मङ्गलोदकम् ॥ ३८ ॥

मधुपूर्वं शान्तिवारि पञ्चगव्यमनन्तरम् ।
मूलोदकं कषायाम्भः पुष्पवारि चतुर्मुख ॥ ३९ ॥

---

1. जप M_1 2. मधु M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्रव्याण्येतेषु कुम्भेषु [1]बहिष्टेषु विनिक्षिपेत् ।
प्रत्येकं शतकृत्वश्च मन्त्रेणैवाभिमन्त्रयेत् ॥ ४० ॥

कुम्भे द्रव्याणि निक्षिप्य चक्राब्जं वर्तयेत्ततः ।
तन्मध्ये मन्त्रराजेन यष्टव्यं तत्सुदर्शनम् ॥ ४१ ॥

कुण्डे [2]वृत्ते च जुहुयात्समि[3]दन्नादिभिः क्रमात् ।
हुत्वा निशायां मनुना प्रभातेऽर्घ्यादिभिः क्रमात् ॥ ४२ ॥

अर्चयित्वा हेतिराजं हुत्वाग्नौ सन्निदादिभिः ।
भूर्जपत्रे लिखेच्चक्रं नाभिनेमिसमन्वितम् ॥ ४३ ॥

षडरं तत्र पूर्वादिक्रमाच्चैव[4] षडक्षरम् ।
लिखित्वा छन्दसामादिं तन्मध्ये साध्यनाम च ॥ ४४ ॥

हेमसूच्या लिखेद्द्रव्यैर्मिश्रितैश्चन्दनादिभिः ।
चन्दनद्वयकाश्मीररोचनागरुमुख्यकैः ॥ ४५ ॥

गन्धद्रव्यैः सुसम्पिष्टैः पश्चात्तां भूर्जपत्रिकाम् ।
गुलिकां कारयेत्तां च शालितण्डुलराशिषु ॥ ४६ ॥

अधिवास्यान्वहं कुम्भैः स्नापयित्वा यथाविधि ।
बन्धयेत्तां मातुरङ्के मन्त्रेणानेन मन्त्रवित् ॥ ४७ ॥

गुलिकाबन्धनेनैव मुक्तो रोगादिभिर्नरः ।
तेजस्वी भवति क्षिप्रं त्वचा मुक्तो यथोरगः ॥ ४८ ॥

ज्वलितस्य भवेच्छान्तिः प्रसूनैः निम्बसम्भवैः ।
दूर्वाङ्कुरां चूतदलैः सिक्तैर्मधुपयोघृतैः ॥ ४९ ॥

---

1. सहितेषु M_1 2. घृतैश्च A 3. दाज्यादिभिः M_1 4. देवं A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनुना जुहुयादग्नौ सप्तरात्रमतन्द्रितः ।
प्रत्यहं दशसाहस्रसंख्यया रोगिसन्निधौ ॥ ५० ॥

अभिषिच्य तथा कुम्भैः रोगिणं चक्रविद्यया ।
बध्द्वा च गुलिकां मन्त्री मोचयेज्ज्वरितं ज्वरात् ॥ ५१ ॥

गोभूहिरण्यवस्त्राद्यैर्मन्त्रिणं तोषयेत्ततः ।
ब्राह्मणेभ्यो यथाशक्ति दद्याद् गोकम्बलादिकम् ॥ ५२ ॥

भूतग्रहपिशाचादि [1]पीडितानां तथा नृणाम् ।
शान्तये जुहुयादग्नौ किंशुकोत्थैः समिच्छतैः ॥ ५३ ॥

त्रियहं त्रिसहस्रैश्च तेषां बद्धा शिखां ततः ।
गुग्गुलुत्थेन धूपेन धूपितान् ग्रहपीडितान् ॥ ५४ ॥

ताडयेन्मन्त्रजप्तेन दण्डेन लतयापि वा ।
पिशाचादिस्ततो ब्रूयान्मुञ्चामीति [2]प्रपीडितः ॥ ५५ ॥

शपथं कारयित्वा तु शिखाबन्धं च मोचयेत् ।
स्थापितैः कलशैः पश्चान्मन्त्रेण ग्रहपीडितम् ॥ ५६ ॥

स्नापयेद्बन्धयेच्चापि गुलिकामभिमन्त्रिताम् ।
ततो विमुच्यते रोगाच्चेतोवाग्भिरुपद्रवात् ॥ ५७ ॥

तेजस्वी शतमायुश्च भवेन्मन्त्र [3]प्रभावतः ।
नारी च दुर्भगा चक्रधारणात्सुभगा भवेत् ॥ ५८ ॥

वन्ध्या च गर्भिणी सद्यः सुप्रसूः स्यादपप्रसूः ।
अनृतुः स्यादृतुमती विमुखा सुमुखा भवेत् ॥ ५९ ॥

---

1. गृहीतानां M_2; दूषितानां M_1 2. प्रपीडितम् M_1 3. प्रसादतः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विरहे सङ्गता भर्त्रा भवेदचिरकालतः ।
स्त्रीप्रसूः पुम्प्रसूतिश्चास्तना स्तनमण्डिता ॥ ६० ॥

कुमार पक्षिपीडादौ बालानां च यथोदितैः ।
विधिभिर्मुच्यते दुःखात् लभते [1]शान्तिमुत्तमाम् ॥ ६१ ॥

प्रासादेऽपि नरेन्द्रस्य ब्रह्मरक्षोमुखैर्ग्रहैः ।
प्रवेशे सति तन्मध्ये कुम्भान् रत्न[2]समन्वितान् ॥ ६२ ॥

स्थापयित्वा यथापूर्वं समिदाद्यै[3]रतन्द्रितः ।
मन्त्रेण जुहुयान्मन्त्री द्वादशाहान् समाहितः ॥ ६३ ॥

प्रत्येकं दशसाहस्रसंख्यया कमलासन ।
ताम्रपत्रे शिलायां वा चक्रमालिख्य तत्पुनः ॥ ६४ ॥

धान्यराशिषु संस्थाप्य निशायां प्रातरुत्थितः ।
प्रासादद्वारि निखनेद्दिक्षु चाष्टसु मन्त्रितम् ॥ ६५ ॥

प्रोक्षयेत्कुम्भतोयेन गृहं सर्वमशेषतः ।
पलायन्ते ग्रहास्सर्वे दूरतः सर्वतोमुखः ॥ ६६ ॥

तद्राष्ट्रेऽपि न तिष्ठन्ति सर्वकालमसंशयम् ।
प्रासादवर्तिनः सर्वे जीवन्ति [4]निरुपद्रवाः ॥ ६७ ॥

धनधान्यसमृद्धिश्च यथा धनदवेश्मनि ।
वस्त्रशय्यासनादीनां दंशने मूषिकादिभिः ॥ ६८ ॥

[5]रक्तास्थिदर्श[6]नेनापि केशानां दहने तथा ।
अकस्माद्गोपुरादीनां दहनेऽशनिपीडिते ॥ ६९ ॥

1. चायुरुत्तमम् T, P_1, P_2 2. रक्त M_2, T 3. समन्वितम् M_1
4. निरुपाधिकाः M_1 5. रक्तास्त्रिदर्शनेनापि P_1 6. वापि T, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निशि शक्रधनुर्दर्शे निवाते चैत्यभूरुहः ।
भङ्गे वल्मीकजनने दुःस्वप्नेऽन्यत्रतादृशे ॥ ७० ॥

एवमादौ दुर्निमित्ते शान्तिमेतेन कारयेत् ।
यज्ञवृक्षसमिद्भिश्च होमः पूर्वोक्तसंख्यया ॥ ७१ ॥

कुर्याच्च शान्तिं पुष्ट्यादिकर्मणा कमलासन ।
कथ्यन्ते तानि बहुधा नामेदं यान्ति भेदतः ॥ ७२ ॥

सर्वाभ्युदयकर्माणि चतुरश्रेषु कारयेत् ।
पौष्टिकं पद्मकुण्डेषु शान्तिं वृत्ते सुखावहाम् ॥ ७३ ॥

त्रिकोणे मारणं कर्म कुण्डे चापाकृतौ पुनः ।
उच्चाटनं यक्षकन्यासाधने कोणपञ्चके ॥ ७४ ॥

षडश्रे स्तम्भनं कर्म सप्ताश्रे मोहनं भवेत् ।
विद्वेषणं नवाश्रे स्यादष्टाश्रे मारणो विधिः ॥ ७५ ॥

एकादशाश्रे ब्रह्मादि वशीकरणमाचरेत् ।
कुण्डे दशाश्रे पश्वादि देवतातोषणो विधिः ॥ ७६ ॥

द्वादशाश्रे तु पुरुषं वैकुण्ठं द्रष्टुमाचरेत् ।
योन्याकारे विवाहार्थं [1]कन्यार्थं कमलासन ॥ ७७ ॥

चतुर्विंशत्यङ्गुलैः स्याद्विस्तारायामकल्पनम् ।
खातं तावद्भिरेव स्यात्कुण्डेषु नियतिं शृणु ॥ ७८ ॥

तदर्धं पादमथवा चतुरङ्गुलमेव वा ।
परितो द्व्यङ्गुलं [2]हित्वा बहिस्तिस्रश्च वेदिका ॥ ७९ ॥

1. वश्यार्थं M_2 2. खात्वा M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कार्यास्तासाञ्च विस्तारश्चतुरङ्गुलसंमितः ।
तावत्येवोन्नतिर्ब्रह्मन् कुण्डस्य धनुषः पुनः ॥ ८० ॥

अङ्गुल्या नवतिः षट् च ज्या च षट्त्रिंशदङ्गुला ।
शङ्कुं विधाय तन्मध्ये दशाङ्गुलसमायतम् ॥ ८१ ॥

भ्रामयेत्परितः सूत्रं कुण्डं तद्वलयाकृतिम् ।
चतुरश्रस्य कुण्डस्य विभजेत् पञ्चधा भुजम् ॥ ८२ ॥

द्वौ भागौ भुजमेकं च त्रिंशत्पञ्चाथवा पुनः ।
अङ्गुलीनां भवेदेषां त्रिकोणाङ्के भुजः स्मृतः ॥ ८३ ॥

कुण्डे षडश्रे च भुजा [1]अष्टाष्टैकादशाङ्गुलाः ।
एको भुजः पञ्चकोणे विंशत्यङ्गुलिसंमितः ॥ ८४ ॥

सप्ताश्रे च भुजायामो यवषट्काधिकाः पुनः ।
तिस्रश्च दशचाङ्गुल्यः कुण्डे त्वष्टा[2]श्रिभिर्युते ॥ ८५ ॥

द्व्याधिका दश वा भूमौ दशाङ्गु[3]लमितीरितम् ।
अङ्गुल्योस्तु भुजायामो नलस्कन्दांशकीर्तितः ॥ ८६ ॥

[4]नवाश्रकुण्डेषु यवा पञ्चकोणे भुजायतिः ।
दश चाङ्गुलयः प्रोक्ता दशाश्रे च चतुर्मुख ॥ ८७ ॥

यवाः पञ्च भुजायामो नव चाङ्गुलयः ।
एकादशाश्रे कुण्डे तु यवैरष्टाभिरन्वितः ॥ ८८ ॥

अष्टावङ्गुलयः कुण्डे द्वादशाश्रे भुजायतिः ।
अष्टादशाङ्गुलाः प्रोक्तो योनिकुण्डेषु चायतीः ॥ ८९ ॥

---

1. अष्टौ वाष्टादशाङ्कुलाः M_1 2. श्रनिर्मितो M_1 3. ल्यः प्रकीर्तिता T, P_1, P_2 4. सहस्रकुण्डेस्वथवा पञ्च एकोभुजायतिः M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टौ च चत्वारिंशच्च भवेदङ्गुलयोऽब्जज ।
गजोष्ठसन्निभा योनिर्यद्वाश्वत्थदलोपमा ॥ ९० ॥

[1]कुण्डान्युक्तान्यथेदानीं शान्त्यादिः प्रतिकल्प्यते ।
यत्कुण्डं यस्य कथितं शान्त्यादेस्तस्य तद्भवेत् ॥ ९१ ॥

अश्ववारणशालासु चक्रयन्त्रं यथाविधि ।
लिखित्वा ताम्रदार्वादौ निशायामधिवासयेत् ॥ ९२ ॥

सहस्रकृत्वः कर्तव्यो होमः कुण्डे[2] शुभे यतः ।
समिद्भिर्यज्ञयोग्याभिः स्थापयेत्कुम्भमर्चितम् ॥ ९३ ॥

अथ प्रभाते शालायां यन्त्रं [3]खन्यान् महीतले ।
प्रोक्षयेत्कुम्भतोयेन गजानश्वान् पृथक्पृथक् ॥ ९४ ॥

सौदर्शनेन मन्त्रेण पुण्याहं वाचयेत्तथा ।
नश्यन्ति व्याधयस्तेषां गजाश्वानां चतुर्मुख ॥ ९५ ॥

बलं स्यादधिकं तेषां इति सप्ताहमाचरेत् ।
ब्राह्मणेभ्यो धनं दद्याद्य[4]थाशक्ति च दक्षिणाम् ॥ ९६ ॥

ऊर्जस्वलमथो ब्रह्मन् गजाश्वं जायते भृशम् ।
तथा च प्रत्यहं होमः स्यात्सुदर्शनविद्यया ॥ ९७ ॥

इत्थं गोमहिषादीनां रक्षां कुर्वीत मन्त्रवित् ।
पुररक्षामथ ब्रह्मन् प्रवक्ष्यामि यथातथम् ॥ ९८ ॥

स्तम्भैष्षोडशभिर्युक्तां दर्भमालापरिष्कृताम् ।
पुरमध्ये प्रपां कृत्वा जुहुयात् सर्पिषा पुनः ॥ ९९ ॥

---

1. कुण्डे त्वुक्ता य M_1 2. कुम्भे यथोदिते M_2 3. कुर्यात् M_1
4. दाचार्याय च M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पालाशाभिः समिद्भिश्च दिनान्येकोनविंशतिः ।
दिक्ष्वष्टासु तथा मध्ये पुरस्य कमलासन ॥ १०० ॥

खन्यात्सौदर्शनं यन्त्रं स्थापयेत् कुम्भमञ्जसा ।
तोयेन प्रोक्षयेद्विद्वान्नगरं चक्रविद्यया ॥ १०१ ॥

ऋग्भिश्च पावमानीभिः प्रशस्ताभिर्यथाक्रमम् ।
पुरद्वारेषु सौधेषु मण्डपेषु महीभृताम् ॥ १०२ ॥

सर्वत्र निखनेच्चक्रं जुहुयात्समिदादिभिः ।
मरणव्याधि दुर्भिक्ष ज्वरादि व्याधयः पुनः ॥ १०३ ॥

नश्यन्ति बलवन्तश्च भवन्ति पुरवासिनः ।
ग्राममध्ये तथा दिक्षु विदिक्षु चतुरानन ॥ १०४ ॥

शृङ्गाटकेषु सर्वेषु निखनेदायुधाधिपम् ।
ग्रहवेतालरक्षांसि व्याधयश्च ज्वरादयः ॥ १०५ ॥

न बाधन्ते पुरग्राममपस्मारादयस्तथा ।
न तस्करभयं किञ्चिदकालमरणं तथा ॥ १०६ ॥

पुरुषायुषवन्तः स्युर्नरा धान्यधनान्विताः ।
सौभाग्यं शान्तिरारोग्यं तथा कुलविवृद्धयः ॥ १०७ ॥

ब्रह्मवर्चसमित्येतद् ब्राह्मणानां भविष्यति ।
पयस्विन्यो भविष्यन्ति गावः पीनपयोधराः ॥ १०८ ॥

तद्राष्ट्रेऽपि मनुष्याणां भद्रमेव भविष्यति ।
अथ वक्ष्यामि ते ब्रह्मन् पन्नगानां निवारणम् ॥ १०९ ॥

देवालये नदीतीरे नन्दनोपवनेषु वा ।
चतुःस्तम्भसमायुक्तं चतुस्तोरणभूषितम् ॥ ११० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभितो दर्भमालाभिश्शोभितं होममण्डपम् ।
कृत्वा तस्मिन्न[1]वान् कुम्भान् स्थापयित्वा नवापरान् ॥ १११ ॥

प्राच्यां वेद्यां पुनः कुर्यात्कुण्डं पूर्वोक्तलक्षणम् ।
यजेदेतेषु कुम्भेषु नव मूर्ती यथाक्रमात् ॥ ११२ ॥

[2]निवेद्य पायसं ताभ्यः पश्चात्कुण्डे हुताशनम् ।
आददीताथ ताम्रेण तालमात्रं भुजङ्गमम् ॥ ११३ ॥

प्रकल्प्य शेषमन्त्रेण प्रतिष्ठाप्य पितामह ।
तस्मिन् चक्रं लिखेत्तस्य मध्ये मत्स्याकृतिं पुनः ॥ ११४ ॥

गरुडं शङ्खपालं च कृष्णमन्त्रं च वेष्टनम् ।
तन्नागयन्त्रं क्षीरेण घृतेन मधुनापि च ॥ ११५ ॥

दध्ना शकृद्रसेनापि स्नापयेच्चक्रविद्यया ।
पुष्पगन्ध प्रदीपाद्यैरुपचारैस्तथापरैः ॥ ११६ ॥

इष्ट्वा नागं स्वमन्त्रेण चक्रं चक्रस्य विद्यया ।
कुण्डमध्ये पुनर्नागयन्त्रं खन्याद्विचक्षणः ॥ ११७ ॥

तस्य चोत्तानरूपस्य हुताशमुपरिस्थितम् ।
कृत्वा दध्ना घृतेनापि पयसा मधुनापि च ॥ ११८ ॥

समिद्भिर्ब्रह्मवृक्षस्य जुहुयान्मन्त्रकोविदः ।
सहस्रकृत्वः प्रत्येकमथ गोपयसोक्षितैः ॥ ११९ ॥

नीवारभागै[3]र्जुहुयात्सप्ताहं अयुतैरपि ।
अपानस्त्विति मन्त्रेण जुहुयात्साधकोत्तमः ॥ १२० ॥

---

1. नपां T, P_1, P_2 2. नैवेद्यं पायसान्नं स्यात् M_2 3. सप्ताहं जुहयात् P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रिष्वहस्सु व्यतीतेषु पर्जन्यो मेघवाहनः ।
[1]द्रावयेदवनीं कृत्स्नां भूयोऽपि सलिलोदयैः ॥ १२१ ॥

अतिवृष्टि प्रशमनं प्रवक्ष्यामि चतुर्मुख ।
पिङ्गलाकारमात्मानं ध्यात्वा पीयूषभावितम् ॥ १२२ ॥

शूलवज्रधरं चापि मन्त्रविन्मन्त्रभूषणम् ।
तैलाज्यसिक्तैर्जुहुयाल्ला[2]जसर्षपलावणै ॥ १२३ ॥

जुहुयाज्ज्वलिते वह्नावयुतं सप्तसागरात् ।
वृष्टिशब्दं पुरस्कृत्य स्तम्भयेति पदद्वयम् ॥ १२४ ॥

प्रयोक्तव्यमिदं ब्रह्मन् मन्त्रान्ते मन्त्रवेदिना ।
अथ शाम्यति सा वृष्टिर्महती चक्रविद्यया ॥ १२५ ॥

अथ राष्ट्रपुरादीनां क्षोभशान्तिं तथा शृणु ।
अथ काष्ठगतं चक्रं प्रतिष्ठाप्य यथाविधि ॥ १२६ ॥

पुरे राष्ट्रे तथा खन्यात् तत्काष्ठैर्जुहुयात्तथा ।
सहसा क्षोभमायान्ति वाजिवारणसङ्कुलम् ॥ १२७ ॥

राष्ट्रं च क्षुभितं ब्रह्मन्ननवस्थं भविष्यति ।
यदि शान्तौ मतिं कुर्याच्चक्रमुद्वास्य तत्पुनः ॥ १२८ ॥

स्नापयेद्भगवन्तं च सहस्रकलशाम्बुभिः ।
झटित्येव प्रशान्तं स्याद्दुरितं पुरराष्ट्रयोः ॥ १२९ ॥

राष्ट्रादिलम्भनं[3] तेऽद्य प्रवक्ष्यामि चतुर्मुख ।
उपेतं दलषट्कोणे कर्णिका केसरान्वितम् ॥ १३० ॥

---

1. प्लावये A 2. राजसर्षप M_1 3. जं बलं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चक्राब्जं कारयेद्भूमौ मेध्यायां कमलासन ।
तद्बहिर्नाभिवलयं षडरं तद्बहिर्लिखेत् ॥ १३१ ॥

तद्बहिर्नेमिवलयं ज्वालामाला समन्वितम् ।
तद्बहिः कल्पयेत्पीठं चतुर्द्वारपरिष्कृतम् ॥ १३२ ॥

शोभोपशोभयुक्तं च कृत्वा मण्डलमीदृशम् ।
तस्मिन् सुदर्शनं ब्रह्मन् पूजयित्वा यथाविधि ॥ १३३ ॥

समिद्भिरन्नैराज्यैश्च हुत्वा मन्त्रं प्रसीदतु ।
शृङ्गे चक्रं देहराष्ट्रं देहराष्ट्रं तथाधनम् ॥ १३४ ॥

इत्येतां पावनीं गाथां जपान्ते प्रार्थयन् पठेत् ।
अथ तस्य पुरं राष्ट्रं ग्रामं चक्रं प्रयच्छति ॥ १३५ ॥

अथ प्रभ्रष्टराज्यानां मनुजानां यथाश्रियः ।
तथा वक्ष्यामि ते ब्रह्मन्नुपायं चक्रविद्यया ॥ १३६ ॥

अन्तस्थितस्य पद्मस्य स्यात्पलाश चतुष्टयम् ।
अथाष्टौ द्वादश ब्रह्मन् षोडशाथ चतुष्टयम् ॥ १३७ ॥

विंशतिश्च तथा त्रिंशत् द्वौ क्रमेण बहिच्छदाः ।
इति षड्विध पत्रस्य कर्णिकायां सुदर्शनम् ॥ १३८ ॥

[1]येष्वथो षट्प्रकारेषु पलाशेषु यथाक्रमम् ।
मूर्तीश्चतस्त्रः प्रथमं तथाष्टाद्याधिका दश ॥ १३९ ॥

षोडशाथ सहस्रं च विंशतिश्च पितामह ।
अथ द्वात्रिंशतिं पश्चादन्तरालेषु षट्स्वपि ॥ १४० ॥

---

1. इष्ट्वा M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथाक्रमं भूषणानि श्रीवत्सप्रभृतीन्यथा ।
अष्टौशक्तीः श्रियासार्धं चक्रादिं होममण्डलम्[1] ॥ १४१ ॥

रवीन् सप्त'धिकान् पञ्च कुमुदादीननन्तरम् ।
इन्द्रादीनथ दिक्पालान् पूजयेन्मन्त्रकल्पवित् ॥ १४२ ॥

समिद्भिर्बिल्वरूपाभिस्तिलैः पद्मैस्तथा घृतैः ।
सहस्रकृत्वः प्रत्येकं जुहुयाच्चक्रविद्यया ॥ १४३ ॥

इत्थं गते सप्तरात्रे प्रातरुत्थाय मन्त्रवित् ।
स्थापितैः पञ्चविंशत्या कुम्भैश्शालिकृतासनैः ॥ १४४ ॥

घृतादि पूरितैर्ब्रह्मन् चक्रविद्याभिमन्त्रितैः ।
राज्यभ्रष्टं [2]मन्त्रहीनं दस्युभिः परिपीडितम् ॥ १४५ ॥

राजानं ब्राह्मणं वैश्यं तथान्यं दुरिताहतम् ।
अभिषिञ्चेत्स्मरन् चक्रं तन्मन्त्रेण विधानवित् ॥ १४६ ॥

तथा प्रकल्पयेद्यन्त्रं दापयेद्दक्षिणां गुरोः ।
[3]इत्थं कृते चतुर्वक्त्र सौभाग्यं राज्यलम्भनम्[4] ॥ १४७ ॥

दस्युनाशो भवेद्भद्रं स्यात्सुदर्शनतेजसा ।
आदावन्ते तदा ब्रह्मन् हंसमन्त्रवता पुनः ॥ १४८ ॥

नाशयेच्चक्रमन्त्रेण विषं स्थावरजङ्गमम् ।
अथ सङ्ग्रामविजयं वक्ष्यामि कमलासन ॥ १४९ ॥

कृपाणे तोमरे शक्तौ शरेषु वलये तथा ।
आयुधेषु तथान्येषु ललाटे वाजिहस्तिनाम् ॥ १५० ॥

---

1. मण्डपम् M_2 2. भाग्यहीनं M_2 3. इत्थं गते चक्रयन्त्रे M_1
4. लाभदम् A

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथा ध्वज[1]पटान्तेषु लिखित्वा चक्रमण्डलम् ।
प्रविश्य समरं भीमं रिपूणां रोमहर्षणम् ॥ १५१ ॥

हेषितेन तुरङ्गाणां बृंहितेन विषाणिनाम् ।
हर्षनादेन योधानां रथनेमि स्वनैस्तथा ॥ १५२ ॥

तुरङ्गम खुरक्षुण्णैः पार्थिवैः पांसुमण्डलैः ।
तिरोहितनभस्सूर्यं कृतान्तसदनोपमम् ॥ १५३ ॥

रुधिरास्रवसम्भ्रान्तं वैतालमिथुनोद्यतम् ।
मांससङ्ग्रहणोड्डीनसहस्रश्येनसङ्कुलम् ॥ १५४ ॥

ज्वालामालामयं चक्रं ध्यायन् जित्वा रिपूनपि ।
अक्षनागप्रहरणैः निष्क्रमेत् पृतनामुखम् ॥ १५५ ॥

अथवा राज्यसीमासु शङ्कून् खदिरसम्भवान् ।
स्थापयेच्चक्रमन्त्रेण हुतशिष्टघृतोक्षितान् ॥ १५६ ॥

अग्निप्रकाररूपास्ते न शक्यं प्रेक्षितुं परैः ।
[2]प्रवेशो कम्पनं ब्रह्मन् [3]चक्रविद्याप्रभावतः ॥ १५७ ॥

यत्र यत्र भयं पुंसां तत्र तत्र भयं भवेत् ।
चक्रमध्यस्थमात्मानं ध्यायन्तं कुपितात्मनः ॥ १५८ ॥

पर्वतारोहणेऽरण्ये सागरप्लवनादिषु ।
व्याघ्रसिंहवराहादि सन्निपातैः खिले पथि ॥ १५९ ॥

गच्छन्न भयमाप्नोति चक्रमन्त्रमिमं जपन् ।
तं न छिन्दन्ति शस्त्राणि न तं दहति पावकः ॥ १६० ॥

---

1. पताकेषु A, M_2 2. प्रवेशे किं पुनः M_2 3. ब्रह्म T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न चैनं क्लेदयन्त्यापो यस्यैष हृदये मनुः ।
ब्राह्मणक्षत्रियविशो शूद्राणां कमलासन ॥ १६१ ॥

प्रतिलोमानुलोमानां कुर्या[1]त्संहननं [2]बुधः ।
समिद्भिर्ब्रह्मवृक्षाणामश्वत्थवटवृक्षयोः ॥ १६२ ॥

प्लक्षोदुम्बरजातीनामपवर्गस्य पावके ।
होमं कुर्याद्यथासंख्यं तथा तज्जातियोषिताम् ॥ १६३ ॥

ब्राह्मणः श्रियमाप्नोति होमेन श्वेतपङ्कजैः ।
रक्त[3]पद्मैर्नरेन्द्रस्य वैश्यस्य श्वेतपाटलैः ॥ १६४ ॥

श्रीफलैराहुतिं कुर्वन् राष्ट्रस्याधिपतिर्भवेत् ।
अङ्गेन न्यस्तमन्त्रेण यां स्पृशेदङ्गनां नरः ॥ १६५ ॥

तस्य सा वशमायाति मृतं चाप्यनुगच्छति ।
अपमृत्युजयं वक्ष्ये यथावदवधारय[4] ॥ १६६ ॥

होमशालागते कुण्डे [5]सम्यगादाय [6]पावकम् ।
तस्मिन्नावाह्य हेतीशं[7] दूर्वाकाण्डैर्घृतोक्षितैः ॥ १६७ ॥

जुहुयात्कोटिभिर्मन्त्रैर्यथाशक्त्यथवा पुनः ।
इति मासद्वयं रक्षेत्पावकं नियतेन्द्रियः ॥ १६८ ॥

होमान्ते यदि भूपालस्तुलारोहणमाचरेत् ।
अन्यच्चेदात्मनो यत्स्वं दद्याद्ब्राह्मणसात् प्रति ॥ १६९ ॥

कलशैः पञ्चविंशत्या स्नापयेच्चक्रविद्यया ।
एवं कृते चतुर्वक्त्र कालमृत्युं जयेन्नरः ॥ १७० ॥

---

1. संवननाम्बुज P_1 2. पुनः A,P_2 3. पीतैः A 4. यथा तदवधारय P_1
5. सम्यगाधाय P_1 6. पङ्कजम् A,T,P_1,P_2 7. देवेशं T,P_1,P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपमृत्युः कथं तस्य तज्जये नास्ति संशयः ।
अथवा कालमृत्योश्च जयोपायोऽवगम्यताम् ॥ १७१ ॥

निष्कैः सहस्रसंख्यातैः प्रतिकृत्य पितामह ।
द्विभुजं पुरुषाकारं भ्रुकुटीकुटिलेक्षणम् ॥ १७२ ॥

दंष्ट्राकरालवदनं वराहरुधिरेक्षणम्
यष्टिं करेण सव्येन पाशं वामेन बिभ्रतम् ॥ १७३ ॥

प्रक्षाल्य पञ्चभिर्गव्यैः पञ्चोपनिषदा तथा ।
नवकैरभिषिच्याथ धान्यराशिषु निक्षिपेत् ॥ १७४ ॥

आवाह्य पश्चाद्व्याहृत्या पूजयित्वा स्वनामभिः ।
होममग्नौ प्रकुर्वीत समिच्चरुघृतैरपि ॥ १७५ ॥

ऋग्भिः कृतान्तलिङ्गाभिर्ब्रह्मव्याहृतिभिस्तथा ।
ततः प्रभाते विप्राय तं पुमांसं हिरण्मयम् ॥ १७६ ॥

पूताय भगवद्भक्त्या पञ्चकालानुवर्तिने ।
दापयेत्कालमृत्युं [1]वा स जित्वा स्यात्परायुषं पदम् ॥ १७७ ॥

अथ मारणमेतद्धि श्रूयतां चतुरानन ।
विविक्ते कल्पयेद्देशे होमशालां विधानवित् ॥ १७८ ॥

तन्मध्ये कल्पयेत्कुण्डमाचार्यो दक्षिणामुखम् ।
गृहीत्वाक्षस्य फलकां हस्तद्वयसमायताम् ॥ १७९ ॥

तदर्धविस्तृतां ब्रह्मन् घनं च [2]चतुरङ्गुलाम् ।
तस्यां लिखित्वा द्वेष्यस्य वपुः प्रत्यक्षसंमितम् ॥ १८० ॥

---

1. च T,P_2 2. चतुरानन M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिकूलेऽथ नक्षत्रे रिपोरष्टमराशिषु ।
कृष्णपक्षे विशेषेण प्रकुर्यान्मरणक्रियाम् ॥ १८१ ॥

प्राच्यां भागेऽथ कुण्डस्य षडरं चक्रमालिखेत् ।
कृष्णसूत्रैरलङ्कृत्य तस्मिन् चक्रं प्रतिष्ठितम् ॥ १८२ ॥

कृष्णगन्धैः कृष्णपुष्पैः पूजयेत्कृष्णवारिभिः ।
श्मशानाद्वा मुनिलयाद्वल्मीकान्मृदमाहरेत् ॥ १८३ ॥

तां रिपोः पादधूलीभिर्व्यामिश्रां कमलासन ।
उन्मत्तरसमिश्रेण खरमूत्रेण पेषयेत् ॥ १८४ ॥

विष्ठया वा मृदावापि द्वेष्यस्य प्रतियातनाम् ।
तस्यां प्राणान् प्रतिष्ठाप्य मन्त्रेणानेन मन्त्रवित् ॥ १८५ ॥

उद्गीथमप्रमेयं च मन्दरं भुवनं तथा ।
क्रोधानिलं पश्चिमास्यं हुताशं मधुसूदनम् ॥ १८६ ॥

प्रचण्डगोपनौ रामं भास्करं पश्चिमाननम् ।
समर्ध्यं गोपनद्वन्द्वममुष्येति पदं पुनः ॥ १८७ ॥

जीवा इह स्थिता शब्दं विष्णुदक्षोदयांस्तथा ।
क्रोधरूपं तपस्यन्तं सर्वशब्दमनन्तरम् ॥ १८८ ॥

विक्रमं विघ्नराजात्रिवह्निबन्धू च गोपनम् ।
वनमालाधरं रामं वाङ्मनःकाय इत्यपि ॥ १८९ ॥

अथ मायातृतीयान्तं लोडन्तं यानि यन्मुखम् ।
स्वाहावसानमुध्दृत्य प्रणवान्तादिकं मनुम् ॥ १९० ॥

तां च प्राणवतीं कुण्डे खन्यादुत्तानशायिनीम् ।
फलकास्थितमाकारमनुलिप्य पितामह ॥ १९१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वोक्तया मृदा पश्चात्प्राणिनं[1] प्राणविद्यया ।
पादेनाक्रान्तहृदयो शेषलोहितलोचनः ॥ १९२ ॥

सहस्रकृत्वश्चक्रस्य मन्त्रं भाषेत मन्त्रवित् ।
[2]विषवृक्षेप्ररूढेन शङ्कुना नेत्रयोर्हृदि ॥ १९३ ॥

हस्तयोः पादयोर्गुह्ये श्रोत्रयोर्नासिकोदरे ।
अन्येष्वपि प्रतीकेषु [3]वेधं कुर्याद्विचक्षणः ॥ १९४ ॥

तथाकृते रिपोस्तत्तद्गात्रं हीनं भविष्यति ।
अथ कुण्डे श्मशानाग्निं निदधीत पितामह ॥ १९५ ॥

दर्भैः परिस्तरेद्वेद्यां दक्षिणापश्चिमोन्मुखन्[4] ।
परिधींस्तद्वदाकीर्य कृत्वा रक्षां तथात्मनः ॥ १९६ ॥

ऋत्विग्भिः षोडशोद्दिष्टैर्द्वारेष्वध्ययने कृते ।
ब्राह्मणेभ्यो धनं दत्त्वा हेतिराजमनुस्मरन् ॥ १९७ ॥

अक्षकाष्ठ [5]प्रक्लृप्ताभ्यां स्रुक्स्रुवाभ्यां यथाविधि ।
कृष्णपन्नगराजीलकृष्णा तु क्षतजोक्षितैः ॥ १९८ ॥

मरीचैः सर्षपैर्युक्तानष्टधान्याष्टधान्वितान् ।
समिधोऽक्षस्य जुहुयात्सहस्रं प्रतिवासरम् ॥ १९९ ॥

रिपुनक्षत्रवृक्षाणां समिधश्चापि मन्त्रवित् ।
मन्त्रान्ते शत्रुनामानं मारयेति प्रकीर्तयेत् ॥ २०० ॥

[6]होतव्यं चावमानेन होमं कृत्वा दिने दिने ।
[7]यावद्भवति कृत्याया दर्शनं जातवेदसि ॥ २०१ ॥

---

1. नमन्त्रितं M_1 2. अक्षवृक्ष M_2 3. वधं M_1, P_1, P_2 4. मुखम् M_1
5. प्रतप्ताभ्यां M_1 6. होतव्यश्च प्रमाणेन M_2 7. यावदित्यारभ्य-दहेदिति पर्यन्तं T कोशे नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रमेण तावज्जुहुयाद्वासरानेकविंशतिम् ।
फलुकामपि वेदिस्थां होमधूपेन धूपयेत् ॥ २०२ ॥

अगरुं गुग्गुलुं चापि धूपार्थमनले दहेत् ।
अथ सप्तस्वतीतेषु दिवसेषु पितामह ॥ २०३ ॥

सप्तस्वहस्सु[1] मध्ये च यथाक्रममी ज्वराः ।
आक्रोशो वेदना तीव्रा गात्राणामविधेयता ॥ २०४ ॥

हिक्कानिःश्वासविच्छेदो जिह्वाहानिस्तथारिपोः ।
भवन्ति हि प्रभावेण चक्रमन्त्रस्य निश्चितम् ॥ २०५ ॥

इति द्विसप्तकेऽतीते दिवसेऽनन्तरे पुनः ।
मध्यरात्रे कृते होमे कृत्या तस्माद्विभावसोः ॥ २०६ ॥

त्रिशूलभीषणैर्हस्तैस्सप्तभिस्त्रिभिरङ्घ्रिभिः ।
जिह्वया रक्तवर्षिण्या लेलिहाना निजं मुखम् ॥ २०७ ॥

उद्गिरन्ती स्वनेत्राभ्यामाज्यसिक्तं हविर्भुजम् ।
नरास्थिमालां बिभ्राणा नूपुरीकृतमेखला ॥ २०८ ॥

कपालकुण्डलोपेता प्रहसन्ती भयानकम् ।
दण्डं [2]घण्टां तथा शूर्पं मार्जनीं पाशमण्डलम् ॥ २०९ ॥

बिभ्रतीं लम्बमानाभ्यां हस्ताभ्यां मुक्तमूर्धजाम् ।
अधिरूढापरस्कन्धमन्धकारनिभाकृतिः ॥ २१० ॥

स्फुलिङ्गमण्डलस्येव विमुक्ताटोपभीषणा ।
उत्थाय प्राञ्जलिर्भूत्वा किं करोमीति भाषते ॥ २११ ॥

---

1. स्स्वतीतेषु M_1 2. गदां M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिधास्यत्यथाचार्यः प्राणान् हर रिपोरिति ।
आदिष्टा सा तथेत्युक्त्वा रिपुं तस्य महात्मनः ॥ २१२ ॥

अपि दूरस्थितं हत्वा गुरुं पुनरुपैष्यति ।
अथ पूर्णाहुतिं हुत्वा होतृभिस्सह मन्त्रवित् ॥ २१३ ॥

[1]द्वाविंशे दिवसे लक्षं षडक्षरमिमं जपेत् ।
तथापराजितं मन्त्रन्नारसिंहमनुं तथा ॥ २१४ ॥

घृतादि पूरितैः कुम्भैर्विंशत्या पञ्चभिः पुनः ।
आत्माभिषेकं कुर्वीत चक्रमन्त्राभिमन्त्रितैः ॥ २१५ ॥

एनसो मुच्यते तस्मात्तथा शान्तिर्भविष्यति ।
उच्चाटनं प्रवक्ष्यामि यथावत् कमलासन ॥ २१६ ॥

निम्बधत्तूरपत्राणां श्मशानाङ्गारमिश्रितैः ।
रसैरक्षस्य काष्ठेन द्विहस्ते प्रेतवानसि । २१७ ॥

षट्कोणे नाभिनेम्यङ्के मण्डले क्रमशो लिखेत् ।
नामधेयं रिपोरन्तः [2]प्रोच्य याम्येऽथ पश्चिमे ॥ २१८ ॥

[3]यकारं भुवनं ब्रह्मन् [4]झकारं भुवनं तथा ।
शिष्टेषु त्रिषु कोणेषु तथाष्टौ मण्डलादयः ॥ २१९ ॥

तदारूढं रिपुं चापि कुण्डे चापाकृतौ पुनः ।
समिद्भिर्निम्बवृक्षस्य तथा च विषमूरुहः ॥ २२० ॥

जुहुयादभितो वह्नावमृतं प्लोषयन् रिपुम् ।
यत्र ध्वजं तं वध्नीयात् [5]उच्छ्रिते चैत्यपादपे ॥ २२१ ॥

---

1. द्वादशे M_2 2. प्राच्ये M_2 3. ककारं M_2 4. ईकारं M_2
5. दृश्यते M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहोभिरेकविंशत्या रिपुस्तस्य महानपि ।
अधिष्ठानं निजं हित्वा भार्यापुत्रादिभिः सह ॥ २२२ ॥

पलायते दिगन्तेषु न कचिल्लभते स्थितिम् ।
अथविद्वेषणं ब्रह्मन्यथावदवधारय ॥ २२३ ॥

अक्षपादपकाष्ठेन स्निग्धयोराकृतिर्द्वयोः ।
कृत्वा तयोर्लिखेन्मन्त्रं नामधेयं तयोरपि ॥ २२४ ॥

विद्वेषयपदोपेतमसृजा ध्वाङ्क्षकाकयोः ।
आखुमार्जारयोर्ब्रह्मंस्तथा सर्पमयूरयोः ॥ २२५ ॥

तथान्येषां विरुद्धानां तिरश्चां पक्षिणामपि ।
निबध्य रज्जुमायामां मूर्धजैर्महिषाश्वयोः ॥ २२६ ॥

तथा ते आकृती बध्द्वा व्यस्तयोस्तु कृतं मुखम् ।
अपिदध्यात्तयोरास्यं जपेन्मन्त्रं षडक्षरम् ॥ २२७ ॥

कुण्डेऽथ[1]होमं कुर्वीत समिद्भिर्मृत्युबन्धयोः ।
अष्टोत्तरसहस्रेण हूयादग्नौ सुदर्शनम् ॥ २२८ ॥

युध्येतस्निग्धयोर्द्वन्द्वं काकोलूकादि संमितम् ।
इत्थं दशस्वतीतेषु दिवसेषु स मन्त्रवित् ॥ २२९ ॥

अपाकृष्यति दम्पत्यो [2]ममत्वं मित्रयोरपि ।
[3]क्षीरैः स्नायात्तयोर्भूयः प्रीतिर्भवति पूर्ववत् ॥ २३० ॥

अथाभिधीयते ब्रह्मन् स्तम्भनं तन्निशम्यताम् ।
शिलातले लिखित्वाथ चतुष्कोणचतुष्टयम् ॥ २३१ ॥

1. च T, P_2 2. मुखं सन्मित्रयोरपि M_1 3. क्षीरस्नानात् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेषु प्रत्येकमालिख्य पत्रैर्द्रव्यैः पितामह ।
गृहं वामनमन्त्रं तमिन्द्रकान्तचतुष्टयम् ॥ २३२ ॥

वज्राङ्कमपि पुष्पैस्तत्पूजयेत् कनकप्रभम् ।
स्थापयित्वा[1]स्थण्डिलेऽस्मिन्नासिक्या मन्त्रमीरयेत् ॥ २३३ ॥

स्तम्भयेति पदं चापि जुहुयादर्कखण्डिकाः ।
स्तम्भनं स्यात् झटित्येवं विवाहे गर्भलाभके ॥ २३४ ॥

वादजल्पवितण्डासु कथास्वपि च वादिनाम् ।
वक्ष्यामि तिलकं ब्रह्मन् लिखित्वा प्रतियातनाम् ॥ २३५ ॥

[2]द्वेष्यस्यावयवैस्तुल्यैं गोमयाङ्गारमिश्रितैः ।
तदङ्गेषु लिखेन्मन्त्रं तद्बीजेन समन्वितम् ॥ २३६ ॥

अथस्याच्छक्तिहीनं तु मतिद्वेषस्य देहिनः ।
अथ ते ताडनं वक्ष्ये धत्तूरं भयमारयोः ॥ २३७ ॥

अर्कस्य च रसे ब्रह्मन् श्मशानाङ्गारमिश्रितैः ।
लिखेत्प्रतिकृतिं विरवकाष्ठे प्रेतस्य वाससि ॥ २३८ ॥

शङ्कुकीलमथादाय चतुरङ्गुल संमितम् ।
अङ्गानि ताडयेत्तस्य तेन कीलेन मन्त्रवित् ॥ २३९ ॥

षडक्षरस्य कुर्वीत नित्यं जपमतन्द्रितः ।
धनादि हानिस्तस्य स्यात् न्यन्ते द्वेष्टि समन्त्रवित् ॥ २४० ॥

वशीकारमहं ब्रह्मन् भूपतीनां वदामि ते ।
कुष्ठकुङ्कुमसिद्धार्थकर्पूरागरुचन्दनैः ॥ २४१ ॥

---

1. तलेतस्मिन् M_2 2. द्वेष्यस्यालयवैस्तल्या,-लयवैशल्या इति पाठौ नार्थबोधावहौ । अथ एष पाठस्साधुस्स्यादिति प्रतिभाति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गोरोचनान्वितैश्चापि कुसुम्भरजसा सह ।
भूर्जपत्रे लिखेच्चक्रं षडरेषु षडक्षरम् ॥ २४२ ॥

तद्बहिर्द्वादशारं च नाभिनेमिसमन्वितम् ।
द्वादशाक्षरमालिख्य द्वादशारं ततो बहिः ॥ २४३ ॥

अष्टाक्षरेण मन्त्रेण हंसमन्त्रेण चान्वितम् ।
तद्बहिर्द्वादशज्वालं पाशाङ्कुशमनुद्वयम् ॥ २४४ ॥

साध्यस्य नामधेयेन प्रणवेनान्तराङ्कितम् ।
आभिष्षोडशभिर्ब्रह्मन् विदर्भितमनन्तरम् ॥ २४५ ॥

तदेतद्गुलिकां कृत्वा पद्मसूत्रेण वेष्टिताम् ।
चक्राब्जे वासितां कृत्वा पूजितां कुसुमादिभिः ॥ २४६ ॥

होमं पद्माकृतौ कुण्डे कृत्वा कुसुमसर्पिषा ।
द्वादशाहानि कृत्वैवं मङ्गल्यादीनि साधयेत् ॥ २४७ ॥

राजादयो मुखं तस्य प्रेक्षन्ते विवशा इव ।
तस्य दूरात्पलायन्ते कूश्माण्डप्रमुखा ग्रहाः ॥ २४८ ॥

रसातलप्रवेशं ते कथयामि चतुर्मुख ।
बिल्वदारुं समासाद्य कुसुम्भरजसा सुधीः ॥ २४९ ॥

लिखित्वा षडरं चक्रं बहिस्तस्याथ मन्त्रवित् ।
[1]यथोपदेशं पातालं पन्नगासुरसङ्कुलम् ॥ २५० ॥

लिखेत्कृत्वा पुनः कुण्डे तस्मिन्नाधाय पावकम् ।
जुहुयान्नरमांसेन जपेन्मन्त्रं च सर्वशः ॥ २५१ ॥

---

1. यथोद्देशम M$_2$

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वादशाहेन ते पश्चात्पातालतलसंश्रयाः ।
उपस्थास्यन्ति तं [1]भीता युवत्यः कामपीडिताः ॥ २५२ ॥

तं ग्रहीष्यन्ति भर्तारमहम्पूर्वं शुचिस्मिताः ।
पाणिभिर्लोलवलयैः कामयानाः प्रियंवदाः ॥ २५३ ॥

[2]रसायनानि दास्यन्ति तस्मै पातालवर्तिने ।
[3]तद्भक्षणेन दीर्घायुस्ताभिस्सह यथेप्सितम् ॥ २५४ ॥

रंस्यते रम्यदेशेषु यत्र वा जायतेरुचिः ।
खड्गस्य साधनं ब्रह्मन्निदानीं कथयामि ते ॥ २५५ ॥

अश्वत्थपत्रान्तरितं खड्गं शास्त्रोक्तलक्षणम् ।
स्पृष्ट्वा षडक्षरं मन्त्रं जपेध्यात्वा सुदर्शनम् ॥ २५६ ॥

अथ खड्गस्य तापः स्यात् स यक्ष्यादीनि जेष्यते ।
तस्मिन् धूमायमाने तु गन्धर्वाधिपतिर्भवेत् ॥ २५७ ॥

तस्मिन् ज्वालामुखे ब्रह्मन् विद्याधरपतिर्भवेत् ।
गृहीत्वा तं पुनः खड्गं यथेष्टं लोकमाप्नुयात् ॥ २५८ ॥

गोमयेनोपलिप्तेऽथ शून्यागारे [4]पितामह ।
चक्रं लिखित्वा सुमनस्सितपुष्पैरलङ्कृतम् ॥ २५९ ॥

व्रणहीनं शवं तस्मिन् ब्राह्मणस्य नृपस्य वा ।
प्राचीनशिरसं कृत्वा माहिषेण घृतेन तम् ॥ २६० ॥

पादयोर्मन्त्रविल्लिम्पेद[5]सहायोऽप्रमत्तधीः ।
तद्वक्षसि पदं कृत्वा मन्त्रराजमिदं जपेत् ॥ २६१ ॥

---

1. भीत्या T 2. रसायनादि T, P_1, P_2 3. ततः प्रभावात् M_2
4. चतुर्मुख T 5. नाहरो M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रत्यहं जुहुयादग्नौ समिद्भिर्वेत्रभूरुहः ।
कृतसंख्यं जपेन्मन्त्रं जपहोमैः पितामह ॥ २६२ ॥

उत्थास्यति शवःप्राणी निशीथे कल्पिताञ्जलिः ।
स तस्मै मन्त्रसिद्धाय वक्ति दिव्यं रसायनम् ॥ २६३ ॥

पादुकामञ्जनं खड्गं प्रदास्यति यथेप्सितम् ।
यदिदं तेन खड्गेन हत्वा नीयात्तदामिषम् ॥ २६४ ॥

त्रैलोक्यविषयं ज्ञानं लप्स्यते चतुरानन ।
वलीपलितहीनत्वममरत्वं च सेत्स्यति ॥ २६५ ॥

निधीनन्यपि गूढानि प्रत्यक्षमिव पश्यति ।
रसं विमृज्य पाषाणे लिखेच्चक्रं षडक्षरम् ॥ २६६ ॥

रसं निधाय मूषायां बध्द्वा द्रव्यैर्यथोचितैः ।
कृत्वाभिमन्त्रितं ब्रह्मन् चक्रमन्त्रेण कल्पवित् ॥ २६७ ॥

उपयुञ्जीत मेधावी जपेच्चापि षडक्षरम् ।
आरोग्यं बलमैश्वर्यं कालमृत्युव्यतिक्रमम् ॥ २६८ ॥

वाग्मित्वं बुद्धिमत्त्वं च रूपसंहननं वयः ।
नभस्थले गतिश्चापि साक्षादिव गरुत्मतः ॥ २६९ ॥

इत्यादयो गुणास्तस्य भविष्यन्ति न संशयः ।
यथा न पादखेदः स्याद्दूरं गत्वापि तच्छृणु ॥ २७० ॥

काकजंघामुपादाय कोकिलेक्षण संहिताम् ।
बलां मोटारसैस्तेषां शरपुङ्खरसान्वितैः ॥ २७१ ॥

सर्षपस्नेहसंमिश्रैश्चक्रमन्त्राभिमन्त्रितैः ।
[1]लिप्त्वा पादयुतं चक्रं कृत्वारण्यमहापथे ॥ २७२ ॥

---

1. लिप्तपादयुतं चक्रं गत्वारणमहापथम् M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योजनानां सहस्त्रे द्वे न खेदं समवाप्नुयात् ।
यक्षिसिद्धिं प्रवक्ष्यामि तां लिखेत् क्षौमवाससि ॥ २७३ ॥

न्यग्रोधमूले तां ध्यात्वा यक्षीविद्यां जपेद्बुधः ।
आराध्य गुग्गुलूत्थेन धूपेन कमलासन ॥ २७४ ॥

समिद्भिर्वटवृक्षस्य तथाशोककरञ्जयोः ।
रक्तपद्मैस्तिलैश्चापि जुहुयाज्जातवेदसि ॥ २७५ ॥

एकविंशतिरात्रान्ते कम्पते स वटो मुहुः ।
दृढ बुद्धिः पुनश्चापि मन्त्रमेवं जपेद्बुधः ॥ २७६ ॥

अथ प्रत्यक्षरूपा सा यक्षी कल्याणलक्षणा ।
स्निग्धेव जननी सिद्धिं [1]तस्मै दत्त्वा यथेप्सितम् ॥ २७७ ॥

अमुनैव विधानेन यक्षा वैश्रवणादयः ।
प्रत्यक्षभूता दास्यन्ति साधकेन वृतं वरम् ॥ २७८ ॥

यथायथाधिको होमो जपो वा कमलोद्भव ।
अमुष्य चक्रमन्त्रस्य पञ्चकोटिर्यथोत्तरम् ॥ २७९ ॥

तथा तथा पदान्येतान्यवधूयेत किल्बिषम् ।
आदित्यानां शशाङ्कस्य वसूनां मरुतामपि ॥ २८० ॥

अश्विनो वासवस्यापि मन्वादीनां तपस्विनाम् ।
रुद्राणां ब्रह्मणश्चापि चक्रमन्त्रस्य वैभवात् ॥ २८१ ॥

सहस्रकोटिसंख्येन होमेन च जपेन च ।
तपसा चातितीव्रेण लभते वैष्णवं पदम् ॥ २८२ ॥

---

1. एतां M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किं भूयसा प्रलापेन यत्रेष्टं तद्भविष्यति ।
स तेन तेन लभते पापेभ्योऽपि प्रमुच्यते ॥ २८३ ॥

इत्येतत्कथितो ब्रह्मन् षडक्षरमहामनोः ।
कालः सङ्ग्रहरूपेण रहस्यं सर्वसिद्धिदम् ॥ २८४ ॥

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मतन्त्रे चर्यापादे
सुदर्शन महामन्त्रवैभवो नाम द्वात्रिंशोऽध्यायः ॥

—: * :—

त्रयस्त्रिंशोऽध्यायः ।

समाराधनाङ्गमन्त्रोद्धारः ।

ब्रह्मा :—

अथौपचारिकान्मन्त्रान् शुश्रूषे भगवन्नहम् ।
प्रयुज्यमानैर्यैः प्रीतिर्महती ते भविष्यति ॥ १ ॥

श्री भगवान् :—

ब्रह्मन्नाराधनाङ्गानि मन्त्राण्यवहितः शृणु ।
यानि श्रुत्यन्तभागेषु शृण्वन्ति ब्रह्मवादिनः ॥ २ ॥

[1]बन्धुकोशं पुरस्कृत्य ककुभं [2]ब्रह्ममस्तकम् ।
[3]वैराजं देवरं पश्चादेकनेत्र[4]मृगेश्वरौ ॥ ३ ॥

पवित्रभुवनौ चापि ब्रह्मन् चण्डवनालयौ ।
हुताशवामनौ पद्मगोपनौ विनतात्मजम् ॥ ४ ॥

---

1. ब्रह्म M_1 2. बन्धु M_1 3. वैकुण्टं A 4. महेश्वरौ T.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विघ्नेशं मन्दरं [1]कान्तं कलात्मा च जयाजयौ ।
पीयूषशामौ श्रीकुम्भौ सूक्ष्मं गोपनपश्चिमौ ॥ ५ ॥

वरुणं भद्रहस्तान्तं विघ्नेशं पाटलप्रियम् ।
अनिरुद्धं जयेणेशौ शुक्लं जयमथोदयम् ॥ ६ ॥

भास्वन्तमृतधामानं शत्रुदाहकवामनौ ।
पद्मादिदेवौ श्रीवत्सं दक्षं भास्करगोपनौ ॥ ७ ॥

पवित्रभुवनौ वह्निभुवनौ शत्रुदाहकम् ।
पश्चिमास्यं मकारं च हुताशनसुधारसौ ॥ ८ ॥

अन्तिमं ककुभं कृत्वा [2]जितन्ते मनुमीरयेत् ।
भानुविष्णुं ध्रुवं बीजं ब्रह्मन्नेतस्य कल्पयेत् ॥ ९ ॥

अङ्गान्यप्यमुना कुर्यादृषिः सनक उच्यते ।
छन्दोऽनुष्टुप्तथैतस्य देवता पुरुषोत्तमः ॥ १० ॥

जपोऽम्बुतर्पणं होमं कृतं षोडशलक्षवत् ।
धर्मार्थकाममोक्षार्थान् पुंसां सर्वं प्रयच्छति ॥ ११ ॥

पञ्चोपनिषदान्मन्त्रानथ ते कथयाम्यहम् ।
परमेष्ठी पुमान्विश्वो निवृत्तः सर्व एव हि ॥ १२ ॥

आम्नायादिं क्रोधरूपं सङ्कर्षणगजाननौ ।
दक्षानिरुद्धौ पापघ्न वह्निगोपनमारुतान् ॥ १३ ॥

पवित्रपावकौ दक्षमाधवौ पद्मसम्भव ।
क्रोधकौस्तुभशङ्खाद्यैर्गोरनं जयमन्दरौ ॥ १४ ॥

---

1. शान्तं P. 2. जितन्ता T, P, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]विघ्नेशमाधवौ चान्ते परमेष्ठिनमीरयेत् ।
ऋषिरादित्यनामास्य छन्दो गायत्रमुच्यते ॥ १५ ॥

देवता च सदाविष्णुर्जपेद् द्वादशलक्षवत् ।
प्रथमं प्रणवं कृत्वा धूलिकेतनगोपनौ ॥ १६ ।

विघ्नेशद्वितयं दक्षकलान्तौ पश्चिमाननम् ।
वह्न्यादिदेवौ शङ्खाख्यं पश्चिमं भुवनं तथा ॥ १७ ॥

पावकं [2]भुवनं पश्चाच्छक्रं दाहकगोपनौ ।
जयदक्षौ भद्रपाणिं देवदत्तौ तथान्तिमौ ॥ १८ ॥

इत्येवं पौरुषं मन्त्रमीरयेन्मन्त्रकोविदः ।
ऋषिं नारदमस्याहुश्छन्दो गायत्रमीरितम् ॥ १९ ॥

देवता वासुदेवश्च शृणु विश्वमतः परम् ।
ताराग्निगोपनौ [3]दक्षभद्रपाणी कलान्तिमौ ॥ २० ॥

पवित्रवह्न्यादि देवान् शङ्खं वरुणविक्रमौ ।
श्रीवत्सकुम्भौ विजयमन्दरौ विघ्नमाधवौ ॥ २१ ॥

इतीरितो विश्वमन्त्रः पुनर्द्रष्टा भृगुर्मनोः ।
छन्दो गायत्रमेतस्य वाच्यः सङ्कर्षणाभिधः ॥ २२ ॥

उद्गीथकुम्भादिदेवौ विघ्नेशद्वयमस्तकम् ।
मन्दरं वरुणं पापहननं बह्निगोपनौ ॥ २३ ॥

वायुं विघ्नेश्वरं रामं पीयूषं वसुमस्तकम् ।
एकनेत्रं वायुनादिं देवान् वैराजमन्दरौ ॥ २४ ॥

---

1. विघ्नेशं च मृगेशं च 2. श्रीधरं A, M_2 3. भद्रपाणि-दक्षकमन्तिमौ A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनुष्येशं मृगेशानं निवृत्तिमनुमीरीरितः ।
ऋषिस्तु नारदश्छन्दो गायत्रं पूर्वमीरितम् । २५ ॥

प्रद्युम्नो देवताऽनेन निवृत्तिं लभते पुमान् ।
प्रणवं पीतवर्णाभं गोपनं मानुषेश्वरम् ॥ २६ ॥

माधवीं सर्गिणं पापहन्तनं वह्निगोपनौ ।
चतुर्गतिं कलात्मानं कुम्भः पावकगोपनौ ॥ २७ ॥

वैराजमन्दरौ स्यातामुद्धार्य चतुरानन ।
गजास्यं देवदत्तान्तं सर्वमन्त्रं प्रकल्पयेत् ।। २८ ॥

उष्णिक्छन्दः पुनस्तस्य द्रष्टा स्यान्नीललोहितः ।
अनिरुद्धो देवता च मनवः पञ्च कीर्तिताः ।। २९ ॥

पञ्चोपनिषदः पुण्यास्ता एताश्चतुरानन ।
महापातकनाशिन्यः पराकादिफलप्रदाः ॥ ३० ॥

एतास्सम्यगधीते यो वेदान्तानथवाखिलान् ।
तावुभौ सदृशौ मन्ये पञ्चभूरशस्यतेऽथवा[1] ॥ ३१ ॥

प्रायश्चित्तेषु होमेषु प्रतिष्ठाप्रोक्षणादिषु ।
प्रयुञ्जीत क्रमानेताः सर्वपापप्रणाशिनीः ॥ ३२ ॥

अतः परं प्रवक्ष्यामि शान्तिमन्त्रचतुष्टयम् ।
प्रणवं मधुहन्तारं पवनं मधुसूदनम् ॥ ३३ ॥

भास्करं पुरुषात्मानं गदिविघ्नेशमाधवान् ।
भल्लायुधं हृषीकेशमग्निं भल्लायुधोदयम् ॥ ३४ ॥

---

1. पञ्चभूरशस्यतेऽधुना T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुम्भं मृगाङ्कपीयूषौ कमलाननमन्तिमम् ।
शुक्लं कुम्भं मघोरशत्रुं भास्करं गोपनं तथा ॥ ३५ ॥

इतीरयेन्मनुं ब्रह्मन् ऋषिः स्याद्देवता मनोः ।
छन्दो गायत्रमेतस्य देवता तिग्मतेजसः ॥ ३६ ॥

उद्गीथं विजयं कुम्भं विघ्नेशान्त्रिमृगेश्वराः ।
पीयूष गोपनौ भद्रहस्तगोपनयष्टयः ॥ ३७ ॥

जृम्भल पद्मनाभं च भानुमद्विजयोनयः ।
मुसली गोपनः पश्चाज्जयं कुभञ्च माधवम् ॥ ३८ ॥

नेत्रोतदेहौ सूर्यश्च श्रीधरौ विजयावनौ ।
श्रीविघ्नेशस्सुभद्रोऽथ गदीवरुणमस्तकाः ॥ ३९ ॥

वैराजकुम्भादिदेवा दक्षो मधुनिषूदनः ।
आदित्यरामनासिक्यचन्द्रवामनसर्गिणः ॥ ४० ॥

हुतान्त इति मन्त्रोऽयमूहनीयश्चतुर्मुख ।
ऋषिरस्य [1]भृगुं प्राहुश्छन्दो गायत्रमित्यपि ॥ ४१ ॥

हुताशनो देवता च देवानां प्रथमं मुखम् ।
निगमादिं श्रियः कान्तौ विजयद्वयविक्रमौ ॥ ४२ ॥

क्रोधमेघौ पवित्रं च श्रीधरं [2]पावकाह्वयौ ।
उग्रात्मवह्निद्युमणिरनलं बन्धुमस्तकम् ॥ ४३ ॥

पवित्रं बन्धुनासिक्यं गदिनं पुरुहं तथा ।
दृष्टिं मृगेशं द्युमणिं रामो वैधरपावकौ ॥ ४४ ॥

---

1. मनुं T, P_2 2. पावकोदयौ T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वरुणं मायया साकं प्रचण्डं पाटलप्रियम् ।
पवित्रदहनौ वायुस्वच्छन्दौ ठठ पश्चिमौ ॥ ४५ ॥

इत्थं प्रकल्पयेन्मन्त्रमृषिर्षनद उच्यते ।
छन्दो गायत्रमेतस्य देवता हरिपिङ्गलः ॥ ४६ ॥

तारं पवित्रं विजयं विघ्नेशं भृगुगोपनौ ।
भास्करं पुरुषात्मानं गदिनं विघ्नमाधवौ ॥ ४७ ॥

भल्लायुधहृषीकेशौ वह्निं भल्लायुधोदयम् ।
कुम्भसम्पुटितं शुक्लं चन्द्रं[1] पीयूषगोपनौ ॥ ४८ ॥

भानुमन्तं मघोरशत्रुमिति मन्त्रं विवेचयेत् ।
ऋषिर्बृहस्पतिस्तस्य छन्दः पूर्ववदीरितम् ॥ ४९ ॥

आदित्यो देवता ह्येवमुक्तं मन्त्रचतुष्टयम् ।
यत्र मन्त्रं क्रियाद्रव्यहीनं शान्त्यादिकर्मणि ॥ ५० ॥

तस्मिन्नेतत्प्रयुञ्जीत तथायं साधको विधिः ।
मन्त्राणि ते प्रवक्ष्यामि तत्त्वानां पञ्चविं[2]शतिम् ॥ ५१ ॥

प्रयुज्यमानैर्यैर्विश्वं प्राणिति प्राणवर्जितम् ।
प्रणवस्योपरि स्पर्शानाहुर्वाभनमस्तकान् ॥ ५२ ॥

नमोऽन्तान् प्रातिलोम्येन योजयेत्पञ्चविंशतिम् ।
परशब्दं चतुर्थ्यन्तं नतेः पश्चात्प्रकल्पयेत् ॥ ५३ ॥

जीवं देहं तथा [3]बुद्धिं गर्वं पश्चान्मनस्तथा ।
शब्दस्पर्शौ तथा रूपं रसो गन्धश्च पञ्चमः ॥ ५४ ॥

---

1. चन्द्रपीयूष गोपनान् T, P^1, P_2 2. विंशतेः T, P_1, P_2 3. बुद्धिं-अहंकारं मनस्तथा A.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतान् पञ्चापि विषयान् तन्मन्त्रवचनोदरान् ।
श्रोत्रं त्वक्च तथा नेत्रं जिह्वा घ्राणं ततः परम् ॥ ५५ ॥

वाचं पाणिं तथा पादं पायूपस्थौ पितामह ।
पृथिवीं प्रथमं तोयं तेजो मारुतमन्वतः ॥ ५६ ॥

व्योम चान्ते चतुर्थ्यन्तैरात्मशब्दैस्तथोत्तरैः ।
कुलनामानिमान् शब्दान् मन्त्ररूपेण कल्पयेत् । ५७ ।

उद्गीथकृतनासिक्यौ हुताशं बिन्दुमस्तकम् ।
ककुभं गदिनं [1]वासुदेवं विजयवामनौ ॥ ५८ ॥

तथा च वासुदेवान्तविजयं वामनं तथा ।
वह्निं गुहालयं चापि पवित्रमधुसूदनौ ॥ ५९ ॥

चतुर्गतिं [2]मनुं प्राणं दीपार्थं मनुमीरयेत् ।
तारं सूर्यहृषीकेशयष्टयः पुष्टिबीजवान् ॥ ६० ॥

मेघबिन्दू शुक्रशमौ ऋषिः पुण्यत्रिविक्रमौ ।
इन्दुर्गुहालयं पश्चाज्जयपावकगोपनाः ॥ ६१ ॥

इति वायुर्नतिर्मत्स्यादक्षसूत्रमनुर्महान् ।
तारं श्रीराम कौमार पुरुषात्ममृगेश्वरौ ॥ ६२ ॥

विष्णुं पद्मानलकं वह्निं धूम्रध्वजगुहालयौ ।
पवित्रबन्धुसुमुखा माधवं प्रथमं तथा ॥ ६३ ॥

हुताशं पद्मपाणिं च वायुं वह्निं गुहालयम् ।
पश्चिमास्यं मघोरशत्रुं शङ्खं च नतिमस्तकम् ॥ ६४ ॥

---

1. पीठं मुसलं वायुमस्तकम् M_1 2. नतिं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्यर्घ्यमन्त्रं रचयेदथ पाद्यमनु शृणु ।
तारं गदिध्रुवौ चापि गदध्वंसी मृगाधिपौ ॥ ६५ ॥

पश्चिमं रामशिरसं विजयं वह्निपश्चिमौ ।
एकविंशं पद्मनाभं मायां पवनपङ्कजौ ॥ ६६ ॥

वह्निद्वितीयमनिलं पापघ्नं मधुसूदनम् ।
[1]वैधरं मारुतं वह्निं हृषीकेशोऽथ पश्चिमम् ॥ ६७ ॥

रामं सुमुखसारङ्गौ नत्यन्तं मन्त्रमीरयेत् ।
आदौ [2]व्यालं शुक्रवह्निं चन्द्रकुम्भौ जयानिलौ ॥ ६८ ॥

मन्दरं पद्मनाथं च वैराजाग्निगुहालयाः ।
[3]पापहन्तारमद्वेषी वनमाली मृगेश्वरौ ॥ ६९ ॥

गोपनो वक्रतुण्डश्च दक्षविघ्नेशगोपनाः ।
वैराजदक्षौ विघ्नेशमाधवौ नतिमस्तकौ ॥ ७० ॥

इत्याचमनमन्त्रस्स्यात् धूपादीनि यथा अमी ।
प्रथमं चेदपि मनोर्धूपान्दुरितात्मवान् ॥ ७१ ॥

रामं दृष्टिमनुस्वारं गदिनं विष्णुमस्तकम् ।
आदित्यगोपनौ चण्डं वह्निजायावसानकम् ॥ ७२ ॥

इत्येतत्कल्पितं मन्त्रं प्रतिभोगनिवेदनम् ।
प्रयुञ्जीत प्रयोगं च तस्मात्साधारणो मनुः ॥ ७३ ॥

द्विषट्काक्षरमुध्दृत्य शिखण्डिपुलहं ध्रुवम् ।
सुभद्रकुम्भौ विजयश्रीधरौ दक्षमाधवौ ॥ ७४ ॥

---

1. सुभगं A, M_2 2. व्यापीति पाठो न कश्चिदप्यर्थं बोधयति ।
3. पापहन्ता च रामं च वनमालिमृगेश्वरौ M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पवित्रभुवनौ क्रोधपश्चिमाननगोपनाः ।
ठठान्तमथ नत्यन्तं मनुमित्थं प्रकल्पयेत् ॥ ७५ ॥

पुष्पाञ्जलिप्रदानेषु नियुञ्जीत जितं पुनः ।
ताःश्शुक्लघटो यष्टिश्चन्द्रमा भुवनोऽनलः ॥ ७६ ॥

सुभद्रवाय्वोतदेह नत्यन्तो मनुरीरितः ।
तेनाराधनवस्त्रं स्यादाप्यायनमुपाचरेत् ॥ ७७ ॥

इत्थमाराधनाङ्गानि मन्त्राणि कथितानि ते ।
इदानीमैहिकान् मन्त्रान्प्रवक्ष्यामि मनोहरान् ॥ ७८ ॥

स्वीकृत्य सप्तवर्णानि रोहिणीशमपांपतिम् ।
पवित्रमानुषेशानौ गोपनं पुण्यविक्रमौ ॥ ७९ ॥

पश्चिमं विजयं वायुं माधवो वरुणानिलौ ।
वासुदेवं तथा दक्षं गोपनं जयमन्दरौ ॥ ८० ॥

विघ्नेशमाधवौ पापहननं पवनं तथा ।
गुहालयमथो यष्टिं सूर्यमूर्ध्वं जगत्पतिम् ॥ ८१ ॥

यष्टिं कुम्भं जगत्प्राणं हृषीकेशं तथा ध्रुवम् ।
श्वेतांशुं वरुणं बिन्दुं द्विसूर्यं वामनं ध्रुवम् ॥ ८२ ॥

ठठान्तिकं तनुं ब्रह्मन्नीरयेदथ तारकम् ।
नत्यन्तं शुक्लवरुणौ पश्चिमं विक्रमं जयम् ॥ ८३ ॥

बन्धुमग्निं हृषीकेशं पश्चिमं मधुसूदनम् ।
चतुर्गतिमचामादिं माहेन्द्रं विष्णुपन्नगौ ॥ ८४ ।

मन्दरं वामनं पश्चात्पश्चिमं विजयानिलौ ।
देवदत्तं श्रियं वह्निं महामायां महाबलाम् ॥ ८५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हृषीकेशं ध्रुवं चापि बीजमाम्रेडयेदिदम् ।
पवित्रमनिलं[1] चण्डं गोपनं द्विविनायकम् ॥ ८६ ॥

वैधरं मधुहन्तारं विजयं मन्दरं तथा ।
भद्रहस्तं मृगेशं च ठठान्तं मन्त्रमीरयेत् ॥ ८७ ॥

सिन्धुद्वीपो मनोर्द्रष्टा विराट् छन्दो निगद्यते ।
स्वप्नाधिपतिरेतस्य देवता परमः पुमान् ॥ ८८ ॥

हृषीकेशं यष्टिमन्त्रमीरयेन्मन्त्रकोविदः ।
उष्णिक् छन्दः पुनस्तस्य देवता नृहरिर्हरिः ॥ ८९ ॥

[2]अथाङ्गिरस नामानि तेषां मन्त्रं प्रचक्षते ।
[3]अभिन्नविट्पस्कन्धं स्पृष्ट्वाश्वत्थमिमं जपेत् ॥ ९० ॥

अहोभिः सप्तभिर्मृत्युं लङ्घयेत्संयतेन्द्रियः ।
अथाल्पायाससाध्यानि शृणु मन्त्राणि पद्मज ॥ ९१ ॥

व्यापिनं पुरुषात्मानं वासुदेवं सपश्चिमम् ।
रामं [4]विघ्नेश्वरं मायामुद्गीथरहितानिमान् ॥ ९२ ॥

दक्षादीशानादि देवान् मायाब्जं सुप्रतिष्ठितम् ।
वायुं पद्मं मघोश्शत्रुं शङ्खं वह्निध्रुवानपि ॥ ९३ ॥

हुतान्तमुद्धरेत्कर्णं गोभितं मन्त्रमुत्तमम् ।
जपेल्लक्षमिमं मन्त्रमुपोष्यैकादशऽहनि ॥ ९४ ॥

द्वादश्यामपि कुर्यात्स्त्रीं समुन्नतपयोधराम् ।
आवाह्य तस्यां हुत्वा च पूजयित्वा च योगिनीम् ॥ ९५ ॥

---

1. मनलं T, P_1, P_2 2. तथा हि P_2 3. अभग्र A, M_2
4. विश्वेश्वरं A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मध्यरात्रे बलिं दत्त्वा छिन्द्यात्तां प्रतियातनाम् ।
भूतं [1]भवद्भविष्यं च तस्य वक्ष्यति योगिनी ॥ ९६ ॥

आम्नायादिं विधातारं प्रचण्डं वसुमस्तकम् ।
पश्चिमं विक्रमं लक्ष्मीं गोपनं खड्गधारिणम् ॥ ९७ ॥

सविक्रमं घटं चाग्निं [2]पद्मं तद्द्विरदाननम् ।
पङ्कजं वारुणमथो सरसीरुहसम्भव ॥ ९८ ॥

ककुभं वह्निमपरं पीयूषं गोधनं तथा ।
झषं गुह्यालयं चापि शङ्खं वह्निं च मन्दरम् ॥ ९९ ॥

श्रीधरं पद्मवैराजं गोपनं सूक्ष्मलोचनम् ।
वह्निं प्रचण्डं विघ्नेशं रामो मन्दरपावकौ ॥ १०० ॥

पीतादिदेवौ पुलहं यष्टिं पद्मगुह्यान्तिकौ ।
एकनेत्रं श्रियं वह्निं वामनं वह्निमाधवौ ॥ १०१ ॥

मृगेशभावसद्बन्धु[3]र्विन्घोपहतिकं तथा ।
स्वच्छन्दं विजयं वह्निं वीरसेनसरोरुहौ ॥ १०२ ॥

आदिदेवं तथा चन्द्र [4]रविदृष्टिशुभप्रदौ ।
वह्निं विनायकं रामं द्विर्दक्षं चतुरानन[5] ॥ १०३ ॥

प्रचण्डः पावको यष्टिः पश्चिमास्यहुताशनौ ।
पीयूषरामसहितौ शुभदं वायुगोपनौ ॥ १०४ ॥

विजयं पद्मबिन्दुं च वैराजमधुसूदनौ[6] ।
गणेशगोपनौ पश्चाद् गदिनं विजयं घटम् ॥ १०५ ॥

---

1. भन्यं M_1 2. घटञ्च T, P_1, P_2 3. विघ्नेशं भुवनं तथा M_1
4. बायुं विष्णुदाष्टिशुभप्रदौ M_1 5. चतुराननम् T, P_1, P_2 6. वैराजं मधुसूदनम् T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकदृष्टिं तथा वह्निं मन्दरं मधुसूदनम् ।
कुञ्जराननविष्णवन्तौ विघ्नेशं बन्धुमस्तकम् ॥ १०६ ॥

ककुभं चन्द्रधवलं गोपनं पश्चिमाननम् ।
चतुर्गतिं ठठोपान्तं इति मन्त्रं प्रकल्पयेत् ॥ १०७ ॥

अधस्तान्नेत्रवृक्षस्य जपन्नेतदतन्द्रितः ।
नष्टं मुष्टिं चिन्तनांच जानात्येतत्प्रसादतः ॥ १०८ ॥

सप्ताक्षरं प्रकल्प्यादौ वरुणं गोपनं दरम् ।
पीयूषमाधवौ[1] दक्षं दृष्टिवह्निरदद्वयम् ॥ १०९ ॥

पश्चिमाभिमुखानेतान् दहनस्यान्तरोदितान् ।
[2]सूर्यरामौ पीतबन्धू द्विः प्रकल्प्य चतुष्टयम् ॥ ११० ॥

शुक्लं यष्टिविवस्वन्तौ वह्निं स्वाहावसानकम् ।
इत्थम्बुस्तम्भनं मन्त्रं कल्पयेत्कमलासन ॥ १११ ॥

प्रणवादिं वासुदेवं शुभदं [3]पङ्कजद्वयम् ।
मायामभ्यस्य हन्तारं पुलहं शशिनं जयम् ॥ ११२ ॥

यष्टिं भल्लायुधं चापि विघ्नेशं राममस्तकम् ।
नत्यन्तमुदकस्तम्भं मन्त्रं मन्त्रवदीरयेत्[4] ॥ ११३ ॥

अनयोः पूर्वमन्त्रेण स्थितवत् सलिले चरेत् ।
उत्तरेण तु सिन्धूनां वेगस्तम्भं समाचरेत् ॥ ११४ ॥

अग्निस्तम्भनमन्त्रं ते कथयामि यथातथम् ।
सप्ताक्षरं कुम्भवह्निं भुवनं वनमालिनम् ॥ ११५ ॥

---

1. पीयूषमाधवं P_1,P_2 2. रामोऽपि तद्बन्धू M_2 3. पङ्कजं तथा T,P_1,P_2 4. मुदीरयेत् M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गोपनं पुरुषात्मानं त्रिवह्निं शशलाञ्छितम् ।
वैराजबिन्दू [1]ह्स्वान्तं चतुर्गतिमथो ठठम् ॥ ११६ ॥

इत्यग्निस्तम्भनं मन्त्रं साधयेदयुतं नरः ।
लोहं तैलं घृतं क्षीरं परशुं सलिलं तथा ॥ ११७ ॥

सप्तान्येतानि संस्पृश्य शीतश्चाग्निर्भविष्यति ।
[2]उदरे पङ्कजस्येव सुखमासीत शुष्मणः ॥ ११८ ॥

सप्ताक्षरं चतुर्थ्यन्तं विष्णुशब्दं चतुर्मुख ।
[3]पवित्रं श्रीहृषीकेषं विघ्नेशं मधुसूदनम् ॥ ११९ ॥

प्रद्युम्नं पापहननं विजयं वायुमाधवौ ।
द्दष्टिं मन्दरपाताद्विर्ठठान्तं मन्त्रमीरयेत् ॥ १२० ॥

गवां च महिषाणां च कुर्यादेतेन वश्यताम् ।
आदौ चतुस्त्रिवर्णानि धनप्रदगुहालयौ ॥ १२१ ॥

पवित्रवह्निकमलं सुमुखं वह्निगोपनौ ।
वायुष्ठठान्तमित्येष व्यालादि दमनो मनुः ॥ १२२ ॥

प्रणवे षष्ठशब्दादि सम्बुध्यन्तं पिशाचवत् ।
ऊर्ध्वलोकेशहननं पाषाणेषु ठठो मनुः ॥ १२३ ॥

इमं हि जपतोमन्त्रं रिपुमूर्धनि ताडयेत् ।
पिशाचरूपं प्रत्यक्षं पाषाणैरस्थिभिश्शवैः ॥ १२४ ॥

व्यापिनं गदिनं भद्रहस्तं पुण्यस्सरित्पतिम् ।
वह्निं [4]हुताशं विष्ण्वन्तं ककुभं कुम्भविक्रमौ ॥ १२५ ॥

---

1. सुस्वान्तं M_1 2. उत्तरे A, P_1, P_2 3. पवित्रार्थं हृषीकेशं M_2
4. हुताशनं विष्णुं A, M_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीकुम्भगोपनान् कुम्भं शशाङ्कं ब्रह्मसाधनम् ।
द्विर्मन्दरं मघोश्शत्रुं सुभद्रं बन्धुमस्तकम् ॥ १२६ ॥

पीतं क्रोधनमायामं विजयं गोपनं ध्रुवम् ।
ब्रह्माणं मानुषेशानं वायुं गोपनमस्तकम् ॥ १२७ ॥

बिन्दुं पवित्रमनलं[1] मारुतं प्रेतनायकम् ।
स्वाहावसानं गन्धर्वं मन्त्रमित्थं प्रकल्पयेत् ॥ १२८ ॥

अथर्वणमिमं मन्त्रं पिनाकी शिरसिस्थितम् ।
अधस्तात्पारिजातस्य हेमसिंहासनस्थितम् ॥ १२९ ॥

[2]आयामिनीभिर्मालाभिर्दिव्याभिश्शोभिवक्षसम् ।
चन्दना[3]गरुलिप्ताङ्गं दिव्याभरणभूषितम् ॥ १३० ॥

रूपयौवनयुक्ताभिर्वालव्यजनपाणिभिः ।
नित्यं षोडशवर्षाभिरुत्पलस्निग्धदृष्टिभिः ॥ १३१ ॥

महाकुलप्रसूताभिर्मदविह्वल[4]मूर्तिभिः ।
अद्भुतभ्रूविलासाभिः श्रवणप्रियगीतिभिः ॥ १३२ ॥

ईष[5]द्विस्रंसिवासोभिरंसव्याकुलमौलिभिः ।
स्तनान्दोलितहाराभिः कदलीसुभगोरुभिः ॥ १३३ ॥

कुटिलालकमालाभिः कन्यकाभिर्निषेवितम् ।
कृतावधानं गीतेषु [6]किंनरीणां मुहुर्मुहुः ॥ १३४ ॥

गन्धर्वाधिपतिं ध्यायन् लक्षं मन्त्रमिमं जपेत् ।
अथैनमुपतिष्ठन्ते कुलवत्यो वराः स्त्रियः ॥ १३५ ॥

---

1. मनिलं M_2 2. आयामिनीभिः ज्वालाभिर्मालाभिः M_2 3. दिङ्नागमदलिप्ताङ्गं रत्नाभरण T, P_1, P_2 4. दृष्टिभिः M_2 5. द्विस्रंसि B_2, P_1, P_2 6. किंनराणां T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गन्धर्वराजवचनाद्रूपयौवनशालिनम् ।
अथेन्द्रजालमन्त्रस्य स्वरूपं कथयामि ते ॥ १३६ ॥

ब्रह्मकुम्भौ वीरसेनौ क्रोधं [1]सुमुखवारुणौ ।
रामं दक्षं मघोशशत्रुं चतुर्गतिमृगेश्वरौ ॥ १३७ ॥

मोहयत्यथ रूपाणि द्विः प्रदर्शय मस्तकम् ।
हुङ्कारं चतुरभ्यस्तं ब्रह्मन् किलिकिलिं तथा ॥ १३८ ॥

ऋतद्वयं कुम्भशमौ पवित्रानलवामनान् ।
विजयं लोचने कृत्वा भद्रं[2] बामनमस्तकम् ॥ १३९ ॥

नानारूपाणि मायेद्वे द्विर्मन्त्रमिति कल्पयेत् ।
जपेन लक्षसंख्येन माया प्रत्यक्षसङ्गता ॥ १४० ॥

यद्यदिष्टं साधकस्य तत्तत्कुर्वीत तत्क्षणात् ।
ब्रह्माद्या देवताः सर्वा गगनस्थाः प्रदर्शयेत् ॥ १४१ ॥

गगनं मेदिनीं कुर्याद्यामिनीं दिवसं तथा ।
जीवन्तमप्सु निहितं प्राणवन्तं तथा शवम् ॥ १४२ ॥

मरुप्रदेशं वारीणि शुष्यन्तं पयसां निधिम् ।
षड्रसं वैपरीत्येन देशानप्ययथातथम् ॥ १४३ ॥

पाषाणैस्ताडयन् देहं नेत्राद्युत्पाटनं तथा ।
खर्वाटकेशसंरोहं यूनः स्थविरतां तथा ॥ १४४ ॥

पुंसः स्त्रीत्वं तथा स्त्रीणां पुंस्त्वं क्लीबस्य तद्द्वयम् ।
तयोर्वा क्लीबतां चित्रं श्मश्रु स्तनविपर्ययात् ॥ १४५ ॥

---

1. सुभग M_2 2. गर्भद्वितय मस्तकम् T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गीतं शुकैस्तथा गीतामन्यथा भावभागिनः ।
अगर्भिणीं गर्भिणीं च गर्भिणीं चाप्यगर्भिणीम् ॥ १४६ ॥

पादादि भङ्गसन्धाने नभःकुसुमसम्भवः ।
अचिन्तितानि शैलानां पतनानि यथेप्सितम् ॥ १४७ ॥

मनुष्यादिषु शृङ्गाणि गगनारोहणं तथा ।
अकाल रणसंरम्भान् प्रतिमाकर्षणं तथा ॥ १४८ ॥

कठिनानां द्रवीभावो द्रवतां कठिनात्मता ।
अद्यापि प्रलयावस्थामुन्मज्जननिमज्जने ॥ १४९ ॥

खड्गादिभिरभङ्गं च जङ्गमं स्थावरं तथा ।
अचेतनेषु चैतन्यं चेतनेषु विचेतनाम् ॥ १५० ॥

रूपदर्शनमन्धस्य मूकस्य मधुरां गिरम् ।
श्रवणं बधिरस्यापि पङ्गोर्गमनमद्भुतम् ॥ १५१ ॥

प्रदर्शनं विमानानां भुवि सूर्येन्दुमण्डलम् ।
शिलावर्षं महाघोरं[1] राहुग्रासमपर्वणि ॥ १५२ ॥

एकस्थानप्रविष्टानि भुवनानि चतुर्दश ।
आसनस्थस्य पतनं तुमुलं च परस्परम् ॥ १५३ ॥

प्रतीपगमनं सिन्धोरासनं हव्यवाहने ।
[2]तत्क्षणे विप्ररूढानां वृक्षाणां पल्लवं फलम् ॥ १५४ ॥

सेचनं हव्यवाहेन ज्वलनं पयसा तथा ।
मध्याह्नसमये ज्योत्स्ना दिङ्मोहं वातसंभ्रमम् ॥ १५५ ॥

---

1. महासारं M_1 2. तत्क्षणेऽपि प्ररूढानां T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चित्तादि धातुसंक्षोभं प्रत्यक्षस्याप्यदर्शनम् ।
शैलशृङ्गाद्यपतनात् [1]गगनस्य प्रदर्शनम् ॥ १५६ ॥

इत्थम्भूतानि चित्राणि कुर्यान्मायानुभावितः ।
इदानीं सप्तयक्षीणां मन्त्राणि कथयामि ते ॥ १५७ ॥

आगच्छ सुन्दरी स्वाहावसानं प्रणवादिमम् ।
इत्येष सुन्दरीमन्त्रो मन्त्रादेः कार्यमाचरेत् ॥ १५८ ॥

प्रणवं प्रथमं सर्वं मनोहरि नमो ठठ ।
इत्थं मनोहारी मन्त्रः प्रियादिष्टं प्रयच्छति ॥ १५९ ॥

उद्गीथं कनकं ब्रह्मन् वक्ष्यते मैथुनप्रिया ।
ठठः कनकवत्सास्यान्मन्त्रः कामुकसिद्धिदः ॥ १६० ॥

मामागश्च चतुर्वक्र कामेश्वरि ठठान्तिमम् ।
इति कामेश्वरीमन्त्रः सर्वां सिद्धिं प्रयच्छति ॥ १६१ ॥

आरुह्य शयनं नक्तमेकाकी पुष्पगन्धवान् ।
ध्यायेत्कामेश्वरीं यक्षीं सा तस्य भवति प्रिया ॥ १६२ ॥

यदन्यां कामयेन्मन्त्री सा तस्य वशमाचरेत् ।
स्वाहान्तः कथितो मन्त्रो ब्रह्मोत्पाते रतिप्रिये ॥ १६३ ॥

प्रीता रतिप्रिया यक्षी साधकस्य प्रयच्छति ।
दिव्यान्योदन वासांसि कुसुमाद्यनुलेपनम् ॥ १६४ ॥

पादुकाञ्जन खड्गादीन् भूषणानि रसायनम् ।
ओं पद्मिनी ठठो मन्त्रं पद्मिनी यस्य देवता ॥ १६५ ॥

---

1. गव्य सस्य T, P_1, P_2

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ओं श्रीं ह्रीं द्वयमागच्छ द्वयं यक्षि ठठान्तिमम् ।
प्रणवद्वितयं पुष्टिबीजं पश्चान्नतिस्तथा ॥ १६६ ॥

वातादि देवौ दक्षाद्यं बन्धुं विघ्नेशमारुतौ ।
वीरसेनमथो शुक्रं कुम्भं वह्निं [1]सुभद्रकम् ॥ १६७ ॥

हृषीकेशं जयं कुम्भं श्रीध्रुवौ कमलासन ।
पञ्चबिन्दुं ठठान्तं च [2]यामिनीमन्त्रमुद्धरेत् ॥ १६८ ॥

एतज्जपेन पुरुषो विभवं लभते परम् ।
द्वन्द्वानि पुंसां स्त्रीणां च रहितान्यपि योजयेत् ॥ १६९ ॥

यद्यद्वस्तु तथान्येषां स्त्रियो वा पुरुषोऽपिवा ।
ताम्बूलं कुसुमं चापि दत्त्वान्वहमुपासयेत् ॥ १७० ॥

यस्यैते मनवस्सप्त सिद्धाः पुंपश्चतुर्मुख ।
यक्ष्यस्तस्य भविष्यन्ति किं कार्यमिति देवताः ॥ १७१ ॥

मेरुमन्दरविन्ध्यादि शिखरेषु यथातथम् ।
साधकं रमयिष्यन्ति कल्पं भोगैरमानुषैः ॥ १७२ ॥

ब्रह्मन् पिशाचमन्त्राणि शृणुष्व गदतो मम ।
सप्ताक्षराणि सप्तार्कं गोपनाः कुम्भविक्रमौ ॥ १७३ ॥

क्रोधप्रचण्डौ वरुणमृगेशौ विपुलस्तथा ।
द्विकुण्ड सप्तमी स्वाहा मनुरेष प्रकीर्तितः ॥ १७४ ॥

बध्नीयादमुना ब्रह्मन्नाविष्टस्य शिखां पुनः ।
सप्ताक्षरं पुरस्कृत्य चतुर्थी विष्णुनस्तकम् ॥ १७५ ॥

---

1. च पश्चिमम् T, P_1, P_2 2. कामिनी M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गुरुर्बन्धुः पिता कामो मन्दरं विक्रमं तथा ।
पुलहं विक्रमं पश्चाद्धलायुध गुहालयौ ॥ १७६ ॥

वैराजपापहननौ विजयं बन्धुमस्तकम् ।
हुताशगोपनौ ब्रह्मन् ककुभं ब्रह्मसूदनौ ॥ १७७ ॥

पवित्र शङ्खौ विजयं मायां स्वाहावसानकम् ।
इति मन्त्रं प्रकल्प्याथ बलिमेतेन दापयेत् ॥ १७८ ॥

पूर्वमन्त्रदशार्णानि महेन्द्रो शममस्तकः ।
पवित्रपवनौ पीतगोपनौ पश्चिमाननौ ॥ १७९ ॥

वह्नयन्त सूदनौ विघ्नगोपनौ पवनं तथा ।
गदी हुतवहः सूर्यो वनमाली पितामहः ॥ १८० ॥

मानं शब्दं शिरः स्वाहा गन्धमन्त्रप्रकल्पितम् ।
द्वादशार्णमुखं [1]पूर्वं वह्निं सुमुखविक्रमौ ॥ १८१ ॥

माहेन्द्रविक्रमौ भानुर्दक्षं विजययोर्द्वयम् ।
द्विर्वारिशब्दं कमलं देवदत्तं विनायकम् ॥ १८२ ॥

स्वाहान्तमीरयेन्मन्त्रं तमाद्वेषे नियोजयेत् ।
स्तम्भे वा पुरुषे वापि पयस्तेनाभिमन्त्रितम् ॥ १८३ ॥

विक्षिपेदथ भूतानि स्तम्भमध्याविशन्ति तम् ।
अष्टाक्षरमुखस्सूर्यो वह्निर्द्विः कमलासन ॥ १८४ ॥

व्यस्तौ पुनस्तयोर्वह्नावुभयत्र त्रिविक्रमौ ।
आदित्यरामं नासिक्यं घटनं पावकप्रिया ॥ १८५ ॥

---

1. पुण्यं M_1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येन साग्रहमन्त्रस्य पिशाचादि भयावहम् ।
भूतप्रतिकृतिं कृत्वा शालिपिष्टैर्महोदरीम् ॥ १८६ ॥

भित्वऽतितीक्ष्णेन शस्त्रेण भूतं साक्षाद्भविष्यति ।
भूतग्रहपिशाचादीनपस्मारमथापि वा ॥ १८७ ॥

कूष्माण्डयक्षगन्धर्वब्रह्मरक्षस्सुरासुरान् ।
आवेशयेद्धरेद्वापि मन्त्रैरेतैश्चतुर्मुख ॥ १८८ ॥

यद्यदेभिरशक्यं स्यात्तत्तत्कुर्याद्विचक्षणः ।
[1]सौदर्शनस्य मन्त्रेण नारसिंहेन वा पुनः ॥ १८९ ॥

त्रैलोक्यमोहनेनापि साक्षादष्टाक्षरेण वा ।
